3. Ānandānubhava's commentary on Śriharṣa's Khaṇḍanakhaṇḍakhādya contains a revised version of Udayana's definition of *Upādhi* which Gaṅgeśa refutes.

From these evidences, it is clear that Gaṅgeśa could not have lived before the first quarter of the 14th century A.D.

The Tattvacintāmaṇi is divided into four parts, each part being devoted to the treatment of one *pramāṇa* exclusively :

The topics that are dealt within the first chapter called Pratyakṣa Khaṇḍa, are 1. Maṅgalavāda, 2. Prāmāṇyavāda, 3. Pramālakṣaṇavāda, 4.Khyātivāda, 5. Pratyakṣalakṣaṇavāda, 6. Anupalabdhivāda, 7. Abhāvavāda, 8. Vāyupratyakṣavāda, 9. Suvarṇataijasatvavāda, 10.Mano'ṇutvavāda, 11. Anuvyavasāyavāda and 12.Viśeṣaṇopalakṣaṇavāda.

The following topics are dealt with under Anumānakhaṇḍa :- 1.Anumitiprakaraṇa, 2. Pūrvapakṣavyāpti, 3. Siddhāntavyāpti, 4.Sāmānyābhāva, 5. Viśeṣavyāpti, 6. Vyāptigrahopāya, 7. Tarka, 8.Sāmānyalakṣaṇa, 9. Upādhi, 10. Pakṣatā, 11. Parāmarśa, 12.Liṅgakāraṇatā, 13. Kevalānvayiprakaraṇa, 14.Kevalavyatirekiprakaraṇa, 15. Arthāpatti, 16. Avayava, 17. Hetvābhāsa, 18. Īśvaravāda, 19. S ktivāda, and 20. Muktivāda.

The Upamānakhaṇḍa is the smallest and contains no section.

The Śabdakhaṇḍa contains the treatment of the following matters:- 1. Śabdaprāmāṇya, 2. Śābdabodhasahakārikāraṇa, 3. Vedanityatvāpauruṣeyatāprakaraṇa, 4. Vidhivāda, 5. Apūrvavāda, 6. Śaktivāda, 7. Sāmānyavāda and 8. Ākhyāta, Dhātu, Upasargavāda.

The selection of topics under the three Khaṇḍa-s, leaving Upamāna is carefully made and arranged judiciously. The arrangement of the topics in the sequential order shows a mastery unparalleled in the whole Nyāya-Vaiśeṣika literature. It is true that Vācaspatimiśra and Udayana were great for the rich contribution they made for stabilising the system. Yet, they had to deal with too many topics which were unmanageable to be covered in a single work. They succeeded in their attempt. It is their encounter with the Buddhists on one side and the Mīmāṃsaka-s on the other that did not allow them rather to pay more attention for a restudy of the topics or revise them. It is in this light, one has to judge Gaṅgeśa's contribution.

Maṅgalavāda got treated in the Kiraṇāvali. Prāmāṇyavāda in the Vārttika, Tīkā and Pariśuddhi and especially in the Nyāyakusumāñjali. These

two get a more detailed treatment in the Tattvacintāmaṇi. Khyātivāda dia not get independent treatment in the works of earlier writers.

Original contribution made by Gaṅgeśa is in the Anumānakhaṇḍa and there too in the treatment of Vyāpti. The definitions framed by his predecessors were fully availed of by him. He does not associate any of these definitions with the names of any of his predecessors. He had a deep insight into the nature and purpose of Vyāpti. Hence he refuted most of these definitions and offered his own definition. The subject of God is taken up immediately after inference to indicate that the inferential method of proving God's existence would be more fruitful.

In its general sense, Nyāya means investigation of what is available, especially objectively using the *pramāṇa*-s. The method of inference for one's self will serve the purpose but what is known and experienced is to be demonstrated to be of a particular nature. Nyāya in its special sense of[63] syllogistic reasoning is to be employed while agreeing or disagreeing with others who hold conflicting views. Nyāya alone shall have scope to confirm one's position. So far is the scope of Nyāya.

To employ Nyāya, expressions are necessary. They have to be used with accuracy. This is to be done by knowing the uses of words and also to convey verbal judgements which would not be questioned. This matter can not be taken up under inference. Therefore the Nyāya system admits a seperate *pramāṇa* called 'verbal testimony'. The treatment under this head serves three main purposes. One is that verbal judgement is quite essential for transactions with others. It is to be made perfect with all its attendent factors. The grammatical aspects therefore get an important place. The second purpose to define the scope of the use of words and sentences so as to lay stress their significant import. The third purpose is to maintain validity of the Veda-s.

A close scruting into the topics dealt with in the Tattvacintāmaṇi shows how invaluable is the study of these. It is no wonder then that after

Gaṅgeśa, the works an Prācīnanyāya lost their place in the field of study. It is only Udayana whose name came to be remembered.

When all is said about Gaṅgeśa, it must be remarked that he was not the pioneer in one respect and that is in dividing the treatise on Nyāya under four heads one for each *pramāṇa*. It was Bhāsarvajña who lived about the middle of the 10th century that wrote his Nyāyasāra during his work into three sections called *Pariccheda*-s. They are called by the names Pratyakṣapariccheda, Anumānapariccheda and Āgamapariccheda. All the topics of the Nyāya and Vaiśeṣika systems are brought within these three sections of the text and its commentary Nyāyabhūṣaṇa. The treatment follows the order in which the categories are enumerated in the first sūtra of Gautama. There is some difference in the methods of treatment adopted by Bhāsārvajña and Gaṅgeśa. The former gives an elaborate treatment to the theories of error, leading to the admission of Anyathākhyāti, while Gaṅgeśa settles the features of Anyathākhyāti on a social basis. As one belonging to the early school, Bhāsarvajña gives importance to the topics discussing matters like reality and unreality of the world. In the sequal, he had to be hard with the Buddhists. Not only does Prāmāṇyavāda get a well-merited treatment in the hands of Bhāsarvajña but the topics like *vāda, jalpa, jāti* and others are given an elaborate treatment. Gaṅgeśa does give a full and deep study of validity of *pramāṇa* and finding no use for the matters connected with the art of debate, he gave up them altogether. Bhāsarvajña treats the subject of God under Āgama, as he believes as the ancient thinkers did that both inference and āgama should be pressed into service while dealing with God's existence.

Gaṅgeśa became the uncrowned leader of the Navyanyāya through his work Tattvacintāmaṇi but it was not a smooth sailing for him at the period when he won the unique reputation of logician par excellence. Jīvanātha and Bhavanātha were reputed logicians when Gaṅgeśa became famous as a logician. These two were brothers. Śaṃkaramiśra, the author of the Upaskāra on the Vaiśeṣikasūtra, was the son of the latter Jīvanātha's views

is cited by Śaṃkaramiśra in his Vādivinoda (P-61) which refute Gaṅgeśa's definitions of Savyabhicāra. Further, he refers to Gaṅgeśa's definition of Pakṣa in a slighting manner using the words *iti kecit*,[64] though he wrote a commentary on the Tattvacintāmaṇi. Another writer who was critical about Gaṅgeśa's treatment was Vaṭeśvara Upādhyāya (1350-1375 A.D.). A third writer was called Nyāyalocanakāra, the author of a work Nyāyalocana. He criticised Gaṅgeśa's treatment of one definition of Vyāpti in his Vyāptipañcaka[65].

The commentaries on the Tattvacintāmaṇi and sub-commentaries are too numerous. The writers who flourished after 1400 A.D. took delight to comment on the Tattvacintāmaṇi and also on the Āloka of Jayadeva, who wrote this Āloka on the Tattvacintāmaṇi. Most of these writers commented also on the works of Udayana and Śrīvallabha. Besides, they were the authors of independent works on Nyāya.

Among the prominent writers who commented upon the Tattvacintāmaṇi, mention could be made of Tvantopādhyāya (1375-1400 A.D.), whose commentary is known as Maṇiṭīkā. Śaṃkaramiśra who lived in the first half of the 15th century wrote the Maṇimayūkha. His work Bhedaprakāśa refutes the Advaita theory of Vedānta, Vādivinoda deals with the art of debate. Upaskāra is a commentary on the Vaiśeṣikasūtra-s. Udayana's Ātmatattvaviveka and Śrīvallabha's Nyāyalīlāvati have his commentaries. Kaṇādarahasya is a Vaiśeṣika manual.

Vācaspati Miśra II (C.1440 A.D.) commented on the Tattvacintāmaṇi in the Cintāmaṇiprakāśa. In the Khaṇḍanoddhāra, he offers a vigorous refutation of Śrīharṣa's Khaṇḍanakhaṇḍakhādya. Among his other works, mention must be made of the Nyāyasūtroddhāra determining the number of Nyāyasutra-s in their sequential order.

Yajñapati Upādhyāya (C.1450 A.D.), is well-known as Upādhyāya. He is the author of the Prabhā, a commentary on the Tattvacintāmaṇi. Jayadeva (C.1465) was a pupil of Harmiśra and Yajñapati. His commentary on the Tattvacintāmaṇi is known as Āloka. He commented on the works of

Udayana and Śrīvallabha. He is said to have written an independent work called Pramāṇapallava. He was given the name Pakṣadhara, as he could take up an issue to whichever disputant it is related. He criticised the interpretations of his preceptor Yajñapati. Pragalbhācārya (C.1450 A.D.), commented on the Tattvacintāmaṇi.

Madhusūdana Ṭhakkura (C.1520 A.D.) wrote the Kaṇṭakoddhāra which exposes the weakness of those who pointed defects in the Tattvacintāmaṇi and Āloka of Jayadeva. Gokulanātha Upādhyāya (C.1640 A.D.) wrote the Cakraraśmi, the commentary on the Tattvacintāmaṇi. Besides, his Padavākyaratnākara deals with the words and their place in sentences.

Mithilā was the stronghold of Nyāya, particularly of the later period. By this time, Navadvīpa in Bengal became the seat of Navyanyāya. Maheśvara-viśāradā was a leading logician in Bengal about the period of yajñapati. His views are noted by Jayadeva and Narahari. The latter's son Vāsudevasārva-bhauma (C.1430 -1540), is held to have been his father's pupil at first and later of Yajñapati. His commentary on the Tattvacintāmaṇi is known as Sārāvali. It is the best commentary on the Tattvacintāmaṇi in which he makes use of the writings of his predecessors. The Anumāna section alone is now available.

Raghunātha Śiromaṇi was the pupil of Vāsudevasārvabhauma. His Dīdhiti is a valuable commentary on the Tattvacintāmaṇi. He makes frequent references to Upādhyāya (Yajñapati), Miśra (Jayadeva) and Sārvabhauma (Vāsudevasārvabhauma). His other work is Padārthatattvanirūpaṇa which contains a rewriting of the Vaiśeṣiika categories. For instance, space, time and *ākāśa* are identical with God. Treatment of many other aspects of the Vaiśeṣika ontology and metaphysics has done great credit to Raghunātha's original thinking.

Haridāsanyāyālaṅkāra (1550 A.D.) commented on the Tattvacintāmaṇi and on the Kārikā-s of the Nyāyakusumāñjali.

Raghunātha's influence is felt in the commentaries on the Tattvacintāmaṇi, Maṇimarīci by Jānakīnāthabhaṭṭācārya, and Vyākhyā by Kaṇāda Tarkavāgīśa.

The commentaries on the Dīdhiti were written by Bhavānanda Siddhāntavāgīśa (1520-1580 A.D.) in the Dīdhitiprakāśa, kṛṣṇadāsasārvabhauma (1500-1560) in the Dīdhitiprasāriṇī, Jagadīśa-tarkālaṃkāra in the commentary known as Mayukhā, Mathurānātha (1540-1600 A.D.) in the Siddhāntarahasya and Gadādharabhaṭṭācārya (1610-1710 A.D.) in the Dīdhitivyākhyā.

Jagadīśa's Śabdaśaktiprakāśikā is a monumental work on semantics. Gadādhara's Vyutpattivāda on verbal judgement is hailed not only by the writers on Nyāya as invaluable for the various aspects of the study of this topic but also by the grammarians for the wealth of information and treatment of usages.

An epitome of the contents of the Tattvacintāmaṇi is contained in the Nyāyakaustubha of Mahādeva, Maṇisāra of Gopīnātha and Maṇidarpaṇa of Rājacūḍāmanidīkṣita.

Manuals and small treatises on the topics of the Nyāya-Vaiśeṣika systems were written. Among them, the Tarkakaumudi was written by Laugākṣi Bhāskara. Tarkāmṛta of Jagadiśatarkālaṃkāra, Tarkasaṅgraha of Annambhaṭṭa (C.1650 A.D). Nyāyasiddhāntamālā by Jayarāmabhaṭṭācārya, Bhaṣāpariccheda and Siddhāṇtamuktāvali of Viśvanāthanyāya pañcānana (C.1650 A.D.) and Nyāyasiddhāntamañjari of Jānakīnāthabhaṭṭācārya. Annambhaṭṭa's Tarkasaṃgraha has more than 3.5 commentaries including his own Tarkasaṃgrahadīpikā. Annambhaṭṭa wrote also Siddhāñjana on Pakṣadharamiśra's Āloka, Nyāyapariśiṣṭaprakāśa on Udayana's Nyāyapariśiṣṭa. Rāṇakojjīvinī, commentary on Bhaṭṭasomeśwara's Nyāyasudhā, Mitākṣarā on the Brahmasūtra-s Uddyota's commentary on Mahābhāṣyapradīpa of Nāgeśa and Svaraviveka.

After this brief survey of some of the important works in the fields of Nyāya and Vaiśeṣika, a brief account is necessary on Rucidatta and

Dharmarājādhvarīndra, the commentator and sub-commentator respectively on the Tattvacintāmaṇi, the Anumānakhaṇḍa of which is published recently.

Rucidatta who lived about 1450 A.D. was one among the disciples of Jayadeva whose other pupils were (1) Narahari, son of Yajñapati Upadhyāya, preceptor of Jayadeva, (2) Mādhava his own son, Vāsudeva, his nephew, (3) Śucikara Upādhyāya and Bhagīratha. Rucidatta was the son of Devadatta and Reṇukā. His works are :- 1. Tattvacintāmaṇiprakāśa, (printed in this volume), 2.Makaranda, a commentary on Vardhamāna's Nyāyakusumāñjaliprakāśa 3. Vivṛti a commentary on Vardhamāna's Dravyakiraṇāvalīprakāśa, 4. Commentary on the Tarkabhāṣaprakāśa of Vardhamāna on the Tarkabhāṣā of Keśavamiśra 5. Makaranda on Udayana's Nyāyakusumāñjali.

Authorship of the Makaranda is not clear. Rucidatta writes at the beginning of the Makaranda published in the Kusumāñjali (edition of the Chowkhamba press with Vardhamāna's Prakāśa).

कुसुमाञ्जलिमकरन्दः श्रीरुचिदत्तेन भण्यते/कृतिना ।
स्तबकोपमर्दभाजां बुधमधुपानां विनोदाय ॥

Rucidatta is the commentator on the Nyāyakusumāñjali. The colophon at the end of Makaranda on Stabaka II seems thus : इति महामहोपाध्यायदेवदत्तात्मज महामहोपाध्यायरुचिदत्तविरचिते कुसुमाञ्जलिप्रकाशव्याख्याने मकरन्दे द्वितीयः स्तबकः । Makaranda is, according to this colophon, on Vardhamāna's Prakāśa on the Nyāyakusumāñjali. This is the case also with the Makaranda according to the colophon for Ch.V. Makaranda is the commentary according to the colophons for Ch.I, II & IV. The commentary Makaranda is only on Vardhamāna's Prakāśa. This is attested by the references to the passages in Vardhamāna's Prakāśa in the Makaranda.

Rucidatta mentions in the Tattvacintāmaṇi Prakāśa on Anumānakhaṇḍa the Prabhāṭīkā of Yajñapati on the Tattvacintāmaṇi, Ratnakośakāra, Līlāvatīkāra, Śrīvallabha and Śaśadhara. Parimala is

mentioned as the work of Jagadguru. It is a commentary on the Nyāyakusumāñjali. Many of the passages in the Anumānaprakāśa are identified by the author of the commentary Tarkacūḍāmaṇi as taken from or reffering to the Prabhā of Yajñapati, Āloka of Jayadeva, Pragalbhācārya, Maṇikanṭha, Vāsudevasārvabhauma and others.

The Tarkacūḍāmaṇi is the commentary on Rucidatta's Prakāśa by Dharmarājādhvarīndra, the author of the Vedāntaparibhāṣā, the well-known Advaita text. He lived about the beginning of the 18th century A.D.

The Tarkacūḍāmaṇi is available for the Anumāna, Upamāna, and Śabdakhaṇḍa-s of Rucidatta's Tattvacintāmaṇiprakāśa. The commentary on the Pratyakṣakhaṇḍa is lost. He writes at the beginning of the Vedāntaparibhāṣā. He was a native of a village Kandramānikyam in the Thanjavur district of Tamil Nadu. The following passage which occurs thus:-

दशानामपि टीकानां भङ्गं कुर्वन् क्वचित्क्वचित् ।
अनुमानप्रकाशस्य विवृतं करवाण्यहम् ॥

What these ten commentaries are is not known. Though it is not possible to name them from out of the writers known to have commented upon the Tattvacintāmaṇi, some well-known names could be mentioned. Vardhamāna, Tvantopādhyāya, Vidyānivāsabhaṭṭācārya, Yajñapatiupādhyāya, Jayadevamiśra, Rucidattamiśra, Śaṃkaramiśra, Vācaspati II, Vāsudevasārvabhauma, and Mathurānātha Tarkavāgīśa.

The wealth of citations in his Tarkacūḍāmaṇi and identification of the authors whose views Rucidatta explained with approval or rejected them speaks the worth of Dharmarājādhvarīndra as a commentator. His commentary is not voluminous but is confined to the explanation that is needed to make significant the interpretations offered by Rucidatta for the passages in the Tattvacintāmaṇi.

The extensive writings of Gaṅgeśa in the Pratyakṣakhaṇḍa, Anumānakhaṇḍa and Śabdakhaṇḍa speak volumes of original thinking which he displays in them. Yet, the section on inference is remarkably splendid.

The Anumānakhaṇḍa opens with the treatment of the nature of inferential cognition. Rucidatta refers to the views of many previous writers. He condemns the views of Yajñapatiupādhyāya and also his pupil and his own teacher Jayadeva.

Invariable concomitance (*vyāpti*) is the important and indispensable factor for the rise of the inferential cognition. The definitions of *vyāpti*, which were offered by his predecessors, are reproduced by Gaṅgeśa and rejected as they do not apply to the inference of the exclusively affirmative kind. These definitions are five in number and hence, these are called by the group name Pañcalakṣaṇī.

Two definitions of *vyāpti* called by the name Siṃhavyāghrī are stated and rejected by Gaṅgeśa. Dr.S.C. Vidyābhūṣaṇa takes the names Siṃha and Vyāghra to have been given to Ānandasūri and Amaracandrasūri, two jain writers.

Sundaḍa or Sondala (C.1300) offered his own concept of negation as that 'whose counterpositive is determined by an essence pertaining to a different substratum' (व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः)[66] ।This is rejected by Gaṅgeśa. Yajñapati, Jayadeva, Rucidatta and Vāsudevasārvabhauma have recorded in their works the arguments both for and against this concept. The entire position is lucidly treated by Rucidatta[67] who cites the views of Upādhyāya who was Yajñapati, Pragalbhācārya, and Jayadevamiśra.

Apart from these two definitions, Gaṅgeśa states twelve definitions as put forward by the opponents. In the listing of these Gaṅgeśa owes much to Śaśadhara's Nyāyasiddhāntadīpa and Maṇikanṭha's Nyāyaratna which contain seventeen and eleven definitions respectively. Six definitions offered by Maṇikaṇṭha are included among the twelve definitions noticed by Gaṅgeśa. Those which are 1st, 3rd, 4th, 9th, 10th and 11th in Maṇikaṇṭha's work correspond to 11th, 10th, 9th, 6th, 5th and 2nd in Gaṅgeśa's work. Eight definitions that are offered by Śaśadhara, which are 1st, 2nd, 4th, 5th, 9th, 11th, 14th and 16th, correspond to 5th, 9th, 6th, 7th, 10th, 3rd

and 2nd in Gaṅgeśa's work. The ninth definition of Gaṅgeśa is स्वाभाविकः सम्बन्धः । This was held by Trilocana[68], teacher of Vācaspatimiśra. The tenth definition अविनाभावसंबन्धो व्याप्तिः was held by Jayantabhaṭṭa[69] and Bhāsarvajña.[70]. The fifth definition अनौपाधिकः सम्बन्धः was held by Udayana[71] and Keśavamiśra[72]. The same definition was held by Vādivāgiśvara[73] as निरुपाधिकसम्बन्ध and as अनुपाधित्व [74] by Śrīvallabha.

The eminent writers on Nyāya and Vaiśeṣika who preceeded Gaṅgeśa and whose definitions of Vyāpti are noted above were held in great respect by all their contemporary writers, except Udayana who was held in high esteem even in the post-Gaṅgeśa period. Yet, Gaṅgeśa included their definitions in his Pūrvapakṣa. This does not be little their work at the hands of Gaṅgeśa, but Gaṅgeśa found that they were no longer valid in the light of criticisms levelled against their concepts by the Buddhists. They were thus not found acceptable.

As many of the works on Nyāya written in the pre-Gaṅgeśa period are lost, it is not possible to trace the first, fourth, seventh and twelfth definitions to any sources. In support of the condition (*upādhi*) playing its role in the inference which is affected by it, four arguments are noted by Gaṅgeśa, each beginning with the words *ata eva*. Rucidatta observes that these four are put forward to explain the view of Prabhākara. This Prabhākara is not the Mīmāṃsaka writer but a Nyāya writer called Prābhākaraupādhyāya who lived about 1250 A.D.[75]

While framing the definitions of invariable concomitance, the Nyāya school makes use of negation (abhāva) to be precise thus avoiding defects like inapplicability (avyāpti) and others. Negation could be of many kinds. The general kind (*Sāmānyābhāva*) gets separate treatment in the Tattvacintāmaṇi. This must be different from specific negation (*viśeṣābhāva*). For instance, air has no colour, dark or red. When it does not have any colour, how does the question arise "Is there colour in air ?". The doubt has no rooms, for totality of absences of all colours is not identical with the absence of colour. There is thus a distinction between the former which

represents *viśeṣābhāva* and the later which is *sāmānyābhāva*. Again in the proposition, the hill has fire because there is smoke, the fire in the hill is different from the fire in the kitchen. The two can not be combined to illustrate *vyāpti* and so fire in its generic sense must be admitted as distinct from fires of specific kinds existing in different loci like hill, kitchen etc.

Like Maṇikaṇṭha[76], Gaṅgeśa does not insist on the indispensible need to adopt repeated observations of invariable concomitance so as to avoid inconstancy.

In the context of arriving at invariable concomitance, the Nyāya school admits a relation called super-normal sense-object contact (*sāmānyalakṣanāpratyāsatti*) to cover all cases of the past, present and future so as to make use of the knowledge of this contact in particular cases. Maṇikaṇṭha does not admit this[77], but Gaṅgeśa argues in favour of its admission.

Reasoning (*tarka*) is adopted in order to eliminate doubt about the unconditional invariability of concomitance. This does not require another reasoning which in turn on another, for this would lead to infinite regress. This should be solved by noting the rise of self-contradiction (*vyāghāta*) which sets the limit for doubt. Self-contradiction is treated by Maṇikaṇṭha, as a type of reasoning.[78] This goes against the Nyāya tradition that reasoning is needed only in cases of doubt and if doubt does not arise due to contradiction, then reasoning will have no scope.

A question is raised as to the type of the knowledge of concomitance that would give rise to the inferential cognition. There are two positions here. One makes such a knowledge have mutual non-existence as the basis and the other treats total non-existence as the basis. This is with reference to invariable concomitance or the nature of probans where the negative element plays a prominent role. For instance, the probans must be the counter-positive of that kind of non-existence which does not exist in the same locus with its counter-positive. In the opinion of Gaṅgeśa, mutual non-existence alone is to be meant here. This is rejected by Rucidatta who

accepts total non-existence only. Jayadeva upholds the view of Gaṅgeśa and argues that both the kinds of non-existence could be admitted. Rucidatta's condemnation of this view is rejected by Dharmarājādhvarīndra. It is hard to prefer the view of Rucidatta to that of Dharmarājādhvarīndra. Yet, the arguments of both are worth appreciation.[79]

The probans in an inferential proposition may be affected by a condition (*upādhi*) which would prevent the rise of the inferential congniton. Gaṅgeśa takes up the treatment of this and notes seven definitions which are treated as representing the prima facie view and rejecting them, offers his own definition. Maṇikaṇṭha offers eight definitions. The definitions 2,3,5 and 8 of Maṇikaṇṭha agree with those 2,5,6 and 7 of Gaṅgeśa. The second definition is that of Udayana.[80] The fifth definition of Maṇikaṇṭha, which is identical with the seventh definition of Gaṅgeśa is that of Taraṇimiśra, author of the Ratnakośa.

The first definition of both Maṇikaṇṭha and Gaṅgeśa is given as an alternative definition by Vādivāgīśvara.[81] Gaṅgeśa uses the words *sādhyatvābhimata* and *sādhanatvābhimata*. Maṇikaṇṭha notes four more definitions of which the second is given by Udayana in his Ātmatattvaviveka.[82] This is in a way the same as the third definition of Gaṅgeśa. According to Maṇikaṇṭha, the writers of the later period (*navīnāḥ*) offer a definition which corresponds to the fourth definition of Gaṅgeśa. Maṇikaṇṭha's fourth definition is identified by his commentator as that of Śrīvallabha. This does not seem to be different from the first definition which may also be that of Vādivāgīśvara.

Gaṅgeśa rejects all the seven definitions and offers his own definition. He cites Maṇikaṇṭha's definition of *upādhi* and does not reject it. Rucidatta defines *upādhi* in his own way by taking the word *sādhanāvyāpakatva* of Gaṅgeśa's definitions as not pervading the probans which strays from the probandum. Dharmarājādhvarīndra defines *upādhi* as existing in the locus with the probandum, while being the counter positive being not pervaded to infer the non-pervadedness of the probandum where

the proban is placed. Rucidatta refutes many explanations offered by Yajñapati Upādhyāya.[83]

Gaṅgeśa notes three definitions for Pakṣatā and rejects them. His definition is :- pakṣatā is that which has the absence of causal factors of perception together with the absence of desire to infer. His followers Yajñapati Upādhyāya, Jayadevamiśra, Vāsudevasārvabhauma, Raghunāthaśiromaṇi and Jagadīśa developed his definition so as to explain the few moments that follow the desire and inference. This aspect is discussed by the commentators on pp.344-345. Rucidatta avoids the explanation that is offered to *siṣādhayiṣā* and concludes that the word means only the desire regarding the inferential cognition.

The synthetic judgement (*parāmarśa*) is a complex cognition in which the knowledge of the *pakṣadharmatā* is qualified by invariable concomitance. The view that the knowledge of the pervader is the cause for the inferential cognition is rejected by Gaṅgeśa and Rucidatta. After much discussion, the author of the Tarkacūḍāmaṇi admits this view.

After proving the place for the mark (*liṅga*) in inference, Gaṅgeśa shows that the *liṅga* is not the efficient cause (*karaṇa*). It is the synthetic judgement of the *liṅga* that plays the role of the efficient cause for the rise of the inferential cognition. *Liṅga* is treated under the two kinds, exclusively positive (*Kevalānvayin*) and exclusively negative (*Kevalavyatirekin*). The latter gets a detailed treatment by Gaṅgeśa so as to prove that presumption (*arthāpatti*) is not different from *kevalavyatirekyanumāna* and as such is not an independent *pramāṇa*. Credit goes to Gaṅgeśa for bringing Arthā patti under inference.

Gaṅgeśa takes up the subject of Avayava, member of syllogistic reasoning and treats the five members forming part of it. Inference must make use of these five limbs while using it to prove a matter for others' sake. This is called the supreme Nyāya.[84] While the Nyāya and Vaiśeṣika systems admit five limbs for Nyāya, it is strange to note that Vādivāgīśvara,

a Vaiśeṣika writer, admits all the five and then observes that there is no need to admit all of them. If what is to be conveyed could be done with few limbs, then there is no need to bring in all of them. He holds that *udāharaṇa* and *upanaya* would serve the purpose.[85] He does not use the words *udāharaṇa* and *upanaya* or *nidarśana* and *anusandhāna*. Instead, he uses the word *aṅga* meaning *avayava*.[86]

Reality or the nature of the objects could be established through reasoning and this could be fruitful by the use of the *avayava*-s. While attempting the nature of a thing, objections may be raised or discussion or dispute would have occasions. To get over these, it is necessary to know what fallacious reasons would be like. Hence Gaṅgeśa treats the fallacious reasons. They are defined as having for their objects the correct knowledge which is the counter positive for itself which is the cause of inferential cognition. The fallacies are five in number with the names Savyabhicāra, Viruddha, Satpratipakṣa, Asiddha and Bādhạ.

The general definition of the fallacy of the probans is that it is a category (padārtha). All categories (or objects) become fallacious sometimes when they are inferred. The particular fallacies could be separately defined.[87]

Savyabhicāra is also called Anaikāntika. The word *vyabhicāra* starying from one to another, that is, inconstant. Savyabhicāra means inconstant.The word *ekāntika* means existing at one end or probandum decisively. Anaikāntika is not remaining constant with a particular probandum. This means that doubt is the basis for this fallacy.

Gaṅgeśa divides this into three kinds calling them by the names Sādhāraṇa, Asādhāraṇa and Anupasaṃhārin. There is no definition which could be exclusively applicable to all the three kinds.[88] Yet, the definition is so worded to apply to all the three kinds. The author adds the great sage classified the three kinds into one group on the strength of a form common to all the three. It is difficult to admit this, since sage Gautama did not mean

प्रकाशः

केचित्तु केवलान्वयिसाध्यकोऽनुपसंहारी सद्धेत्वसाधारणो विरुद्धसंकीर्णासाधारणश्च यन्मते न संग्राह्यः तन्मतेनेदं लक्षणम्। वृत्तिमत्त्वेन विशेषणान्नावृत्तावतिप्रसङ्गः इत्याहुः।

ननु 'विरुद्धोऽप्यनेन रूपेण साधारण एव' इति ग्रन्थकृताग्रेऽवधारणात् उक्तलक्षणानां तत्राव्याप्तिरिति चेत्—न। न हि विरुद्धोऽपि साधारणानैकान्तिक इति तदर्थः। किन्तु साधारणे यो [1]दूषकत्वोपाधिः स तत्राप्यस्तीति विरुद्धस्यापि [2]तद्वत्त्वेन ज्ञायमानस्यानुमितिप्रतिबन्धकत्वमिति। साधारणविभाजकोपाधिश्च सपक्षविपक्षगामित्वमिति न तस्य साधारणत्वं, किं तु [3]सर्वथा विरुद्धत्वमेव। कदाचिद्विरुद्धत्वप्रयोजकोपाधिमत्तया ज्ञातस्यानुमितिप्रतिबन्धकत्वम्. कदाचिच्च साधारणत्वप्रयोजकविपक्षगामित्ववत्तयेति। न च विपक्षगामित्वमेव साधारणविभाजकोपाधिः स्वीक्रियताम्। तथा चानेन रूपेण सोऽपि

तर्कचूडामणिः

नन्वेवं सद्धेत्वसाधारणस्यापि अलक्ष्यत्वे तत्रातिव्याप्तिः 'स्यादित्यत आह—तत संग्राह्यतेति। अत्यन्ताभावपदं प्रतियोगिव्यधिकरणाभावपरं बोध्यम्। व्यापकाभावेऽपि प्रतियोगिवैयधिकरण्यं देयम्।

केचित्त्विति। तथा च यथाश्रुतमेव लक्षणमिति भावः। वक्ष्यमाणविशेषलक्षणानां तत्रातिव्याप्तिप्रसङ्गेन तदसंग्रहपक्षोऽनुपपन्न इत्यस्वरसोऽत्र बोध्यः। ननु यथाश्रुतं गगनादावतिप्रसक्तमित्यत आह—वृत्तिमत्त्वेनेति।

ननु दूषकतोपाधिसत्त्वे साधारणत्वमेव तस्येत्यत आह—साधारणेति। नन्वेवं विरुद्धत्वाज्ञाने विपक्षगामित्वज्ञानेनानुमितिप्रतिबन्धः स्यात्, हेत्वाभासान्तरता च स्यादित्यत आह—कदाचिदिति। दूषकतोपाधिसांकर्यस्यादोषतया तत्रोभयसद्भावादिति भावः।

1 दूषणत्वोपाधि–क
2 तत्त्वेन–क
3 सर्वदा–ख
4 भवेदित्यत आह–ग

प्रकाशः

साधारण[1] एवान्तर्भवतीति वाच्यम् । [2]स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात् । अन्यथा साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोरप्येकत्वापत्तिः ।

वयं तु [3]एतल्लक्षणं सम्प्रदायमतेन । ग्रन्थकृन्मतेन [4]तु विरुद्धस्यापि संग्राह्यत्वे साध्यवन्मात्रवृत्तित्वनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वं त्रितयसाधारणं लक्षणमिति पश्यामः । न चैवं विरुद्धस्याप्यत्रैवान्तर्भावे विभागव्याघातः । उपधेयसंकरेऽप्युपाधेरसंकरात् । अन्यथा [5]तस्यासिद्ध्यन्तर्भूतत्वेनोक्तदोषापत्तिः ।

तर्कचूडामणिः

ननु विभाजकोपाधिर्नाम तावत्संग्राहकं लक्षणम् । तथा च विपक्षगामित्वरूपसाधारण-लक्षणलक्षितस्यानैकान्तिकसामान्यलक्षणलक्षितत्वमवश्यं वाच्यम् । अन्यथा विशेषलक्षणानां तत्रातिव्याप्तेरित्यस्वरसादाह—वयं त्विति। सं प्रदायेति। तन्मते विरुद्धस्य साधारणत्वाभावादिति भावः । प्रथमलक्षणमपि तन्मतेनैवेति ध्येयम् । उपधेयेति । विरुद्धत्वसाधारणत्वरूपोपाधिमत एकत्वेऽपि तयोरैक्याभावादित्यर्थः । अन्यथेति। उपधेयैक्यस्य दोषत्वे विरुद्धस्य व्याप्यत्वा-सिद्धतया विभागव्याघातापत्तिः इत्यर्थः ।

अत्रेदं चिन्त्यम् । असाधारणत्वज्ञानेऽपि शब्दत्वादिना साध्यवन्मात्रवृत्तित्वज्ञानसम्भवेन तस्य तन्निश्चयविरोधित्वाभावात् असाधारणाव्याप्तिः । न चैवं सपक्षव्यावृत्तत्वस्य हेत्वाभासत्वोपा-धित्वं न स्यात्, तज्ज्ञानेऽप्यनुमित्यप्रतिबन्धादिति वाच्यम् । तस्य तदनुपाधिताया वक्ष्यमाणत्वेन इष्टापत्तेः । साध्यतदभावनिरूपितव्यतिरेकव्याप्तिद्वयसहितपक्षधर्मता[6]ज्ञानस्यैव तद्विरोधितया तद्विष-यस्यैव तदुपाधित्वात् । न चैवं तादृशोपाधिमादायैव तत्र लक्षणगमनं स्यादिति वाच्यम् । तज्ज्ञानेऽपि शब्दात् साध्यवन्मात्रवृत्तित्वज्ञानसम्भवेन [7]तस्य तदविरोधित्वात्, शब्दत्वाभावो

1 एवान्तर्भवतीति—क
2 स्वतन्त्रस्य—क
3 एतल्लक्षणप्रणयनं—ख
4 च—ख
5 तस्य सिद्धान्त—ख
6 ज्ञानस्यैव तदुपाधि—ग
7 तस्य तद्ज्ञानस्यैव तद्विरोधित्वात्—ग

प्रकाशः

केचित्तु साध्यव्याप्यत्वेना[1]प्रमीयमाणत्वे सति बाधासिद्ध्यतिरिक्तहेत्वाभासताप्रयोजकधर्मयोगित्वं त्रितयसाधारणं लक्षणं बोध्यम् । असाधारणश्च न सत्प्रतिपक्षीभूय दूषणम्, तदन्तर्भूतत्वप्रसङ्गात्, दूषकताबीजस्यैकत्वात् । तथा च सद्धेतावसाधारणे [2]नाव्याप्तिरिति वदन्ति ।

तर्कचूडामणिः

नित्यत्वानित्यत्वोभयाभावव्यापक इति–ज्ञानस्य ग्राह्याभावानवगाहित्वेन तादृशशाब्दज्ञानाप्रतिबन्धकत्वादित्येतदनुशायादेव मतान्तरमाह–**केचित्त्विति** ।

सद्धेतौ सत्प्रतिपक्षितेऽतिव्याप्तेराह सत्यन्तम् । [3]अप्रतीयमानेत्युक्ते तादृशभ्रमविषये साधारणेऽ[4]व्याप्तिरतः[5]**अप्रमीयमाणत्वे सतीति** । तदपि स्वसाध्यानुमित्यनुकूलव्याप्तिमत्तया अप्रतीयमानत्त्वम् । तेन व्यतिरेकिणि सद्धेतौ सत्प्रतिपक्षिते नातिव्याप्तिः । व्याप्यत्वानवगमदशायां ह्रदादौ पक्षे स्वरूपासिद्धे [6]धूमादौ बाधोदाहरणे पृथिवीत्वे च [7]ज्ञानदशायामतिव्याप्तिं वारयति –**बाधासिद्ध्यतिरिक्तेति** । ननु सत्प्रतिपक्षोत्थापकत्वपक्षे सत्यन्ताभावात् [8]सद्धेत्वसाधारणेऽव्याप्तिरित्यत आह–**असाधारणश्चेति** । व्यभिचारसंशयाधायकतया विरुद्धव्याप्तिधीसामग्र्यात्वेन वा असाधारणस्य दोषत्वमिति भावः ।

अत्रासाधारणस्य सत्प्रतिपक्षोत्थापकत्वेऽपि तद्धेदस्य वक्ष्यमाणतया तत्र सत्यन्ताभावादव्याप्तिः । प्रकारान्तरेण [9]दोषस्य निराकरिष्यमाणत्वादित्यनुशयो द्रष्टव्यः । वस्तुतो द्वितीयलक्षणमेव सर्वसंग्राहकं द्रष्टव्यम् ।

---

1 अप्रतीयमानत्वे–क
2 नाव्याप्तिरित्यपि–ख
3 अप्रतीयमानत्वे सतीत्युक्ते–घ
4 अतिव्याप्तिः–ख॰ ग॰
5 अप्रतीयमानत्वे–क
6 धूमादौ अतिव्याप्तिं–ग
7 ज्ञातदशायां–ख
8 सद्धेतुसाधारणे–ग
9 दोषत्वस्य–क

तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः। न चैवमाधिक्ये विभागव्याघातः। स्वरूपसतानुगतरूपेण त्रयाणामेकीकृत्य महर्षिणा विभागकरणात्।

प्रकाशः

[1]तेनेति। तेन असाधरणस्य साध्यतभावनिरूपित[2]व्याप्तिद्वयग्रहपुरस्कारेण साध्यतदभावोत्थापकतया दूषणत्वपक्षे नाव्याप्तिरित्यर्थः। प्रथम[3]लक्षणस्य तु तस्मिन् पक्षेऽव्याप्तिरेव। [4]तत्र संशयविरोधिभूतव्याप्तिग्रह[5]विरहदशाविशिष्टस्यैव सपक्षव्यावृत्तत्वस्योभयकोट्युपस्थापकतावच्छेदकत्वेन [6]संग्राह्यत्वादिति भाव इति केचित्।

तर्कचूडामणिः

ननु असाधारणस्य साध्यतदाभवोत्थापकत्वं तत्संशायकत्वम्। [7]ततश्चोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वादिलक्षणस्याति न तत्राव्याप्तिरिति तेनेति ग्रन्थस्यासंगतिरित्यत आह—**तेनेति**। [8]नन्वेवमपि द्वितीयलक्षणं [9]तत्राव्याप्तमित्यत आह—**प्रथमेति**।

ननु तत्रापि तदुपस्थापकतावच्छेदकं सपक्षादिव्यावृत्तत्वमस्त्येवेति [10]नाव्याप्तिरित्यत आह— **तत्रेति**। सपक्षव्यावृत्तत्वमात्रस्य तथात्वे व्यतिरेकव्याप्तिग्रहदशायामपि [11]तस्यासाधाणत्वापत्तेरिति भावः। सत्प्रतिपक्षोत्थापकतापक्षे च व्यतिरेकव्याप्तिग्रहनियमेन तद्विरहदशा[12]विशिष्टस्वाभावादिति भावः।

अत्र व्यतिरेक[13]व्याप्तिद्वयग्रहस्य न संशयविरोधित्वम्, एकमात्रकोटिकविशेषदर्शनस्यैव तद्विरोधित्वात्। अन्यथा सत्प्रतिपक्षस्थले संशयोच्छेदापत्तेः। तथा च संशयविरोधिव्याप्तिग्रहविरहविशिष्टसपक्षव्यावृत्तत्वं तत्रापीति प्रथमलक्षणेपि नाव्याप्तिरित्यस्वरसं द्योतयति—**केचिदिति**।

---

1 तेनेति। असाधारणस्य—ख
2 व्याप्तिग्रहद्वयस्य पुरस्कारेण—क
3 लक्षणे तु तत्र मते तस्मिन्नव्याप्तिरेव—ख
4 तत्संशय—क
5 दशाविरह—क
6 संग्रहादिति—क
7 तथा चोभय—क—ख
8 नन्वेतदपि द्वितीयलक्षणं तत्र नातिव्याप्तम्—ग
9 तत्रातिव्याप्तम्—ग
10 नातिव्याप्तिः—ख
11 तस्मादसाधारणत्वापत्तेरतन्मते इष्टापत्तिरिति भावः—ग
12 विशिष्टत्वादिति—ग
13 व्याप्तिग्रहद्वयस्य—ग

न चैवं साध्याभावज्ञापकत्वेन बाधप्रकरणसमयोः, तदज्ञापकतयान्येषाम् उपसंग्रहः कुतो न कृत इति वाच्यम् । स्वतन्त्रेच्छस्य नियोगपर्ययोगानर्हत्वात् ॥

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे
सव्यभिचारसामान्यनिरुक्तिः

प्रकाशः

न चैवमिति । यद्यपि बाधस्य साध्याभाव[1]रूपत्वं, न तु (तद्व्यापकत्वम्) [तज्ज्ञापकत्वम्], तथापि प्रमितसाध्याभाववत्पक्षकत्वरूपबाधस्य ग्रन्थकृदभिमततया तस्य [2]लिङ्गतयात्र साध्याभावज्ञापकत्वमित्यर्थः । इदं चोपलक्षणम् । विरुद्धस्यापि साध्याभावज्ञापकत्वेन तदन्तर्भावापत्तिरित्यपि द्रष्टव्यम् ।

इति श्रीरुचिदत्तविरचिते तत्त्वचिन्तामणि प्रकाशे अनुमानखण्डे
सव्यभिचारसामान्यनिरुक्तिः

तर्कचूडामणिः

वयं तु ब्रूमः । ननु साध्यवन्मात्रवृत्तित्वनिश्चयविरोधीत्यत्र साध्यानुमित्यनुकूलव्याप्यत्वनिश्चयविरोधीत्येव किमिति नोक्तमित्यत आह—**तेनेति** । तादृशनिश्चयविरोधित्वोक्तौ तत्र सत्प्रतिपक्षोत्थापकतापक्षे अव्याप्तिः स्यादिति साध्यवन्मात्रवृत्तिनिश्चयविरोधीत्युक्तम्, अतो नाव्याप्तिरित्यर्थ इति ॥

इति श्रीधर्मराजाध्वरिविरचिते तर्कचूडामणौ अनुमानखण्डे
सव्यभिचारसामान्यनिरुक्तिः

---

1 रूपत्वं तथापि–क 2 लिङ्गतया साध्या–ख

अथ साधारणप्रकरणम्

तत्र साधारणत्वं न साध्याभाववद्वृत्तित्वम्। सर्वमनित्यं मेयत्वादित्यनुपसंहार्ये, भूर्नित्या गन्धवत्त्वादित्यसाधारणे संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः। अत एव न साध्यवत्तदन्यवृत्तित्वम्।

नापि निश्चितसाध्यवत्तदन्यवृत्तित्वम्, साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात्।

प्रकाशः

ननु तयोः संग्राह्यत्वान्न दोष [1]इत्यनुशयेनाह—**संयोगादीति**। **अत एवेति**। अन्योन्याभावस्याव्याप्यवृत्तित्वादुक्तातिव्याप्तेरेवेत्यर्थः। यद्वानुपसंहार्येऽतिव्याप्तेरेवेत्यर्थः।

अत एवाग्रे तद्व्यावृत्तं लक्षणमाह— **नापीति**। निश्चितसाध्यवद्वृत्तित्वे सति साध्यवदन्यवृत्तित्वमित्यर्थः। न तु निश्चितसाध्यवदन्यवृत्तित्वम्। तादृशपक्षवृत्तित्वेन धूमादावतिव्याप्त्यापत्तेरिति।

तर्कचूडामणिः

तयोरिति। अनुपसंहार्यसाधारणयोरित्यर्थः। ननु संयोगवतस्तदन्यत्वाभावेन कथं तत्रातिव्याप्तिरित्यत आह—**अन्योन्येति**। नन्वव्याप्यवृत्तित्वं नेति व्यवस्थापितम्। अन्यथा वक्ष्यमाणलक्षणे तत्रातिव्याप्तेरित्यनुशयादाह— **यद्वेति**।

ननु तयोः संग्राह्यत्वमित्युक्तम्, अत आह—**अत एवेति**। निश्चित[3]पदस्य विपक्षविशेषणत्वे दोषमाह—**न त्विति**।

---

1 इत्याशयेनाह—ख 2 पदस्य पक्ष-ख

अत एवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते तत एव वादिनिवृत्तेश्च, न तु सपक्षगतत्वमपि। अनुपसंहार्यो व्यावर्त्यः, अन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत्—त्यज तर्हि तमधिकम्, क्लृप्तेऽन्तर्भावात्।

नापि सपक्षविपक्षगतत्वम्। व्यर्थविशेषणत्वात्। विरुद्धो व्यावर्त्य इति चेत्—न। विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात्।

अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वम्। तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्ये नातिप्रसङ्गः न च व्यर्थविशेषणता। घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वात् इत्यनुपसंहार्यस्य विरुद्धस्यानैकान्तिक

अत एवेति। अमुके साध्यवदन्यस्मिन् अयं हेतुरित्येवोद्भाव्यत इत्यर्थः।

नापिति। पूर्वं विपक्षत्वमन्योन्याभावगर्भम्, अग्रेऽत्यन्ताभावगर्भमुक्तमिति न पौनरुक्त्यम् सपक्षपदं निश्चयावटितमिति न पौनरुक्त्यम्।

[1]न च व्यर्थविशेषणतेति। पक्षान्यपदव्यर्थता नेत्यर्थः। विरुद्धस्येति। साध्यानवगतसहचारित्वे सतीत्यादिरूपस्येत्यर्थः।

'अत एवामुकेऽयमित्येवोद्भाव्यते' इति क्वचित् पाठः। तत्र कथममुकेऽयमिति ज्ञानं प्रतिबन्धकमित्याशङ्क्याह — अमुक [2]इति।

ननु निश्चितसाध्यवत्तदन्यवृत्तित्वमिति पूर्वलक्षणेन पौनरुक्त्यम्। अत्र सपक्षपदस्य निश्चितसाध्यवत्परत्वात्। विपक्षपदस्य साध्यवदन्यपरत्वादित्यत आह — पूर्वमिति। ननु विपक्षत्वस्यात्यन्ताभावगर्भत्वे संयोगसाध्यकद्रव्यत्वेऽतिव्याप्तिरित्यनुशयमाह — सपक्षेति। अनुपसंहार्यादेरपि साधारणत्वादिति भावः।

ननु पक्षान्यसाध्यवद्वृत्तित्वविशेषणवैयर्थ्याशङ्कायां नित्यत्वादिसाध्यकविरुद्ध एवाति-व्याप्तिसत्त्वेन घटो नित्य इत्यनुमानस्य व्यवच्छेद्यत्वादित्युक्त्यनुपपत्तिरित्यत आह — पक्षान्येति।

---

1 पौनरुक्त्यम्। विरुद्धस्येति-क 2 इत्यत एवेति-ग

भिन्नस्य व्यवच्छेद्यत्वादिति चेत्— न। दूषकताप्रयोजकरूपभेदमन्तरेण भेदस्यैवानुपपत्तेः।

साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्वमित्यपि न। व्यर्थविशेषणत्वात्, एकव्यक्तिकसाध्ये तदभावाच्च। एतेन हेत्वाभासान्तरव्यवच्छेदकं विशेषणं व्यर्थमिति।

उच्यते। विपक्षवृत्तित्वं साधारणत्वम्, तन्मात्रस्य दूषकत्वात्।

प्रकाशः

सर्वेति। यत्किंचित्साध्यवदन्यवृत्तित्वं धूमादावपीत्यत उक्तम्—सर्वेति। साध्यवद्विशेषणम्, तद्वतोऽप्रसिद्धेः (न) [1]सामान्यान्योन्याभावाविवक्षायामिदम्। तद्विवक्षायां तु व्यर्थविशेषणत्वमेव द्रष्टव्यम्।

एकव्यक्तिकेति। एकव्यक्तिराश्रयरूपा यस्य साध्यस्य तदेकव्यक्तिकं साध्यम्। तथा चानेकवाचिसर्वपदार्थासम्भवस्तत्रेति भावः।

विपक्षवृत्तित्वमिति। ननु विपक्षत्वं निश्चितसाध्याभाववत्त्वं साध्याभाववत्त्वं वा। नाद्यः, असाधारणवदनित्यदोषतापत्तेः। न द्वितीयः, तन्निश्चयत्वेन प्रतिबन्धकत्वे सन्दिग्धानै-

---

तर्कचूडामणिः

ननु धूमादेः साध्यवत्त्वावच्छिन्नान्योन्याभाववदवृत्तित्वेनातिव्याप्त्यनवकाशे सर्वपदवैयर्थ्यमित्यत आह—सामान्येति।

एकसाधनव्यक्तिर्यत्र साध्ये इत्यङ्गीकारे तदभावासिद्धिरित्यत आह—एकेति। ननु सर्वपदस्याशेषपरतायां न दोष इत्यत आह—तथा चेति।

निश्चयांशज्ञानस्याप्रतिबन्धकतया तद्घटितोपाधेर्हेत्वाभासत्वानुपपत्तिरिति दोषे सत्येव दोषान्तरमाह — असाधारणवदिति। तद्वदेव कादाचित्कनिश्चयगर्भत्वादित्यर्थः।

---

1 सामान्याभावस्याविवक्षायाम्—ख

प्रकाशः

तज्ज्ञानत्वेन प्रतिबन्धकत्वे च पक्षीयव्यभिचार[1]संदेहस्यापि सत्त्वेनानुमितिमात्रोच्छेदापत्तेः[2]। न च साध्याभावांशनिश्चयीभूततज्ज्ञानत्वेन प्रतिबन्धकत्वमिति वाच्यम्। साध्यांशनिश्चयीभूतज्ञानत्वेन प्रतिबन्धकत्वे असाधारणस्यापि नित्यदोषतापत्तेः।

अपि च स श्यामो मित्रातनयत्वादित्यत्र पक्षातिरिक्ते मित्रातनये सर्वत्र श्यामत्वनिश्चयदशायां शाकपाकजत्वेन [3]उपाधितया सन्दिग्धेन व्यभिचारसंशयापादनं पक्ष एव कर्तव्यम्, अन्यत्र विशेषदर्शनात्। तथा च साध्याभावांशनिश्चयीभूतत्वाभावात् व्यभिचारसन्देहस्तत्र प्रतिबन्धको न स्यात्। न चैवमेवेति वाच्यम्। [4]तत्रोपाधिसन्देहानुद्भावनप्रसङ्गात्

तर्कचूडामणिः

तत्संशयश्च साध्याभावांशे संशयरूपः। सन्दिग्धानैकान्तिकस्तु तदंशे निश्चयरूप इत्यर्थः। **साध्यांशेति**। कादाचित्कनिश्चयगर्भतया ह्यसाधारणस्यानित्यदोषत्वम्। तच्च न सम्भवति। साध्यवद्व्यावृत्तज्ञानमात्रस्य तत्रापि प्रतिबन्धकत्वसम्भवात्। न च पक्षस्यापि साध्यवत्तया सन्दिग्धत्वेन तद्व्यावृत्तत्वनिश्चयाभाव इति वाच्यम्। [5]तत्रापि निश्चितसाध्यवद्व्यावृत्तत्वज्ञानत्वेन प्रतिबन्धकत्वादिसम्भवादिति भावः।

यद्वा साध्यवद्व्यावृत्तत्वज्ञानमात्रस्य प्रतिबन्धकत्वे व्यतिरेकिणि पक्षीयव्यभिचारसंशयस्य तद्व्यावृत्तत्वसंशयपर्यवसन्नतया व्यतिरेक्युच्छेदापत्तिरिति तद्वारणाय निश्चितसाध्यवद्व्यावृत्तज्ञानत्वेन प्रतिबन्धकत्वमिति निश्चयघटितस्यासाधारणत्वस्यानित्यदोषत्वमिति तवाभिमतम्। तच्च न सम्भवति। साध्यांशनिश्चयीभूतसाध्यवद्व्यावृत्तत्वज्ञानत्वेन प्रतिबन्धकत्वसम्भवेन तस्य [6]निश्चयाघटितत्वादित्यर्थः।

ननु साध्यवद्व्यावृत्तत्वं नासाधारण्यम्। सद्धेत्वसाधारणाव्याप्तेः। किं तु निश्चितसाध्यवद्व्यावृत्तत्वमिति [7]अनित्यदोषत्वं तस्य दुर्वारमित्यस्वरसादाह — **अपि चेति**।

---

1 संशयस्यापि—ख
2 उच्छेदप्रसङ्गात्—ख
3 उपाधिना—क
4 अत्र—ख
5 तथापि—ग
6 निश्चयघटित—क निश्चयघटितत्वाभावात्—ग
7 नित्य—ग

प्रकाशः

अपसिद्धान्तापाताच्च । क्षितिः द्विकर्तृका कार्यत्वादित्यादावप्रयोजकत्वाहितसाध्याभावांशसंशयीभूतपक्षीयव्यभिचारसन्देहप्रतिबन्धकत्वस्य सर्वसिद्धत्वाच्च ।

किं च साध्याभावे प्रतियोगिवैयधिकरण्याप्रवेशे अयमेतत्कपिसंयोगी एतत्त्वादित्यादौ एद्धेतावतिव्याप्तिः । तत्प्रवेशे च [1]साध्याधिकरणभिन्नाधिकरणवृत्तिसाध्याभावसामानाधिकरण्यमिति फलितार्थः । तथा च साध्याधिकरणभिन्नाधिकरणवृत्तित्वज्ञानमेव प्रतिबन्धकमस्तु, लाघवात् ।

किं च साध्यवदन्यवृत्तित्वज्ञानस्यावश्यं प्रतिबन्धकतया अत्रानन्तर्भूतत्वादाधिक्यम् । [2]एवं साध्यनिष्ठहेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वज्ञानस्य [3]हेतुनिष्ठसाध्यवन्मात्रवृत्तिभिन्नत्वज्ञानस्य हेतुनिष्ठसामानाधिकरण्यज्ञानस्य साध्यवन्निष्ठहेतुसमानाधिकरणान्योन्याभावप्रतियोगित्वज्ञानादेश्च प्रतिबन्धकत्वादाधिक्यम् ।

मैवम् । विपक्षत्वं साध्याभाववत्त्वमेव, न तु निश्चयगर्भम् । अतो नानित्यदोषता ।

तर्कचूडामणिः

ननु तदनुद्भावनमिष्टमेवेत्यत आह—अपसिद्धान्तापातादिति । उभेवाह—क्षितिरिति ।

ननु व्यभिचारस्यानुमितिप्रतिबन्धकनिश्चयविषयत्वमात्रेण [4]हेत्वाभासत्वं संशयस्य च प्रतिबन्धकतावच्छेदकत्वमननुगतमेवेत्यस्वरसादाह—किं चेति ।

ननु विपक्षत्वं साध्यानधिकरणत्वम्, तद्वामित्वं साधारणत्वमिति न द्रव्यत्वेऽतिव्याप्तिः, न वा तद्वारणाय [5]विशेषणोपादानम्, न वा व्यर्थविशेषणत्वमित्यनुशयादाह — किं चेति ।

अनित्यदोषत्वाभावे हेतुमाह—विपक्षेति । सर्वदा तत्प्रतिबन्धकत्वमात्रेण कथं नित्य-

1 साध्यवैयधिकरण्यावच्छेदेन साध्याभाव 2 एवं च—ख
3 हेतुनिष्ठसाध्यसम्बन्ध-सामानाधिकरण्य-अन्योन्याभावप्रतियोगित्वज्ञानादेश्च—क
4 हेत्वाभासस्य तत्संशाय च—ग 5 विशेषापादनम्

प्रकाशः

[1]तद्वृत्तित्वनिश्चयश्च सर्वदा अनुमितिप्रतिबन्धकः । यन्निश्चीयमानमनुमितिप्रतिबन्धकं भवत्येव तस्यैव नित्यदोषत्वम् । असाधारणे तु [2]शब्दत्वादौ पक्षे साध्यसन्देहदशायां [3]सपक्षविपक्ष-व्यावृत्तनिश्चयः घटपटाद्यनित्य-व्योमादिनित्य-व्यावृत्तत्वनिश्चयपर्यवसन्न एव प्रतिबन्धकः । पक्षे च साध्यपर्यवसन्न एव प्रतिबन्धकः । पक्षे च साध्यनिश्चयदशायां घटादिव्योमादिव्यावृत्तत्वनिश्चयो विद्यमानोऽप्यकिंचित्कर एव । न हि तत्त्वेन तस्य प्रतिबन्धकत्वम् । किं तु सकलसपक्षविपक्ष व्यावृत्तत्वनिश्चयत्वेन । तथा च तदा पक्षस्यापि सपक्षतया [4]तन्निश्चयस्य तत्त्वं नास्तीति न प्रतिबन्धकत्वमिति तस्यानित्यदोषता । प्रतिबन्धकता च व्यभिचारज्ञानत्वेनैव । न चानुमिति-मात्रोच्छेदः, तर्कविशेषदर्शनादिना संशयोच्छेदे अनुमानप्रवृत्तेः ।

तर्कचूडामणिः

दोषतेत्यत आह—**यदिति** । ननु प्रतिबन्धकसत्त्वे कथमनुमितिरित्यत आह—**न हीति**।

अत्रेदं चिन्त्यम् । एवं हि [5]साधारणस्याप्यनित्यदोषतापत्तिः । शब्दत्वस्य नित्यत्वा-ज्ञानदशायां ध्वनेर्नित्यत्वभ्रमदशायां [6]तद्वृत्तित्वेन [7]श्रावणत्वज्ञानस्य साधारणज्ञानत्वेन प्रतिबन्धकस्य ध्वनिवृत्तित्वज्ञानपर्यवसन्नतया तथात्वेन [8]ध्वन्यनित्यताज्ञानस्यानुमित्यप्रतिबन्धकत्वात् । यदि च विपक्षवृत्तित्वज्ञानस्यैवानुमितिबन्धकतया [9]ध्वन्यनित्यत्वज्ञानदशायां श्रावणत्वस्य [10]विपक्षगामित्व-ज्ञानाभावादेव नानुमितिप्रतिबन्धः । तदा सपक्षव्यावृत्तत्वस्यैव हेत्वाभासतोपाधितया पक्षे साध्यनिश्चयदशायां तज्ज्ञानाभावादेव नानुमितिप्रतिबन्ध इति तुल्यम् ।

यदि च तज्ज्ञानेऽपि शब्दात् व्याप्तिग्रहसम्भवेन सर्वदा तस्य नानुमितिप्रतिबन्धकत्वम्, तदा तस्य हेत्वाभासतोपाधित्वमेव न स्यात्, तज्ज्ञानेऽप्यनुमित्युत्पत्तेरिति क्व तस्यानित्यदोषता ।

---

1 तद्वृत्तिनिश्चयश्च-क
2 शब्दादौ-क
3 पक्षविपक्ष-क
4 तन्निश्चयस्तत्र नास्तीति-ख
5 साधारणस्य नित्य-ग
6 तद्व्यावृत्तत्वेन-ग
7 श्रावणत्वस्य ज्ञानसाधारणस्य ज्ञानत्वेन-ग
8 ध्वनिनित्यत्व-ख
8 ध्वनिनित्यता-ख
10 सपक्ष-ग

प्रकाशः

यद्वा हेतुमत्तया निश्चिते उपाधिसन्देहाद्यनाहितो यो व्यभिचारसंशयः तदतिरिक्त-व्यभिचारज्ञानत्वेन प्रतिबन्धकत्वम् ।

[1]वस्तुतस्तु व्यभिचारसंशयतन्निश्चययोरेकं न प्रतिबन्धकतावच्छेदकम् । [2]किं तु तत्संशयो व्यभिचारसंशयत्वेन एतन्निश्चयश्च व्यभिचाररूपग्राह्याभावनिश्चयत्वेन प्रतिबन्धकः । तन्निश्चयत्वेन रूपेणान्यत्रेवात्रापि प्रतिबन्धकत्वकल्पनात् । ग्राह्यसंशयस्य चान्यत्राप्रतिबन्धकत्वात् । अनन्य-गत्या [3]तादृशस्यापि तस्य व्यभिचार[4]संशयत्वेनैव प्रतिबन्धकत्वं कल्प्यते ।

तर्कचूडामणिः

यदि चासाधारणेऽन्य एव हेत्वाभासतोपाधिः, तदा तस्य नियमतः प्रतिबन्धकत्वात् तस्य नित्यदोषत्वं दुर्वारमेव ।

तस्मादनुमितिप्रतिबन्धनियमानियमाभ्यां न नित्यानित्यदोषता । किं तु हेतुदोषसम्बन्धस्य [5]कादाचित्कत्वतदभावाभ्याम् । अत एव सत्प्रतिपक्षस्यानित्यदोषत्वमिति ।

ननु पक्षीयव्यभिचारसंशयप्रतिबन्धकतायामपसिद्धान्तः । अत एव सन्दिग्धे न्यायप्रवृत्ति-रिति सिद्धान्तप्रवाद इत्यनुशयादाह—यद्वेति । सन्दिग्धानैकान्तिकसंग्रहाय सप्तम्यन्तम् । अन्यथाहिते पक्षीयसन्देहे विशेषणाभावायत्तविशिष्टाभावलाभाय उपाधिसंदेहाद्यनाहित इति । आदिपदादप्रयोजकत्वादिपरिग्रहः ।

ननूक्तव्यभिचारज्ञानप्रतिबन्धतावच्छेदकं न व्याप्तिप्रत्यक्षत्वम्, व्यभिचारनिश्चयेऽप्यानु-मानिकव्याप्तिज्ञानाद्यापत्तेः । नापि तन्निश्चयत्वम्, व्यभिचारसंशये [6]शाब्दव्याप्तिज्ञानानापत्ते-[7]रित्यस्वरसादाह— वस्तुत इति । प्रतिबन्धकत्वमिति । अव्यभिचारप्रत्यक्ष इति शेषः ।

---

1 स्तुतो व्यभिचारनिश्चयतत्संशययोः—ख
2 तन्निश्चयस्य व्यभिचाररूपग्राह्याभावनिश्चयत्वेनैव प्रतिबन्धकत्वात् । तन्निश्चयस्य तेनैव रूपेणा-न्यत्रवात्रापि प्रतिबन्धकत्वकल्पनात् । ग्राह्यसंशयस्य चान्यत्राप्रतिबन्धकत्वात्—ख ।
3 तादृशस्य तस्य—क
4 संदेहत्वेनैव—क
5 कादाचित्कत्वात्तदभावाभ्यां—ग
6 शाब्दस्य व्याप्ति—ग
7 इत्यरुचेराह

प्रकाशः

न च पक्षीयव्यभिचारसंदेहे तथाप्यतिप्रसङ्ग इति वाच्यम्। प्रतिबन्धकाननुगम[1]स्यादोषत्वेन [2]फलबलेन तत्तत्संदेहत्वेनैव प्रतिबन्धकत्वकल्पनात्। निश्चितहेतुनति उपाधिसंदेहाद्यनाहितसाध्यव्यभिचारसंशयातिरिक्तव्यभिचारसंशयत्वेनैवेति न किंचिदनुपपन्नम्। अत एव व्यभिचारसंशयत्वेनैव तदुद्भावनमपीति। साध्याभावे च प्रतियोगिवैयधिकरण्यं देयमेव। [3]तज्ज्ञानेन हेतौ साध्याधिकरणभिन्नाधिकरणवृत्तित्वानवभासनात्। विरोधिविषयतया [4]गुरुविषयस्यापि तस्य प्रतिबन्धकत्वात्।

न च साध्यवदन्य[5]वृत्तित्वादिज्ञानानामपि प्रतिबन्धकत्वादाधिक्यम्। अत्यन्ताभावगर्भव्याप्तिप्रत्यक्षे अन्योन्याभावगर्भव्यभिचारज्ञानस्याप्रतिबन्धकत्वात्। अन्योन्याभावगर्भव्याप्तिप्रत्यक्षे [6]तु तद्गर्भव्यभिचारज्ञानस्यैव प्रतिबन्धकत्वात्।

प्रतिबन्धकत्वे वा व्यभिचारज्ञानप्रतिबन्धकज्ञानविषयतावच्छेदकत्वेन व्याप्तिज्ञानकारणी-

सर्कचूडामणिः

प्रतिबन्केधति। कार्यस्याकस्मिकताप्रसङ्गेन हेत्वननुगमस्यैव दोषत्वादिति भावः। ननु तदननुगमस्यादोषत्वेऽपि अनुगतसम्भवे अननुगतस्यावच्छेदकमयुक्तमित्यपरितोषादाह- **निश्चितेति।** अत्राव्यभिचारप्रत्यक्षत्वं प्रतिबध्यतावच्छेदकं बोध्यम्।

नन्वेवं [7]व्यभिचारस्य हेत्वाभासत्वं न स्यात्, अन्योन्याभावादिगर्भव्यभिचारज्ञानेऽप्यत्यन्ताभावादिगर्भव्यभिचारज्ञानादनुमितिसम्भवादित्यनुशयादाह— **प्रतिबन्धकत्वे वेति।** अशेषसाधनाश्रयाश्रितत्वगर्भव्याप्तिज्ञाने सकलव्यभिचारज्ञानस्य प्रतिबन्धकत्वादिति भावः। ननु व्यभिचाराननुगमेन तदभावाननुगमात् तज्ज्ञानगर्भं धर्मान्तरमपि अननुगतमेवेत्यरुचेराह- **व्याप्तिति।** सहचारज्ञानसहकारिणोऽभावाः सर्वे व्यभिचारज्ञानाभावाः तत्प्रतियोगि यत् ज्ञानं

1 स्यादोषतया-ख
2 बलेन संदेह-ख
3 तज्ज्ञाने हेतौ-ख
4 गुरुविषयकस्यापि-ख
5 वृत्तित्वज्ञाना-ग
6 च-क
7 सव्यभिचारस्य-ग

विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारणत्वम् । अन्यथा तस्य हेत्वाभासान्तरतापत्तेः । उपाधेरसंकर एव । सर्वमनित्यं मेयत्वादित्यनुपसंहारी शब्दो नित्यः शब्दत्वात् भूर्नित्या गन्धवत्त्वादित्यसा-

---

प्रकाशः

भूतसहचारग्रहपहकार्यभावप्रतियोगिज्ञान[1]विषयतावच्छेदकत्वेन वा सर्वेषामेकीकृत्य साधारणत्वेन विभजनात् । साध्यसम्बन्धस्यापि ग्राह्यतया [2]तत्सम्बन्धाभावसामानाधिकरण्यस्यावश्यं विरोधितया तत्संग्रहार्थमुक्तोपाधेरवश्यमनुसरणीयत्वात् । विरुद्धस्यापि साधारणत्वेन संग्राह्यत्वे उक्तोपाधिसत्त्वमेव [3]तद्विभाजकम् । [4]तदसंग्राह्यत्वे सपक्षगामित्व[5]सहकृततदुपाधिसत्त्वमेव तदिति सर्वमवदातम् ।

तत्त्वाज्ञान इति । यद्यपि तत्त्वेन [6]ज्ञानदशायामपि साधारणत्वमस्येव, तस्य नित्यदोषत्वात् । तथापि तदा तन्नोद्भाव्यते, किं तु विरुद्धत्वमेवेति भावः ।

तर्कचूडामणिः

तद्विषयतावच्छेदकेत्यर्थः । सर्वेषां साधारणत्वेन विभजनादिति योज्यम् । ननु हेतुनिष्ठ-[7]साध्यवन्मात्रवृत्तिभिन्नत्वादिज्ञानस्य ग्राह्याभावानवगाहितया अप्रतिबन्धकत्वात् तत्साधारणोपाधिनिर्वचनं व्यर्थमित्यत आह—साध्येति । उक्तेति । व्याप्तिज्ञानेत्यादिना निरुक्तेत्यर्थः । सम्प्रदायमतेनाह—तदिति ।

---

1 विषयतावच्छेदकरूपवत्त्वेन-ख
2 तत्सम्बन्ध्यभाव-ख
3 तत्संग्राहकम्-ख
4 तदनुग्राह्यत्वे-क
5 सहकृतंतदुपाधिसत्त्वमेव-ख
6 ज्ञानज्ञान-ख
7 भाध्यवन्मात्र-ग

धारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षतादशायामुद्भाव-यितुं न शक्यत इत्युभयोर्भेदेनोपन्यासः ॥

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे
साधारणप्रकरणम्

प्रकाशः

एतत्संग्राहकं च सामान्यलक्षणं प्रागेव दर्शितमिति विशेषलक्षणसंगृहीतस्य सामान्य-लक्षणेनासंग्रहो न दोषः ।

यदि च दूषणोपाधिमात्रस्यैव सांकर्यम्, तदा दोषशङ्कापि नास्ति ॥

इति श्रीरुचिदत्तविरचिते तत्त्वचिन्तामणि प्रकाशे अनुमानखण्डे
साधारणप्रकरणम्

तर्कचूडामणिः

अत्रोपाध्यायोक्तदोषं निराकरोति—एतदिति। असंग्रहरूपो यो दोषः स नेत्यर्थः ॥

इति श्रीधर्मराजाध्वरिविरचिते तर्कचूडामणौ अनुमानखण्डे
साधारणप्रकरणम्

असाधारणप्रकरणम्

सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः। ननु सपक्षत्वं न साध्यवन्मात्रत्वम्, विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात्। नापि पक्षातिरिक्तसाध्यवत्त्वम्, शब्दोऽनित्यः शब्दत्वादित्यादेर्व्याप्तिधीदशायामप्यसाधारणतापत्तेः। न चेष्टापत्तिः, बाधप्रतिरोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनियमादिति चेत्—न। सर्वनिश्चितसाध्यवद्विपक्षव्यावृत्तत्वस्य तत्त्वात्।

प्रकाशः

सर्वनिश्चितसाध्यवदिति। अत्र सर्वेति निश्चितसाध्यवद्विपक्षयोरुभयोरपि विशेषणम्। [1]तेन सद्धेतुधूमादिविरुद्धयोर्नातिव्याप्तिः।

ननु शब्दे [2]नित्यत्वनिश्चयो यदा नास्ति शब्दत्वे [3]चाप्तवाक्यादेरनित्यत्वप्रतियोगिकव्यतिरेकव्याप्तिमात्रग्रहः [4]तदा तत्रातिव्याप्तिरिति चेत्—न। संशयविरोधिविशेषदर्शनविरहकालीनस्य सर्वसपक्षविपक्षव्यावृत्तत्वस्य विवक्षितत्वात्।

तेनेति। सर्वत्वस्य सपक्षविशेषणतया सद्धेतुधूमादौ विपक्षविशेषणाच्च विरुद्धत्वेन ज्ञाते शब्दत्वादौ नातिव्याप्तिरित्यर्थः।

सत्प्रतिपक्षोत्थापकतापक्षे व्यतिरेकव्याप्तिरूपविशेषदर्शनसहकृततया असम्भव इत्यत आह—संशयविरोधीति। एककोटिकविशेषदर्शनस्यैव तद्विरोधितया व्यतिरेकव्याप्तिद्वयज्ञानं न तथेति

---

1 तेन सह सद्धेतु-ख
2 यदा नित्यत्वनिश्चयो नास्ति-ख
3 चाप्तवाक्यादेवानित्यत्व-क
4 तथा-क

शब्दत्वानित्यत्वव्याप्तिग्रहे सति शब्दे साध्यनिश्चयान्नातिव्याप्तिः। न च घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः, साध्यसन्देहदशायां तस्य हेत्वाभासत्वात्। यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुतः साधारणः, शब्दो नित्यः शब्दत्वादिति विरुद्धः, शब्दोऽनित्यः शब्दत्वादित्यादिः सद्धेतुरेव, व्याप्त्यज्ञानस्य पुरुषदोषत्वात् इत्युदाहरणाभावादसाधारणो न पृथक्। तथापि पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वम्, अन्यथा पक्षत्वभङ्गप्रसङ्गात्।

अथ सर्वसपक्षव्यावृत्तिरेव दोषः न विपक्षव्यावृत्तिरपि, तस्या अनुगुणत्वात्। प्रत्युत विपक्षव्यावृत्तत्वेन व्यतिरेकितया परसाध्यसाधक-

---

प्रकाशः

हेत्वाभासत्वेन विशेषणान्न तत्रातिव्याप्तिरिति तु न वाच्यम्। पक्षान्तरे शब्दत्वस्य स्वरूपासिद्धतया हेत्वाभासत्वेन दोषतादवस्थ्यात्।

शब्दत्वानित्यत्वेति। [1]तथा च तदा सपक्षव्यावृत्तत्वमपि नास्ति, [2]अतो नातिव्याप्तिरिति भावः। अन्यथेति। सन्दिग्धसाध्यधर्मा पक्ष इति [3]मतमवलम्ब्यैतदुक्तम्।

तर्कचूडामणिः

भावः। अत्र तादृशविशेषदर्शनविरहज्ञानस्य [4]अनुमित्यप्रतिबन्धकतया तद्घटितसपक्षव्यावृत्तत्वस्य कथं हेत्वाभासतोपाधित्वमिति चिन्त्यम्।

जयदेवमतं दूषयति—हेत्वाभासत्वेनेति।

ननु शब्दत्वानित्यत्वव्याप्तिनिश्चये विशेषदर्शनविरहाभावादेव नातिव्याप्तिरित्यपि [5]सुवचमिति तदप्रदर्शनानुपपत्तिरित्याशङ्क्य उपलक्षणपरतां वाशब्देन सूचयन् व्याचष्टे—तथा चेति। ननु सन्देहाभावेऽपि सिद्ध्यभावरूपपक्षतास्त्येवेत्यत आह—सन्दिग्धेति।

---

1 तथा च सपक्ष-ख
2 अतोऽपि नाति-क
3 मतमालम्ब्य-क
4 अनुमितिप्रति ग
5 सुवचमित्यतस्तद्-ग

मेवोपन्यस्तं स्यात्। न च संशयकतया दोषत्वं तच्चोभयव्यावृत्तत्वज्ञानादिति वाच्यम्। व्याप्तिग्राहकं सहचारज्ञानं तदभावद्वारैव सपक्षव्यावृत्तिमात्रस्य दोषत्वात्।

किं च शब्दोऽनित्यः शब्दत्वादित्युक्त्वा निवृत्ते तावत् नेदमुद्भाव्यम्, न्यूनत्वेनैव वादिनिग्रहात् तदुद्भावने वादिनिवृत्तेश्च। न च न्यूनत्वे तदुपजीव्यम्। असाधारण्यव्यतिरेकेणापि तदुद्भावनात्। न च व्यतिरेकिप्रयोगे तदुपन्यासः। व्याप्तिपक्षधर्मतयोरप्रतिक्षेपेऽकिंचित्करत्वात्, स्वार्थानुमाने च सर्वसपक्षव्यावृत्तिरेव दोष इत्युक्तमिति।

प्रकाशः

व्याप्तिग्राहकमिति। नन्वेवं व्याप्तिग्राहकसहचारग्रहविघटकतया स्वतो दूषकत्वाभावात् उपाधिवद्धेत्वाभासत्वं न स्यादिति चेत्—न। पूर्वपक्षिणस्तस्येष्टत्वादिति भावः।

तदुपजिव्यमिति। सपक्षव्यावृत्तत्वेनोदाहरणाभावात्, अन्यथोदाहरणमपि कुर्यादेवेत्यर्थः असाधारणेति। अप्रतिभादिना उदाहरणाप्रयोगसम्भवादिति भावः। व्यतिरेकिप्रयोगे सम्पूर्ण इति शेषः। तथा च तत्र न्यूनत्वाभावादिदमेवोद्भाव्यमिति भावः। अकिंचित्करत्वादिति। तत्र सहचारज्ञानविघटनद्वारापि व्याप्तिग्राहप्रतिबन्धकत्वाभावादिति भावः। स्वार्थानुमान इति। तथा चोभयव्यावृत्तत्वस्य कुत्रापि न दूषकत्वमिति भावः।

तर्कचूडामणिः

पूर्वपक्षिण इति। इदं चापाततः। वस्तुतस्तु विरुद्धस्य सहचारग्रहविघटनद्वारा व्याप्तिग्रहविघटकत्वेऽपि हेत्वाभासत्ववत् सपक्षव्यावृत्तस्यापि तत्त्वं स्यादेव। उपाधेश्च नियमतोऽनुमितिप्रतिबन्धकत्वाभावादेव न हेत्वाभासत्वमिति द्रष्टव्यम्। उपजीव्यत्वमेवाह—सपक्षेति। अनुपजीव्यत्वे ग्रन्थकृतानुक्तं हेतुं स्वयमेवाह—(असाधारणमिति) [असाधारणेतीति]। ननु व्यतिरेकिप्रयोगेऽपि अप्रतिभादिना उदाहरणाप्रयोगे न्यूनत्वमेवेत्यत आह—सम्पूर्ण इति। ननु अनुमितिप्रतिबन्धकतयैव बाधादिवत् तस्य किंचित्करत्वं स्यादित्यत आह—तत्रेति। ग्राह्याभावाद्यनवगाहितया न बाधतौल्यमिति भावः। ननु सपक्षव्यावृत्तेर्दोषत्वानङ्गीकारे सिद्धान्तिनो न विरोध इत्यत आह—तथा चेति।

उच्यते । शब्दत्वं साध्यवतस्तदभाववतश्च निवृत्तत्वेन ज्ञातमर्थात् व्यतिरेकितया वा पक्षे साध्यं तदभावं च साधयेत् अविशेषात्, अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणो दोषः। सत्प्रतिपक्षे द्वौ हेतू तथा, अत्र त्वेक एवेति तयोर्भेदः ।

राजकीय संस्कृत संस्थान ग्रन्थालय 23692 जयपुर

प्रकाशः

अर्थादिति परमते व्यतिरेकितयेति स्वमते । साध्यतदभावोत्थापकतयेति । साध्यतदभावानुमित्यनुकूलव्यतिरेकव्याप्तिद्वयसहितपक्षधर्मताज्ञानविषयतयेत्यर्थः । न चैवं सत्प्रतिपक्षे असाधारणोद्भावनं कुत्रापि न स्यात्, तेनापि सत्प्रतिपक्षितत्वस्यैव करणादिति वाच्यम्। तदनुद्भावनस्यैव तत्रेष्टत्वादिति साम्प्रदायिकाः ।

अत्र वदन्ति । यो नित्यत्वाभाववान् स शब्दत्वाभाववानिति व्यतिरेकव्याप्तिग्राहे शब्दत्वाभावरूपव्यापकाभावरूपस्य शब्दत्वस्य शब्दे निश्चयः अनित्यत्वाभाव[1]रूपस्य तु व्याप्यस्य तत्र संशय इति सन्दिग्धानैकान्तिकस्य प्रतिबन्धकत्वान्न व्याप्तिग्रह इति क्व सत्प्रतिपक्षत्वम् । न चानुमानमात्रोच्छेदकतया पक्षीयव्यभिचारसंशयो न दोष इति वाच्यम् । तावता व्याप्यवत्तया निश्चिते व्यापकसंशयस्यादोषत्वात्। व्यापकाभाववत्तया निश्चिते [2]तु व्याप्यसंशयस्य प्रतिबन्धकत्वे [3]हि न कस्यापि विप्रतिपत्तिः ।

तर्कचूडामणिः

नन्वर्थापत्तेरसन्मतेऽभावात् अर्थादित्यस्यानुपपत्तिः । परमतेन तदभिधाने व्यतिरेकितयेत्यस्यानुपपत्तिरित्यत आह — अर्थादिर्तीति। साध्यतदभावसंशायकतयेत्यर्थ इति भ्रान्तिं वारयति— साध्येति । साम्प्रदायिका इति । उपाध्यायादय इत्यर्थः ।

तत्र जयदेवोक्तदोषमाह—अत्रेति ।

---

1 रूपस्य तत्र व्याप्यस्य तत्रासंशयः-क 2 ऽपाय-ख
3 'न' कस्यापि-क

प्रकाशः

न चैवं व्यतिरेकिमात्रविलयापत्तिः, सर्वत्र व्यापकहेत्वभावाभावरूपहेतुमत्तया निश्चिते पक्षे साध्याभावरूपव्याप्यसंशयेन सन्दिग्धानैकान्तिकत्वादिति वाच्यम्। यत्र तर्कादिना पक्षीयसाध्य-सन्देहव्युदासः तत्रैव तत्सम्भवात्।

[1]यद्वा व्यतिरेकिण्यप्रसिद्धमेव साध्यं [2]यस्य मते सिध्यति तन्मतेन वा तत्सम्भवात्। न चात्रापि परस्परविरुद्धतादृशतर्कावतारः सम्भवति। एककोटिक[3]तर्कावतारे त्वेकविशेषदर्शनाद साधारण्यगन्धोऽपि नास्ति, कुतो व्यतिरेक[4]व्याप्तिद्वयग्रहपुरस्कारेण सत्प्रतिपक्षत्वम्। अत एव पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वमित्यनन्तरमेवोक्तवान् ग्रन्थकारः।

किं चैवं दूषकतावीजभेदस्य हेत्वाभासभेदप्रयोजकत्वादत्र च तदभावात् सत्प्रतिपक्षभेदो न स्यात्। [5]हेतुभेदमात्रस्याप्रयोजकत्वात् तावता सत्प्रतिपक्षविशेषतापत्तेश्च।

न चोभयपरामर्शविषयतापन्नप्रतिसाधनं सत्प्रतिपक्षः। [6]सपक्षविपक्षव्यावृत्तत्वं [7]हि ज्ञायमानं तद्भिन्नमेव प्रतिबन्धकम्। तज्ज्ञानस्य व्यतिरेकोभय[8]सहचारग्रहरूपतया विरोधिपरामर्शो-

तर्कचूडामणिः

यस्येति। तन्मते सन्देहस्यैवाभावादित्यर्थः। वाशब्दोऽ[9]नास्थायाम्। वस्तुतः पूर्वपरिहा एव तात्पर्यम्। अत एव तत्रैव तुल्यनामाशङ्क्य निराकरोति— **न चेति। एककोटिकेति।** एकमात्रकोटिकेत्यर्थः। **विशेषदर्शनादिति।** संशयविरोधिभूतादिति शेषः।

दूषकतावीजेति। अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकेत्यर्थः।

[10]दूषकतावीजभेदमाशङ्क्य निराकरोति — **न चेति।** ननु ग्राह्याभावानवगाहिनः

---

1 व्यतिरेकि–ख
2 यन्मते–क
3 तर्कावतारकाले विशेष–ख
4 व्याप्तिपुरस्कार–ख
5 हेतुभेदाभेद–ख
6 स च पक्ष–क
7 च–ख
8 सहचाररूप–ख
9 नास्थायाम्। न चेति–ग
10 दूषकताभेदबीज–ख

प्रकाशः

त्थापकत्वादिति वाच्यम् । एवं हि [1]व्यभिचारोत्थापकोपाधिवत् परमुखनिरीक्षकतया हेत्वाभासत्वमेव न स्यात् क्वान्तर्भावबहिर्भावचिन्ता ।

किं चात्र नियमतः साध्यव्यापकाभावप्रतियोगित्वग्रहे विरुद्धान्तर्भावापत्तिः । अपि च वृत्तिमतो धर्मस्यान्यतर[2]वृत्तित्वनियमेन उभय[3]व्यावृत्तत्वमेकत्र ग्रहीतुमशक्यमेव । वृत्तिमत्त्वेनान्यतराधिकरणवृत्तित्वनिश्चयेन उभयाधि[4]करणव्यावृत्तेः ग्राह्यस्य तद्विरहरूपतया अप्रतीतेः । सपक्षविपक्षव्यावृत्तत्वस्य च ज्ञानमेकत्र एकदा न विरुद्धम् । तृतीयकोटेः पक्षस्यापि सत्त्वेन [5]विरोधाभावात् । विरुद्धोभयव्याप्तिग्रहस्य च पक्षान्तर्भावेन विरोधस्यावश्यकत्वात् । सत्प्रतिपक्षे चासाधारण्यं नोद्भाव्येत सत्प्रतिपक्षान्तरवत् । न चेष्टापत्तिः, कथकसम्प्रदायविरोधात् । [6]तस्मादुभयव्यावृत्तग्रहसामग्रीत्वेन सत्प्रतिपक्षवदभयप्रतिबन्धकतया असाधारणस्य दोषत्वम् । विरोध्यनुमितिसामग्र्या इव विरोधिव्याप्तिधिसामग्र्या अपि [7]तत्प्रतिबन्धकत्वाविशेषादिति ।

अत्र ब्रुमः । [8]सत्प्रतिपक्षतयैवास्य दोषत्वम् । न च पक्षीयव्यभिचारसंशयान्न व्याप्तिग्रह इति वाच्यम् । व्यतिरेकिवेलयापत्तेः । न च तर्कादिना संशयव्युदासे तत्सम्भव इति वाच्यम् । एवं हि निश्चितहेतुमाति–[9]पक्षे साध्यसन्देहेन व्यभिचारसंशयोऽपि प्रतिबन्धकः स्यात् ।

तर्कचूडामणिः

अप्रतीतेरिति । प्रत्येतुमशक्यत्वादित्यर्थः । दोषान्तरमाह–सत्प्रतिपक्ष इति । कथं तर्ह्यसाधारण्यस्य दोषत्वमित्यत आह–तस्मादिति । विरोधीति । यद्धीर्यत्रेतिन्यायादितिभावः ।

---

1 च–ख
2 वृत्तिनियमेन–क
3 व्यावृत्तत्वस्वरूपमुभयव्यावृत्तत्वमेकत्र–क
4 करणाद्यविरहरूपतया–ख
5 विरोध्यभावात्–क
6 तदुभय–क
7 प्रतिबन्धक–क
8 सत्प्रतिपक्षरूपतयैव–ख
9 सपक्षे साध्यसन्देहः प्रति–ख

प्रकाशः

न चानुमानमात्रोच्छेदः । तर्कादिना तन्निवृत्तौ तत्सम्भवात् । न चैवमेवेति वाच्यम् । अपसिद्धान्तात् । अत एव पृथिवित्वेन ते भवत एवेति अन्येन [1]पक्षतासम्पत्तये घटादौ [2]तत्सन्देहः प्रागुपपादितः ।

तस्मात् प्रतिबन्धकत्वं फलबलकल्प्यम् । तथा च अन्वयिनि व्याप्यनिश्चये पक्षीय-व्याप्यकसंशयः व्यतिरेकिणि च व्यापकाभावनिश्चये पक्षीयव्याप्यसंशयो न दोष इति फलबलात् कल्प्यते । [3]न च सत्प्रतिपक्षाभेदः । हेतुभेदाभेदस्यैव तद्भेदहेतुत्वात् । न चैतावता विशेषेण [4]तद्विशेषत्वमेवोचितमिति वाच्यम् । स्वतन्त्रेच्छायाः नियोगपर्यनुयोगा-नर्हत्वात् । अन्यथा साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोरप्यै[5]क्यापत्तेः ।

वस्तुतस्तु सत्प्रतिपक्षे उभयपक्षधर्मताविषयत्वेनैव परामर्शस्य प्रतिबन्धकत्वम् । अन्यथा अन्यतरहेतोः स्वरूपासिद्धत्वग्रहेऽपि सत्प्रतिपक्षतापत्तेः । अत्र चैकपक्षधर्मताविषयत्वेनेति तदन्तर्भावशङ्कापि नास्ति । तदिदमुक्तं द्वौ तथेति ।

तर्कचूडामणिः

अत एवेति । न च व्यभिचारनिश्चयस्यानुमिति प्रतिबन्धकतावच्छेदकं लाघवेन तज्ज्ञानत्वमेवेति वाच्यम् । संशयेविशेषदर्शनस्य स्वयोत्तेजकत्वेन स्वीकारात् । निश्चये च तस्यातथात्वात् किं च व्यभिचारनिश्चयेऽप्रामाण्यशङ्काशून्यत्वमपि प्रतिबन्धकतावच्छेदकत् । न च संशये पि तस्य तथात्वम् । संशयोऽप्रमेति ज्ञानेऽ अनुमितिप्रतिबन्धादिति ।

ननु व्यरेकिणि व्यापकाभाववत्तया निश्चिते व्याप्यसंशयस्याप्रतिबन्धकत्वे अन्वयिन्यपि तस्य तत्त्वं म स्यादिस्यत आह— तस्मादिति ।

---

1 पक्षतोपपत्तये–क
2 सन्देहः–क
3 न वा–ख
4 तद्विशेषत्वमेवेति–ख
5 क्यापत्तेः । यतु–ख

प्रकाशः

यतु परमुखनिरिक्षकतयोपाधिवदुभयव्यावृत्तत्वं न दोष इति। तत्तथैव। साध्यतदभावव्यापकाभावप्रतियोगित्वसहितपक्षधर्मताज्ञानमात्रस्यात्र प्रतिबन्धकतया तद्विषयीभूतस्यैव हेत्वाभासत्वात् तत्त्वस्यैव लक्षणत्वात्।

अत एव [1]एकत्रानुकूलतर्कावतारे नातिप्रसङ्गः। न च विरुद्धान्तर्भावः।- साध्यव्यापकाभावप्रतियोगित्वज्ञानस्य [2]विरोध्यविषयकतया तत्र प्रतिबन्धकत्वानभ्युपगमादिति वक्ष्यते।

न च शब्दत्वादेर्वृत्तिमत्त्वग्रहे सति तदभावस्य न साध्यतदभावव्यापकत्वग्रह इति वाच्यम्। [3]न हि सकलव्याप्याधिकरणे व्यापकसम्बन्धो व्यापकत्वम्. येन साध्यतदभावान्यतरवति सकलाधिकरणे हेत्वभावसंबन्धस्य ग्रहात् हेतोर्वृत्तिमत्त्वं न गृह्येत। किं तु व्याप्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वम्। तथा च नित्यत्वानित्यत्वान्निष्ठात्यन्ताभावप्रतियोगी [4]न शब्दत्वाभाव इति ज्ञानं न [5]शब्दत्ववृत्तिमत्त्वग्रहे प्रतिबन्धकम्, ग्राह्याभावासंस्पर्शात्।

अत एव हेतुवृत्तिमत्त्वज्ञानमपि न ज्ञानप्रतिबन्धकम्। अन्यथा बाधस्यापि प्रतिबन्धकत्वानापत्तेः। साध्यव्याप्यवत्तया [6]निश्चिते पक्षे व्यापकसम्बन्धज्ञानस्यावश्यकतया तदभावावगाहिबाध[7]ज्ञानानुदयात्।

[8]तस्माद्यथा व्याप्यवत्तया निश्चिते पक्षे बाधरूपव्यापकाभावनिश्चयः तथा व्याप्यभूतनित्यत्वानित्यत्वान्यतरवत्तया निश्चितेऽपि शब्दे व्यापकीभूतशब्दत्वाभावरूपस्य [9]शब्दत्वस्य निश्चय

तर्कचूडामणिः

तस्येति। कथकसम्प्रदायस्येत्यर्थः। अत्र ब्रूमः— सत्प्रतिपक्षोत्थापकतया दोषत्वे तदभेदो दुर्वार एव। दूषकताबीजभेदस्यैव तद्भेदप्रयोजकतया हेतुभेदाभेदमात्रस्याप्रयोजकत्वात्। अत्र सर्वत्र हेत्वाभासे दूषकताबीजभेदनिर्वचने निर्बन्धः। न च सत्प्रतिपक्षे

1 एवैकत्रानुमाने तर्कावतारे-क
2 विरोधिविषयतया-ख
3 न हि सकलसाध्यतदभावाधिकरणे-ख
4 शब्दत्वाभाव-ख
5 शब्दवृत्तिमत्त्वविग्रहप्रति-ख
6 ज्ञाने-ख
7 ज्ञानस्यामुदयात्-ख
8 तस्माद्यदा-क
9 रूपस्य निश्चया-क

प्रकाशः

इति न किंचिदनुपपन्नम् । यदि च भिन्नप्रकारकत्वान्न तस्य प्रतिबन्धकत्वम् तदा, प्रकृतेऽपि तुल्यम् । सत्प्रति-पक्षे चैतदुद्भाव[1]नमिष्टमेव । न चैवं कथकसम्प्रदायविरोधः, तस्य सन्दिग्धत्वात् ।

यच्चोक्तम्—तस्मादुभयव्यावृत्तत्व[2]ग्रहस्येत्यादि, तदपि चिन्त्यम् । सपक्षविपक्ष[3]व्यावृत्तत्वज्ञानकालेऽपि शब्दादिना व्याप्तिग्रहादनुमित्युत्पत्तेरनुभव[4]सिद्धत्वात् । अत एव व्यतिरेकासहचारेणान्वयव्याप्तिग्रहपक्षे विरोधावश्यकतया तत्सामग्र्याः सत्प्रतिपक्षतेत्यपास्तम् ।

तर्कचूडामणिः

उभय[5]पक्षधर्मताविषयत्वेन परामर्शस्य प्रतिबन्धकता, अत्र त्वेकपक्षधर्मविषयत्वेनेति दूषकताबीजभेद इति वाच्यम् । विरोधिव्याप्तिपक्षधर्मताविषयकत्वेनैवोभयत्र प्रतिबन्धकतया [6]तद्द्वयविषयकत्वस्य तदनवच्छेदकत्वात् । अन्यथा यत्रानित्यत्वसाध्यकहेतुद्वयस्य शब्दादौ पक्षधर्मताज्ञानं नित्यत्वसाध्यकहेतोश्च पक्षावृत्तित्वज्ञानं, तत्राप्यनुमितिप्रतिबन्धापत्तेः । यदपि सपक्षव्यावृत्तत्वं न दोषः, किंतु साध्यतदभावव्यापकाभावप्रतियोगित्वसहितपक्षधर्मताज्ञानस्यैव प्रतिबन्धकतया तद्विषय एव हेत्वाभासः, तत्त्वमेव च तल्लक्षणमिति । तत् तुच्छम् । सद्धेत्वसाधारणाव्याप्तेः । तस्य तादृशाभावप्रतियोगित्वाभावात् । न च तादृशज्ञानविषयत्वमेव तल्लक्षणम् । तस्य विभाजकोपाधित्वेऽपि दूषकतोपाधित्वाभावात् ।

[7]किंच सद्धेत्वसाधारणे अनुमितिप्रतिबन्धकतावच्छेदकनिरुक्ताभावप्रतियोगित्वाभावेन तद्वत्त्वगोचरयथार्थज्ञानाभावात् हेत्वाभासलक्षणस्य तत्राव्याप्तिः । न च तत्र [8]विरुद्धत्वादिनव लक्षणगमनमिति वाच्यम् । असाधारणत्वेन विभागानुपपत्तेः । न ह्यन्येन रूपेण सामान्यलक्षणे [9]रूपान्तरेण विभागः सम्भवति ।

---

1 अनिष्टमेव—क
2 ग्रहस्यैवेत्यादि—ख
3 व्यावृत्तत्वादिज्ञान—ख
4 सिद्धत्वात् । किंच—क
5 पक्षविषयतया धर्मत्वेनेति—ग
6 तद्विषयविषयकत्वस्य—ग
7 किं चासद्धेत्वेव—क
8 विरोधित्वादिनव—ग
9 रूपान्तरविभागः—क

प्रकाशः

किं चोभय[1]व्यावृत्तत्वग्रहस्योभयसहचारग्रहमात्रतया नोभयव्याप्तिग्रहसामग्रीत्वम्, येन विरोधिसामग्रीत्वेन प्रतिबन्धकत्वं स्यात्। किं त्वनुकूलतर्कादिसहितस्य तस्य तथात्वम्। अत एवैकत्रानुकूलतर्काव[2]तारे नासाधारण्यम्। न हीतरसामग्रीसमवहितस्यापि यज्ज्ञानस्य विरोधिसामग्रीत्वेनानुमितिप्रतिबन्धकत्वं तस्य हेत्वाभासत्व[3]मभिमतम्। तथा सतीतरसामग्रीसमवहितस्योपाधिज्ञानस्य व्यभिचारसामग्रीत्वेन प्रतिबन्धकतया तस्यापि हेत्वाभासतापत्तेः। तज्ज्ञानं ग्राह्याभावानवगाहीति न प्रतिबन्धकमिति यदि, तदेतरत्रापि तुल्यम्। [4]विरोधिसामग्रीत्वेन

तर्कचूडामणिः

अपि च व्यतिरेकिणि अन्वयव्याप्तिज्ञानस्यैव अनुमितिहेतुत्वव्यवस्थापनेन [5]साध्याभावनिरूपितव्यतिरेकव्याप्तिग्रहेऽपि साध्यनिरूपितान्वयव्याप्तेः शब्दादिना ज्ञानेऽनुमितिसंभवात् न तस्यानुमितिप्रतिबन्धकत्वम्। न च व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वेऽन्वयव्याप्त्यज्ञानदशायां तज्ज्ञानेऽनुमितिर्न स्यादिति वाच्यम्। उक्तरूपेण हेतुत्वे [6]सहचारज्ञानेऽप्यनुमित्यापत्त्या तादृशसाध्यसहचारज्ञानत्वेन हेतुतया व्यतिरेकव्याप्तिज्ञानस्य साध्यसाधनसहचाराविषयतया अनुमित्यहेतुत्वात्। न च व्यतिरेकसहचारज्ञानस्यापि तदधिकरणनिष्ठव्यभिचारज्ञानवत् हेतुतेति वाच्यम्। अन्वयसहचारज्ञानस्य साध्यसहचारज्ञानत्वेन लाघवेन हेतुतया उक्तरूपेणाहेतुत्वात्।

यदपि सकलसाधनाधिकरणे साध्यसम्बन्धो न व्यापकत्वमित्यादि, तदपि न। अशेषसाधनाश्रयाश्रितसाध्यसम्बन्धस्य त्वन्मते व्याप्तित्वेन व्यापकत्वस्य सम्बन्धरूपत्वावश्यम्भावात्। अत एव त्वन्मते परामर्शानन्तरं बाधावतारोऽपि न सम्भवति। परामर्शस्यैव पक्षीयसाध्यसम्बन्धावगाहितया तदभावावगाहिबाधज्ञानासम्भवादिति दिक्।

ननु सपक्षव्यावृत्तत्वज्ञानस्य विरोधिव्याप्तिज्ञानसामग्रीत्वेन शब्देनापि न व्याप्तिग्रह इत्यत आह—किंचेति।

---

1 व्यावृत्तत्वस्योभय-ख
2 तारकाले-क
3 मिति मतम्-क
4 विरोधमानसामग्री-क
5 साध्याभावनिरूपितान्वयव्याप्तेः-ग
6 सहचारज्ञाने-क

प्रकाशः

[1]तत्त्वमुभयत्रापि तुल्यम् । बाधसामग्रीत्वेनाधिकरणोपस्थितेरपि प्रतिबन्धकत्वात्तद्विषयस्यापि हेत्वाभासान्तरता[2]पत्तिश्च । [3]बाधसामग्रीत्वेन प्रतिबन्धकस्य न स्वतो दूषणत्वमिति यदि तदेतरत्रापि तुल्यम् ।

केचित् साध्यतदभावोत्थापकतया — तदुभयसंशायकतयेत्यर्थः । तथा च तत्पर यैवा[4]परोऽपि ग्रन्थो व्याख्येय इति । तन्न । पक्षे साध्यतदभावसंशयस्य प्रागपि सत्त्वात् ।

किं च तत्संशयस्य ग्राह्याभावविषयतया प्रतिबन्धकत्वम्, हेतुविषयतयानैकान्तिकसंशयत्वेन वा । नाद्यः, ग्राह्याभावसंशयस्य प्रमाणप्रवृत्त्य[5]प्रतिबन्धकत्वात् । न द्वितीयः तस्य पक्षीयव्यभिचारसन्देहत्वेनाप्रतिबन्धकत्वात् । नान्त्यः, पक्षीयसंदिग्धानैकान्तिकस्यानुमानमात्रोच्छेदकतयाप्रतिबन्धकत्वात् । न च संदिग्धोपाध्याहितव्यभिचारसंदेहवदसाधारणाहितोऽपि स प्रतिबन्धक एवेति वाच्यम् । [6]एवं सति परमुखनिरीक्षकतया तद्वदेव हेत्वाभासतानुपपत्तेः ।

तर्कचूडामणिः

दोषान्तरमाह—बाधेति ।

अपरोऽर्पीति । साध्याभावोत्थापकत्वादिति ग्रन्थ इत्यर्थः ।

ननु प्राक् [7]संशयसत्त्वेऽपि न तस्य प्रतिबन्धकम्, अनाहितत्वात् । [8]किं त्वसाधारणत्वाहितस्यैव तस्य तथात्वमित्यत आह— किंचेति ।

---

1 तत्त्वमुभयत्रापर्मीति–ख
2 तापत्तेश्च–क
3 परसामग्रीत्वेन प्रतिबन्धकत्वमिति यदि–ख
4 अपरो ग्रन्थः–क
5 प्रतिबन्धकत्वात् । नान्त्यः–ख
6 तथा सति–ख
7 संशयत्वेऽपि–क
8 किं च साधारण–ग

प्रकाशः

यत्तु सपक्षविपक्षव्यावृत्तत्वे सति [1]पक्षावृत्तित्वमसाधारणत्वम् । तज्ज्ञानं [2]साधारण-संशयसामग्रीत्वेन [3]प्रतिबन्धकम् । यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रति-बन्धिकेति व्याप्तेः । न चोपाधावतिप्रसङ्गः, [4]तस्यासामग्रीत्वादिति ।

तत्तुच्छम् । तज्ज्ञानस्य हि सामग्रीत्वं किमितरनैरपेक्ष्येण साधारणसंशयजनकत्वम् [5]इतरकारणसमवहितस्य जनकत्वं वा । नाद्यः, असम्भवात् । न हि कोटिस्मरण[6]विशेषा-दर्शनादिना विनाकृतस्य तस्य तत्संशयजनकत्वम् । व्यभिचारेण तेषामन्यत्रापि [7]संशयजन कत्वानुपपत्तेः नान्त्यः, उपाधावतिप्रसङ्गात् । न हीतरकारणसमवहितस्याप्युपाधिज्ञानस्य न व्यभिचारज्ञान[8]सामग्रीत्वम् । तथा सति [9]तस्यैतदजनकत्वमेव स्यात् । तथा चोपाधिव्यु त्पादनमनर्थकं स्यात् ।

तर्कचूडामणिः

यज्ज्ञानमिति । ननु सिद्धेरनुमितिप्रतिबन्धकतया तज्जनकपरामर्शस्यापि तत्वापत्तिः । न च येन रूपेण ज्ञानस्य प्रतिबन्धकत्वं तदवच्छिन्नसामग्र्या एव प्रतिबन्धकत्वं विवक्षितम् । परामर्शश्च न सिद्धित्वावच्छिन्नसामग्रीति वाच्यम् । एवं हि ग्राह्याभावव्याप्यबुद्धेरप्रतिबन्धक-तापत्तेः । तस्या अपि ग्राह्याभावनिश्चयत्वावच्छिन्नसामग्रीत्वाभावादिति चेत्- न । सिषाध यिषासत्त्वे तत्रानुमितेरेवोत्पत्त्या तस्याः प्रतिबन्धकत्वाभावात् । तद्विरहसहकृतसिद्धित्वेन-प्रतिबन्धकत्वेऽपि अविशेषितप्रतिबन्धकताया एव विवक्षितत्वात् ।

स्वरूपासिद्धिसंकीर्णासाधारणाव्याप्तिरिति दोषे सत्येव दोषान्तरमाह–**तज्ज्ञानस्येति** । इष्टापत्तिमाशङ्क्याह– **तथा चेति** ।

ननु [10]स्वातिरिक्तज्ञानसामान्यहेत्वतिरिक्तनिरपेक्षत्वं सामग्रीत्वं सपक्षादिव्यावृत्तत्वज्ञान स्यैव । साध्यतदभावज्ञानरूपतया कोटिस्मरणानपेक्षणात् । स्वतन्त्रकोटिस्मृतेश्च व्यभिचारे-णाहेतुत्वात् ।

---

1 पक्षव्यावृत्तत्वम्–ख
2 तज्ज्ञानसाधारणं–ख
3 प्रतिबन्धकम् : तत्सामग्र्यपि-ख
4 तत्सामग्रीत्वाभावात्–क
5 इतरज्ञानसमवहितज्ञानजनकत्वम्–ख
6 विशेषादर्शनविना–ख
7 संशयाजनकत्वापत्तेः–ख
8 जनकत्वम्–ख
9 तस्य तदजनकत्वमेव–ख
10 स्वातिरिक्तज्ञानान्तरनिर–ग

असारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वमात्र-

प्रकाशः

किं चोभयव्यावृत्तत्वे सति पक्षवृत्तित्वज्ञानं साधारण्यसंशयमपि पक्ष एव जनयेत् । [1]न च पक्षतिरिक्ते, तत्र [2]तस्यावृत्तित्वेनैव हेतोर्ज्ञानेन [3]विशेषदर्शनात् । तथा च तादृशस्य पक्षीयव्यभिचारसंशयस्यैव नानुमितिप्रतिबन्धकत्वम्, [4]कुतस्तत्सामग्रीत्वेन, तज्ज्ञानस्य तादृश-संशयस्य [5]तत्पूर्वेनपि सत्त्वेन तत्र तस्याप्रयोजकत्वादिति संक्षेपः ।

यद्यपि पगर्थानुमानेऽपि साध्यतदभावोत्थापकतयैवायं दोषः, तथापि परं प्रति विपक्षव्या वृत्तत्वांशो दोषत्वेन [6]नोद्भाव्य इत्याशयनोक्तं स्वार्थानुमान इति द्रष्टव्यम् ।

[7]असाधारणत्वेनान्वयिप्रयोगे [8]न्यूनत्वादेरेवोद्भावनमुचितं न त्वसाधारणस्येत्यत आह— व्यतिरेकीति । यद्यपि साध्याभावप्रतियोगिकव्यतिरेकव्याप्तेरेव [9]तथसाध्याभावोपापकत्वात्

तर्कचूडामणिः

उपाधिज्ञानस्य स्वातिरिक्तव्यभिचारज्ञानादिसापेक्षतया न सामग्रीत्वम् इत्यनुत शयदाह—किंचेति । नन्वाहितसंशयत्वेन पक्षीयस्यापि तस्यानुमितिप्रतिबन्धकत्वं स्यादेवेत्य-आह — संक्षेप इति । तथा सत्युपाधिवदेव [10]अहेत्वाभासत्वपत्तिरिति भावः । किं च [11]संशयोत्थापकतापक्षे सत्प्रतिपक्षभेदशङ्काया अनवकाशात् सत्प्रतिपक्षे द्वौ तथेति भेदप्रतिपादन-विरोधः । अपि च 'न चासाधारण्यं दोषः, इत्यापि सत्प्रतिपक्षेऽथापकतया दोषत्वात्' इत्युपाधिप्रकरणस्थकारिकाविरोध इति द्रष्टव्यम् ।

नन्वेवं सत्प्रतिपक्षोत्थापकत्वस्य [12]हानिरित्यत आह — व्यतिरेकेति । ननु विपक्ष विपक्षव्यावृत्तत्वस्य साध्यानुमित्यनुकूलव्याप्तिज्ञापकतया कथं वैयर्थ्यमित्यत

---

1 न तु-ख
2 तथावृत्तत्वेनव-ख
3 तत्र विशेष-ख
4 क्व तत्सामग्री-ख
5 एतत्पूर्वमपि सत्त्वेनैतस्याप्र-ख
6 नोद्भाव्यते-ख
7 असाधारणेनान्वयि-ख
8 न्यूनत्वाद्यद्भावनं-ख
9 साध्याभावोपपादत्वात्-क
10 हेत्वाभास-क
11 संशयानुमापकता-ग
12 अपगतिः

मुद्भाव्यम्, साध्याभावोत्थापकत्वात्, न तु विपक्षव्यावृत्तत्वमपि, प्रतिकूलत्वात्, व्यर्थत्वाच्च ।

यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया प्रतिबन्धकतया वा तदुद्भावनमपि । लक्षणं तु सर्वसपक्षव्यावृत्तत्वम्, न तु विपक्षव्यावृत्तत्वमपि,

प्रकाशः

दुद्भावनमृचिम्; तथापि व्यभिचारज्ञापनायोपाधेरिव [1]तद्व्याप्तज्ञानायैव तत्र सर्वसपक्षव्यावृत्त वस्योद्भावनमिति भावः । साध्येति । [1]तद्व्यतिरेक व्याप्ति ज्ञानद्वारा साध्याभावो त्यापक वादि त्यर्थः । व्यर्थत्वादिति । साध्यभावो पादनेऽनङ्गत्यापवादि त्यर्थः ।

वस्तुगतिमुक्त्वा कथकसम्प्रदायानुरोधादाह—यद्वेति । लक्षणं त्विति । यद्यपि सर्वसपक्ष[2]व्यावृत्तेऽपि हेतौ यदा आप्तवाक्यदिना साध्यतदभावान्यतरप्रतियोगिकैकमात्रव्यतिरेक व्याप्तिग्रहः, [3]त्यदा वा तदधीनसान्यतदभावप्रतियोगिकव्यतिरेकव्याप्ति[4]द्वयग्रहस्तदातिव्याप्तिः । प्रथमस्य सद्धेतुत्वात्, द्वितीयस्य च व्याप्तेरज्ञानादज्ञानरूपासिद्धिमात्रयोगितया असाधारणवाभावात् । तथापि साध्यतदभावप्रतियोगिकव्यतिरेकव्याप्तिद्वयवत्तया ज्ञायमानत्व[5]मसाधारण लक्षणमित्यत्र तात्पर्यम् । असाधकतासाधनं तु तत्र सत्प्रतिपक्ष इव साध्याभावानुमिति-

तर्कचूडामणिः

आह —साध्येति ।

किं दृष्टान्तप्रतिबन्धुपन्यासेन, तेन विनापि सपक्षव्यावृत्तत्वमात्रस्य साध्याभावोत्थापकत्वादित्यत आह — वस्तुगतिमिति । नन्वसाधकतानुमाने साध्यानुमित्यनुकूलेत्यादिकं यर्तनेवेत्यत आह — [3]असाधकतेति । ननु विपक्षव्यावृत्तत्वस्य साध्यानुमित्यनुकूलतया

1 व्यतिरेक—ख
2 व्यावृत्तत्वेऽपि—क
3 यथा वा न साध्य—क
4 द्वयंग्रहः—क
5 असाधारण्यलक्षण—क

व्यर्थविशेषणत्वात् । विरुद्धमप्यनेनोपाधिनासाधारणमेव । अन्यथा एतदवगमे विरुद्धत्वाज्ज्ञाने हेत्वाभासान्तरतापत्तेः ॥

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
अनुमानखण्डे असाधारणप्रकरणम्

प्रकाशः

सामग्री[1]प्रतिबन्धकत्वादित्येवमेवेति तत्रापि न वैयर्थ्यशङ्केति ध्येयम् । यर्थेति । असाधकतानुमान इति शेषः । [2]विरुद्धमपीति । अत्रानैकान्तिकसामान्यलक्षणायोगः पूर्ववदेव समाधेय इति ध्येयम् ॥

इति श्रीरुचिदत्तविरचिते तत्त्वचिन्तामणिप्रकाशे अनुमानखण्डे
असाधारणप्रकरणम्

तर्कचूडामणि

सत्प्रतिपक्षेत्थानुकूलतया सत्प्रतिपक्षोत्थापनाङ्गतया कथं व्यर्थत्वमित्यत आह—असाधकतानुमान इति । ननु विरुद्धस्य साध्याभाववन्मात्रवृत्तितया तदन्यत्वाभावात्तत्र सामान्यलक्षणाव्याप्तिरित्यत आह— तत्रेति । (अत्रेति) ॥

इति श्रीधर्मराजाध्वरिविरचिते तर्कचूडामणौ अनुमानखण्डे
असाधारणप्रकरणम्

1 प्रतिबन्धकत्वात्-क 2 विरुद्धमिति-ख

अथ अनुपसंहारिप्रकरणम्

अनुपसंहारो नासत्सपक्षविपक्षः, सिद्ध्यसिद्धिविरोधात् । नापि केवलान्वयिधर्मावच्छिन्नपक्षकः, केवलान्वयिसाध्यकस्य सद्धेतुत्वात् । व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्भावित्वेन साधारणत्वात् । अन्यथा संशयाहेतुत्वेनानैकान्तिकता न स्यात् । सर्वं क्षणिकं सत्त्वादिति साध्याप्रसिद्ध्या व्याप्यत्वासिद्धमपार्थकं वा, साध्यप्रसिद्धौ तु साधारणमेव ।

प्रकाशः

सिद्धसिद्धीति । सपक्षविपक्षसिद्ध्यसिद्धीत्यर्थः । अन्यथेति । साध्यतदभाववद्भावित्वाभावे व्यतिरेकिसाध्यकस्यानैकान्तिकतापि न स्यात्, उक्तानैकान्तिकसामान्यलक्षणायोगादित्यर्थः । व्याप्यत्वासिद्धमिति । अज्ञानरूपासिद्ध[1]मित्यर्थः । तथापि तत्र परं प्रत्युद्भावनार्हम् , अत आह—अपार्थकमिति । अन्त्यशब्दस्य क्षणिकत्वमतमाश्रित्याह साध्यप्रसिद्धाविति ।

तर्कचूडामणिः

सिद्ध्यसिद्ध्योर्विषयाकाङ्क्षायामाह— सपक्षेति । अन्यथेत्यस्य केवलान्वयिसाध्यकस्य सद्धेतुत्वाभाव इत्यर्थभ्रमं वारयति— साध्येति । ननु साध्याप्रसिद्धौ तन्निरूपितव्याप्त्यभावोऽ[2]प्यप्रसिद्ध एवेत्यत आह— अज्ञानेति । [3]तथापीति । तज्ज्ञानस्यानुमित्यप्रतिबन्धकतया अहेत्वाभासत्वादित्यर्थः । ननु न्यायमते क्षणिकत्वस्याप्रसिद्धतया कथं 'साध्यप्रसिद्धाविति[4]युक्तम्, अत आह— अन्त्येति ।

---

1 इत्यर्थः । तत्र–क
2 प्यसिद्ध–ग
3 तथा चेति–ग
4 साध्याप्रसिद्धा–ग

न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं पक्षातिरिक्तसाध्याभाववद्वृत्तित्वं वा साधारणत्वम्, व्यर्थविशेषणत्वात्, न च विरुद्धं विशेषणस्य व्यावर्त्यमित्युक्तम् ।

नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्मावच्छिन्नपक्षकत्वम् । सर्वमभिधेयं मेयत्वादित्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनानुपसंहारिण्यव्यापकत्वात् ।

अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारोऽनुपसंहार्यः । यदि च पक्षे व्याप्तिग्रहः कथंचित्, तदा शब्दोपदर्शितव्याप्तिकानुमानवत्

प्रकाशः

नापीति । केवलान्वयिसाध्यकपक्षेतावतिव्याप्तेराह-सत्यन्तम् । शेषस्तु साधारणातिव्याप्तिवारणाय । तदर्थश्च केवलान्वयिधर्मावच्छिन्नसाध्यसिद्धिविरोधिसंदेह[1]विषयवृत्तित्वम् । साधारणश्च [2]निश्चितसाध्याभाववद्वृत्तिरिति भावः । विप्रतिपत्त्येति । साध्याभावाप्रसिद्धावपि अभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि [3]न वेति संदेहसंभवात् ।

यदि चेति । सहचारग्रहात् पक्ष एव यत्र व्याप्तिग्रह [4]इत्यर्थः ।

तर्कचूडामणिः

साधारणेति । साध्याभाववद्वृत्तित्वेन निश्चिते तत्रातिव्याप्तिवारणायेत्यर्थः । ननु सर्वमनित्यं मेयत्वादित्यत्र साधारणत्वनिश्चयदशायामतिव्याप्तिः । तस्यापि तादृशधर्मावच्छिन्नपक्षकत्वात् । न च संशयघटितपक्षतैवात्र विवक्षितेति वाच्यम् । केवलान्वयिसाध्यकानुपसंहारिणि साध्याभावाप्रसिद्ध्या संशयाभावेन [5]तत्राव्याप्तेरित्यत आह—तदर्थश्चेति । साध्यप्रसिद्धिर्विरोधिनी यस्येत्यर्थः ।

ननु ग्राहकाभावे सति कथं पक्षे तद्ग्रहः, सामान्यलक्षणप्रत्यासत्त्या साध्योपस्थितावपि पक्षीयव्याप्त्यग्रहात् यदि चेत्यस्यास्वारस्यमित्यत आह—सहचारेति ।

---

1 विषयत्वं–ख 2 निश्चितसाध्यवद्वृत्ति–ख
3 न वेति तदसंभवात्–क 4 इत्यर्थः । तत्र पक्षातिरिक्ते–ख 5 तत्रा व्याप्ते–ग

अभेदानुमानवच्च सद्धेतुरेवेति चेत्—न ।

तत्रैव सद्धेतावतिव्याप्तेः । सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः । असाधारणविरुद्धयोरतिव्याप्तेश्च । दूषकतायां व्यर्थविशेषणत्वाच्च । न च दूषकतानैकान्तिकत्वेन न प्रत्येकमिति वाच्यम् । अर्थगत्या व्यर्थविशेषणत्वात् ।

प्रकाशः

[1]तत्रैवेति । यत्र सद्धेतौ पक्ष एव व्याप्तिग्रहस्तत्रैवेत्यर्थः । तत्र पक्षातिरिक्ते व्याप्तिग्रहाभावादिति भावः । दोषान्तरमाह—सर्वस्येति । सर्वमनित्यं मेयत्वादित्यर्थः । ननु पक्षातिरिक्तत्वमत्र न विवक्षितम्, किं तु व्याप्तिग्रहानुकूलाप्रतीतसहचारित्वमेवेति नोक्तदोषद्वयम्, अत आह—असाधारणेति । दूषकतायामिति । असाधकतायामित्यर्थः । न चेति[1] । इदमसाधकम् अनैकान्तिकत्वात् इत्यसाधकताप्रयोगे [2]अनुपसंहारिणि व्यर्थविशेषणत्वशङ्कैव नास्तीति भावः । अर्थगत्येति । अनैकान्तिकत्वमुभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वम् । तत्र साध्याभावकोट्युपस्थापकतावच्छेदकरूपमात्रस्यैव गमकत्वेऽपि शेषवैयर्थ्यं तत्रावश्यकमिति भावः ।

यत्तु [3]अनुपसंहारिहेतौ पक्षीकृते अनैकान्तिकत्वादिति हेतुवाक्येन योग्यताबलादुक्तरूपानुपसंहारित्वरूप एवार्थोऽभिधेयः । तत्र च व्यर्थविशेषणत्वं दुष्परिहरमेवेति ।

तर्कचूडामणिः

पूर्वग्रन्थशेषत्वे व्याहतिरित्यत आह—दोषान्तरमिति । ननु सर्वमभिधेयं मेयत्वादित्यस्यासंग्राह्यतया तदव्याप्तिर्न दोषायेत्यत आह—सर्वमिति । अत्र सहचारानवगमदशायां-धूमादावतिव्याप्तिरिति दोषे सत्येव दोषान्तरमाह—अत आहेति । ननु अप्रतीतसहचारत्वस्यानुमितिप्रतिबन्धकज्ञानविषयतानवच्छेदकतया दूषकतैव नास्ति, कुतो[3]व्यर्थतोक्त्यवकाश इत्यत आह—असाधकतायामिति ।

उपाध्यायमतं जयदेवोक्तेन दूषयति—यत्त्विति ।

---

1 न चेति–ख
2 अनुपसंहारे–क
3 अनुपसंहारिणि हेतौ–ख
4 व्यर्थत्वावकाशः–ग

नापि विप्रतिपत्तिविषयमात्रवृत्तित्वम्, केवलान्वयिसाध्यकेऽव्याप्तेः, सर्वस्य पक्षत्वे मात्रार्थाभावादिति ।

प्रकाशः

[1]तन्न । तत्र [2]तेन प्रकारेणोपस्थितिं विना व्यर्थविशेषणत्वाभावात् । अन्यथा [3]धूमवत्त्वादित्यस्यापि नीलधूमवति योग्यताबलात् तत्परत्वे तदापत्तिः । अनैकान्तिकत्वेन साधारणाद्यन्यतमत्वं विवक्षितम् । तत्र व्यर्थविशेषणत्वमित्याहुः (इत्यप्याहुः ?) । **केवलान्वयीति ।** सर्वमभिधेयं प्रमेयत्वादित्यत्रेत्यर्थः । अत्र हेतुमाह–**सर्वस्येति ।** मात्रार्थस्य व्यवच्छेद्यस्य तत्राभावादिति भावः । यद्यपि व्यतिरेकसाध्यकेऽप्यनुपसंहारिणि अव्याप्तिर्भवत्येव । तथापि तस्य वस्तुतः साधारणत्वान्न [4]लक्ष्यत्वमित्यपरो ब्रूयादिति निस्सन्दिग्धां (अ?)व्याप्तिं दत्तवानिति भावः । क्वचित् [5]अतिव्याप्तेरिति पाठः । तत्रायमर्थः । ननु मात्रपदं [6]कार्त्स्न्यार्थं व्यवच्छेदार्थकं वा । [7]आद्ये दोषमाह–**केवलान्वयीति ।** व्याप्त्यज्ञानस्य पुरुषदोषत्वात् सद्धेतौ तस्मिन्नतिव्याप्तिरित्यर्थः । अन्त्ये त्वाह–**सर्वस्येति ।**

तर्कचूडामणिः

अत्र चयत्किंचिन्निरूपितसाधारणान्यतमत्वस्य प्रकृतसाधकतायामलिङ्गतया तत्साध्यनिरूपितत्वविशेषणमावश्यकम् । तथा च सद्धेत्वनुपसंहारिणि तदप्रसिद्धिरित्यस्वरसं सूचयति–**इत्यपीति ।**

शब्दोऽभिधेय इत्यस्यालक्ष्यतया कथं तत्राव्याप्तिः । कथं वा तत्र सर्वस्य पक्षतेत्यत आह–**सर्वमिति ।** ननु मात्रार्थः कार्त्स्न्यं संभवत्येवेत्यत आह–**मात्रेति ।**

---

1 तन्न । तेन–क
2 तत्प्रकारेण–क
3 धूमवत्त्वस्यापि–ख
4 लक्षणत्वम्–ख
5 अतिव्याप्तिरिति–ख
6 कार्त्स्न्यार्थपरं वा–ख
7 आद्ये केवलान्वयीति–ख

उच्यते। व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी। स चान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात् घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वात् इत्यादौ साध्यसाधनसाहचर्या-

प्रकाशः

उपलक्षणं चैतत्। असाधारणादावतिव्याप्तिर्द्रष्टव्या। व्याप्तिग्रहानुकूलेति। व्याप्तिग्रहानुकूलो य एकत्र धर्म्युपसंहारः सहचारग्रहस्तदभावो यत्रेत्यर्थः। पक्षे सहचारसंदेहसत्त्वात् अप्रतीतसहचारत्वमसंभवीत्यत आह – व्याप्तिग्रहानुकूलेति। तदनुकूलत्वं च सहचारनिश्चयत्वेनेत्यर्थः। अन्यथा तत्रापि व्याप्तिधीप्रसङ्गात्।

ननु व्याप्तिग्रहानुकूलत्वं स्वव्याप्तिग्रहानुकूलत्वम्। तथा च केवलव्यतिरेकिण्यपि तादृशसाध्यसहचारानिश्चयोऽस्तीत्यतिव्याप्तिरिति चेत्—न। व्यतिरेक[1]सहचारनिश्चयस्यापि स्वव्याप्तिग्रहानुकूलत्वात् व्यतिरेकसहचारेणान्वयव्याप्तिर्गृह्यत इति मते। मतान्तरे तु व्याप्तिपदमेव स्वसाध्यसिद्ध्यनुकूलव्याप्तिपरम्। तथा च व्यतिरेकिणि तादृशव्यतिरेक[2]व्याप्तिरेव भवतीति तद्ग्रहानुकूलश्च व्यतिरेकसहचारः, तस्य च तत्र प्रतीतिरस्त्येवेति नातिव्याप्तिरिति भावः।

नन्वज्ञायमानतादशायां सद्धेतावतिव्याप्तिः। न च हेत्वभिमतपदं हेत्वाभासपरम्। जलह्रदादिपक्षे स्वरूपासिद्धतया हेत्वाभासे तत्रैवाति[3]व्याप्तेः। न च साध्यसहचारनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वमिति वाच्यम्। विरुद्धेऽपि गतत्वादिति चेत्—न। स्वसाध्यसिद्ध्यनुकूलव्याप्तिग्रहानुकूलसहचारस्वा[4]वच्छिन्नसहचारनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वस्य विवक्षितत्वात्। विरुद्धस्य व्यतिरेकसहचारनिश्चयाविरोधित्वान्न तत्रातिव्याप्तिरिति भावः। [5]अनुपसंहारिणि तु प्रमेयमात्र एव साध्यसंदेहेन नोभयसहचारनिश्चय इति भावः। न च केवलान्वयिसाध्यकेऽव्याप्तिः तत्र व्यतिरेकसहचाराभावादिति वाच्यम्। तत्रान्वयव्याप्तिमात्रस्यैव [6]स्वसाध्यसिद्ध्यनुकूलतया तद्ग्रहानुकूलसहचारत्वेनान्वयसहचारमात्रस्यैव लाभादिति भावः।

तर्कचूडामणिः

ननु तदपि लक्ष्यमेवेत्यत आह- व्याप्तीति।

तथा चेति। व्यतिरेकसहचारस्य व्यतिरेकव्याप्त्यनुकूलत्वादित्यर्थः।

1 सहचारस्यापि–ख
2 व्याप्तिर्भवतीति–क
3 व्याप्तिः–क
4 अवच्छिन्ननिश्चय–ख
5 अनुपसंहारे–क
6 स्वसाध्यानुकूलतया–ख

ज्ञानात् तस्य विरुद्धत्वाज्ञानदशायामनुपसंहारित्वस्येष्टत्वात् ।

केवलान्वयिधर्मावच्छिन्नपक्षको वा । सर्वमभिधेयं प्रमेयत्वादिति सद्धेतौ न केवलान्वयी पक्षतावच्छेदकः निश्चितसाध्यवद्वृत्तित्वात् । विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्यैव ।

प्रकाशः

विरुद्धत्वाज्ञानेति । यद्यपि विरुद्धत्वज्ञानदशायामपि उक्तलक्षणसत्त्वात् तदाप्यनुपसंहारित्व[1]मस्त्येव, तथापि तदा विरुद्धत्वमेवोद्भाव्यत इतीदमुक्तम् । एतच्चान्वयसहचारमात्रनिश्चयविरोधित्वेनानुपसंहारित्वमभ्युपत्योक्तम् । वस्तुतो व्यतिरेकसहचारनिश्चयस्य तत्र संभवान्नानुपसंहारित्वं तस्येति ध्येयम् ।

ननु तादृशसहचारग्रहाभावः कारणाभावत्वेन स्वरूपसन्नेव व्याप्तिग्रहप्रतिबन्धक [2]इत्यनुशयादाह—केवलेति । केवलान्वयिधर्मव्यापक[3]स्वसाध्यसिद्धिविरोधिसंदेहविषयवृत्तित्वमित्यर्थः । तेन प्रमेयत्वमत्र वर्तते न वेति संदेहाधीनपक्षताके केवलान्वयि[4]साध्यकेऽनुपसंहारिणि नाव्याप्तिः । [5]अस्यापि संशयस्य स्वसाध्यसिद्धिविरोधित्वात् । न च विशेषदर्शनकालेऽनुमित्सयाप्यनुमितिसंभवात्तत्रैवातिव्याप्तिः, तादृशसंशयाभावात् । [6]न च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः नित्याः मेयत्वादित्यव्याप्तिः । केवलान्वयिधर्मावच्छिन्नसंशयाभावेऽपि तद्व्यापकसंशयस्य सत्त्वात् । अन्यथानुपसंहारित्वानुपपत्तेः । न च सर्वो धूमवान् वह्निमान् धूमवत्त्वादित्यादौ सकलधूमाधिकरणे वह्निसंशयदशायामनुपसंहारिण्यव्याप्तिः । [7]तस्य व्यतिरेकसहचारनिश्चया-

---

तर्कचूडामणिः

ननु तादृशेति । ज्ञायमानदोष एव च हेत्वाभास इति भावः । स्वसाध्यसिद्धिविरोधित्वविवक्षायाः प्रयोजनमाह—तेनेति । ननु पक्षपदं सिद्ध्यभाववत्परमेवास्तु, न तु संदेहघटितपक्षत्वपरम्, येनाव्याप्तिवारणाय तादृशविरोधित्वं विवक्ष्येतेत्यत आह—न चेति । धर्मावच्छिन्नेति । तत्प्रकारकेत्यर्थः । तद्व्यापकेति । विषयविषयिभावसम्बन्धेन तद्व्यापकत्वं बोध्यम् । न चेति । तत्संशयस्य तदव्यापकत्वादिति भावः ।

---

1 अस्त्येव, तदा-क
2 इत्याशयात्-ख
3 साध्य-क
4 साध्यके, नाव्याप्तिः-ख
5 तस्यापि साध्यसिद्धिरवात्-ख
6 न वा-ख
7 तत्र-ब

प्रकाशः

विरोधित्वेनानुपसंहारित्वाभावेनालक्ष्यत्वात् केवलव्यतिरेकिवत् ।

नन्वत्र ज्ञाने संशयस्योपलक्षणत्वात् स्वरूपसत्तादृशसंशयाक्रान्तसकलप्रमेयमात्रवृत्तित्वज्ञानं व्याप्तिज्ञानविरोधितया अनुमितिप्रतिबन्धकं वाच्यम् । तथा च सहचारनिश्चयविरहस्यावश्यकतया[1] व्याप्त्यग्रहादज्ञानरूपासिद्धिरेव, न तु हेत्वाभासः । न च पक्षे साध्याभावसहचारज्ञानान्न तादृश [2]सहचारनिश्चय इति हेत्वाभासत्वमिति वाच्यम् । तथा सति साध्याभावसहचारस्यैव साधारणत्वात् तत्रैवान्तर्भावापत्तेः । न च तन्निश्चयो नास्त्येव, तत्संशयश्च पक्षीयो नानुमितिविरोधी, अनुमितिमात्रोच्छेदकत्वादिति वाच्यम् । अत एव न हेत्वाभासः, ज्ञायमानप्रतिबन्धकोपाध्यलाभात् । न च तस्यैव साध्याभावसहचारसंशयस्य व्यभिचारसंदेहत्वेनाप्रतिबन्धकत्वेऽपि विश्वगोचरसंदेहविषयसाध्याभावसामानाधिकरण्यज्ञानत्वेन प्रतिबन्धकत्वं कल्प्यतामिति वाच्यम् । सहचारनिश्चयाभावेनैव व्याप्त्यप्रतीतौ तेन रूपेण प्रतिबन्धकत्वाकल्पनात् । कल्पने वा केवलान्वयिसाध्यकासंग्रहस्य तथाप्यापत्तेः । तत्र साध्याभावाप्रसिद्धेः । न च तस्यालक्ष्यत्वमेवेति वाच्यम् । अव्यवहिताग्रिमग्रन्थविरोधात् । तज्ज्ञानस्य प्रतिबन्धकत्वेऽपि साधारणविलक्षणप्रतिबन्धकतावच्छेदका[3]नुपन्यासात् । अन्यथा तादृशसंशयविषयसाध्याभावज्ञानत्वेनापि प्रतिबन्धकत्वकल्पने हेत्वाभासाधिक्यापत्तेः ।

तर्कचूडामणिः

अत्र तादृशसंशयविषयवृत्तित्वज्ञानस्य प्रतिबन्धकतायां संशयो विषयतया विशेषणम्, उतेष्टसाधनताज्ञानांदाविच्छावदुपलक्षणम् । न द्वितीय इत्याह— नन्विति । आवश्यकत्वादिति । सहचारसंशये तन्निश्चयायोगादिति भावः । ननु सहचारनिश्चयप्रतिबन्धकज्ञानविषयतयैव तस्य हेत्वाभासत्वम्, अव्यभिचारज्ञानप्रतिबन्धकज्ञानविषयव्यभिचारवदित्यत आह — कल्पने वेति । ननु विश्वगोचरसंदेहविषयसाधनसामानाधिकरणात्यन्ताभावप्रतियोगित्वसंशयत्वेनैव प्रतिबन्धकत्वम् । तच्च तत्रापि इत्यरुचेराह — तज्ज्ञानस्येति । प्रतिबन्धकतेति । प्रतिबन्धकज्ञानविषयतेत्यर्थः । ननु विषयतावच्छेदकावैलक्षण्येऽपि ज्ञानगतस्वरूपसद्वैलक्षण्यमात्रेण हेत्वाभासान्तरतास्त्वित्यत आह — अन्यथेति ।

---

1 आवश्यकत्वादिति व्याख्यानसंमतः पाठः ।) 2 सहचारानिश्चय-क

3 अनुपन्यासात् । न च तादृश-ख

प्रकाशः

यदि चोक्तदोषात् तज्ज्ञाने सत्यपि शाब्दव्याप्तिर्धीपत्त्वात् न तस्य प्रतिबन्धकत्वं तदा प्रकृतेऽपि तुल्यम् । न च तादृशसंशयविषयवृतित्वमेव हेत्वाभासतोपाधिः । तज्ज्ञानस्य फलकरणविषयविरोध्यनवगाहितया प्रतिबन्धकत्वाभावात् ।

अत्र वदन्ति—केवलान्वयिधर्मव्यापकताट्टशसंशय[1]विषयमात्रवृतित्वमेवानुपसंहारित्वम् । तज्ज्ञानं च हेतौ [2]साध्यासामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबन्धकम् । संशयसामग्र्याः सामान्यत एव निश्चयप्रतिबन्धकत्वकल्पनात् । [3]तद्विशिष्टज्ञानस्य च हेतौ साध्यसामानाधिकरण्यसंशयजनकत्वमवर्जनीयमेव । हेतुमति सर्वत्र [4]साध्याभावसंदेहेन हेतौ साध्यसामानाधिकरण्यसंदेहस्य ओचित्यावर्जितत्वात् । [5]अत एवास्यानित्यदोषत्वम् । [6]विशेषदर्शनसत्त्वे तस्य संशयसामग्रीत्वाभावात् । न चोक्तक्रमेणात्र साध्याभावसंशय एव दोषत्वेन कल्प्यतामिति वाच्यम् । क्वचिदप्यकल्पनात् । [7]विशेषादर्शने सत्येव तस्याः संशयसामग्र्याः [8]तन्निश्चयप्रतिबन्धकत्वं कल्प्तमिति ।

अत्रेदं चिन्त्यम्—तज्ज्ञानसत्त्वेऽपि शब्दात् व्याप्तिग्रहसंभवेन तस्य न व्याप्तिर्धीप्रतिबन्धद्वारा अनुमितिप्रतिबन्धकत्वम् । साध्यसामानाधिकरण्यसंदेहस्यैव योग्यतासंशयपर्यवसन्नतया तत्राप्रतिबन्धकतया तत्सामग्र्याः सुतरामप्रतिबन्धकत्वात् । नन्वेवं व्यभिचारसंदेहस्यापि शाब्दव्याप्तिग्रहाप्रतिबन्धकतया व्यभिचारस्यापि हेत्वाभासत्वं न स्यादिति चेत्—न । न हि तत्संशयप्रतिबन्ध[8]कत्वेन तस्य हेत्वाभासत्वम् । अपि तु तन्निश्चयस्य प्रतिबन्धकतया, यन्निश्चये चावश्यमनुमितिप्रतिबन्धस्तस्यैव हेत्वाभासत्वात्[9] ।

तर्कचूडामणिः

उक्तेति । विषयतावच्छेदकावैलक्षण्यादित्यर्थः । आद्यं दूषयति—न चेति । फलम्—अनुमितिः । करणं—परामर्शः ।

अथदेवमतमाह—अत्रेति । तज्ज्ञानेति । साध्यसामानाधिकरण्याभावज्ञानेत्यर्थः ।

---

1 विषयवृत्तित्व-ख
2 साध्यसामाना-ख
3 तद्विशिष्टहेतौ-ख
4 साध्याभावसामानाधिकरण्य-ख
5 अत एवानित्य-ख
6 विशेषदर्शने तत्र संशय-क
7 अकल्पनात् । संशय-क
8 तत्प्रतिबन्धकत्वं-क
9 कत्वेन तस्यैव हेत्वाभासत्वात्-ख

व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणम् । तदवगमेऽपि साधारणसंकर एव । एवं व्याप्यत्वासिद्धेर्ज्ञाने । तदुद्भावने चायं व्यभिचारवदुपजीव्यत्वाददोषः ।

प्रकाशः

अन्यथा [1]साध्यव्यापकत्वसाधनाव्यापकत्वसंशयविषयीभूतोपाधिज्ञानस्य औचित्या[2]र्जितस्य व्यभिचारसंदेहसामग्रीत्वेन प्रतिबन्धकतया उपाधेरपि हेत्वभासान्तरतापत्तेश्च । न च तज्ज्ञानस्य न व्यभिचारसंदेहसामग्रीत्वम्, तत्सत्त्वेऽपि कोटिस्मरणादिविरहे व्यभिचारसंशयानुत्पादकत्वादिति वाच्यम् । एवं हि [3]तादृशसंशयविषयवृत्तित्वज्ञानस्यापि न सामानाधिकरण्यसंशयसामग्रीत्वम् तत्सत्त्वेऽपि सामानाधिकरण्याभावादिकोटिस्मृतिविरहे संशयानुत्पादकत्वात् । न च साध्याभावेन [4]तत्साध्यासामानाधिकरण्योपस्थापनमिति वाच्यम् । तत्र तस्यासामर्थ्यात् ।

साध्याभावेति । साध्याभाववद्वृत्तित्वानिश्चयदशायामित्यर्थः । **तदवगम इति** । तन्निश्चय इत्यर्थः । **संकर एवेति** । कालभेदेन तत्रोभयसमावेशादिदमुक्तम् । तत्रानुपसंहारित्वाभावेन संकराभावादिति भावः । **व्याप्यत्वेति** । इदं [5]व्यतिरेकिसाध्यकानुपसंहारित्वममिप्रेत्य । केवलान्वयिसाध्यके तदभावादिति भावः ।

तर्कचूडामणिः

अन्यथेति । कादाचित्कानुमितिप्रतिबन्धकस्यापि हेत्वाभासत्व इत्यर्थः । नन्वनुपसंहारित्वदशायां तत्संशयसत्त्वेन तदज्ञानदशैव तत्र सिद्धेत्यत (असिद्धेत्यत) आह— **साध्येति** ।

ननु तत्संशयेऽपि साधारणता स्यादित्यत आह— **तन्निश्चय** इति ।

नन्वनुपसंहारित्वज्ञाने नियमतो व्याप्यभावाज्ञानात् व्यतिरेकिसाध्यकानुपसंहारिण्यपि

---

1 साध्यव्यापकसाधनाव्यापकसंशय–ख
2 वर्जितव्यभिचार–ख
3 तादृशवृत्तित्व–क
4 साध्याभावसामाना–
5 व्यतिरेकसाध्यानुपसंहारिणम–क

घटाकाशोभयवृत्तिद्वित्वाश्रयत्वं च विरुद्धमेव। एतेन अनुपसंहारित्व प्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव, तदभावे व्याप्यत्वासिद्धि रेवेति निरस्तम्, उपजीव्यत्वादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचितेतत्त्वचिन्तामणौ
अनुमानखण्डे अनुपसंहारिप्रकरणम्

प्रकाशः

यद्वा [1]अज्ञानरूपासिद्धिमभिप्रेत्योक्तम्। अत एवानुपदमेव तथा विभावयिष्यति। अत एव च [2]ज्ञाने तु नोपजीव्यत्वमित्यपरितोषात् उद्भावने चेत्युक्तम्।

अनुपदस्वीकृताव्याप्तिमाशङ्क्याह – घटेति। इदं च साध्यानवगतसहचारेत्यादिलक्षणमभ्युपेत्योक्तम्[3]। वस्तुतः साधारणोऽयमिति मन्तव्यम्॥

इति श्रीरुचिदत्तमिश्रविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे अनुपसंहारिप्रकरणम्

तर्कचूडामणिः

न तस्योपजीव्यत्वमित्यत आह—यद्वेति। अनुपदमिति। एतेनेत्यत्रेत्यर्थः।

ननु नेदं लक्षणमिति वक्ष्यत इत्यरुचेराह- वस्तुत इति॥

इति श्रीधर्मराजाध्वरिविरचिते तर्कचूडामणौ
अनुमानखण्डे अनुपसंहारिप्रकरणम्

---

1 अज्ञायमानरूपा–ख
2 तज्ज्ञाने नोपजीव्यम्–ख
3 मभिप्रेत्र, वस्तुतः – ख

अथ विरुद्धप्रकरणम्

विरुद्धो न साध्याभावव्याप्यः, संयोगादिसाध्यके सद्रेतावतिव्याप्तेः। नापि साध्यवन्निष्ठात्यन्ताभावप्रतियोगिव्याप्यत्वं तत्त्वम्। इदं द्रव्यं गुणवत्त्वादित्यादौ संयोगदिव्याप्येऽतिव्याप्तेः। किं तु साध्यासमानाधिकरण-साध्याभावव्याप्यः साध्यवदन्योन्याभावव्याप्यो वा। सध्याभावत्वं साध्यविरोधित्वमात्रं भावाभावसाधारणम्, तेनाभावे साध्ये अभावाभावस्य भावत्वेऽपि नाव्याप्तिः। अभावाभावोऽभावप्रतियोगिनिरूप्यत्वेन भावभिन्न एव वा। न च भावत्वेनैवोपपत्तौ किमधिकेनेति वाच्यम्। बाधकं विना अभावप्रतीतेः प्रमात्वात्। अन्यथा अत्यन्ताभावान्योन्याभावयोरप्रसिद्धिः।

अथ साध्यहेत्वोर्विरोधे पक्षे साध्यसत्त्वे हेत्वसिद्धिः। हेतुसत्त्वे साध्याभावसिद्धौ बाधः। न च प्रमाणान्तरेण साध्याभावसिद्धौ बाधो न हेतुत्वेनै-

---

प्रकाशः

सयोगादीति। [1]संयोगादिविशेषसाध्यक इत्यर्थः। किंतु साध्यासामनाधिकरणेति। साध्यवैयधिकरण्यावच्छेदकावच्छिन्नसाभावव्याप्य इत्यर्थः। अन्यथेति। तत्राधिकरण[2]द्वैरूप्यात्तेनैव पपत्तेरित्यर्थः।

तर्कचूडामणिः

ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाव[3]व्याप्यत्वमेव लक्षणम्, द्रव्यत्वं तु न तथा, तादृशाभावस्य गुणादावेव सत्वेन वृक्षादौ तदभावादित्यत आह – संयोगेति। ननु गुणः [4]संयोगी गुणित्वादित्यत्राव्याप्तिः, संयोगाभावस्यतदसमानाधिकरणत्वादित्यत आह – साध्येति।

---

1 संयोगविशेष–ख 2 द्वैरूप्याभावाय नोपप तिरित्युर्थः–ख
3 ०व्याप्तत्वमेव–ग 4 सयोग गुणत्वात्–ग

वेति वाच्यम्। विशेषणवैयर्थ्यादिति चेत् - न। हेतोः पक्षे [1]साध्याभाव-बाधानुपसाधपनेऽपि प्रथमोपस्थितविरोधस्यैवोपजीव्यत्वेन दोषत्वात्।

ननु साध्याभावसंबन्धो व्यभिचार एव दोषः न तु तन्नियतत्वमपि, गौरवात् असाधकत्वे व्यर्थत्वाच्च। न च साध्यासहचरितस्य साध्याभावसहचरितस्य वा गमकत्वभ्रमरूपायामशक्तौ विशेषोऽस्ति, येन अशक्ति-विशेषोन्नायकतया न व्यर्थविशेषणता। न चानैकान्तिकसामान्यलक्षणे विपक्षगामित्वं न विशेषणम्, असाधारणाद्यव्याप्तेः, साधारणं तु सपक्ष-वृत्तित्वसहितमिति वाच्यम्। विपक्षगामित्वस्यैव साधारणत्वात् अधिकस्य व्यर्थत्वात्। न च विरुद्धं व्यावर्त्यम्, विपक्षगामित्वेनात्रैव तदन्तर्भावात्।

प्रकाशः

कस्यचिन्मतं निरस्यति-न चेति। अत्र [2]व्यभिचारव्यावृत्तेन रूपेणानुमेयप्रतिबन्धकत्वात् तद्भेदानुपपत्तिदवस्थयमित्यपि द्रष्टव्यम्।

तर्कचूडामणिः

अशक्तेर्गमकत्वभ्रमरूपत्वमयुक्तम्, अशक्तेरसाधकतारूपत्वात्। तथाचापसिद्धान्त इत्यत आह-कस्यचिदिति।

न चेयादिमणेरयमर्थः—नन्वसाधकतानुमाने न व्यर्थत्वम्, व्यभिचारानुमेयासाधकतान्यतद्भि[न्यत्वाद्धि]रुद्धत्वानुमेयासाधकतयाः। अत एव वह्निविशेषे साध्ये नीलधूमस्य न व्यर्थविशेषणत्वमित्याशङ्क्य निराकरोति-न चेति। गमकत्वभ्रमरूपायामिति। गमकत्वभ्रमेण रूप्यतेऽनुमीयत इति व्युत्पत्त्या साधकत्वाभाव एवोक्तः। ननु विरुद्धस्य विपक्षगामित्वेन किमनैकान्तिकेऽन्तर्भावोऽभेदतः, उत साधारणान्तर्भावः। नाद्य इत्याशङ्कते-न चेति। असाधारणेति। सद्भेदेऽसाधारणेत्यर्थः। सद्भेदेऽनुपसंहार्यव्याप्तेश्चेति बोध्यम् न द्वितीय इत्याह-साधारणं त्विति। द्वितीयमादाय दूषयति-विपक्षेति।

तथाप्यनैकान्तिकदूषकताबीजभिन्नदूषकताबीजसत्त्वेनाभासान्तरत्वं विरुद्धस्येति शङ्कते—

---

1 साध्याभावोपस्थापतेऽयीति पाठान्तरम् 2 व्यभिचारिव्यावृत्तत्वेन-ग

अथानैकान्तिके विपक्षसंबन्धो [1]नैव दूषकताबीजम् , असाधारणाद्यव्याप्तेः। न च तत्रान्यदेव बीजम्, हेत्वाभासाधिक्यापत्तेरिति चेत्— अस्तु तावदेवम् । तथापि साधारणे विरुद्धप्रवेशो वज्रलेप एव ।

अन्ये तु विरुद्धलक्षणे न व्यर्थत्वम् , साधारणस्य व्यवच्छेद्यत्वात् । नाप्यसाधकतानुमितौ, एतस्यापि व्याप्यत्वात् । नीलधूमादौ च व्याप्तिरस्त्येवेति न स्वार्थानुमाने दोषः । परस्य तु व्यर्थत्वमधिकम् । न च विरुद्धत्वादित्यत्र शब्दाधिक्यमिति ।

तन्न । अर्थो हि लिङ्गम् । न च व्यभिचारावारकविशेषणावच्छेदेनापि व्याप्तिः, गौरवादिति वक्ष्यते । न च अर्थानुगत्या व्यर्थत्वेऽपि विरुद्धत्वादित्यत्र उद्भावनाशक्यत्वम् । आवश्यकतद्विवेचने तदुद्भावनस्य शक्यत्वादिति । हेतुद्वयोपन्यासे चाधिकम्, प्रथमेन द्वितीयस्य कृतकर्तव्यतया दुष्टबीजत्वात् । न च नीलधूमादित्यादौ विशिष्टकर्तव्यमन्येन केनापि कृतम् । धूमवत्त्वादित्यनेनैव कृतमिति चेत्— न । तथानुपन्यासात् । अन्यथा नीलानन्वयापत्तेः ।

प्रकाशः

अस्तु तावदिति । वस्तुतोऽनैकान्तिकसामान्यज्ञानं प्रतिबन्धकमेव न, विरोध्यविषयकत्वात् । किं तु विपक्षवृत्तित्वादिज्ञानमेव । तथा च तदन्तर्भाव आवश्यक इति भावः ।

तथानुपन्यासादिति । नीलबहिर्भावेन धूमवत्त्वानुपन्यासादित्यर्थः । **अन्यथेति ।** तथैवोपन्यासे तदसमभिव्याहृतनीलस्य [3]निराकाङ्क्षत्वादनन्वये अपार्थकत्वादित्यर्थः ।

तर्कचूडामणिः

शङ्कते—**अथेति ।** विपक्षसंबन्धस्यानैकान्तिकसामान्ये दूषकताबीजत्वाभावमङ्गीकरोति—**अस्तु तावदिति ।** कथं तर्हि नाभासान्तरत्वमित्यत आह—**तथापीति ।**

नन्वेवमपि अनैकान्तिकसामान्यदूषकताबीजासंगृहीततया तद्भिन्नस्य कथं साधारणतर्भावः, सामान्यानन्तर्भूतस्य विशेषानन्तर्भूतत्वनियमादित्यत आह—**वस्तुत इति ।**

---

1 न दूषकतेति न्तठान्तम्
2 अथगत्येति पाठान्तरम्
3 तत्रैवोप-ख
4 निराकाङ्क्षिततयानन्वये-ख
5 अपार्थकत्वापत्तिरित्यर्थः-ख

अपरे तु साध्यानवगतसहचारः साध्याभावसहचारी विरुद्धः। अन्यथा पृथिव्यां मेयत्वेनेतरभेदानुमानं न विरुद्धं स्यात्, साध्याभावाव्याप्यत्वात्। न च तत्साधारणम् सपक्षासत्त्वात्। न च साध्यसहचाराज्ञानदशायां साधारणातिव्याप्तिः, तदा तस्यापि विरुद्धत्वादिति प्राहुः।

तन्न। विपक्षगामित्वमात्रं दूषकमित्युक्तत्वात्! अत एव व्यभिचरितो व्यतिरेकी अनैकान्तिक एव। नापि साध्याभावसाधकत्वं, तत्प्रमापकत्वं वा। साध्याभावसंबन्धबुद्धिं विना तदज्ञानात्। नापि साध्यवदन्यत्वव्याप्यत्वम्, व्याप्यत्वविवेचने व्यर्थविशेषणत्वात्।

नापि स्वव्यापकाभावप्रतियोगिसाध्यकत्वम्, साध्याभावस्य हेतुव्यापकत्वप्रतीतौ हेतुसाध्याभावसंबन्धभानस्यावश्यकत्वात्।

प्रकाशः

साध्यानवगतेति। साध्याप्रमितसहचार इत्यर्थः। तेन गोत्वाश्वत्वयोः सहचारभ्रमे नाव्याप्तिः।

विपक्षेति। साध्याभावसहचरितत्वमात्रविषयतयैव प्रतिबन्धकत्वेविशिष्टविषयत्वेनातथात्वे तेन रूपेणान हेत्वाभासत्वमिति भावः। ननु वह्निविरुद्धत्वभ्रम दशायां धूमेऽतिव्याप्तिरित्यनुशयेनाह—**तत्प्रमापकत्व चेति**। **साध्याभावेति**। साध्याभाव[1]व्याप्यत्वेन तत्प्रमापकत्वं ग्राह्यम्। तथा च तत्संबन्धबुद्धिरावश्यकी। अन्यथा तत्प्रमापकत्वग्रहस्यापि विरोध्यविषयतया अप्रति बन्धकत्वापातादिति भावः।

एतेन साध्याभावव्याप्यत्वादौ व्यर्थविशेषणत्वादिना दूषिते साध्यवदन्योन्याभाव व्याप्यत्वंद्वितीयंलक्षणमनूद्य दूषयति—**नापीति**।

तर्कचूडामणिः

ननु विशिष्टविषयज्ञानस्य प्रतिबन्धकत्वे विशिष्टमपि[2] दूषकमेवेत्यत आह—**साध्याभवेति**। ननु [3]साध्याभावसंबन्धाज्ञानेऽपि तत्प्रमाकत्वं सुग्रहमित्यत आह—**साध्याभावव्याप्यत्वेनेति**। ननु शब्दात्तत्प्रमापकत्वग्रहः तदभावेऽपि संभवतीत्यत आह— **अन्यथेति**।

---

1 व्याप्यत्वेनैव—ख 6 शिविष्टं—क
3 साध्याभावज्ञानेऽपि – ग

उच्यते । साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम् । न च प्रतियोगिनोरनन्वये[1] भासमान एव तदभावयोर्व्याप्तिग्रहः । भिन्नग्राहकसामग्रीकत्वात् । अन्यथा व्यतिरेकिविलयापत्तेः ।

प्रकाश :

साध्यव्यापकेति । नन्वेतस्य ज्ञानं न व्याप्तिधीप्रतिबन्धकम् । हेत्वभावस्य हि साध्यव्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । न चैतद्विषयकबुद्धौ साध्यसामानाधिकरण्यविरोधीं कोऽप्यर्थः [2]परिस्फुरति, [3]ग्राह्याभावासंस्पर्शात्, अतथाभूतस्य ज्ञानस्याप्रतिबन्धकत्वात्, अन्यथातिप्रसङ्गादिति चेत्—न । सकलसाध्याधिकरणनिष्ठाभावप्रतियोगित्वस्य विवक्षितत्वात् । सर्वस्मिन् साध्याधिकरणे हेतुविरह इति ज्ञानं च हेतौ साध्यसामानाधिकरण्य[4]धीविरोध्येव । साध्याधिकरणे हेतोर्ग्राह्यतया तद्विरहस्य ग्राह्यविरहरूपत्वात् । अभावपदं प्रतियोगिव्यधिकरणाभावपरम् । तेनायं वृक्षो द्रव्यम् एतत्कपिसंयोगित्वात् इत्यत्र नातिव्याप्तिः । तथा अयमाकाशवान् द्रव्यत्वादित्यत्र इदमव्यापकम् । तत्र साध्याधिकरणाप्रसिद्धेः । न च तदलक्ष्यमेवेति वाच्यम् । साध्ये हेतुसामानाधिकरण्याभावग्रहस्य व्याप्तिधीप्रतिबन्धकत्वेन तद्विषयरयापि [5]हेत्वाभासत्वौचित्यात् । तत्र च तस्य सत्त्वात् । न च हेतुसामानाधिकरण्याभाव एव सकलविरुद्धव्यापकत्वात् [स]हेत्वाभासतोपाधिरस्त्विति वाच्यम् । [6]अस्याकाशादिविरुद्धाव्यापकत्वात् [7]साध्यसामानाधिकरण्याभावरय दूषकतावीजस्य तत्रापि संभवादिति चेत्— न । सर्वेषामेव [8]विरुद्धोपाधित्वात् विरोधित्वाविशेषेण विनिगमकाभावाच्च । न च हेत्वाभासाधिक्यम् ।

तर्कचूडामणिः

प्रतियोगिव्यधिकरणेति । प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नैत्यर्थः । **न च हेत्विति** । साध्य इति शेषः । ननु तदसंग्रह्यमेवेत्यत आह— **साध्येति** । ननु लाघवात् कस्यचिदेव तदुपाधित्वमित्यत आह— **विरोधित्वेति** ।

---

1 अन्वये इति पाठान्तरम्
2 स्फुरति–ख
3 ग्राह्याभावास्फुरणात्–ख
4 विरोध्येव–क
5 हेत्वाभासताप्रयोजकतौचित्यात्–ख
6 अस्याप्याका–क
7 साध्ये हेतौ च सामाना–ख
8 विरुद्धोपाधित्वम् विरुद्धत्वा–ख

यद्वा वृत्तिमतः साध्यवदवृत्तित्वं साध्यवद्वृत्तित्वानधिकरणत्वं साध्या समानाधिकरणधर्मत्वं साध्यवद्वृत्तित्वानधिकरणधर्मत्वं वा तत्त्वम् ।

प्रकाशः

सामानाधिकरण्ये साध्यहेतुप्रतियोगिकत्वधीविरोधिधीविषयत्वेन [1]सर्वोपाधीनेकीकृत्य महर्षिणा विभागीकरणात् । अत एव वक्ष्यमाणं साध्यवदवृत्तित्वादिकमपि नाधिकम् । अत एव [2]साध्यवान् सर्वोऽपि [2]हेतुमान्नेति ज्ञानस्य प्रतिबन्धकत्वात् सकलसाध्याधिकरणनिष्ठान्योन्याभाव-प्रतियोगितावच्छेदकत्वमपि हेतौ हेत्वाभासताप्रयोजकमिति विभागन्यूनतेति निरस्तम् । तज्ज्ञानस्य साध्यसामानाधिकरण्यग्रहविरोधित्वे उक्तविभाजकोपाध्याक्रान्तत्वात् तदविरोधित्वे [3]व्याप्तिग्रहाविरोधित्वात् [4]व्यभिचारयोर्ग्रहे न विरुद्धता, व्याप्तिग्रहाविरोधित्वात् ।

यत्तु साध्यसामानाधिकरण्यधी[5]विरोधिधीविषयत्वं विभाजकोपाधिरिति । तन्न अवृत्तिसाध्यविरुद्धाव्यापकत्वादिति ।

नन्वेतदवृत्तिहेतावतिव्यापकम् । न च दूषकता[6]बीजसाम्यात्तस्यापि लक्ष्यत्वमेवेति वाच्यम् । तत्रोक्तविरुद्धत्वग्रहेऽपि व्यतिरेकव्याप्तिग्रहाप्रतिबन्धकत्वादित्यस्वरसादाह —यद्वेति । तथा च वृत्तिमतः सकलसाध्याधिकरण[7]निष्ठात्यन्ताभावग्रहे न व्यतिरेकव्याप्तिग्रह इति भावः ।

केचितु वृत्तिमत इत्यसंकीर्णस्थलकथनाय । अन्यथा अवृत्तिमत्त्वे सामान्यतो ज्ञाते पक्षावृत्ति त्वस्यापि ज्ञानात् स्वरूपासिद्धि[7]संकरापत्तेः । दूषकताबीजं तु साध्यवदवृत्ति-त्वमात्रमेवेत्याहुः ।

तर्कचूडामणिः

जयदेवमतं दूषयति — यत्त्विति ।

ननु वृत्तिमत्त्वांशज्ञानस्य ग्राह्याभावाद्यनवगाहितया न प्रतिबन्धकत्वमित्य रुचेराह— केचिदिति ।

ननु साध्यवदवृत्तित्वमपि साध्यद्वृत्तित्वनधिकरणत्वमिति पूर्वाभेद इत्यत

---

1 सर्वोपाधीनामेकीकृत्य महर्षिणा विभजनात्–ख
2 साध्यवान्–ख
3 ०व्याप्तिग्रहाप्रतिबन्धकत्वात्–ख
4 आ०व्यभिचार–ख
5 विरोधित्वम्–ख
6 विजस्य सारयात्–ख
7 निष्ठाभाव–क
8 संकीर्णतापत्तेः–ख

प्रकाशः

साध्यवदतित्वेति । साध्यवदवृत्तित्वप्रतियोगिकाभावाधिकरणत्वमित्यर्थः । [1]पूर्वोक्तास्वसमत्रापि हृदि निधाय[2]वृत्तिमत्परधर्मपदान्तर्भावेन लक्षणद्वयान्तरमाह–साध्येत्यादि । अन्योन्याभावात्यन्ताभावगर्भतया [3]लक्षणयोर्भेदो द्रष्टव्यः ।

वयं तु [4]ब्रूमः । असाधारणोक्तन्यायेन वृत्तिमत्त्वघटितोक्तविरुद्धत्वग्रहस्यापि न व्यतिरेकव्याप्तिग्रहप्रतिबन्धकत्वम् । तस्मिन् सत्यपि शब्दादिना तद्ग्रहे बाधकाभावात् । तस्मात् व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इति मते विरुद्धस्य हेत्वाभासत्वम् । तत्र न वृत्तिमत्त्वान्तर्भावः । तं विनाप्यन्वयव्याप्तिप्रतिबन्धकत्व[5]संभवात् । अत एव व्याप्यत्वासिद्धेरपि हेत्वाभासत्वम् । न हि व्यर्थविशेषणे नीलधूमादौ तज्ज्ञानस्य व्यतिरेकव्याप्तिग्रहप्रतिबन्धकत्वसंभावनापि, विषयविरोधाभावादिति ।

तर्कचूडामणिः

आह–साध्यवदिति ।

वयं त्विति । अत्रेदं चिन्त्यम् -- व्यतिरेकसहचारदन्वयव्याप्तिग्रहपक्षेऽपि व्यतिरेकसहचारस्य व्यतिरेकव्याप्तिग्राहकत्वमभ्युपगन्तव्यमेव । स्वसहचारज्ञानस्य व्याप्तिग्राहकत्वौचित्यात् । तथा चान्वयव्याप्तिग्रह[6]वैलम्बे कदाचित् व्यतिरेकव्याप्तिग्रहादप्यनुमितेर्न विरुद्धस्य हेत्वाभासत्वम् । न च व्यतिरेकव्याप्तिज्ञानमनुमितिहेतुरेव न भवतीति वाच्यम् । तस्यापि स्वव्यभिचारज्ञानविरोधित्वेन हेतुत्वावश्यंभावात् । किं चान्वयसहचारग्रहस्य स्वसहचारज्ञानत्वेनैव हेतुत्वम्, न तु सहचारग्रहविषयिभूताधिकरणनिष्ठव्यभिचारज्ञानविरोधिज्ञानगौरवात् । तथा चान्यसहचारात् कथमन्यव्याप्तिग्रहः । अत एव व्याप्यत्वासिद्धेरपि । हेत्वाभासत्वम् । तज्ज्ञानेऽपि व्यतिरेकव्याप्तिग्रहात्अनु मित्युत्पत्तेरिति ।

वयं तु व्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वेऽपि विरुद्धस्य हेत्वाभासत्वं स्यादेव । अन्वयव्याप्तिपूर्विकायाः साध्यानुमितेरुद्देश्यायाः नियमेन प्रतिबन्धात् । स्वर्णमयत्वाद्यभावस्योद्देश्यामितिप्रतिबन्धकतया [7]हेत्वाभासत्ववत् ।

---

1 पूर्वास्वरस–ख
2 वृत्तिमत्परपर–ख
3 लक्षणभेदः–क
4 वयं तु–क
5 संभवात्–ख
6 विलम्बेन–ग
7 हेत्वाभासोपजीवित्ववत्–ग

न च व्यतिरेक्यतिव्याप्तिः। तत्र साध्याप्रसिद्ध्या तथा ज्ञानविरहात्। असाधारणे च संकर एव। अनेनापि रूपेण तस्य दोषत्वात्। न च साध्यवद्वृत्तित्वे सति वृत्तिमत्त्वज्ञानात् साध्याभाववद्भेदमित्यज्ञानमावश्यकम्, तेन विना साध्यवद्वृत्तित्वाज्ञानादिति वाच्यम्। उपजीव्यत्वेन भिन्नत्वात्। उपजीव्यत्वेऽपि साध्यवति न वर्तत इति ज्ञानं न स्वतो दूषकमिति चेत्–न। असहचारज्ञानस्य विरोधितया व्याप्तिग्रहप्रतिबन्धकत्वात्, व्यभिचाराज्ञानविरोधित्वेन व्यभिचारज्ञानवत्।

ननु विरुद्धस्य स्वार्थानुमानदोषत्वेऽपि परार्थानुमानेऽपार्थकत्वम्, अयोग्यताज्ञानेन निश्चितानन्वयादिति चेत्–न। अयोग्यताज्ञानस्य विरुद्धत्वज्ञानोपजीवकत्वेन तस्यैव दोषत्वात् [1]बाधेऽप्येवम्।

प्रकाशः

[2]न च व्यतिरेक्यतिव्याप्तिरिति। साध्यवद्वृत्तित्वज्ञानस्य तत्रापि संभवादनुमितिप्रतिबन्धापत्तिरित्यर्थः, वस्तुतस्त्वतिव्याप्तेरसंभवात्। अत एव तत्र तादृशज्ञानाभावमेवोपपादयति–तत्रेति। व्यभिचाराज्ञानेति। अत्र्यभिचारज्ञानेत्यर्थः। [3]अयोग्यताज्ञानस्येति। अयोग्यता[4] हि पदार्थयोः संसर्गाभावप्रमैव। सैव च प्रकृते विरुद्धत्वधीः। तथा च विरुद्धत्वज्ञानमेवात्रायोग्यताज्ञानं पर्यवस्यतीति तस्य विरुद्धत्वज्ञानोप[5]जीवकत्वमिति भावः। एवं बाधेऽपीति। [6]तत्र यैवानुमाने बाधधीः सैव शब्देऽयोग्यताधीरिति कथमनयोरुपजीव्योपजीवकभाव इति चिन्त्यम्।

तर्कचूडामणिः

नन्वयोग्यता[6]ज्ञानस्य संबन्धाभावज्ञानरूपतया विरुद्धत्वाज्ञानत्वमेवेतिकथमुपजीव्योपजीवकभाव इत्यत आह–अयोग्यतेति। अयोग्यताज्ञानस्यविषयजन्यत्वानित्यमात् कथं तस्य विरुद्धज्ञानोपजीवकत्वमिति चिन्त्यम्।

---

1 एवं बाधेपि इति प्रकाशसंमतः पाठः
2 न च व्यतिरेकीति-क
3 अयोग्यता–क
4 बोध्यस्वमि...–ञ
5 अत्र–क
6 ज्ञानस्य–क

स चायं विधिसाधने त्रिविधः—साक्षात् साध्याभावव्याप्यत्वा साध्यव्यापकाभावव्याप्यत्वात् साध्यव्यापकविरुद्धोपलम्भात्। यथा धूमवानयं योग्यधूमवत्तया अनुपलभ्यमानत्वात् निरग्निकत्वात् जलाशयत्वात्। न च सर्वत्र साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविध्यम्। एतदज्ञानेऽपि साध्याभावतद्व्यापकाभावव्याप्यत्वेनापि ज्ञातस्य दोषत्वात्।

प्रकाशः

[1]निरग्निकत्वात्— अग्निसंबन्धाभाववत्त्वादित्यर्थः। तेन धूमव्यापकवह्न्यभावः [2]तद्व्याप्यत्वं तत्संबन्धाभाव इति भावः। अभेदेऽपि व्याप्यव्यापकभाव इत्यभिप्रायेण वह्न्यभाव एव हेतुः। अत एवाग्रे व्यापकत्वमभेदेऽपीति वक्ष्यति। एतदज्ञानेऽपीति। अत्रेदं चिन्त्यम्—यदि प्रतिबन्धकज्ञानविषयतावच्छेदकत्रैविध्येन त्रैविध्यम्, तदा विधान्तरमपि स्यादेव। पूर्वोक्तसाध्यवदवृत्तित्वादिज्ञानानामपि प्रतिबन्धकत्वात्। यदि च [3]सहचारज्ञानविरोधित्वेन तेषामनुगमः[4]तदात्र तेषामप्यनुगमः स्यात् न त्रैविध्यम्। न चैतत्त्रितयं [5]विरुद्धहेत्वाभासतोपाधिः, प्रथमोपाधिज्ञानस्य [6]साधारणज्ञानत्वेनैव दूषकत्वात्। द्वितीयतृतीयोपाधिज्ञानस्य विरोध्यविषयत्वेनाप्रतिबन्धकत्वात्। न हि धूमे साध्ये वह्न्यभावव्याप्यत्वग्रहस्य हेतौ वह्निविरुद्धत्वग्रहस्य वा विरोधित्वम्। किं तु धूमविरुद्धत्वग्रहस्यैव। जलाशयत्वादौ वह्निविरुद्धत्वग्राहकालेऽपि शब्दाभासादिना धूमव्याप्यत्वग्रहसंभवात्। न च पूर्वोक्त एव विरुद्धहेत्वाभासतोपाधिः, तस्य च ग्रहणे प्रकारत्रयमिदमिति वाच्यम्। [6]एतद्वितयप्रकाराभावेऽपि साध्यवदवृत्तित्वादिग्रहात्। तज्ज्ञानेऽविकदाचित् [8]साध्यवदवृत्तित्वाग्रहात्।

तर्कचूडामणिः

तत्रेति। मणिकृन्मते उभयोरपि प्रमागर्भत्वान्मतान्तरे च द्वयोरपि तदगर्भत्वादिति भावः ननु त्रैविध्यकथनं विधान्तरोपलक्षणपरं न तु व्यवच्छेदपरमित्यरुचेराह—न चेति। व्यतिरेकव्यभिचारमुक्त्वा अन्वयव्यभिचारमाह—तज्ज्ञानेऽपीति। ननु सर्वत्र बाधादिसांकर्यमेवेति

---

1 निरग्निकत्वात्—ख
2 तद्व्याप्यः तत्सं—क
3 सहचारादिज्ञान—ख
4 तदातेषामनुगमाद्—ख
5 विरुद्धे—ख
6 साधारणत्वेनैव—क
7 तत्र त्रितयप्रकारा—क
8 साध्यविरुद्धत्वाग्रहात्—ख

न च धूमवानयं तदभाववत्त्वादिति त्र्यधिकम्, स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वम्। तच्चाभेदेऽपि धूमवानयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तया अनुपलभ्यमानत्वादित्यनैकान्तिकमेव।

निषेधसाधनेऽपि त्रिविधः-प्रतियोग्युपलम्भात् साध्यव्यापकाभावोपलम्भात् साध्यव्यापकविरुद्धोपलम्भात्। यथा निरग्निकोऽयमग्निमत्त्वात् धूमाभावशून्यत्वात् धूमवत्त्वात्। सर्वथा विशेषगद्वारापि। यथा कृष्णागुरुप्रभववह्निमानयं कटुकानुरसिपाण्डुरधूमवत्त्वात्। अयं च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसंकीर्णः क्वचित्।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
अनुमानखण्डे विरुद्धप्रकरणम्

प्रकाशः

एवं निषेधसाधनेऽपीति। ननु विरुद्धे बाधाद्यन्यतमज्ञानस्यावश्यकत्वात् तस्यैवानुमितिप्रतिबन्धकत्वेन नास्य हेत्वाभासान्तरत्वमित्यत आह—अयं चेति। बाधादिपदं तज्ज्ञानपरम्। तथा च क्वचित् बाधादिज्ञानसांकर्येऽपि क्वचिदसंकीर्णसाध्यवदवृत्तित्वादिज्ञानस्य प्रतिबन्धकत्वादस्य हेत्वाभासत्वमिति भावः।

यत्तु चतुर्विधाः परमाणवोऽनित्याः मार्थिपरमाणुत्वात् इत्यत्र क्वचिद्विरुद्धस्य बाधितत्वादिदोषसांकर्यमिति स्वरूपकथनमिति। तन्न। प्रकृतानुपयुक्तत्वात्। अन्यथा हेत्वाभासान्तरेऽपि हेत्वाभाससांकर्यं विभावयेदिति।

इति श्रीरुचिदत्तमिश्रविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे विरुद्धप्रकरणम्

तर्कचूडामणिः

क्वाचित्कत्वकथनमसंगतमित्यत आह—बाधादीति।

इति श्रीधर्मराजाध्वरिविरचिते तर्कचूडामणौ
अनुमानखण्डे विरुद्धप्रकरणम्

---

1 'एवं निषेधसाधनेऽपि' इति प्रकाशसंमतः पाठः
2 एतन्निषेधसाधनेऽपि-क
3 'तथा च' नास्ति-क
4 हेत्वाभासत्वप्रतिबन्धकत्वमिति-क
5 केचित्तु-ख
6 'इति स्वरूप...हेत्वाभाससांकर्यम्' नास्ति-ख।
7 विभावयतीति-ख

अथ सत्प्रतिपक्षप्रकरणम्

सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्ययलिङ्गत्वम् । परस्परप्रतिबन्धेनोभयोरबोधकत्वात् । बलं च न सपक्षसत्त्वादि, व्यतिरेकिण्यभावात् । नापि मानव्याप्तिपक्षधर्मतावत्त्वम् । विरोधेनैकत्र तद्भङ्गनियमात् ।

नापि व्याप्तिपक्षधर्मतया ज्ञातत्वम् । विरोधिव्याप्तिपक्षधर्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्तश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्या आरोपयितुमशक्यत्वात् । न च साध्यव्याप्यस्य पक्षधर्मता पक्षधर्मस्य वा साध्यव्याप्यता आरोप्येति वाच्यम् । एकत्र तदुभयाभावात् विशिष्टस्याप्रसिद्ध्या तद्वैशिष्ट्यस्यारोपासंभावात् । नाप्यनिर्धारितविशेषेण बोधितसाध्यविपर्ययकत्वम्, उभयोरबोधकत्वात् । विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः, एकत्र तद्भङ्गनियमात् ।

प्रकाशः

नापि व्याप्तिपक्षधर्मतया ज्ञातत्वमिति । व्याप्तिपक्षधर्मतावगाहिसमानज्ञानविषयत्वमित्यर्थः । आरोपयितुमिति । यद्यपि भ्रमरूपा नित्यत्वव्याप्यश्रावणत्वधीः संभवत्येव, तथापि प्रमितमेवारोप्यत इति मतमवलम्ब्येदमुक्तम् । एकत्रेति । सत्प्रतिपक्षयोर्मध्ये एकत्र हेतावित्यर्थः । पक्षविशेष्यकपरामर्शाभिप्रायेणेदं बोध्यम् । विशेषणतावच्छेदकप्रकारकज्ञानस्यैव विशिष्टवैशिष्ट्यावगाहिज्ञानजनकत्वमिति मतमवलम्ब्येदमुक्तम् । अन्यथा हेतुविशेष्यकपरामर्शे विशिष्टस्यानारोप्यत्वेन तदप्रसिद्धेरदोषत्वात्[1] । एकस्य द्वयमिति न्यायेन शब्दे श्रावणत्ववैशिष्ट्यस्य श्रावणत्वे [2]नित्यत्ववैशिष्ट्यस्य च युगपदेवावभासनात् पक्षविशेष्यत्वेऽप्यदोषात्वाच्च । अत एव दूषणमिदं तलग्नकमिति [3]सिद्धान्ती सिद्धान्तेनोद्धरिष्यति । अन्यथा [4]लिङ्गाभासादिना अनुमित्यनापत्तिरिति ।

तर्कचूडामणिः

ननु व्याप्यत्वादिप्रकारकज्ञानविषयत्वं न लक्षणम् । यत्र सत्प्रतिपक्षे विशङ्कितव्यभिचाराभावादिस्मृत्यनन्तरं पक्षवृत्तिलिङ्गपरामर्शः, तत्र व्याप्तेरप्रकारत्वात् पक्षधर्मतायाः सर्वथैवाप्रकारकत्वेनाव्याप्तेः । किं च यत्र समूहालम्बनपरामर्शे एकहेतुविषयत्वावच्छेदेन ज्ञाने अप्रामाण्यसंदेहः । [5]तत्रातिव्याप्तिः । अपि च सत्प्रतिपक्षोत्तीर्णसद्धेतावतिव्याप्तिः, तस्यापि [6]ज्ञातत्वादित्यत आह — व्याप्तीति ।

---

1 अदूषणत्वात्–ख
2 नित्यत्वव्याप्यत्ववैशिष्ट्यस्य–ख
3 'सिद्धान्ती' नास्ति–ख
4 लिङ्गाभासात्–ख
5 तत्रातिव्याप्तिः–ख
6 ज्ञानत्वात्–क

उच्यते। साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम्।

प्रकाशः

यद्वा एकत्र आकाशादौ [1]लिङ्गे उभयाभावात् व्याप्तिपक्षधर्मतोभयाभावात् विशिष्टस्योभयस्य व्याप्तिपक्षधर्मतारूपस्य अप्रसिद्धिरित्यर्थः। [2]विशेषश्च न व्याप्तिभङ्गाभङ्गरूप इति। [3]अनिर्धारितो वाच्य इति शेषः। एकत्र भङ्गनियमादिति। तथा चान्यतरत्वेन निर्धारणसंभवान्न सर्वथैवोभयोरनिर्धारितविशेषत्वमित्यर्थः। साध्येति। अत्राधिकबलोपस्थितिप्रतिबद्धकार्ये हीनबले लिङ्गेऽतिव्याप्तिवारणायोक्तं [4]समानेति। [5]समानत्वं च निर्णयाजनकत्वेन विवक्षितम्। अधिकबलोपस्थितिश्च निर्णयजनिकेति न समानबलेति नोक्तदोषः।

ननु तत्फलस्य बाधस्यैव तत्रानुमितिप्रतिबन्धकत्वं न त्वधिकबलोपस्थितेः। [6]किं च यत एव दोषात् प्रतिबध्यस्य हीनबलत्वं तत एव तत्रानुमितिप्रतिबन्धसंभवान्न तस्यापि तत्प्रतिबन्धकत्वमिति चेत्—

तर्कडामणिः

ननु सत्प्रतिपक्षस्थलेऽन्यतरहेतौ व्याप्तिपक्षधर्मतान्यतरभङ्गनियमेऽपि द्वयाभावोऽसिद्ध एव। न चैकाभावमात्रेण द्वयाभावाभिधानं, व्यासज्यवृत्त्यभावानङ्गीकारात् इत्यरुचेराह—यद्वेति। ननु तत्राप्यन्यत्र प्रसिद्धयोर्व्याप्तिपक्षधर्मतयोरारोपोऽस्तु, इत्यत आह—विशिष्टस्येति। व्याप्तिपक्षधर्मतारूपं गमकतावच्छेदकं यस्य तस्येत्यर्थः। पक्षविशेष्यकपरामर्श एव हेतुरित्याशयः। व्याप्तिननु पक्षधर्मतान्यतरभङ्गाभङ्गयोः [7]परस्परव्यावृत्तयोः विशेषत्वनिराकरणानुपपत्तिरित्यत आह—अनिर्धारित इति। तथा च तयोरनिर्धारितत्वमेव निषिध्यते इति भावः। ननु तद्भङ्गनियमेऽपि तदनिर्धारणं स्यादेव व्याप्त्यप्रतिसन्धानदशायामित्यत आह—तथाचेति। यद्यपि हेतुतावच्छेदकावच्छेदेनानिर्धारितत्वविवक्षायां नोक्तदोषः, तथापि पूर्वदोषे तात्पर्यम्। ननु व्याप्तिपक्षधर्मतावगाहितया सापि समानैवेत्यत आह—समानत्वमिति।

---

1 लिङ्गे—क
2 निर्णय—ख
3 एकत्र—क
4 समानबलेति—ख
5 निर्णयाजनकत्वं—क
6 प्रतिबद्धस्य—ख
7 परमत—ग
8 याप्तिप्रति—ग

प्रकाशः

न। बाधस्यानुमितिप्रतिबन्धकतया तत्सामग्रीत्वेनाधिकबलोपस्थितेरपि प्रतिबन्धकत्वात्। यज्ज्ञानं यत्र प्रतिबन्धकमित्यादिव्याप्तेः। अन्यथा बाधावतारपूर्वसमये हीनबलेनापि लिङ्गेनानुमितिजननापत्तेः। न च तदा तुल्यबलतया सत्प्रतिपक्षत्वमेवेति वाच्यम्। अव्यवहितोत्तरसमये अधिकबलेनापि[1] बाधरूपानुमित्यजननापत्तेः। यदि च हीनबलत्वप्रयोजकं दोषान्तरमपि[2] ज्ञातं, तदा तस्यापि प्रतिबन्धकत्वमस्तु, प्रत्येकमवधृतसामर्थ्यात् विनिगमनाभावात्। अन्यथा हेत्वाभासद्वयावतारकालेऽप्युभयस्य प्रतिबन्धकत्वं न स्यात्। दोषान्तरसंकीर्णाया एवस्याः सर्वत्र प्रतिबन्धकत्वात् तद्विषयस्य न हेत्वाभासतोपाधित्वम्। अतथाभूतज्ञानविषयस्यैव तथात्वात्।

तर्कचूडामणिः

ननु बाधोत्पत्तिकालीनानुमितिप्रसङ्गवारणाय अधिकबलोपस्थितिप्रतिबन्धकत्वं स्यादित्यपरितोषादाह– किं चेति। हीनबलत्वमप्रामाण्यशङ्कास्कन्दितत्वम्। न हि तत्र व्यभिचारसंशयादिकमन्तरेणान्यतरपरामर्शो तादृशशङ्का संभवतीति भावः। तत्सामग्रीत्वेनेति। यद्यपि मनोयोगादिनानाकरणसमुदायस्येव सामग्रीत्वेन परामर्शस्य सामग्रीत्वमसिद्धम्; तथापि स्वोत्तरभाविज्ञानापेक्षा[3] नियतिशून्यत्वरूपचरमकारणत्वमत्र सामग्रीत्वमिति भावः। किं चेत्यादिकमुद्धरति–[3]यदि चेति। प्रतिबध्यस्य लिङ्गस्य व्यभिचाराद्यनवगमेऽपि कोटिस्मरणादिवशात्तत्परामर्शेऽप्रामाण्यशङ्का स्यादेवेत्यभिप्रायेण यदि चेत्युक्तम्। नन्वेवमधिकबलोपस्थितिविषयस्य हेत्वाभासान्तरत्वं स्यात्, उक्तलक्षणालक्षितत्वेन सत्प्रतिपक्षानन्तर्भावादित्यत आह–दोषान्तरेति। प्रतिबध्यलिङ्गगतदोषान्तरेत्यर्थः। यद्यपि प्रतिबध्यलिङ्गे दोषान्तरज्ञानमनावश्यकमेवः तथापि अप्रामाण्यज्ञानस्य पुरोवर्तिनि तदभावज्ञानरूपतया [4]व्याप्तिज्ञानप्रामाण्यसंशयस्यैव लिङ्गे व्याप्त्यभावज्ञानतया दोषत्वमिति भावः। [4]अतथेति। यज्ज्ञानं [5] दोषान्तरासंकीर्णमनुमितिप्रतिबन्धकं तस्यैव हेत्वाभासत्वादित्यर्थः। न चैवं हेत्वाभासलक्षणस्य तत्रातिव्याप्तिरिति वाच्यम्।

---

1 लिङ्गेन बाधरूपानुमितिजननापत्तेः–ख 2 ज्ञातं तदा–ख
3 नियत–ग
4 व्याप्तिज्ञानसंशयस्यैव –ग
5 दोषान्तरसंकीर्ण–ग

प्रकाशः

अत एव बाधस्य दोषासंकरार्थ प्रयास इति ।

धूमोऽयं न व्याप्तपक्षधर्मः पर्वतवृत्तित्वादित्यादौ यदा बाधावतारस्तदा पर्वतवृत्तित्वादौ लिङ्गेऽतिव्याप्तिः, बाधरूपोपस्थितेः व्याप्तिपक्षधर्मताविषयत्वेन बलोपस्थितित्वात् । स्वयं च निर्णयरूपतया निर्णयाजनकत्वेन समत्वाच्चेत्यत आह—**साध्यविरोधीति** । साध्यविरोध्युपस्थापनसमर्थत्वमुपस्थितौ विशेषणम् । बाधरूपोपस्थितिरतु साध्यविरोध्युपस्थितिरेव न तु तज्जनिकेति तद्व्युदासः । न च बलपदस्य स्वविरोधिबलपरत्वादेव नातिप्रसङ्ग इति वाच्यम् । उक्तविशेषणदानेनैव तत्पर्यवसानात् । न तु केवलमेव बलपदं तत्परम् । विशेषणवैयर्थ्यापत्तेः । साध्यविरोध्युपस्थापनसमर्थत्वं च साध्यसिद्धिविरोध्युपस्थितिजनकत्वम्, अतो न केवलान्वयिसत्प्रतिपक्षाव्याप्तिः ।

ननु यत्रानित्यत्वव्याप्यकृतकत्वनिश्चयः सत्प्रतिपक्षात्मा, तत्रैव समूहालम्बनात्मके नित्यत्वविरुद्धं नन्यत्वमपि भातम्, तत्र नित्यत्वविरुद्धत्वेन ज्ञायमानजन्यत्वेऽतिव्याप्तिः, नित्यत्वरूपसाध्यविरोध्यनित्यत्वोपस्थितिसमर्थया निर्णयाजनकत्वेन समानया तथैव बलोपस्थित्या तस्य प्रतिरुद्धकार्यत्वात् ।

तर्कचूडामणिः

तत्रापि दोषान्तरासंकीर्णानुमितेप्रतिबन्धकज्ञानविषयावच्छेदकत्वस्य विवक्षितत्वादिति भावः **निर्णयाजनकत्वेनेति** । न च तादृशबाधस्य वह्न्यनुमितिजनकतया निर्णयाजनकत्वमसिद्धमिति वाच्यम् । प्रकृतसाध्यनिर्णयाजनकत्वस्य तदर्थत्वात् । अन्यथा सत्प्रतिपक्षस्थले समूहालम्बनपरामर्शस्य स्वानुव्यवसायादिजनकतया असंभवापत्तेः । बलविशेषणत्वेऽसंभवादाह -- **उपस्थिता-विति** । ननु बाधबुद्धेरपि बाधबुद्ध्यन्तरजनकत्वात् अजनकत्वमसिद्धमिति चेत्—न । साध्यसिद्धिविषयाभावानवगाहित्वस्यापि उपस्थितिविशेषणत्वेन विवक्षितत्वात् इति । **स्वविरोधीति** । स्वसाध्यसिद्धिविषयाभावानवगाहित्वसाध्यसिद्धिप्रतिबन्धकज्ञानविषयेत्यर्थः । **सत्प्रतिपक्षात्मेति** ॥ नित्यत्वव्याप्यश्रावणत्वं चेत्यर्थः । ननु तदपि लक्ष्यमेवेत्यत आह — **नित्यत्वविरुद्धत्वेनेति** । इदं चोपलक्षणम्—व्यभिचारत्वादिना ज्ञायमान इत्यपि द्रष्टव्यम् ।

---

1 समानत्वाच्च–ख
2 बाधोपस्थिति–ख
3 पस्थापनसमर्थतया–ख
4 बाधबुद्धयापि–ग

प्रकाशः

न च बलोपस्थितित्वेन प्रतिबन्धकत्वं विवक्षितम् । विरुद्धत्वोपस्थितेश्च सहचार निश्चयविनरोधित्वेन तत्त्वमिति वाच्यम् । एवं हि पर्वतवृत्तित्वादौ हेतावतिप्रसङ्गाभावात् विशेषणवैयर्थ्यमेव । न हि तत्र बलोपस्थितित्वेन प्रतिबन्धकत्ववं कि तु ग्राह्याभावनिश्चय त्वेनैवेति चेत् – अत्राहुः बलोपस्थितित्वेनैव प्रतिबन्धकत्वं विवक्षितम् । एवं च सर्वाण्येव विशेषणानि असंभववारणानिति न तद्व्यैयर्थ्यम् । तथा हि बलोपस्थिति त्वेनप्रतिबन्धक त्वमसंभवि । स्वीयबलोपस्थितेरप्रतिबन्धकत्वात् । अतः साध्यविरोधीत्यादि उपस्थितौ विशेषणम् । केवलान्वयिसत्प्रतिपक्षसंग्रहानुरोधाच्चानेनैव रूपेण प्रतिबन्धकत्वम्' न तु साध्याभावसहकबलोपस्थितित्वेनेति नोक्तदोषतादवस्थ्यम् । साध्यविरोध्युपस्थितिजननस्वरूपयोग्य वस्य हीनबलोपस्थितावपि सत्त्ववेन तत्त्वं न प्रतिबन्धकतावच्छेदकमिति असंभवतादवस्थ्येन तद्वारणार्थं समानपदम् । समानत्वं च प्रतिबन्ध्यापेक्षया वैलक्षण्यवत्तया अनिर्धार्यमाण त्वम् । न च हीनायां बलोपस्थितौ तदस्ति । एवं च बाधतत्सामग्र्यादावतिव्याप्तिरेव नास्तीति न तद्वारणाय तद्विशेषणमिति ।

तर्कचूडामणिः

अत्र तादृशसमूहालम्बनरूपपरामर्शस्य बलोपस्थितित्वेनापि प्रतिबन्धकत्वमयेव । अन्यथा तत्रैव सत्प्रतिपक्षे श्रावणत्वे लिङ्गेऽव्याप्त्यापत्तेरिति दोषे सत्येव दोषान्तरमाह— एवं हीति । न च जन्यत्वस्य कृतकत्वाभिन्नतया लक्ष्यत्वमेवेति वाच्यम् । अनित्यत्वे साध्ये तस्य स प्रतिपक्षितत्वेऽपि नित्यत्वे तस्य तथात्वात् (अतथात्वात्) ! कृतकत्वभिन्नजन्य त्वस्य विवक्षितत्वाद्वा । नन्वेवमतिव्याप्तिप्रसङ्गाभावेन विशेषणवैयर्थ्यापत्तिरित्यत आह–एवं चेति

नन्वेवमसंभवः , लाघवेन साध्याभावोपस्थापकज्ञानत्वेनैव प्रतिबन्धकतया उक्तरूपेणाप्रति बन्धकत्वादित्यत आह — केवलेति । ननु तदपि निर्णयाजनकत्वेन समानमेवेत्यत आह —समानत्वं चेति । अनिर्धार्यमाणत्वम् अनिर्धार्यमाणविषयकत्वम् ।

---

1 विरुद्धोप क 2 'किं तु –प्रतिबन्धकत्वम्' नास्ति क
3 वारणायेति क 4 साधनोप क
5 'रूप' नास्ति ग 6 सत्प्रतिपक्षिते श्रावणे-क

प्रकाशः

अत्रेदं चिन्त्यम्–[1] तादृशबलोपस्थितित्वमपि न प्रतिबन्धकतावच्छेदकम्। तथाहि यत्रोभयहेतुपरामर्शकाले उभयत्रापि बाधाद्यवतारेणोभयस्यापि हीनबलत्वं तत्र तदुपस्थितावति प्रसङ्गेन पुनरप्यसंभव एव। [2] तस्या अपि प्रतिबन्ध्यापेक्षया वैलक्षण्यवत्तया अनिर्धार्यमाणत्वेन समानत्वात्। न च तदा सत्प्रतिपक्षितत्वमिष्टमेवेति वाच्यम्। अपसिद्धान्तात्। बाधादेवानुमितिप्रतिबन्धसंभवात्! [3] बाधितेनापि सत्प्रतिपक्षे हेत्वाभासान्तरेणापि तदापत्तेः। [4]न च बाधानवतरकालीनत्वमेव समानत्वम्। तथा सति पूर्वोक्तसत्प्रतिपक्षात्मकनित्यत्वविरुद्धोपस्थितावतिप्रसङ्गेनासंभवतादवस्थ्यात्। किं चाधिकबलोपस्थितेरपि प्रतिबन्धकत्वात् समानबलोपस्थितित्वं न प्रतिबन्धकतावच्छेदकम्, किं त्वन्यूनबलोपस्थितित्वमेव। न च समानपदेन तथैव विवक्षितमिति वाच्यम्। हीनबलेऽतिव्याप्त्यापत्तेः। अनेनैव रूपेणाधिकबलोपस्थित्या [5]प्रतिरुद्धकार्यलिङ्गत्वाच्च।

नन्वधिकबलोपस्थितेर्विरोधिसामग्रीत्वेन प्रतिबन्धकत्वं न [6]त्वनेन रूपेणेति चेत्—हन्तैवं समानबलोपस्थितेरपि विरोधिसामग्रीत्वेन[7] प्रतिबन्धकत्वमस्तु। परस्परविरुद्धार्थकशब्दस्थले

तर्कचूडामणिः

उभयत्रापीति। व चोभयत्र बाधावतारासंभव इति वाच्यम्। गोत्वाश्वत्वसाधकानुमानयोस्तत्संभवात्। हेत्वाभासान्तरेणेति। तत्त्वेन ज्ञायमानेनेत्यर्थः। अत्र हीनबलोपस्थितेरपि प्रतिबन्धकत्वापत्तिरिति दोषे सत्येव दोषान्तरमाह–तथा सतीति। ननु विरुद्धत्वोपस्थितेरनेनापि रूपेण प्रतिबन्धकत्वमिष्टमेव। अन्यथा तत्प्रतिबध्यश्रावणत्वलिङ्गाद्यव्याप्तेरित्यरुचेराह–किं चेति। नन्वधिकबलोपस्थितेरेव विरोधिसामग्रीत्वेन प्रतिबन्धकत्वम्, तदनन्तरं [8]विरोधिज्ञानोत्पत्तेः, न तु समानबलोपस्थितेरपि तेन रूपेण प्रतिबन्धकत्वम्, तदनन्तरं

---

1 'तादृश' न नि –क
2 तस्यापि—क
3 बाधितेन सत्प्रति—क
4 न च बाधाव ....प्रतिबन्धकत्वात् इति ग्रन्थस्त्रुटितः
5 प्रतिबद्ध–क
6 त्वेनैव – ख
7 सामग्रीत्वेनैव–क
8 विरोधिज्ञानापत्तेः–क

प्रकाशः

तथा प्रतिबन्धकत्वकल्पनात् । तथा च सुतरामसंभवः, तेन रूपेण क्वचिदपि प्रतिबन्धकत्वाल्पनात् । [3]तस्मात् बलोपस्थितित्वेनाप्रतिबन्धकत्वेऽपि यदुपस्थितेः प्रतिबन्धकत्वे व्याप्तिपक्षधर्मतारूपं बलं केनापि रूपेण विषयतावच्छेदकं तदुपस्थित्या प्रतिरुद्धकार्यत्वं विवक्षितम् । तथा च पर्वतवृत्तित्वादिप्रतिबन्धकबलोपस्थितेर्ग्राह्याभावोपस्थितित्वेन प्रतिबन्धकत्वम् । व्याप्तिपक्षधर्मताविरहस्य च तत्र ग्राह्यतया तदभावरूपस्य बलस्य ग्राह्याभावरूपतया तदवच्छेदकत्वमित्यतिव्याप्तिः, तद्वारणाय साध्यविरोधीत्यादिविशेषणम् । अनित्यत्वव्याप्य कृतकत्वनित्यत्वविरुद्धजन्यत्वनिश्चयरूपबलोपस्थितौ च समूहालम्बनरूपायां विषयतया न बलं प्रतिबन्धकतावच्छेदकम्, किं तु विरुद्धावमात्रम् । तावतैव तस्याः सहचारधीप्रतिबन्धद्वारा व्याप्तिधीप्रतिबन्धकत्वसंभवादिति ।

तर्कचूडामणिः

तज्ज्ञानानुत्पादेन सामग्रीत्वासिद्धेरित्यत आह—**परस्परे**ति । न हि यदनन्तरं कार्यं भवत्येव तादृशासामग्री अत्र विवक्षिता, परस्परविरुद्धशब्दस्थले विरोधिसामग्रीत्वेन प्रतिबन्धकत्वानापत्तेः । किं तु यदनन्तरमसति प्रतिबन्धके कार्यं भवत्येव तादृश्येव विवक्षितेति भावः । एतादृशसामग्रीमादायैव सामग्रीकालीनकार्यानुत्पादव्याप्यत्वं प्रतिबन्धकत्वमिति प्रवादः ।

ननु समूहालम्बनरूपोपस्थितेर्विरुद्धवत् विरोधिव्या रपि विषयतया विनिगमकाभावेनोभयोरपि प्रतिबन्धकतावच्छेदकत्वम् ।न च तत्र व्याप्तिज्ञानविलम्बादेवनुमितिविलम्बेनाधिकबलोपस्थितेरप्रतिबन्धकत्वमिति वाच्यम् । यस्मिन् सति नियमतो नानुमितिस्तस्यैव प्रतिबन्धकतया तदुपस्थितेरपि

1 स्वनेनैव–ख
2 सामग्रीत्वेनैव–ख
3 तस्मादुप–क
4 प्रतिबद्ध–क
5 पर्वतवृत्तित्वादिलिङ्गप्रति–ख
6 'बलस्य' ना
7 ग्राह्याभावस्य तत्त्वात्तदव–क
8 'रूप' नास्ति ।–क
9 'धी' नास्ति –क
10 एतेन समू–ग

प्रकाशः

लिङ्गपदं च व्याप्तिपक्षधर्मतया ज्ञातत्वपरम्। एतादृशबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गे विरुद्धत्वेन ज्ञायमाने जन्यत्वादावतिप्रसङ्गः। अत एव चात्ममनःप्रभृतौ विरुद्धव्यभिचारिणि वा तत्त्वेन ज्ञायमाने नातिव्याप्तिः। तदपि हि तादृशबलोपस्थित्या प्रतिरुद्धकार्यमेव। तत्प्रतिरुद्धायामनुमितौ लिङ्गत्वादात्मादेरपि कारणत्वात्। न च साध्यविरोधीत्यत्र साध्यपदं स्वसाध्यपरम्। अतः कथमलिङ्गे तत्रातिव्याप्तिरिति वाच्यम्। साध्यं हि ज्ञाप्यं लिङ्गस्येवात्मादेरपीति सर्वं सुस्थम्।

तर्कचूडामणिः

तथात्वात्। कार्यानुत्पादव्याप्यत्वमात्रं वा प्रतिबन्धकत्वं विवक्षितमित्यपरितोषादाह—लिङ्गपदं चेति। लिङ्गपदं वेत्यर्थः।

अत्रेदमालोचनीयम्—यज्ज्ञाने सति नियमतोऽनुमितिप्रतिबन्धः तस्यैव हेत्वाभासत्वम्। अन्यथा उपाधेरपि तथात्वापत्तेः। न च विरोधिव्याप्यत्वबुद्धेः नियमतोऽनुमितिप्रतिबन्धकत्वम् गोत्वाश्वत्वसाधकानुमानद्वये परामर्शसत्त्वेऽपि एकत्र बाधावतारेऽनुमितेरुत्पत्तेः। न च बाधनिश्चयाविषयविरोधिव्याप्यबुद्धेः प्रतिबन्धकतया तद्विषयस्य तत्त्वमिति वाच्यम्। बाधनिश्चयाविषयत्वज्ञानस्याप्रतिबन्धकतया तद्घटितस्य तदुपाधित्वाभावात् किं च प्रतिसाधनमात्रं न हेत्वाभासतोपाधिः, तज्ज्ञानेऽपि व्याप्यत्वाद्यज्ञाने अनुमित्यप्रतिबन्धात्। किं तु ग्राह्याभावव्याप्तिपक्षधर्मताविशिष्टप्रतिसाधनम्। तथा च व्यभिचारिणोऽसिद्धस्य च तदनुपाधितया सद्धेतोः तेन हेत्वाभासत्वं न स्यात्, तत्र व्याप्तिवैशिष्ट्यपक्षधर्मतयोरभावात्। न च तत्रापि ज्ञानसंबन्धेन तयोः सद्भाव इति वाच्यम्। तत्र तज्ज्ञानस्य यथार्थत्वाभावेन तत्संबन्धत्वाभावात्। अन्यथा धूमेऽपि व्यभिचारसंबन्धापत्तेः।

---

1 एतादृशोप-क
2 प्रतिबद्ध-ख
3 तत्प्रतिबध्या-ख
4 तथात्वम्-ग
5 विवक्षितं तदाह-ग
6 'नियमतो - व्याप्यबुद्धेः' नास्ति।-ग
7 बाधनिश्चयविषयत्व-ग
8 व्याप्तिपक्ष-ग

प्रकाश :

[1]यत्तु समानबलोपस्थित्या प्रतिरुद्ध[2]कार्यलिङ्गत्वमेव लक्षणम् । समानत्वमेव केन रूपेण विवक्षितमित्यपेक्षायां साध्यविरोध्युपस्थापन[3]समर्थत्वं विशेषणम् । तथा चानेन रूपेण समानया बलोपस्थित्या प्रतिरुद्धकार्यत्वमिति विवक्षितमिति । तन्न । अधिकबलोपस्थित्या प्रतिरुद्धे हीनबलेऽतिव्याप्तेः । सा च न समाना किं त्वधिकेति न वाच्यम् ।

तर्कचूडामणिः

अपि च विरोधिपरामर्शस्य ग्राह्याभावव्याप्यबुद्धित्वं न प्रतिबन्धकतावच्छेदकम् । गोत्वव्याप्यपरामर्शस्याश्वत्वानुमित्यप्रतिबन्धकतापत्तेः । केवलान्वयिन्यव्याप्तेश्च । नापि साध्यविरोधिव्याप्यत्वज्ञानत्वम् । वस्तुगत्या यत् साध्यविरोधि[5] तद्व्याप्यत्वविवक्षायां गोत्वाश्वत्वयोरविरोधभ्रमदशायां गोत्वव्याप्यत्वबुद्धेः प्रतिबन्धकतापत्तेः । विरोधित्वेन ज्ञायमानत्वविवक्षायां[6]ग्राह्याभावस्य ग्राह्य[7]विरोधित्वाज्ञानदशायां तद्व्याप्यबुद्धेः अप्रतिबन्धकतापत्तेः ।

किं च तद्विरोधित्वं [8]तदधिकरणानाधिकरणत्वं तदनधिकरणाधिकरणत्वं वा उभयथापि केवलान्वयिसत्प्रतिपक्षाव्याप्तिः । न च साध्यानुमितिप्रतिबन्धकज्ञानविषयव्याप्यज्ञानत्वं प्रतिबन्धकतावच्छेदकमिति नोक्तदोष इति वाच्यम् । वस्तुगत्या तज्ज्ञानविषयो यः तद्व्याप्यत्व[9]ज्ञानविवक्षायां गोत्वाश्वत्वयोरविरोधभ्रमदशायां गोत्वव्याप्यत्वबुद्धेः प्रतिबन्धकतापत्तेः । तज्ज्ञानविषयत्वस्यापि[10] विषयतावच्छेदकत्वे तदज्ञानदशायां साध्याभावव्याप्यबुद्धेः अप्रतिबन्धकतापत्तेः ।

अत एव साध्यविरोधि त्वज्ञानकालीनतद्विरोधिव्याप्यज्ञानं प्रतिबन्धकमित्यपास्तम् । उच्यते (उक्तग्रन्थे) साध्याभावव्याप्यपक्षधर्मस्य साध्यविरोधिव्याप्यपक्षधर्मस्य साध्यसंबन्धा

---

1 केचित्ते-ख
2 कार्यत्वमेव-क
3 समर्थत्वेन-ख
4 समानार्थत्वात्-ख
5 तद्विवक्षायां-ग
6 विवक्षायां
7 विरोधित्वाज्ञान-ग
8 यदि तदधि-क
9 विवक्षाया-ग
10 विषयतानवच्छेदकत्वे-ग

बलं च व्याप्तिपक्षधर्मते । विरोधिबोधकान्यगमकतौपयिकरूपसंपत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यत्वं वा तत्त्वम् ।

प्रकाशः

साध्यविरोध्युपस्थितिसमर्थत्वेन तस्यापि समानत्वात् । प्रकारान्तरेण समानत्वविवक्षायां समाध्येत्यादिविशेषणवैयर्थ्यापत्तेः ।

ननु बलं सपक्षसत्त्वादिकं विपक्षासत्त्वादिकं वा । आद्ये व्यतिरेक्यव्याप्तिः । अन्त्ये केवलान्वयिन्यव्याप्तिरित्यत आह—**बलं चेति** । व्याप्तिश्च स्वसाध्यसिद्ध्यनुकूला विवक्षिता सा च क्वचिदन्वयव्याप्तिः क्वचित् व्यतिरेकव्याप्तिरिति भावः । **विरोधीति** । अत्राप्यधिकबलोपस्थित्या प्रतिरुद्धकार्ये लिङ्गेऽतिव्याप्तिवारणाय विरोधिबोधकान्येति गमकतौपयिक[1]रूपविशेषणम् । बोधकत्वं च न स्वरूपयोग्यत्वम्, किं तु फलोपहितत्वम् । तेन सत्प्रतिपक्षस्यापि विरोधिबोधस्वरूपयोग्यत्वेन तदन्यत्वासंभवान्नासंभवः । तदर्थोऽपि विरोधी यो बोधः तदुपहितान्यत्वम् । अतो न केवलान्वयिसत्प्रतिपक्षे विरोधिबोधकाप्रसिद्ध्या अव्याप्तिः । गमकतौपयिकं च रूपं व्याप्तिपक्षधर्मते । तत्रापि व्याप्तिपक्षधर्मतया ज्ञातत्वपरलिङ्गपदं बोध्यम् । तेन न पूर्वोक्तातिव्याप्तिः ।

तर्कचूडामणिः

भावव्याप्यपक्षधर्मादेश्च प्रत्येकं दोषतया उक्तदोषाभावात् । उक्तविभजनेरेकीकृतत्वाच्च न विभागव्याघातः । तथा चासद्धेतोरेव साध्याभावादिव्याप्यरूप दोषवत्तया सत्प्रतिपक्षत्वं न तु सद्धेतोरपि । तत्र हेत्वाभासताप्रयोजकदोषाभावदिति सद्धेतुर्न कदापि हेत्वाभास इति मतमेव साधीयः । न चैवं विभाजकोपाध्यतिप्रसङ्गः । उपस्थितिपदस्य प्रमापरत्वात् । अत एव यत्र सद्धेतुद्वयं तत्रापि न हेत्वाभासत्वम् । पुरुषदोषादेवानुमितिवीरह इति वयमालोचयामः

ननु निर्णयाजनकत्वेन समानत्वं विवक्षितमित्यत आह —**प्रकारान्तरेणेति** ।

---

1 रूपत्र तोविशेषणम्—ख

स्थापनायाः व्याप्तिपक्षधर्मत्वमुभयत्वादिसिद्धम् , वादिना तदभावा-नुपन्यासात् । द्वितीयस्य तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधितमिति स्वार्थानुमान एवायं दोष इत्येके । तन्न । निरन्तरयोर्वा उभयोर्व्याप्ति पक्षधर्मतया ज्ञातयोः प्रतिपक्षत्वात् । युगपदुपस्थितेः कारणवशेन स्वपर साधारणत्वात् ।

अथ वस्तुनोऽव्यात्मकत्वेन व्याप्तिपक्षधर्मताभङ्ग एकत्रावश्यक इति स एव दोषः । न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्याप्त्यादिभङ्गनियम इति वाच्यम् ।

प्रकाशः

यत्तु यन्मते चक्षुरादिकमप्यनुमानेन सत्प्रतिपक्षितं तन्मते तत्साधारणमपि लक्षणं भवत्विति लिङ्गपदमत्र नोक्तमिति । तन्न । [1]तन्मते हि यदा चक्षुरनुमानेन न सत्प्रतिपक्षितं भवति तदा चक्षुषाप्यनुमानं सत्प्रतिपक्षितं वाच्यम् । [2]तच्चोक्तलक्षणासंगृहीतं स्यात्, ज्ञायमानतया चक्षुषोऽप्रतिबन्धकत्वात् । अग्रे चक्षुरादेश्चेत्यनेन [3]ग्रन्थकृतस्तन्मतस्यैव दूष्यत्वाच्चेति ।

एकदा निरन्तरयोर्वेति । सामग्र्यनियमात् क्वचिदेकदा क्वचिन्निरन्तरयोरिति व्यवस्थितविकल्पः । न चाग्रिमपरामर्शकाले प्रथमपरामर्शेनानुमितिजननापत्तिः । विरोधिपरा मर्शसामग्र्या एव तदा प्रतिबन्धकत्वात् । अग्रिमपरामर्शस्य च प्रतिबन्धकतया तदभावस्य कार्यसहभूतस्यैव जनकत्वाभ्युपगमेन तत्काले तदभावाच्च । स्वपरसाधारणत्वादिति ।

तर्कचूडामणिः

यत्त्विति । विरुद्धत्वादिना अज्ञायमानत्वविशेषणान्न पूर्वोक्तविरुद्धातिव्याप्तिरिति भावः । ननु लिङ्गस्य प्रतिबन्धकत्वे प्रत्यक्षस्यापि तत्प्रतिबन्धकत्वं भवतु, प्रतिपक्षविधया माना-भावादित्यत आह - अग्र इति । विरोधीति । यद्धीरिति न्यायादिति भावः ।

---

1 भवति–ख

2 तच्च नोक्तलक्षणसंगृहीतमिति । तन्न । ज्ञायमानतया–ख

3 ग्रन्थकृतैव दूषितत्वाच्च–ख

अविरोधेऽप्यनुमित्यविरोधात्, विरोधे तु व्याप्त्यादिभङ्गनियमादिति चेत्—न। प्रतिरुद्धत्वज्ञानानन्तरं व्याप्त्यादिभङ्गज्ञानमित्युपजीव्यत्वेन व्यभिचारवदस्यापि दोषत्वात्।

ननु साध्यतदभावयोरिव तद्व्याप्यत्वेनावधारितयोर्विरोधादेकत्र न निश्चयः, किं तु संशयः। निश्चये वान्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेत्—न।

प्रकाशः

तथाचास्यापि दूषणसमर्थत्वापद्दोषान्तरवदुद्भावनं परार्थानुमानेऽप्यविरुद्धमिति भावः। प्रतिरुद्धत्वेति। विरोध्युभयपरामर्शविषयीभवत्प्रतिसाधनज्ञानानन्तरमित्यर्थः। प्रतिरुद्धत्वज्ञानस्यत् प्रतिरोधहेतुत्वात्।

उभयोरेकत्वेति। ननु विरोधादेकत्र निश्चय एव कुत इति चेत्—न। हेत्वोर्विरोधास्फूर्तौ साध्ययोश्च तत्प्रतीतौ स्वसामग्रीसमाजादुभयोः परामर्शसंभवात्। न हि साध्यविरोध एव हेतुविरोधः। उभयपरामर्शानन्तरं साध्ययोर्विरोधप्रतिसन्धाने च सत्प्रतिपक्षसंभवात् किं च प्रत्यक्षरूपे परामर्शे विरोधिव्याप्यवत्त्वग्रहो न प्रतिबन्धकः, पीतः शङ्ख इति भ्रमानुबोधव

तर्कचूडामणिः

तत्काल इति। परामर्शकाले तदभावादिति भावः। न च ज्ञानाभावातिरिक्ताभाव एवायं नियम इति वाच्यम्। कार्याभावातिरिक्तप्रतिबन्धकाभावत्वेन हेतुत्वेऽपि न कार्यसहभाव इति। ननु तथापि प्रतिवादिना स्थापनायां व्याप्त्यादिभङ्ग एवोपन्यसनीय इत्तआह-तथा चेति। प्रतिरुद्धत्वेति। प्रतिपक्षितत्वेन्यर्थः। प्रतिरोधेति। अनुमितिप्रबन्धेन्यर्थः। ग्राह्य भावव्याप्यानवगाहनादिति भावः।

---

1 तदा चास्य दूषण—क 2 विरुद्धत्वेति—ख
3 विरुद्धत्व—ख 4 स्थापनायाः-ग
5 तत्प्रतिपक्षौ—क 6 भ्रमानुपपत्तेः—ख

उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इति उपजीव्यत्वेनास्य भिन्नत्वात्। दूषकताबीजं तु समबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वम्, न तु व्यापिपक्षधर्मताविरह एव, सद्धेतावपि सत्प्रतिपक्षत्वात्।

प्रकाशः

किं तु [1]ग्राह्याभावज्ञानमेव। तस्य च तत्राभावात् सत्प्रतिपक्षासंभवादिति भावः। तथा च नित्यत्वव्याप्यवत्त्वग्रहेऽप्यनित्यत्वव्याप्यवत्त्वग्रहो न विरुद्धः। तेन नित्यत्वव्याप्याभावानवगाहनात्।

ननु दुष्टत्वमेवास्य कथं, दुष्टत्वे वा कदाप्यदुष्टत्वं स्यादिति कदाचिद्दुष्टतायां किं बीजमित्यत आह—**दूषकताबीजमिति**। हेत्वाभासताप्रयोजकम्। तथा च विरोधिपरामर्शविषयीभवन्नयं निर्णयं न जनयतीयत एव हेत्वाभासो न तु व्याप्त्याद्यभावात्। तथा च सद्धेतोरपि तस्य तथात्वम्।

तर्कचूडामणिः

साध्यविरोधस्य हेतुविरोधान्यत्वेऽपि तद्विरोधावगमे सति तद्व्याप्यग्रहो न संभवति न हि संभवति नित्यत्वानित्यत्वे विरुद्धे तदुभयव्याप्यवांश्चायमिति ज्ञानमित्यत आह—**उभयेति**। ननु विरोधप्रतिसन्धानपूर्वकालीनपरामर्शद्वयस्यासत्प्रतिपक्षतया तदुभयानुमितिरेव स्यात्, द्रव्यत्वव्याप्यत्वघटत्वव्याप्यदर्शनादिवत् न तु प्रतिबन्धः। न हि विरोधज्ञानमनुमितिप्रतिबन्धकम् येन तत्सामग्र्या अप्यनुमितिप्रतिबन्धकत्वं स्यादित्यरुचेराह—**किं चेति**। **ग्रहमात्रमिति**। प्रत्यक्षमात्रमित्यर्थः। ननु निर्णयाजनकत्वज्ञानस्याप्रतिबन्धकतया कथं दूषकताबीजत्वमित्यत आह—**हेत्वाभासतेति**।

---

1 ग्राह्याभावमात्रम् 'ग्राह्याभावग्रहमामिति व्याख्यानसंमतः पाठः—ख

एकत्र व्याप्तिभङ्गज्ञानद्वारा वा अस्य दूषकत्वम् । चक्षुरादेश्च नानुमानेन प्रतिरोधः, तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात् ।

प्रकाशः

अत एव न सर्वदैव तथात्वम् । तादृशविरोधिपरामर्शस्य कादाचित्कत्वात् । न तु दूषकताबीजम् अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकम् इति भ्रमः कर्तव्यः । निर्णयाजनकत्वज्ञानस्याप्रतिबन्धकत्वात् । तादृशज्ञानविषयतावच्छेदकं च प्रतिहेतुद्वयमेव । तद्वत्त्वं च यथा तदुभयस्य तथोक्तं प्राक् । **एकत्रेति** । अन्यतरत्वप्रकारकव्याप्त्यादिभङ्गज्ञानजनकत्वलक्षणेन वाऽनतिप्रसक्तेन **दुष्टबीजेनास्य** हेत्वाभासत्वमित्यर्थः । तच्च कादाचित्कमिति न सदाऽस्यहेत्वाभासत्वमिति भावः । **एवं च यदि** व्याप्त्यादिभङ्गज्ञानद्वाराऽस्य दोषत्वं तदा दूषकतायामसिद्ध्युपजीवनान्नास्य हेत्वाभासत्वं पृथगिति निरस्तं बोध्यम् । नन्वनुमानप्रतिरुद्धे चक्षुरादौ लिङ्गत्वाभावादुक्तलक्षणयोरव्याप्तिः । तस्य व्याप्तिपुरस्कारेणागमकत्वात् तद्भङ्गज्ञानद्वारा तस्य दूषकत्वसंभवाच्चेत्यत आह—**चक्षुरादेश्चेति** । **तदुपस्थितावपीति** । पीतत्वाभावव्याप्यशङ्खत्वोपस्थितावपि पीतप्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः ।

तर्कचूडामणिः

ननु किं तर्हि तादृशज्ञानविषयतावच्छेदकम् कथं वा तदभावे हेतोराभासतेत्यत आह—**तादृशेति** । **दुष्टबीजेनेति** । हेत्वाभासताप्रयोजकेनेत्यर्थः । **लिङ्गत्वाभावादिति** । व्याप्तिपक्षधर्मतया ज्ञातत्वाभावादित्यर्थः ।

---

1 सर्वथैव–क
2 कदाचित् सत्त्वात्–ख
3 एतच्च–क
4 व्याप्त्यादिज्ञानभङ्गद्वारा–ख
5 प्रतिबध्ये–क
6 दूषगत्वा–ख
7 तदुपस्थिताविति–क
8 हेत्वाभासता–ग

नन्वेवं वादिवाक्यमात्रस्य प्रतिरोधकत्वेनानुमानमात्रोच्छेदः। न च विरोधिवाक्यस्य न्यूनबलत्वे लक्षणायोगः, समानबलत्वे प्रतिरोध एव, अधिकबलत्वे नरशिरःशौचानुमानवत्तेन बाध एवेति वाच्यम्। अगृह्यमाण विशेषदशायां प्रतिवादिवाक्येन सर्वानुमानप्रतिरोधापत्तेः। अनुमानात् पूर्वं पश्चाद्वा अनुमानान्तरेण तस्य न्यूनाधिकबलत्वानिरूपणात्। निरूपणे वा अनुमानवैयर्थ्यापत्तेः।

मैवम्। विरोधिवाक्यमात्रस्य समबलत्वाभावात्। उक्तं हि–"व्याप्तिपक्षधर्मते बलम्" इति।

प्रकाशः

नन्वेवमिति। यदि न समानबलमात्रेण सत्प्रतिपक्षत्वाभ्युपगम इत्यर्थः। समान बलत्व इति। व्याप्त्यादि तत्र बलमभ्युपेत्य लक्षणायोगे दोषे सत्येव दोषान्तरमाह—अधिम केति। तस्येति। विरोधिवाक्यस्याधिकबलत्वे ज्ञाते अनुमेयस्य बाधितत्वादेवानुमानवैयर्थ्यं न्यूनबलत्वे च ज्ञाते साध्यनिश्चयादेव तद्वैयर्थ्यमिति भावः।

उक्तं हीति। शब्दरूपे च प्रमाणे न तादृशं बलमित्यर्थः। प्रतिज्ञादिवाक्यजनित ज्ञानमप्रामाण्यशङ्कास्कन्दितमिति न प्रतिबन्धकमिति भावः।

तर्कचूडामणिः

प्रत्यक्षस्याधिकबलत्वमेवंशब्दार्थ इति भ्रमं वारयति—यदीति। ननु शब्दस्य व्याप्त्याद्यभावेन कथं समबलतेत्यत आह—व्याप्त्यादीति। ननु विरोधिवाक्यस्य न्यूनबलत्वे ज्ञाते साध्यनिश्चयात् वैयर्थ्यसंभवेऽप्यधिकबलत्वज्ञाने साध्यनिश्चयान्न वैयर्थ्यं स्यादित्यत आह-विरोधीति।

ननु विरोधिवाक्यस्य सत्प्रतिपक्षतया अप्रतिबन्धकत्वेऽपि तज्जन्तज्ञानस्य बाधज्ञानत्वेन प्रतिबन्धकता स्यादित्यत आह—प्रतिज्ञेति। अत एव विरोधिवाक्यस्य बाधज्ञानसामग्रीत्वे-प्रतिबन्धकत्वमपास्तम्।

---

1 वादिवाक्यस्य–ख 2 प्रतिवादि–ख
3 संबन्धिते–ग 4 तज्जनकज्ञानस्य–ग

प्रत्यक्षादेर्लिङ्गभावेनैवानुमितिप्रतिरोधः, कथायां तदुपन्यासानर्हत्वात्। यत्तु विरोधिव्याप्यद्वयस्यासाधारणत्वात् संशयजनकत्वं दूषकताबीजमिति। तन्न। एकैकं हि सत्प्रतिपक्षं न तु विशिष्टम्, तादृशं च न संशायकमिति। अनुमितिद्वयस्य प्रामाण्याग्राहकाप्रवृत्तिर्दूषकताबीजमित्यन्ये। तन्न। परस्पर प्रतिबन्धेनानुमितेरेवनुत्पत्तेः।

रत्नकोपकारस्तु-सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमितिः संशय-रूपा जन्यते। विरुद्धोभयज्ञानसामग्र्याः संशयजनकत्वात् संशय-द्वारस्य दूषकत्वात्। न च संशयरूपा नानुमितिः, बाधस्येव विरोध्यु-पस्थितेरनुमितिसामग्रीविघटकत्वेनावधारणात्, अन्यथा बाधेऽप्यनु

प्रकाशः

[1]ननु यदि व्याप्तिपक्षधर्मता बलं तदा प्रत्यक्षादेः सत्प्रतिपक्षतयोपन्यासः सर्वसिद्धो विरुध्येतेत्यत आह-प्रत्यक्षादेरिति। कथायामिति। यदुपन्यस्तं परस्य प्रमां जनयति तदेव प्रमाणमुपन्यसनीयम्। प्रत्यक्षस्य च स्वरूपसत एव प्रमाजनकत्वम्। शब्दस्य तथात्वेऽपि बाधोक्तत्वेनाप्रामाण्यशङ्कास्कन्दितत्वादिति भावः। एकैकमिति। प्रत्येकमासाधारणत्वाभावादिति भावः।

तर्कचूडामणिः

ननु तत्प्रतिपादकवाक्यसत्त्वे कथमुपन्यासानर्हतेत्यत आह-यदिति। असाधारण त्वेति। उभयसाधारणत्वाभावादिति भावः।

अनुमितिद्वयस्येति मणेरयमर्थः-प्रामाण्यानुमाने तदाभावव्याप्याभाववति तत्प्रकार-कत्वं लिङ्गम्। न च सत्प्रतिपक्षस्थले [2]व्याप्याद्वयवत्तया ज्ञाते तल्लिङ्गग्रहसंभव[3] इति। एवं हि प्रमेयत्वादिप्रकारकज्ञाने प्रामाण्यानुमितिर्न स्यादेवेति दोषे सत्येव दोषान्तरमाह-परस्परेति।

---

1 एकैकमिति-ख
2 व्याप्यवत्तया-ग
3 ग्रहः संभवति-ग

मित्यापत्तेरिति वाच्यम। अधिकबलतया बाधेन प्रतिबन्धात्। तुल्यबलादनुमिति :स्यादेव, सामाग्रीसत्त्वात्। सध्याभावबोधस्य च तत्र प्रतिबन्धकत्वं न तु तद्बोधकस्य नयनादेः प्रत्येकं निर्णायकत्वेनावधारितात् कथं संशय इति चेत्-न। प्रत्येकाद्धि ज्ञानमुत्पद्यमानमर्थात् संशयः न तु प्रत्येकं संशयजनकत्वम् इति मेने।

तन्न। साध्यतदभावयोर्विरोधेन यथैकज्ञानस्यापरधीप्रतिबन्धकत्वं तथा साध्याभावव्याप्यवत्त्वस्यापि साध्यविरोधित्वात्तद्बुद्धेरपि साध्यधीप्रतिबन्धकत्वात्।

प्रकाशः

साध्यतदभावयोरित्यादि। साध्याभाव एव बाधः, अप्रामाण्यशङ्काशून्यं च तज्ज्ञानं प्रतिबन्धकमिति मतेनेदमुक्तम्। ननु विरुद्धद्वयनिश्चयसामग्र्या संशयजनकत्वकल्पनादवश्यमत्र तया अनुमितिरूपसंशय उत्पादनीयः। न च विशेषादर्शनसहितायास्तस्यास्तथात्वम्, प्रकृते च विशेषदर्शनमिति वाच्यम्। एकमात्रकोटिविशेषदर्शनस्यैव संशयप्रतिबन्धकत्वात् तदभावस्यैव संशयकारणत्वात् तस्य च प्रकृते सत्त्वात्। अन्यथा स्थाणुपुरुषत्वोभयव्याप्यदर्शने सति पुरोवर्तिनि तदुभयकोटिकसंशयानुपपत्तेः।

ननु विरुद्धप्रत्यक्षसामग्र्याः संशयजनकत्वम्। अन्यथा विरुद्धस्मृतिसामग्रीतः संशयरूपस्मृत्यापत्तेः। विरुद्धार्थकशब्दद्वयात् शाब्दसंशयापत्तेश्चेति चेत्—न। तन्मत इष्टापत्तेः।

तर्कडामणिः

ननु मणिकृन्मते साध्याभावप्रमात्वज्ञानस्य प्रतिबन्धकतया तद्व्याप्यग्रहस्यैव प्रतिबन्धकत्व न तु साध्याभावव्याप्यग्रहस्येत्यत आह—**साध्याभाव इति**। ननु मात्रान्तर्भावे गौरवमित्यत आह—**अन्यथेति**। विरुद्धज्ञानसामग्र्याः तज्जनकत्वे इत्यर्थः।

ननु तादृशानुभवसामग्र्या एव तथात्वमित्यत आह--**विरुद्धेति**।

---

1 उपपादनीय-क
2 शब्दयोः शाब्दसंशयस्यापि संशयापत्तेश्च-
3 एतन्मत-ख
4 नचैवं-क

तर्कचूडामणिः

ज्ञानस्य हेतुत्वात् इत्यादिना अन्यथाख्यातिसिद्धिर्लाघवमूला न स्यात्, न स्याच्च परामर्शादेरनुमित्यादिकारणता। यदि बाधकानुभावभावे सति लाघवबलेन [1]कारणत्वादिकल्पनम्, न तु साधकानुभवे सत्येव तत्। तथा सति तत एव तत्सिद्धौ [2]लाघस्याप्रयोजकतापत्तेरिति, मतम् तता प्रकृतेऽपि संशयानुमितौ [3]साधकानुभावाभावेऽपि बाधकानुभावाभावात् लाघवेन संशयरूपानुमितिकल्पनमिति तुल्यमिति।

वयं तु ब्रूमः। ग्राह्याभावव्याप्यज्ञानस्य प्रत्यक्षाद्यप्रतिबन्धकत्वेऽपि अनुमितौ प्रतिबन्धकत्वमिति सकलवादिसिद्धम्, त्वदनुमतं च। तत्र प्रतिबध्यतावच्छेदकं ग्राह्यानुमितित्वं लाघवात् न तु निश्चयानुमितित्वं गौरवादिति कथं तत्संशयरूपाप्यनुमितिः।

न चोक्तस्य प्रतिबध्यतावच्छेदकत्वेऽपि तत्कोटिमात्रविशेषदर्शनस्यैव प्रतिबन्धकतया समूहालंबनरूपपरामर्शो न प्रतिबन्धक इति वाच्यम्। लाघवेन विशेषदर्शनत्वस्यैव ग्राह्यानुमितिप्रतिबन्धकतावच्छेदकत्वात्। न चैवं स्थाण्वादिगोचरे प्रत्यक्षसंशयोऽपि विशेषद्वयदर्शनकाले न स्यात्, लाघवेन तत्रापि विशेषदर्शनमात्रस्य प्रतिबन्धकत्वादिति वाच्यम्। तथा सति तत्रानुभूयमानसंशयानुपपत्त्या तत्र गौरवस्यापि प्रामाणिकत्वात्। प्रकृते च तदनुभवस्य प्रत्यक्षसंशयमादायोपपत्तेः।

किं च समाने विषये प्रत्यक्षसामग्र्याः बलवत्त्वात् परामर्शद्वयरूपसंशयसामग्रीतः प्रत्यक्षसंशय एव नानुमितिरूपः। न च संशयस्यालौकिकप्रत्यक्षत्वे तत्सामग्र्याः अनुमितिसामग्रीतो दुर्बलत्वमेव, अन्यथा मानान्तरविलयापत्तेरिति वाच्यम्। दोषविशेषसहकृतायाः अलौकिकप्रत्यक्षसामग्र्या अपि बलवत्त्वात्। अन्यथा संशयोत्तर करादिभ्रमजन्यभ्रमरूपपुरुषप्रत्यक्षानुपपत्तेः।

अपि च परामर्शो येन रूपेण साध्यस्य भानं तेन रूपेण तस्यानुमितिविषयत्वम्। न चात्र विरुद्धत्वेन प्रकारेण साध्यं परामर्शविषयः। नित्यत्वा नित्यत्वयोर्विरोधित्वज्ञानकाले नित्यत्वानित्यत्वव्याप्यवानिति शाब्दज्ञानस्य सत्प्रतिपक्षात्मकस्य विरुद्धत्वाविषयत्वात्। न चेश्वरानुमान-

---

1 कारणत्वकल्पनम्—ग
2 लाघवव्याप्यप्र—ग
3 बाधकाभावेपि—ग
4 साध्यभानं—ग
5 वाच्यम्—ग
6 विरुद्ध वस्याविषयत्वात्—ग
7 समानविषये—ग

विरोधिज्ञानत्वस्य प्रतिबन्धकत्वे तन्त्रत्वात् ।

निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणम् । अनैकान्तिकानामन्वयात् व्यतिरेकाद्वा कोट्युपस्थापकतया संशयः फलम् । विरुद्धस्य साध्यविपरीतज्ञानम् । अपक्षधर्मोऽपि विरुद्धोऽन्यत्र विपरीतज्ञानसमर्थ एव बाधेऽन्यतो विपरीतज्ञानं न तु हेत्वभिमतादेः । नित्यो घटः कार्यत्वादिति विरुद्धे बाधसंकरेऽप्यदोषः । असिद्धेऽनैकान्तिकादिचतुष्टयज्ञानान्या-

---

प्रकाशः

अत एव विशेषणज्ञानविशेष्येन्द्रियसंनिकर्षादिक्लृप्तकारणसत्त्वेऽपि पर्वते वह्निसाक्षात्कारानुभवात् विशेषणसंनिकर्षस्यापि तत्र कारणत्वं कल्प्यत इति संक्षेपः ।

[1]विपरीतेति । यद्यपि नैकं विरोधित्वमुभय[2]ज्ञानविषयः, तथापि यथा साध्याभावज्ञानं साक्षात् प्रतिबन्धकं तथा तदभावव्याप्यवत्त्वज्ञानमपीति [3]तात्पर्यम् ।

विरोधीती । ज्ञानपदं प्रमापरम् । अपक्षधर्म इति । वृत्तिमत इति लक्षणानुरोधेन नाकाशादिर्विरुद्ध इति मतेनेदम् । नन्विदं बाधितेपि गतमित्यत आह— बाध इति । तथा च विपरीतज्ञानजनकत्वं विरुद्धत्वं न तु विपरीतज्ञानविषयपक्षवृत्तित्वम्, अतो न तत्रातिव्याप्तिरित्यर्थः । घट इति । अन्यतोऽपि विपरीतज्ञानसंभवादित्यर्थः ।

तर्कचूडामणिः

इवोपनीतं तद्भासत इति वाच्यम् । तत्र मानान्तरादेकत्वसिद्धेर्वक्ष्यमाणत्वादिति । तदेतदाह— संक्षेप इति ।

सद्धेतौ भ्रममादायातिव्याप्तेराह— ज्ञानपदमिति । ननु मानान्तरजन्यांविपरीतज्ञानविषयपक्षवृत्तित्वं बाधितव्यभिचारिणि गतमित्यत आह—तथा चेति ।

---

1 तन्त्रत्वादिति-क 2 ज्ञाने विषयः-ख
3 ध्येयम्-क

लिङ्गत्वज्ञानम् । बाधे पक्षधर्महेतौ व्याप्तिबाधः । प्रकरणसमे तु न व्याप्तिपक्षधर्मताबाधः फलम् । नाप्यलिङ्गत्वज्ञानम्, व्याप्त्यादिबुद्धिसत्त्वात् नापि विपरीतबुद्धिः, स्वसाध्यविपरीतेनानियमात् । नापि संशयः । प्रत्येकं कोटिद्वयानुपनयात् । किं तु कथमत्र तत्त्वनिर्णय इति जिज्ञासा फलम् ।

तथा च प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थितिः प्रकरणसमः । न ह्यनुपस्थिते प्रतिपक्षे एकस्माज्जिज्ञासा, किं तु निर्णय एव ।

प्रकाशः

व्याप्तिबाध इति । [1]व्याप्ते च पक्षधर्मताबाध इत्यपि द्रष्टव्यम् । तथा च [2]व्याप्तिपक्ष. धर्मतान्यतरबाधः फलमित्यर्थः ।

प्रकृतेति । प्रकृतोभयसाध्यसाधकहेत्वोरित्यर्थः । व्याप्तीति । तादृशजिज्ञासा. जनकोपस्थितिविषयत्वमित्यर्थः । नन्वेकपरामर्शादपि तादृशजिज्ञासा भावनीत्यतिव्याप्तिरित्यत आह—न हीति । तृणारणिमणिन्यायेन विजातीयजिज्ञासायामस्य जनकत्वान्न व्यभिचार-

---

तर्कचूडामणि;

नन्वेवं [3]फलाननुगमे तज्जनकस्वरूप[4]लक्षणाव्याप्तिरित्यत आह—तथा चेति ।

ननु [5]प्रकृतस्तद्धेतौ चेन्न जिज्ञासेत्यत आह—प्रकृतेति । ननु लिङ्गस्यैव प्रकरणसमत्वं न तदुपस्थितेरित्यत आह—तादृशेति। नन्वत्र व्यभिचारेणान्यत्रापि इष्टसाधनताज्ञानं हेतुः स्यादित्यत आह—तृणेति ।

---

1 व्याप्ये च—ख
2 व्याप्तपक्ष—क
3 फलानुगमे—ग
4 लक्षणस्यातिव्याप्ति—ग
5 प्रकृतसाध्ये सद्धेतौ जिज्ञासा—ग

अथ ज्ञातुमिच्छा जिज्ञासा। सा च ज्ञानेष्टसाधनताज्ञानात् संशया-द्वेति कथं तेन विना विरोधिसाधनज्ञानमात्रादिति चेत्-न। असति प्रतिपक्षे न जिज्ञासा, सति तु सेत्यन्वयव्यतिरेकाभ्यां प्रकरणसमस्यापि जिज्ञासाकारणत्वात्। न चानैकान्तिकातिव्याप्तिः। तत्र हि संशयद्वारा साध्ये जिज्ञासा, अत्र तु हेतुसमीचीनत्व इति।

ननु परामर्शयोरेकदानुत्पादात् कथं प्रतिरोधः। क्रमोत्पन्नयोरेकदा सत्त्वादिति चेत् न। एकानन्तरमपरहेतुव्याप्तिपक्षधर्मताज्ञानाभ्यामग्रिमव्याप्तिविशिष्टज्ञानोत्पत्तिकाले पूर्वपरामर्शनाशात्। न चोभयहेतुव्याप्तिपक्षधर्मताज्ञानानां परस्परप्रतिबन्धात् परामर्शोत्पाद इति वाच्यम्। व्याप्यादिज्ञानचतुष्टययौगपद्याभावात्।

यत्तु व्याप्तिद्वयसंस्कारोद्बोधकहेतुद्वयज्ञानयोः परस्परप्रतिबन्धात् नोभयव्याप्तिस्मृतिरिति दूषकताबीजम्। तन्न। व्याप्तिस्मृतिं विना सत्प्रतिपक्षाभावात् वादिभ्यां व्याप्त्युद्भावनाच्चेति।

मैवम्। हेतुद्वयसमूहालम्बनात् युगपदुभयव्याप्तिस्मृतौ उभयपरामर्शरूपं ज्ञानमुत्पद्यते। अत एकदा विरुद्धकार्यद्वयकरणान्नैकमपि

प्रकाशः

इति भावः। अत्र हेतुसमीचीनत्वं इत्युपलक्षणम्, साक्षाच्चेत्यपि द्रष्टव्यम्। शङ्कते-क्रमोत्पन्नयोरिति। अपरहेत्विति। क्वचिद् व्याप्तिज्ञानेन क्वचित्पक्षधर्मताज्ञानेन। अग्रिमविशिष्टज्ञानं च वह्निव्याप्योऽयमित्याकारकं [1]पर्वतवृत्तिधूमे वह्निव्याप्तिरित्याकारकं वा। तदन्यतरज्ञानोत्पत्तिकाले पूर्वपरामर्शविनाशादित्यर्थः। अन्यथा [2]विरोधिगुणत्वेन प्रथमज्ञानस्यैव परामर्शनाशकत्वात् ज्ञानाभ्यामित्यसंगतं स्यात्।

तर्कचूडामणिः

ननु परामर्शमात्रस्योभयजन्यतया कथंचित् कस्यचिद्धेतुत्वमित्यत आह-अग्रिमेति।

---

1 पर्वतवृत्तिधूमो वह्निव्याप्यः -क 2 विरोधित्वेन-ख

कार्यमुत्पद्यते। तादृशपरामर्शश्च स्वार्थानुमाने प्रत्यक्षादितः, परस्य तु वाद्युपन्यस्तन्यायोत्थापितप्रमाणात्।

अस्य च केवलान्वयिन्यपि संभवः। घटोऽभिधेयः प्रमेयत्वादित्यत्र अभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि जात्यन्यत्वे सति घटमात्रवृत्त्यन्यधर्मत्वात् घटान्योन्याभाववत् पटरूपवच्च। घटनिष्ठात्यन्ताभावोऽभिधेयत्वप्रतियोगिकः घटवृत्तिनित्याभावत्वात् घटनिष्ठान्योन्याभाववदिति विशेषादर्शनदशायाम्। न च पक्षैक्यमपि तन्त्रम्। विरोधस्यैव दूषकत्वेऽधिकस्य व्यर्थत्वात्।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
अनुमानखण्डे सत्प्रतिपक्षप्रकरणम्

प्रकाशः

जात्यन्यत्व इति सत्तादौ व्यभिचारादाह। घटरूपादौ व्यभिचारवारणाय द्वितीयं विशेषणम्। ननु गुणवत्त्वादावुपाधौ तथापि व्यभिचार इति चेत्, तथापि सत्प्रतिपक्षत्वं संगतमेव। विशेषादर्शनकाले तेनापि तत्स्वीकारात्। अत एव वक्ष्यति 'विशेषादर्शनदशायाम्' इति। अत एवाग्रिमानुमानेऽपि पटान्योन्याभावादौ व्यभिचारो न दोषावह इति भावः। पीतत्वादिव्याप्यपरामर्शः शङ्खे नापीतत्वानुमितिप्रतिबन्धकः, अप्रामाण्यशङ्कास्कन्दितत्वात्। तदनास्कन्दे तु सत्प्रतिपक्षत्वमिष्टमेवेति ध्येयम्।

इति श्रीरुचिदत्तमिश्रविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे सत्प्रतिपक्षप्रकरणम्

तर्कचूडामणिः

ननु सत्प्रतिपक्षो न हेत्वाभासः, तज्ज्ञानेऽपि श्वैत्यानुमितेरप्रतिबन्धादित्यत आह— पीतत्वेति। तथा चानुत्थयबलत्वान्नानुमितिप्रतिबन्धस्तत्रेत्यर्थः।

इति श्रीधर्मराजाध्वरिविरचिते तर्कचूडामणौ
अनुमानखण्डे सत्प्रतिपक्षप्रकरणम्

अथ असिद्धिप्रकरणम्

असिद्धिस्तु न व्याप्तिपक्षधर्मताविरहः, प्रत्येकमननुगमात्। अथ प्रत्येकाभावेऽनुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोसिऽद्धिः। यद्यपि विशिष्टस्यान्यत्वे प्रत्येकाभाव एव स इत्यननुगमः! तथापि विशेषणावच्छिन्न प्रतियोगिको विशेष्याभावो विशेषणविशेष्यसंबन्धाभावो वा विशिष्टाभावोऽनुगत इति चेत्—न। विशिष्टाभावाज्ञानेऽपि व्याप्त्यादिप्रत्येकाभावज्ञाने उद्भावने च अनुमितिप्रतिबन्धो वादिनिवृत्तिश्चेति तत्प्रत्येकाभावाव्याप्तिः। अन्यथा तेषां हेत्वाभासान्तरतापत्तेः। न च विशिष्टाभावधीद्वारा प्रत्येकाभावो दोषो न तु स्वत इति वाच्यम्। प्रत्येकाभावस्य स्वत एव दोषत्वसंभवात्।

वस्तुतो विशिष्टाभावो दोष एव न। प्रत्येकस्य समर्थत्वे तेनैवान्यथासिद्धेर्व्यर्थविशेषणत्वात्।

प्रकाशः

वस्तुत इति। इदं च विशिष्टाभावस्य प्रत्येकाभावसमानवित्तिवेद्यत्व[1]मभ्युपगम्योक्तम्। वस्तुतस्त्वखण्डाभावस्य तस्य शब्दादिना [2]केवलस्यापि ज्ञानस्य ग्राह्याभाव[3]ज्ञानत्वादिविशेषेणावश्यं प्रतिबन्धकत्वात् सोऽपि दोष एव। यथाच न [4]हेत्वाभासाधिक्यं [5]तथा वक्ष्यते। [6]व्यर्थेति।

तर्कडामणिः

ननु प्रत्येकाभावज्ञानेऽपि विशिष्टाभावज्ञानादनुमितिप्रतिबन्धात्सोऽपि दोष एवेत्यत आह —इदं चेति।

---

1 मभ्युपेत्य—ख
2 केवलस्य ज्ञानात्तज्ज्ञानस्य—क
3 ज्ञानत्वाविशेषेण—ख
4 हेत्वाभासान्तरत्वं—ख
5 तथाग्रे—ख
6 अन्यथेति—ख

प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञानमित्युपजीव्यत्वात्। विशिष्टाभावानुद्भावनेऽपि प्रत्येकोद्भावने वादिनिवृत्तेश्च। अत एव व्याप्तिपक्षधर्मताविशिष्टज्ञानविषयाभावत्वं प्रत्येकाभावानुगतमसिद्धत्वम्। व्यभिचारादावसिद्धत्वेऽप्युपजीव्यत्वेन प्राथम्यात् तदुद्भावने वादिनिवृत्तेश्च स स्वत एव दूषकः। तत्र व्याप्त्यसिद्ध्यर्थम् उपाधौ तूद्भाविते विप्रतिपद्यतेऽपि। तस्य [1]दुर्ग्रहत्वात् व्यभिचारेणैव तदन्वयाच्च।

प्रकाशः

इदमप्यखण्डाभाव[2]मनभ्युपेत्योक्तम्। उपजीव्यत्वादिति। प्रत्येकाभावाज्ञाने [3]जातस्यापि विशिष्टाभावज्ञानस्य दोषत्वं न स्यात् अप्रामाण्यशङ्कास्कन्दितत्वेन स्वकार्याक्षमत्वादिति भावः। क्वाचित्काभिप्रायेणोपजीव्यत्वमुक्तमित्यप्याहुः।

नन्वेवमपि व्यभिचारादेरसिद्ध्यन्तर्भाव इत्यत आह—व्यभिचारादाविति। उपजीव्यत्वं क्वाचित्काभिप्रायेणेति द्रष्टव्यम्। तत्र व्याप्तिसिद्ध्यर्थमिति। [4]इदं तु अनौपाधिकत्वव्याप्तिपक्षे, तत्रोपाधिरेव व्याप्तिविरह इति ध्येयम्। दुरूहत्वादिति। साध्यव्यापकत्वादिनानापदार्थघटितत्वेनास्य तदपेक्षया विलम्बितप्रतीतिकत्वादित्यर्थः।

तर्कचूडामणिः

ननु तदज्ञानेऽपि शब्दादिना विशिष्टाभावज्ञान[5]जनने कथमुपजीव्यत्वमित्यत आह—प्रत्येकेति। व्यभिचारिणः उपजीव्यत्वं क्वचिदपि न। अन्यथा व्यभिचारज्ञानोपजीव्यतया उपाधेरपि हेत्वाभासतापत्तेरत्वनुशयं द्योतयति — अप्याहुरिति।

ननूपाध्युद्भावनेन कथं व्याप्त्यसिद्धिः, उपाधेर्व्याप्त्यभावत्वाभावादित्यत आह—इदं चेति। ननूहस्तकः, तथा च तर्कितुमशक्यत्वेऽपि ज्ञातुं शक्यत्वाद्विप्रतिपत्त्यनुपपत्तिरित्यत आह—साध्येति। तस्येति। व्यभिचारादेरित्यर्थः।

---

1 दुरूहत्वादिति प्रकाशसंमतः पाठः।
2 मभ्युपेत्य—ख
3 ज्ञातस्यापि—ख
4 इदं चेति चूडामणिपाठः।
5 दर्शनेन ग

यदि च व्यभिचारादिकमज्ञात्वाप्यसिद्धिबुद्धिः। तथाप्युपधेयसंकरेऽप्युपाधेरसंकर एवेति निरस्तम्। व्यर्थविशेषणत्वादेव।

एतेन व्याप्तिपक्षधर्मतान्यतराभावोऽसिद्धिरिति प्रत्युक्तम्। अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्य दोषत्वात् व्यर्थविशेषणत्वाच्च।

यत्तु व्याप्तिपक्षधर्मताप्रमितिविरहः आश्रयासिद्ध्याद्यनुगतोऽसिद्धिः, तत्प्रमितिसत्त्वे तत्रानुमित्यापत्तेरिति। तदपि व्यर्थविशेषणत्वात् तदज्ञानेऽपि प्रत्येकज्ञानस्य दोषत्वाच्च निरस्तम्।

वस्तुतस्तु प्रकृतहेतुव्याप्तिपक्षधर्मतावैशिष्ट्यस्य तत्प्रमितेश्चाप्रसिद्ध्या तदभावो ज्ञातुमुद्भावयितुं चाशक्य एव। यत्किंचिद्व्याप्तिपक्षधर्मताविशिष्टप्रमितिविरहः सद्धेतुसाधारणः। स्वप्रमितिविरहो यत्किंचित्प्रमितिविरहो वा सद्धेतावपि। सकलतत्प्रमितिविरहो दुर्निरूपः। व्याप्त्यभावादेव तद्ग्रहे स एव दोषः, उपजीव्यत्वात्। यदि च प्रमितिविरहः स्वरूपसन्नेव दोषः कारणाभावत्वात्; तदा व्याप्त्यादिभ्रमादनुमितिर्न स्यात्, न स्याच्च हेत्वाभासता, ज्ञानगर्भतल्लक्षणाभावात्।

एतेन व्याप्तिप्रमितिपक्षधर्मताप्रमितिविरहान्यतरत्वमसिद्धिः। अन्यतरत्वं च तदन्यान्यत्वम्, तेनोभयविरहेऽपि नाव्याप्तिरिति निरस्तम्। व्यर्थविशेषणत्वादेव।

प्रकाशः

ननु ज्ञप्तावनुपजीव्यत्वेऽप्युत्पत्ता[1]वस्य तत्त्वं स्यादित्यत आह—**यदि चेति**। **स एवेति**। ज्ञानगर्भहेत्वाभासलक्षणानुरोधादिति भावः।

तर्कचूडामणिः

तत्त्वम् असिद्ध्युपजीव्यत्वमित्यर्थः।

नन्वसिद्धेरपि नियमतोऽनुमितिप्रतिबन्धकतया अवधारणानुपपत्तिरित्यत आह—**ज्ञानेति**।

---

1 तस्येति चूडामणिपाठः।

स्यादेतत् । व्याप्तिपक्षधर्मताभ्यां निश्चयः सिद्धिः तदभावोऽसिद्धिः। अत एवाव्याप्तेऽपक्षधर्मे च तदारोपरूपा सिद्धिरित्यनुमितिः, न तु व्याप्तपक्षधर्मादपि तदनिश्चये । न चैवं हेतोरप्याभासत्वं तदाभासस्यापि हेतुत्वं स्यात् । दशाविशेषे इष्टत्वात् । सेयं स्वरूपसती दूषिका, कारणाभावत्वात् । न च व्याप्त्यादिप्रत्येकनिश्चयाभाव एव दूषकः, आवश्यकत्वादिति वाच्यम् । विशिष्टनिश्चयस्य हेतुत्वे तदभावस्य कार्यानुत्पादकत्वादिति ।

मैवम् । एवं सव्यभिचारादेरप्यत्रैवान्तर्भावप्रसङ्गात् । असिद्धेः स्वरूपसत एव दोषत्वे स्वज्ञानार्थं व्यभिचाराद्यनुद्भावनात् ।

यदि च तस्मात्सिद्धिर्नोपपद्यत इति तस्योपजीव्यत्वम्, तदा आश्रयासिद्ध्यादिज्ञानात् सिद्धिर्नेति स एव पृथग्दोषः स्यात् । असिद्धिश्च ज्ञाता परस्योद्भाव्येति स्वज्ञानार्थमुद्भावितासिद्धिनिर्वाहार्थं च आश्रयासिद्ध्यादिज्ञानमावश्यकम् ।

कथं च हेतुतदाभासविवेकः ? सिद्धौ द्वयोरपि हेतुत्वात् असिद्धौ तदाभासत्वात् । व्यभिचारादेः सद्धेतौ सिद्धिमखण्डयतश्च हेत्वाभासत्वाभावात् ।

प्रकाशः

सिद्धौ द्वयोरपि हेतुत्वादित्यत्र हेतुमाह—व्यभिचारादेरिति । सद्धेताविति । सद्धेतुत्वदशायां सिद्धिदशायामिति यावत् । तथा च सव्यभिचारादेर्हेतुत्वं तदा न स्यात् यदि सिद्धिखण्डनहेतुत्वं तन्निष्ठव्यभिचारादेः स्यात् । तच्चेन्नास्ति तदा तस्य न हेत्वाभासत्वम्, किं तु हेतुत्वमेवेत्यर्थः ।

तर्कचूडामणिः

ननु व्यभिचारादेर्हेत्वाभासत्वनिराकारणं प्रकृतासंगतम्, एवं सद्धेतौ सिद्धिमखण्डयतोऽप्यसद्धेतौ सिद्धिखण्डनजनकतया हेत्वाभासत्वं स्यादेवेत्यत आह—सिद्धौ इति ।

अथ सुषुप्तौ जागरेपि व्याप्तिपक्षधर्मतासत्त्वे तदनिश्चयेऽनुमित्यनुत्पादो हेत्वाभासप्रयोज्यः, सव्यभिचारादौ तथावधारणादिति असिद्धिरज्ञातापि हेत्वाभासः। न चैवं हेत्वाभासाधिक्यं कल्प्तान्तर्भावो वा, तेन रूपेण व्याप्त्यसिद्ध्यादेरेव संग्रहादिति चेत्-न। एवं सव्यभिचारादिरप्य द्धिः स्यादित्युक्तत्वात्। उपजीवनाद्भेदे आश्रयासिद्ध्यादिरपि पृथक् स्यात्। सुषुप्त्यादावनुमित्यभावः कारणाभावात्। कार्यानुत्पादो हि न प्रतिबन्धकमात्रात्, किं तु कारणाभावादपि। असत्यपि प्रतिबन्धके वह्न्यभावेन दाहानुत्पत्तेः।

अथानुमित्यनुत्पादो हेत्वाभासप्रयुक्त एवेति चेत् तर्ह्यनुमितौ मनोयोगादिरपि न हेतुः। हेत्वाभासादेवानुमित्यनुत्पादे तद्व्यतिरेकेणानुमित्यनुत्पादाभावात्, सिद्धेरेव तद्धेतुत्वे चरमकारणमेव हेतुः स्यात्।

प्रकाशः

अन्ये तु ननु व्यभिचारादेर्हेतुदोषस्य यत्रासत्त्वं स सद्धेतुः, यत्र वा तत्सत्त्वं स तदाभास इत्येव हेतुतदाभासविवेकः स्यादित्यत आह-व्यभिचारादेरिति। चकारोऽत्र भिन्नक्रमः व्यभिचारादेश्चेत्येवं योजनीयः। व्यभिचारादेरपि सिद्धिखण्डनप्रयोजकतया हेत्वाभासत्वमिष्यते। सिद्धिखण्डनं च यदि व्यभिचारदिरहिते सद्धेतावपि स्वीकृतं तदा तत्र यत्सिद्धिखण्डनं तदकुर्वतः तस्य सिद्धिखण्डनाप्रयोजकत्वान्न हेतुदोषत्वं स्यात्। तथा च तत्सत्त्वासत्वकृतोऽपि हेतुतदाभासविवेको न स्यादिति भाव इत्याहुः।

मनोयोगादिरपीति। यदि मनोयोगादिकारणत्वे प्रमाणान्तरमसित, तदा तद्व्यतिरेका-

---

तर्कचूडामणिः

उपाध्यायमतमाह-अन्ये त्विति। भिन्नक्रम इति। अप्यर्थश्चेत्यपि बोध्यम्। अत एवाह-व्यभिचारादेरपीति। ननु सद्धेतौ या सिद्धिस्तामखण्डयतोऽपि यत्र तत्खण्डनं तज्जनकत्वमात्रेण दोषत्वं स्यादित्यत आह- तत्र यत्सिद्धिखण्डनमिति।

नन्वनुमितौ मनोयोगस्यान्वयव्यतिरेकानवगमेऽपि घटादिप्रत्यक्षे तस्य ताभ्यां कारणत्वग्रहावसरे लाघवेनानित्यसानत्वावच्छेदेन तत्कल्प्यत इत्यनमितिहेतुत्वं तस्यावर्जनीयमेवेत्यत आह-मनोयोगादीति।

अन्ये तु गमकतौपयिकप्रतिद्वन्द्विव्याप्तिपक्षधर्मताविरहतन्नियतयोरन्यतरत्वं हेत्वाभासत्वम् । तत्राधिकसमानबलौ बाधप्रतिरोधौ प्रतिद्वन्द्विनौ । व्याप्तिपक्षधर्मताविरहश्चासिद्धिः । तन्नियतौ च सव्यभिचारविरुद्धौ । न चानयोरप्यसिद्ध्यन्तर्भावः । व्याप्तिविरहनियतत्वेन ज्ञातयोः स्वातन्त्र्येणैव दूषकत्वात् भ्रमे विशेषदर्शनस्यैवेति ।

तन्न । अत्रापि व्याप्तिपक्षधर्मताविरह एवासिद्धिः पर्यवस्यति । अन्यतरत्वं च न लक्षणम् , व्यर्थविशेषणत्वात् । हेत्वाभासान्तर-

---

प्रकाशः

दप्यनुमितिव्यतिरेकस्यावश्यकत्वात् असिद्धिवदस्यापि हेत्वाभासान्तरत्वं स्यादित्यनिष्टं बोध्यम् कारणाभावत्वस्याविशेषादिति । ननु मास्तु मनोयोगादि कारणमित्यभ्युपगन्तारं प्रत्याह— **सिद्धेरिति** । तथा चापसिद्धान्त इति भावः ।

अन्ये त्विति । गमकतौपयिकपदेन अबाधितासत्प्रतिपक्षितत्वे विवक्षिते । तत्प्रतिद्वन्द्वित्वं बाधसत्प्रतिपक्षयोस्तदन्यतरत्वं च लक्षणमिति । तच्च तदन्यान्यत्वमिति नाननुगमः **व्याप्तिविरहनियतत्वेनेति** । व्याप्तिविरहनियतावच्छेदकरूपेण व्यभिचरितत्वादिना ज्ञातयोरित्यर्थः **विशेषदर्शनस्यैवेति** । विरोधिविषयतामात्रेण साम्यम् ।

तर्कचूडामणिः

इष्टापत्तिमाशङ्क्याह— **तथा चेति** [1]ननु व्यभिचारादेरपि गमकतौपयिकव्याप्त्यादिप्रतिद्वन्द्वितया पृथगुपादानवैयर्थ्यमित्यत आह **गमकतेति** । ननु व्याप्तिविरहव्याप्यत्वानवगमदशायां व्यभिचारज्ञानस्य प्रतिबन्धकत्वं न स्यात् । न चेष्टापत्तिः । ग्राह्याभावज्ञानत्वेनैव तस्य प्रतिबन्धकत्वादित्यत आह—**व्याप्तीति** । ननु विशेषदर्शनस्य ग्राह्याभावव्याप्यत्वावगाहितयैव प्रतिबन्धकतया [1]दृष्टान्तासंगतिरित्यत आह—**विरोधीति**

---

1 दृष्टान्तासिद्धिः—ग

बहिष्कृतस्य व्याप्तिपक्षधर्मतानिश्चयविरोधिनो रूपस्य विवक्षितत्वात्। तच्चाश्रयासिद्ध्यादिकमेवेति ॥

इत्यसिद्धिपूर्वपक्षचिन्तामणि :

अथ सिद्धान्त

उच्यते। आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिश्च प्रत्येकमेव दोषः। प्रत्येकस्य ज्ञानादुद्भावनाच्चानुमितिबन्धात्! न तु विशिष्टाभावः परामर्शविषयाभावो वा, व्यर्थविशेषणत्वात्।

प्रकाशः

यद्वा भ्रमे ग्राह्याभाव[1]व्याप्यग्रहस्य प्रतिबन्धकत्वदर्शनात् अनयोरपि व्याप्तिविरहव्याप्यवेनैव ज्ञातयोः प्रतिबन्धकत्वमित्यभिमानेनैतदुक्तम्।

विवक्षितत्वादिति। [2]असिद्धत्वेनेति शेषः। तच्चेति। न तु व्याप्तिपक्षधर्मताविशिष्टाभावादिकमिति भावः।

प्रत्येकमेवेति। एवकारो भिन्नक्रमः। प्रत्येकं दोष एवेत्यर्थः। न त्विति। 'न तु विशिष्टाभावमात्रमित्यर्थः। अत्र हेतुः पूर्वोक्तः। 'प्रत्येकस्य ज्ञाना'दित्यादिः 'परामर्शविषयाभावो वे' त्यत्र हेतुमाह– व्यर्थविशेषणत्वादिति। [3]परामर्शांशस्य व्यर्थत्वा। दित्यर्थः। तस्य परामर्शशर्सयेत्यर्थः।

तर्कचूडामणिः

ननु विरोधिविषयकत्वमात्रविवक्षायां मूलग्रन्थासंगतिः, विपरीतदर्शनस्यैवेति मूलग्रन्थापत्तेरित्यरुचेराह—यद्वेति। भ्रमे इति। प्रत्यक्षभ्रमे इत्यर्थः।

ननु [4]एवकारेण व्यभिचारादिव्यवच्छेदे इष्टापत्तिरेवेत्यत आह– नत्विति। नन्वखण्डाभावे वैयर्थ्याभावेन वक्ष्यमाणहेत्वसंगतिः, ततो हेतुमाह—अत्रेति। नन्वेवं [5]ग्रन्थोक्तहेतुवैयर्थ्यमित्यत आह-परामर्शेति। तत्पदस्य विशिष्टाभावपरत्वं वारयति–परामर्शेति।

---

1 व्याप्यत्वग्रहस्य–ख
2 असिद्धत्वादिनेति–ख
3 परामर्शस्य–ख
4 एकारादिव्यभि–ग
5 स्वग्रन्थोक्त–ग

तस्य ज्ञानमुद्भावनं विनाप्यनुमितिप्रतिबन्धात्। अनुभवसिद्धे हि लक्षणम्, न तु लक्षणानुरोधेनानुभवकल्पना। परामर्शविषयाभावत्वेनानुगतेन त्रयाणामसिद्धत्वेन संग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा।

प्रकाशः

एतेन [1]विशिष्टाभावोऽपि दोष एव, विशिष्टस्यापि ग्राह्यतया तदभावज्ञानस्यापि विरोधित्वात्। न च व्यर्थविशेषणता, अखण्डाभावे तदभावात्। [2]शब्दादिना प्रत्येकाभावानुपस्थितावपि उपस्थितत्वाच्च न तेनैवान्यथासिद्धिः। तथा च प्रत्येकमेव दोषः, न तु विशिष्टाभाव इत्यसंगतमित्यपास्तम्। तस्यापि दोषत्वस्वीकारात्, उक्तयोजनामात्रेण [3]ग्रन्थस्य संगतत्वाच्च। [3]असिद्धैस्त्रिविधत्वोपवर्णनमुपलक्षणम्। अत एव हेतौ पक्षसंबन्धविरहः, पक्षे हेतुसंबन्धविरहः, व्याप्तिपक्षधर्मतासामानाधिकरण्यविरह इत्यादयोऽपि परामर्शविषयीभूततत्पदार्थप्रतियोगिकाभावा असिद्ध्यन्तर्भूता एव।

नन्वेवं हेत्वाभासाधिक्यं स्यादित्यत आह—परामर्शविषयाभावत्वेनैवेति।

तर्कचूडामणिः

उपाध्यायोक्तं दूषयति—'एतेनेति। ननु वैयर्थ्याभावेऽपि सर्वत्र प्रत्येकाभावज्ञानाय वानुमितेप्रतिबन्धसंभवेन विशिष्टाभावस्य न हेत्वाभासत्वमित्यत आह—शब्दादिति। नन्वेवं त्रैविध्योक्तिरसंगतेत्यत आह—असिद्धैरिति।

---

1 परामर्शविषयाभावत्वेनैवानुगतेनेति प्रकाशसंमतः पाठः　2 शब्दात् इति चूडामणिसंमतः पाठः
3 उक्तयोजनया चग्रन्थस्य—ख　4 तन्नेति—ग

प्रकाशः

नन्वव्यभिचारसहचारयोः परामर्शविषयतया तदभावे विरुद्धे व्यभिचारे चातिव्याप्तिः। साध्यस्यापि तादृशतया तदभावरूपे बाधे चातिव्याप्तिः।

ननु यद्रूपोपस्थितयद्विषयतया परामर्शस्यानुमितिप्रतिबन्धकत्वं तद्रूपावच्छिन्नतदभावो विवक्षितः। साध्यप्रतियोगिकव्याप्तित्वप्रकारोपस्थितव्याप्तिविषयतया परामर्शस्तथेति व्याप्तित्वावच्छिन्नाभावो भवत्वसिद्धिः, न तु व्याप्तिशरीर[1]निविष्टप्रत्येकाभावः। प्रत्येकविषयत्वेन च परामर्शस्य [2]कारणत्वे विशकलिततत्तत्परामर्शादनुमित्यापत्तेरिति चेत्—न[3]। एवं पक्षहेतुसंबन्धाभावरूपगद्यसिद्ध्यादेरसंग्रहापत्तिः। न हि हेतुसंबन्धत्वप्रकारोपस्थितहेतुसंबन्धविषयतया परामर्शस्यानुमितिजनकत्वम्, हेतुसंबन्धस्य परामर्शे [4]संसर्गमर्यादया भासमानत्वेन तत्र प्रकारत्वाभावात्। न च व्याप्तित्वप्रकारोपस्थितव्याप्तिविषयतया परामर्शस्य कारणत्वम्। विशकलितव्यभिचाराभावसहचारस्मरणानन्तरभाविनः पक्षे लिङ्गवैशिष्ट्यविषयकस्य लिङ्गे च [5]तदुभयविषयकस्य मानसादिपरामर्शस्यानुमित्यजनकत्वापत्तेः। व्याप्तित्वस्य [6]पूर्वानुपस्थितेः प्रकारत्वाभावात्। तदुभयवैशिष्ट्यस्यैव [7]व्याप्तित्वेन तद्विषयतया अनुमितिजनकत्वं तस्यापीति।

मैवम्। व्यभिचारादिचतुष्टयभिन्नहेत्वाभासत्वस्य विभाजकोपाधित्वात्।

तर्कचडामणिः

असिद्धिलक्षणस्यातिव्याप्तिं शङ्कते—**नन्विति**। **विरुद्ध इति**। तत्त्व इत्यर्थः।

जयदेवमतं शङ्कते—नन्विति। **तत्तत्परामर्शादिति**। विशकलिततत्तज्ज्ञानादित्यर्थः। कथं तर्हि तस्यानुमितिजनकत्वमित्यत आह—**तदुभयेति**। व्यभिचारज्ञानविरोधित्वादिति भावः।

उपाध्यायमतेन समाधत्ते—मैवमिति। **व्यभिचारादीति**। तादृशहेत्वाभासतोपाधित्वस्येत्यर्थः।

---

1 प्रविष्ट—ख
2 जनकत्वे—ख
3 चेत्—ङ
4 संसर्गतया—ख
5 तदुभयवैशिष्ट्यविषयकस्य—ख
6 पूर्वानुपस्थितत्वेन—ख
7 व्याप्तिरूपतया—

अत एव "ये व्याप्तिविरहपक्षधर्मताविरहरूपास्तेऽसिद्धिभेदमध्यमध्यासते तदन्ये च यथायथं व्यभिचारादयः" इति सिद्धान्तप्रवादोऽपि। न चैवं साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि संग्रहे विभागव्याघातः। स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात्। अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः। सव्यभिचारादेरप्येवं रूपसत्त्वेऽपि उपजीव्यत्वेन पृथक्त्वम्। उपधेयसंकरेऽप्युपाधेरसंकरात्।

नन्वाश्रयाप्रसिद्ध्या कथमाश्रयासिद्धिरुद्भाव्या। न च शशीयतया गवि शृङ्गनिषेधवत् व्योमकमलमिति वाच्यम्। शशशृङ्गनिषेधो न गवीत्युक्तत्वादिति चेत्–व्योमकमलमिति निश्चितानन्वयत्वेनापार्थकम्, आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरसंकीर्णा।

प्रकाशः

अत एवेति। असिद्धेरेकरूपत्वाभावा[1]देवेत्यर्थः। अन्यथा 'ये' इत्यत्र बहुवचनं न स्यादिति भावः।

नन्विति। व्योमकमलं सुरभि कमलत्वादित्यादावेवाश्रयासिद्धि[2]र्वाच्या। तत्र व्योमकमलादिकमप्रसिद्धमिति कथं तद्विरह उद्भावनीय इत्यर्थः। **व्योमकमलमिति**। निषिध्यत इति शेषः। **अपार्थकमिति**। तथा च तत्र नाश्रयासिद्धिरुद्भाव्यते, किं त्वपार्थकमेवेत्यर्थः। नन्वेवमाश्रयासिद्धिः कुत्रेत्यत्राह–**आश्रयेति**।

तर्कचूडामणिः

परामर्शविषयाभावत्वस्य संग्राहकोपाधित्वमतःशब्दार्थ इति भ्रमं वारयति–**असिद्धेरिति**। **अन्यथेति**। भेदपदं च न स्यादित्यपि बोध्यम्।

ननु गगनारविन्दाप्रसिद्धावप्याश्रयासिद्ध्युद्भावनं स्यात्। [3]न हि तत्रैवाश्रयासिद्धिरिति प्रागुक्तम् इत्यत आह–**व्योमेति**। व्योमकमलस्य निषेधसाम्याभावादाह **निषिध्यत इति**। कथं तर्हि तत्राश्रयासिद्ध्युद्भावनमित्यत आह—**तथाचेति**। उपजीव्यत्वादित्याशयतः, वस्तुतः

---

1 देव–क 2 द्रष्टव्या–क
3 न तु–ग

प्रकाशः

सुवर्णमयाद्रिरग्निमान् धूमवत्त्वादित्यादौ सुवर्णमयत्वविशेषणासिद्धिराश्रयासिद्धिरसंकिर्णेत्यर्थः । एवं च व्योमकमलपदमपि यदि प्रसिद्धकमलतात्पर्येणोच्चार्यते ; तदा तत्र व्योमीयत्वविशेषणासिद्धिराश्रयासिद्धिरेव, अद्रौ सुवर्णमयत्वासिद्धिवदिति ध्येयम् । न चेदमपार्थकम् , आश्रयासिद्धेस्तत्रोपजीव्यत्वात् । अत एव बाधस्यापि दोषत्वम् ।

यत्तु पक्षविशेषणं पक्षता, तदसिद्धिराश्रयासिद्धिरिति । तन्न । तद्विरहस्य कारणाभावत्वेन स्वरूपसत एव प्रतिबन्धकतया हेत्वाभासत्वाभावात् ।

ननु पक्षतावच्छेदकधर्माभावो न हेत्वाभासः । तज्ज्ञाने सत्यपि पक्षधर्मिणि लिङ्गपरामर्शसत्त्वे अनुमितिप्रतिबन्धाभावात् । न च हेतुपक्षतावच्छेदकसामानाधिकरण्यस्य परामर्शविषयतया तदभावज्ञानस्य तद्विशिष्टापरामर्शविघटकतया तद्विशिष्टवगाह्यनुमितिप्रतिबन्धकत्वेन हेत्वाभासत्वमिति वाच्यम् । एवं हि साध्यपक्षतावच्छेदकसामानाधिकरण्यस्यानुमितिविषयतया तदभावज्ञानस्य ग्राह्याभावज्ञानत्वेनैव प्रतिबन्धकतया तस्य बाधान्तर्भावापत्तेः । न च साध्याभाव एव बाध इति वाच्यम् । पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावस्यापि बाधबहिर्भूतत्वापत्तौ हेत्वाभासाधिक्यापत्तेः । न च सोऽप्याश्रयासिद्धिरेवेति वाच्यम् । परामर्शविषयाभावत्वाभावेन तस्य तदविघटकतया असिद्धिबहिर्भूतत्वात् ।

अत्राहुः । हेतुतावच्छेदकसामानाधिकरण्यस्य परामर्शविषयतया तदभावस्याश्रयासिद्धिरूपत्वात् । तादृशसामानाधिकरण्यस्यानुमित्यविषयतया तदभावस्य बाधत्वासंभवात् । पक्षतावच्छेदकाभावपक्षतावच्छेदकसाध्यसामानाधिकरण्याभावादयश्च ग्राह्याभावतया बाधान्तर्भूता एवेति।

तर्कचूडामणिः

स्वार्थानुमितौ तज्ज्ञानप्रतिबन्धतया कथायामप्यसिद्धिरुद्भाव्यत इति ध्येयम् ।

न चेति । तथा चोद्देश्यानुमितिप्रतिबन्धकत्वात् हेत्वाभासत्वमिति भावः । **हेत्वाभासाधिक्येति** । तथा चानुमितिविषयाभावत्वमेव बाधत्वम् , तच्च पक्षतावच्छेदकाभावेऽपीति भावः । **परामर्शेति** । असिद्धित्वस्य परामर्शविषयाभावव्याप्यत्वादिति भावः ।

जयदेवमतमाह – अत्रेति ।

---

1 तात्पर्येणोद्भाव्यते ख
2 विपक्षे धर्मिणि ख
3 प्रतिबन्धकतया–ख
4 परामर्शविषयाभावाभावत्वेनैव–ख
5 पक्षता ख

प्रकाशः

वयं तु पक्षतावच्छेदकाभावस्य [1]अनुमितिग्राह्या[1]भावतया [2]यदि बाधत्वं' तदा परामर्शविषयाभावतया असिद्धित्वमेव कुतो न स्यात्। [3]न चानुमितिग्राह्याभावातिरिक्तपरामर्शविषयाभावत्वमसिद्धित्वमिति वाच्यम्। परामर्शविषयाभावातिरिक्तग्राह्या[3]भावत्वं बाधत्वमित्यस्यापि सुवचत्वात्। न चैवं साध्यस्यापि परामर्शविषयतया तदभावोऽप्यसिद्धिरेव स्यादिति वाच्यम्। लिङ्गोपहितलैङ्गिकभानपक्षे [4]लिङ्गव्याप्त्यादेरपि ग्राह्यतया तदभावस्यापि बाधत्वापत्तिरिति तुल्यम्।

तस्मात् यज्ज्ञानं परामर्शविघटनद्वारा अनुमितिं प्रतिबध्नाति स न बाधः। यज्ज्ञानं परामर्शे[5] जातेऽपि साक्षात् प्रतिबन्धकं स एव बाधः। अत एव लिङ्गोपहितभानपक्षे स्वरूपासिद्ध्यादीनां न बाधत्वम्। प्रकृते च [6]काञ्चनमयत्वाद्यभावज्ञानस्य तद्विशिष्टपक्षकानुमितौ तद्विशिष्टपक्षधर्मतावगाहिपरामर्शविघटनद्वारैव [7]प्रतिबन्धकत्वं न तु साक्षात्। तादृशपरामर्शस्य

तर्कचूडामणिः

वयं त्विति। अत्रेदमालोचनीयम्। पक्षतावच्छेदकाभावस्यानुमितिविषयाभावतया बाधत्वमेव कुतो न स्यात्। न च परामर्शविषयाभावतया असिद्धित्वमेव न कुत इति वाच्यम्। न हि तादृशाभावत्वम् असिद्धत्वे तन्त्रम्। व्यभिचारादेरपि तत्त्वापत्तेः। न च व्यभिचारविरुद्धत्वभिन्नत्वविशेषितं तदिति वाच्यम्। साध्याभावस्य तत्त्वापत्तेः। किं तु व्यभिचारादिचतुष्टयभिन्नाभासत्वमेव। अत एवोक्तं 'व्यभिचारादिचतुष्टयभिन्नहेत्वाभासत्वस्य विभाजकोपाधित्वात्' इति। न चैवं लिङ्गोपधानपक्षे लिङ्गव्याप्त्यादेः अनुमितिविषयतया तदभावस्य बाधत्वापत्त्या अनुमितिविषयाभावत्वमपि न बाधत्वे तन्त्रमिति वाच्यम्। तस्मिन् पक्षे व्यभिचारादिज्ञानस्य साक्षादनुमितिप्रतिबन्धकत्वापातेन तत्पक्षस्याग्रे निराकरिष्यमाणत्वात्! न च पक्षतावच्छेदकाभावज्ञानस्य बाधज्ञानत्वेनानुमितिप्रतिबन्धकत्वे [8]तद्व्याप्यज्ञानस्यापि साध्याभाव-

1 ग्राह्या-ख
2 तदभावस्यापि यदि-ख
3 ग्राह्या-ख
4 लिङ्गादेरपि ख
5 जातेऽपि-ख
6 काञ्चनमयत्वाभावज्ञानं-ख
7 प्रतिबन्धकम्-ख
8 तत्सामग्रीत्वेन तद्व्याप्य-क

प्रकाश

पक्षे [1]तद्वैशिष्ट्यविषयतानियमेन तदनन्तरं पक्षे तदभावज्ञानासंभवात् पक्षे तदभावज्ञाने च [2]तद्विशिष्ट-पक्षधर्मतावगाहिपरामर्शाभावादेवानुमितिप्रतिबन्धः। तथा च पक्षतावच्छेदकाभावस्य ग्राह्याभाव-वेऽपि न बाधत्वम्, किं त्वाश्रयासिद्धित्वमेव, [3]कदापि साक्षात् प्रतिबन्धकत्वाभावादिति ब्रूमः।

तर्कचूडामणिः

व्याप्यज्ञानवत् सत्प्रतिपक्षतया प्रतिबन्धकत्वं स्यादिति वाच्यम्। इष्टत्वात्। अत एव पक्षतावच्छेदकसाध्यसामानाधि[4]करण्याभावव्याप्यज्ञानस्य सत्प्रतिपक्षतया प्रतिबन्धकत्वम्। यदपि तस्मादित्यादिं, तदपि मन्दम्। लाघवेनानुमिति[5]विषयाभावत्वस्यैव बाधत्वे गुरुशरीरस्य तस्या-प्रयोजकत्वात्। अन्यथा साध्यस्यैव यत्र साधकत्वं तत्र साध्याभावस्य बाधत्वानापत्तेः, तज्ज्ञानस्य परामर्शविघटनद्वारैवानुमितिप्रतिबन्धकत्वात्। न चेष्टापत्तिः, साध्याभावो बाध इत्यादिलक्षणान तत्रातिव्याप्त्यापत्तेः। अत एव प्रतिरोधातिरिक्तत्वे सति साक्षादनुमितिप्रतिबन्धकज्ञानविषयत्वं बाधत्वमिति वक्ष्यमाणलक्षणं पक्षतावच्छेदकाभावसाधारणं संगच्छते।

वस्तुतस्तु पक्षतावच्छेदकाभावस्य यथा बाधत्वं तथा असिद्धत्वमपि, साक्षात्परामर्शविघटक-व्यभिचाराद्यन्यतमरूपतावश्यंभावात्। अत एव [6]साध्याविशेषस्थले साध्याभावस्योभयरूपत्वम्। न चोपधेयसंकरस्यादोषत्वेऽपि कथमुपाधिसांकर्यं न दोष इति वाच्यम्। क्वचित्तयोरैक्येऽपि सर्वत्र तथात्वाभावात् तावतापि हेत्वाभासान्तरत्वसंभवादिति दिक्।

---

1 तद्विशिष्टविषयता—ख
2 तद्विशिष्टपक्षतावच्छेदकविशिष्ट—ख
3 कदाचिदपि—ख
4 करण्यव्याप्य—ग
5 विषयतावच्छेदकस्यैव—ग
6 साध्यविशेष—क

[1]व्याप्तिविरहश्च [2]व्यर्थविशेषणादौ ।

प्रकाशः

पर्वतांशेऽनुमित्यप्रतिबन्धेऽपि विशिष्टविषयकानुमितिप्रतिबन्धकत्वेनास्य हेत्वाभासत्वम् । व्यर्थविशेषणस्थलेऽनुमित्युत्पादेऽपि उद्देश्यानुमितिप्रतिबन्धकतया हेत्वाभासत्ववत् । एवं च काञ्चनमयत्वविशिष्टत्वेन [3]ज्ञाते पर्वतत्वाभाव[4]ज्ञानपर्वतभिन्नत्वज्ञान[5]पर्वतत्वसुवर्णमयत्वसामानाधिकरण्याभावज्ञानादीनामपि परामर्शप्रतिबन्धकत्वात् तद्विषयाभावानामाश्रयासिद्धत्वमेव । स्वरूपासिद्धिव्याप्यत्वासिद्धिभिन्नासिद्धित्वेन तेषामनुगमाच्च न विभागव्याघात इति ध्येयम् ।

व्याप्तिविरहस्त्विति । असंकीर्ण इति शेषः । आदिपदात् व्यर्थविशेष्यत्वपरिग्रहः । यथा चात्र व्याप्यत्वासिद्धिस्तथा [5]च वक्ष्यति । ननु व्यर्थविशेषणादावसंकीर्णा यथा तथास्तु । [6]सव्यभिचारादिहेतोर्व्यभिचारादिसंकीर्णा व्याप्यत्वासिद्धिः कथम् ? यत्किंचिद्व्याप्तिविरहस्य सद्धेतुसाधारणत्वात् । वह्न्यादिसमानाधिकरणात्यन्ताभावाप्रतियोगिधूमादिसामानाधिकरण्यरूप-प्रकृतव्याप्तेरसिद्धेः ।

तर्कचूडामणि;

पर्वतांश इति । यद्यपीदं प्रागुक्तम्, तथापि तदेव दृष्टान्तप्रदर्शनेन स्पष्टीक्रियत इति भावः ।

ननु व्यभिचारिण्यपि व्याप्तिविरहसत्त्वे कथं व्यर्थविशेषणत्वादावित्युक्तम् इत्यत आह— **असंकीर्ण इति** । नन्वव्यभिचरितसामानाधिकरण्यसत्त्वे नीलधूमादौ कथं व्याप्तिविरह इत्यत आह – **यथा चेति** । **तत्सामानाधिकरण्येति** । (१)

ननु साध्यनिष्ठस्य व्याप्तिरूपत्वाभावेन कथं तदभावस्य व्याप्यत्वासिद्धत्वम् । न हि व्याप्तिज्ञानविषयाभावत्वमात्रेण तत्त्वम्, व्यभिचारादेरपि तत्त्वापत्तेः । किं च तादृशान्योन्याभाव-प्रतियोगितावच्छेदकत्वाभावज्ञानस्यापि प्रतिबन्धकत्वादाधिक्यम् ।

---

1 'व्याप्तिविरहस्तु' इति प्रकाशसंमतः पाठः 2 'व्यर्थविशेषणत्वदौ' इति चूडामणिसंमतः पाठः
3 ज्ञातेऽपि पर्वतत्वाद्यभाव-ख. 4 ज्ञान–ख
5 अग्रे वक्ष्यते–ख 6 सव्यभिचारिहेतौ व्यभिचारिसंकीर्णा–क

प्रकाशः

न च साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्वं साध्ये व्याप्यत्वासिद्धिरिति वाच्यम् । अव्यभिचरितसामानाधिकरण्यस्य व्याप्तित्वेन विशेषणीभूताव्यभिचारविरहरूपतया अस्य व्यभिचारान्तर्भूतत्वात् विशेष्यसामानाधिकरण्यविरहस्य च विरुद्धत्वात् । तथा च विशिष्टविरहस्य तत्त्वं वाच्यम् । तत्र चाप्रसिद्धिरेवेति चेत्–

मैवम् । हेतुसामानाधिकरण्यविशिष्टस्य हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वस्याभावो व्याप्यत्वासिद्धिः । न च विशेष्यविरहज्ञानस्यैव व्यभिचारज्ञानतया प्रतिबन्धकत्वमिति वाच्यम् । हेतौ साध्यसामानाधिकरण्ये गृह्यमाणे साध्येऽपि [1]हेतुसामानाधिकरण्यस्य समानसंवित्संवेद्यत्वेन ग्राह्यतया तद्विशिष्टाभावग्रहस्यापि प्रतिबन्धकत्वात् । न च प्रतियोग्यप्रसिद्धिः, सव्यभिचारादिहेतुव्यापके प्रमेयत्वादौ तत्प्रसिद्धेः । न चावृत्तिविरुद्धे तथाप्यप्रसिद्धिः तद्व्यापकाप्रसिद्धेरिति वाच्यम् । तस्य व्यप्यत्वासिद्धत्वेनासंग्राह्यत्वेऽप्यदोषात् । विरुद्धत्वादिनैव तस्य हेत्वाभासत्वादिति दिक् ।

तर्कचूडामणिः

अपि चाशेषसाधनाश्रयाश्रितत्वज्ञानस्य त्वन्मते हेतुतया उक्तात्यन्ताभावाप्रतियोगित्वस्य व्याप्तिग्रहविषयतया कथं तदभावो व्याप्यत्वासिद्धः । अपि च अवृत्तिविरुद्धस्यासंग्राह्यत्वे गगनं न वह्निव्याप्यमिति ज्ञानादनुमितिप्रतिबन्धो न स्यात्, तस्य व्यभिचाराद्यविषयतया तत्त्वेन प्रतिबन्धकत्वायोगात् ।

किं च हेतुसामानाधिकरण्यस्य प्रतियोगित्वाभावविशेषणतायां तदभावस्य प्रतियोगित्वरूपभावात्मकत्वाभावेन अभावान्तरत्वमेव वाच्यम् । तच्च न संभवति । अभावप्रतियोगिकाभावानङ्गीकारात् । [2]न च भावावच्छिन्नप्रतियोगिताकोटौ अभावाभावोऽपि स्वीक्रियत एवेति वाच्यम् । एवं हि घटाभावस्याप्यभावान्तरतापत्तेः । तत्रापि घटस्य भावस्य प्रतियोगितावच्छेदककोटिप्रविष्टत्वात् । न च हेतुसामानाधिकरण्यविशिष्टस्याप्रतियोगित्वस्य अभावः प्रतियोगित्वमेव विशिष्टाभावाभावस्य भावत्वात् । अन्यथा घटसामानाधिकरण्यविशिष्टघटाभावाभावस्याभावान्तरतापत्तेरिति वाच्यम् । तथा सति तज्ज्ञानस्य व्यभिचारज्ञानत्वेनैव प्रतिबन्धकतापत्तेः । तस्मात् व्यर्थविशेषणादावेव व्याप्यत्वासिद्धिर्न तु सव्यभिचारादौ । अत एवोक्तं **मणिकृता**- 'व्याप्तिविरहस्तु व्यर्थविशेषणत्वादौ' इति । तदेतदाह—**दिगिति** ।

---

1 'तत्सामानाधिकरण्यस्य' इति चूडामणिसंमतः पाठः ।

2 न चाभावावच्छिन्नप्रतियोगिताकोटिभावोऽपि–ग

तदुक्तम्—'एकाप्रसिद्धिं परिहरतो द्वितीयापत्तिः' इति।

उपाधिस्तु न व्याप्तिविरहः। वह्निव्यापकधर्मस्याप्रसिद्ध्या धूमे तद्विरहासिद्धेः। किं तु यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यम् अनौपाधिकत्वं व्याप्तिः। साध्यव्यापकसाधनाव्यापकश्च धर्मान्तरं न तु तद्विरहः, अपि तु तन्नियतः। न चैवमुपजीव्यत्वेनोपाधिर्हेत्वाभासान्तरम्, उपजीव्यत्वेऽपि स्वतोऽदूषकत्वेन तदर्थं परमुखवीक्षकत्वात्। न हि साध्यव्यापकाव्याप्यत्वमनुमितिविरोधि। किं तु व्यभिचारोन्नयनेन स्वव्यतिरेकेण सत्प्रतिपक्षतया वा। तदाह—'उपाधाववश्यं व्यभिचारः, उपाधेरेव व्यभिचारशङ्का' इति।

अप्रयोजकान्यथासिद्धौ सोपाधी नासिद्धौ। प्रतिकूलतर्कानुकूलतर्काभावावुपजीव्यत्वे सति स्वतोदूषकावपि न हेत्वाभासौ, स्वरूपसतोरेव प्रतिबन्धकत्वादित्युक्तम्॥

इति श्रीमद्गङ्गेशोपाध्यायविरविते तत्त्वचिन्तामणौ अनुमानखण्डे
असिद्धिप्रकरणम्

प्रकाशः

स्वोक्त एवाचार्यसंमतिमाह—तदुक्तमिति।

नन्वनौपाधिकत्वस्य व्याप्तिरूपत्वेन [1]तदभावरूपत्वेनौपाधिर्व्याप्यत्वासिद्धिः। न च [2]नीलधूमादावुपाधिरस्तीति तत्र न व्याप्यत्वासिद्धिरित्यत्राह—उपाधिस्त्विति।

नन्वप्रयोजक एव किमित्यसांकर्यं नोक्तमित्यत आह—अप्रयोजकेति। प्रतिकूलेति। न च [3]तर्करूपमेव ज्ञानं प्रतिबन्धकमिति [4]तद्विषयस्य हेत्वाभासत्वापत्तिरिति वाच्यम्। [5]तज्ज्ञानस्य नियमतोऽयथार्थत्वात्, अनुमिति[5]प्रतिबन्धकयथार्थज्ञानविषयस्यैव हेत्वाभासत्वादिति केचित्।

तर्कचूडामणिः

क्षित्यादिकमकर्तृकम् अजन्यत्वादित्यत्र स्वरूपासिद्धिं शरीरपदेन परिहरतो मीमांसकस्य व्यर्थविशेषणतया व्याप्यत्वासिद्ध्यापत्तेरिति आचार्यग्रन्थस्यार्थः।

अयथार्थत्वादिति। धूमो न स्यादित्यादेरारोपरूपत्वादित्यर्थः।

---

1 तदभाव उपाधिः–क
2 धूम–ख
3 तद्विषयस्य तर्करूप–ख
4 तस्य–ख
5 अनुमिति–क

प्रकाशः

अपरे तु—यद्विषयत्वं ज्ञानस्य प्रतिबन्धकतावच्छेदकं तस्यैव हेत्वाभासत्वम्। अत एव सिद्धसाधनस्यानुमिति प्रतिबन्धकत्वेऽपि [1]साध्यस्य न हेत्वाभासत्वम्। न चेह [2]तर्कविषय-विषयकत्वं तथा। तदर्थविषयकज्ञानान्तरादप्यनुमितिप्रतिबन्धापत्तेः। किं तु विषयनिरपेक्षानिष्ट-प्रसङ्गत्वेनैव तर्कस्य तथात्वम्। अत एव सामानविषयकादपि तर्कादिष्टापादनदशायां न प्रतिबन्ध इत्याहुः।

इह यथा व्याप्तिविरहज्ञानं पक्षधर्मताविरहज्ञानं च साक्षात्परामर्शविघटकं तथा व्याप्ति-विरहव्याप्यवत्ताज्ञानं [3]पक्षधर्मताविरहव्याप्यवत्ताज्ञानं च प्रतिबन्धकम्, विरोधिज्ञानत्वाविशेषात्। तथा च तदुभयविरहव्याप्यवत्त्वं कथं न हेत्वाभासान्तरमिति चिन्त्यम्।

अत्र केचित् तद्विरहव्याप्यत्वज्ञानं व्याप्तिपक्षधर्मताप्रत्यक्षादिविरोधितया तथा, व्याप्त्याद्यनुमितिविरोधितया वा। आद्ये असंभवः। न हि व्याप्त्यादिविषयके प्रत्यक्षे शाब्दज्ञाने वा तदभावव्याप्यधीर्विरोधिनी। प्रत्यक्षे ग्राह्याभावप्रत्यक्षस्येव शाब्दज्ञाने ग्राह्या-भावज्ञानस्यैव प्रतिबन्धकत्वात्। अन्त्ये तु सत्प्रतिपक्षितत्वमेव। विरुद्धोभयव्याप्यज्ञानात्। न चैवमुपाधिना व्यभिचारानुमितिरपि 'विरोधिनी न स्यादिति' वाच्यम्। योग्यधर्मिणि व्यभिचार-स्यापि योग्यत्वे विशेषदर्शनानन्तरं पुरुषप्रत्यक्षवत् व्यभिचारप्रत्यक्षस्यापि तत्रोत्पत्तेः। अयोग्ये तु सत्प्रतिपक्ष एवेति वदन्ति।

तर्कचूडामणिः

ननु प्रतिपक्षासाधारणस्थलीयानुमितिप्रतिबन्धकज्ञानस्याप्रमात्वेऽपि तद्विषयस्य हेत्वाभासतो-पाधित्ववदत्रापि तदुपाधित्वं स्यादित्यपरितोषादाह—**अपरे त्विति। तदर्थेति।** ह्रदपक्षकवह्न्य-भावानुमाने धूमाभावापादनस्याप्रतिबन्धकत्वादित्यर्थः।

जयदेवमतमाह—**अत्रेति। ग्राह्याभावज्ञानस्येति।** तन्निश्चयस्येत्यर्थः।

---

1 साध्यं न हेत्वाभासः—ख
2 तर्कविषयकं तथा—ख
3 विरोधि—ख
4 न स्यादिति—ख

प्रकाशः

तन्न । व्याप्त्याद्यनुमितिप्रतिबन्धकत्वेनैव हेत्वाभासत्वात् । न च सत्प्रतिपक्षत्वमेव ; वह्नौ धूमव्याप्तिविरहव्याप्यवत्त्वस्य धूमव्याप्त्यनुमितौ सत्प्रतिपक्षतया प्रतिबन्धकत्वेऽपि वह्निना धूमानुमितौ न सत्प्रतिपक्षितत्वम् । धूमविरहव्याप्यस्यैव तत्र सत्प्रतिपक्षत्वात् । न तु धूमव्याप्तिविरहव्याप्तस्य तस्य व्याप्तिविघटनद्वारा धूमानुमितिप्रतिबन्धकत्वात् सत्प्रतिपक्षत्वम्, सत्प्रतिपक्षस्य साक्षात् प्रतिबन्धकत्वात् । अन्यथा व्याप्तिविरहादेरपि बाधत्वापत्तिः, ग्राह्याभावस्यैव बाधत्वात् । न च व्याप्तिरूपग्राह्याभावो न बाधः, किं त्वनुमितिविषयाभावः, तस्यैव साक्षात्प्रतिबन्धकत्वात्, अस्य च परंपरया विघटकत्वादिति वाच्यम् । एवं ममापि व्याप्तिरूपग्राह्यविरहव्याप्यवत्त्वं न सत्प्रतिपक्षः, किं त्वनुमितिविषयाभावव्याप्यवत्त्वम् । तस्यैव साक्षात्प्रतिबन्धकत्वात् । अस्य च परंपरया विघटकत्वादिति तुल्यम् ।

तस्माद्यथा व्याप्तिज्ञाने व्याप्तिविरहज्ञानस्य बाधज्ञानत्वेन प्रतिबन्धकत्वेऽपि न धूमानुमितौ बाधत्वम्, तथा व्याप्तिग्रहे व्याप्तिविरहव्याप्यग्रहस्य सत्प्रतिपक्षज्ञानत्वेन प्रतिबन्धकत्वेऽपि न धूमानुमितौ सत्प्रतिपक्षत्वम्, किं तु व्याप्तिविरहादिवद्धेत्वाभासान्तरत्वमेवेति ।

अपरे तु—तयोरपि व्याप्यत्वासिद्धत्वमेव, अतो नाधिक्यम । न चाननुगमः, स्वरूपासिद्ध्याश्रयासिद्धिभिन्नासिद्धित्वेन स्वरूपसता एकेन रूपेण सर्वसंग्रहादित्याहुः । तदपि न । तत्र हेत्वाभासव्यवहाराभावेन वक्ष्यमाणदोषात् हेत्वाभासत्वाभावेन च व्याप्यत्वासिद्धत्वाभावात् ।

वयं तु ब्रूमः । स एव हेत्वाभासो यस्य [1]प्रत्यक्षज्ञाने सति अवश्यमनुमितिप्रतिबन्धः । न तु यज्ज्ञाने सति कदाचिदनुमितिप्रतिबन्धः सोऽपि तथा, उपाधेरपि हेत्वाभासत्वापत्तेः ।

तर्कचूडामणिः

अधिकबलोपस्थितिविषयातिव्याप्तेराह—प्रत्येकेति । दोषान्तरासंकीर्णेत्यर्थः ।

---

1 प्रत्येकेति चूडामणिसंमतः पाठः ।

प्रकाशः

याह्यादिविरहव्याप्यवत्त्वज्ञाने च नावश्यमनुमितिप्रतिबन्धः, तज्ज्ञाने सत्यनुमितिरूपव्याप्ति-ग्रहप्रतिबन्धेऽपि प्रत्यक्षशाब्दव्याप्तिग्रहादनुमित्युत्पत्तेः। न हि ग्राह्यविरहव्याप्यवत्त्वज्ञानं प्रत्यक्ष-प्रतिबन्धकम्। पीतत्वाभावव्याप्यशङ्खत्वग्रहेऽपि पीतप्रत्यक्षोदयात्। न वा तज्ज्ञानं शाब्द-ज्ञानप्रतिबन्धकम्। [1]अयोग्यताज्ञानस्यैव विरोधित्वात्।

अत एव स्थाणुत्वाभावव्याप्य[2]करभ्रमानन्तरम् अयं स्थाणुरेवेत्याप्तवचनात् स्थाणुत्व निश्चयोऽनुभवसिद्धः। अत एव बाधसत्प्रतिपक्षातिरिक्तः परामर्शविषयाभाव एव हेत्वाभास-शास्त्रकाराभिसन्धानविषयः, तादृशश्चाश्रयासिद्ध्यादिरेव। तेन व्याह्यादिविरहव्याप्यत्वस्य ज्ञायमानतया साक्षात्प्रतिबन्धकत्वेऽपि न हेत्वाभासत्वम्। न च शास्त्रकारस्य तथाभिसन्धाने मानाभावः। तत्र हेत्वाभास[3]व्यवहाराभावस्यैव मानत्वादिति समाधानमनुपादेयम्। उक्ते-नैवोपपत्तेरिति। पक्षे साध्यसिद्धौ सिद्धसाधनमेव, तदभावसिद्धौ स्वरूपासिद्धिरेव, तदप्रतीताव-ज्ञानरूपासिद्धिरेवेति साध्या[4]विशेषस्य नाधिक्यमाशङ्कनीयम्॥

इति श्रीरुचिदत्तमिश्रविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे असिद्धिप्रकरणम्

तर्कचूडामणिः

उपाध्यायसमाधानं दूषयति— अत एवेति।

इति श्रीधर्मराजाध्वरिविरचिते तर्कचूडामणौ
अनुमानखण्डे असिद्धिप्रकरणम्

1 योग्यतादिज्ञानाविरोधित्वात्–ख
2 भ्रमा–क
3 व्यवहारस्यैव क
4 साध्या–क

अथ बाधप्रकरणम्

बाधो न साध्याभाववत्पक्षकत्वम्, पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा। पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विना अधिकबलत्वाज्ञानेन बाधाभावादिति वक्ष्यते। अत एव साध्याभाववत्पक्षवृत्तित्वमपि न। असिद्धिसंकीर्णबाधाव्याप्तेश्च।

किं तु साध्याभाववत्त्वप्रमाविषयपक्षकत्वं, प्रमितसाध्याभाववत्पक्षकत्वं, पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति। विवक्षितविवेकेन साध्याभावप्रमैव दोषः। सा च प्रमात्वेन ज्ञाता न स्वरूपसती, हेत्वाभासत्वात्। प्रमात्वज्ञानं विना अधिकबलत्वाभावेनादोषत्वात् अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च।

प्रकाशः

साध्याभाववदिति। प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसाध्याभाववत्पक्षकत्वमित्यर्थः। एवमग्रिमलक्षणेष्व[1]भावपदं तादृशाभावपरं[1] बोध्यम्।

ननु इदं बाधितत्वं केवलान्वयिन्यप्रसिद्धमित्यबाधितत्वमपि तत्र नास्तीति [2]तत्र तद्बोधकनिगमन[3]स्याप्यनवकाशः स्यादित्यपरितोषात् अतिरिक्तविषयतावादिमतेन लक्षणान्तरमाह—**पक्षनिष्ठेति**। पक्षनिष्ठं यत् प्रमाविषयत्वं विशेषणताविशेषः तत्प्रकारीभूताभावप्रतियोगिसाध्यकत्वमित्यर्थः। **विवक्षितेति**। बाधज्ञानस्य हेतुविषयतया प्रतिबन्धकत्वाभावात् तन्मात्रविषयतयैव प्रतिबन्धकत्वादिति भावः। **प्रमात्वेनेति**। तथा च तत्प्रमात्वं दोषः तज्ज्ञानस्य प्रतिबन्धकत्वादिति भावः। **अप्रमायामि**त्युपलक्षणम्, प्रमायामप्रमात्वनिश्चयेऽनुमित्युत्पत्तेश्चेत्यपि द्रष्टव्यम्।

तर्कचूडामणिः

संयोगसाध्यकसद्धेतावतिव्याप्तेराह—**प्रतियोगीति**। ननु प्रतिबन्धकज्ञानस्य हेतुविषयतयापि तत्वेन कथं तत्प्रमैव दोष इत्युक्तमित्यत आह—**बाधेति**। ननु कथं प्रमायाः दोषत्वम्, प्रमात्वेन तज्ज्ञानेऽनुमित्यप्रतिबन्धादित्यत आह—**तथा चेति**।

---

1 भावपदं—क 2 तद्बोधक—क

3 स्यावकाशः—ग

अथ साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचारः, तदज्ञाने असिद्धिः, संशययोग्यत्वाभावेन पक्षत्वाभावात् आश्रयासिद्धिश्च। न च पक्षभिन्ने व्यभिचारो दोषः। व्यर्थविशेषणत्वात् सर्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधनमित्यवगमादेव भङ्गात्।

न चैवं संदिग्धसाध्यदृष्टान्ते संदिग्धानैकान्तिकवत् पक्षे व्यभिचार-संशयादनुमानमात्रोच्छेद इति पक्षे साध्यसंशयोऽनुमानाङ्गमिति। व्याप्तस्य पक्षधर्मताज्ञानादनुमित्युत्पादेन संशयनिवृत्तेः। अन्यथा विशेषदर्शनस्य संशयविरोधिता भज्येता। न च पक्षे साध्याभावं प्रतीत्य व्यभिचारज्ञान-मित्युपजीव्यत्वात् बाधः पृथक्। पक्षे साध्याभावप्रतीतिरेव हि साध्याभाव-हेत्वोः संबन्धोल्लेखिनीत्येकवित्तिवेद्यत्वेन नोपजीव्यत्वम्। अन्यथा बाधदशायां पक्षे हेतोरज्ञानादसिद्धिरेव।

प्रकाशः

ननु पक्षे साध्याभावानुपस्थितौ विरोधाभावादप्रतिबन्धकत्वम्। उपस्थिते [1]च हेतु[1]विषयत्वे व्यभिचारः, तदविषयत्वे असिद्धिरिति नासांकर्यं कुत्रापि बाधस्येति शङ्कते—**अथेति**। **आश्रयासिद्धिरिति**। संप्रदायमतेन बोध्यम्।

[2]**पक्ष इति**। तथा च [2]फलबलात् पक्षीयव्यभिचारसंशयस्याप्रतिबन्धकत्वेऽपि तन्निश्चयस्य [3]प्रतिबन्धकत्वं[3] स्यादेवेति भावः। **अनुमित्युत्पादेनेत्युपलक्षणम्**, तज्जनकपरामर्शेन वेति द्रष्टव्यम्। **विशेषेति**। विरोधीत्यर्थः।

तर्कचूडामणिः

ननु बाधज्ञानस्य तत्प्रमात्वयिषयकस्य पक्षीयसाध्याभावाविषयकतया तत्र हेतुज्ञानेऽपि न व्यभिचारसांकर्यम् इत्यत आह—**नन्विति**। ननु पक्षविशेषणाभाव एवाश्रयासिद्धेरुपपत्तेः मूलासंगतिरित्यत आह – **संप्रदायेति**।

तर्हि संशयवत् तन्निश्चयोऽपि तदविरोध्येवेत्यत आह—**तथा चेति**। ननु व्याप्यदर्शनस्य संशयविरोधितामात्रेण व्यभिचारनिश्चयस्य कथं व्याप्तिधीप्रतिबन्धकत्वमित्यत आह—**विरोधीति**।

---

1 हेतु–क 2 तथा च–क

3 प्रतिबन्धकत्वं–ख

न चोद्भावितव्यभिचारनिर्वाहाय बाधोद्भावनमावश्यकमित्युपजीव्यत्वम् । व्यभिचारोद्भावने परं कथंतानावश्यकत्वात् । तत्त्वे वा तन्निर्वाह्यमेव दूषणं क्लृप्तत्वात् । वह्निरुष्णः कृतक इत्युद्भावनात् वह्निरुष्ण इत्युद्भावने लाघवमिति बाधः पृथगिति कश्चित् । तन्न । पक्षे साध्याभावप्रमा स्वार्थानुमाने यदि न दोषः तदा परं प्रत्यपि न स्यात् अविशेषादिति तदुद्भावनस्य दूरनिरस्तत्वात् ।

अथोपनीतकाञ्चनमयत्वविशिष्टवह्न्यनुमितेः सल्लिङ्गजन्यायाः आभासत्वं हेत्वाभासाधीनम् । न चानुमितेः पूर्वं तत्र व्यभिचारज्ञानम्, विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानात् । अत एव पक्षासिद्धिरपि न । अतः

प्रकाशः

त्प्रयुक्तसंशययोग्यताभावेनाश्रयासिद्धिरपि नेत्यर्थः । व्यधिकरणधर्मावच्छेदेन [1]बाधवत् व्यभिचारोऽपि संभवत्येव ।

[2]पक्ष इति । अत्रोद्भावनाद्यवावेन लाघवानवतारादिति भावः ।

एकदेशि[2]मतेनासांकर्यं शङ्कते--**अथेति** । प्रत्यक्षस्थले लाघवात् प्रमाणत्वावच्छेदेनवोपनयसहकारित्वकल्पनादिति भावः । **अत एवेति** । विशिष्टाप्रसिद्ध्या तदभावाप्रसिद्धेस्त-

---

तर्कचूडामणिः

ननु व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावाङ्गीकारे अपसिद्धान्त इत्यत आह—**एकदेशीति** । ननु काञ्चनमयत्वांशे व्याप्त्याद्यभावात् कथं तद्गोचरानुमितिः । [3]न चोपनय एव तत्र हेतुः । [4]तस्यानुमितिहेतुत्वे मानाभावादित्यत आह—[5]**प्रत्यक्षेति** । ननु [6]साध्याप्रसिद्धावपि सिद्ध्यभावरूपपक्षता स्यादेवेत्यत आह—**विशिष्टेति** । **तत्प्रयुक्तेति** । अप्रसिद्धिप्रयुक्तेत्यर्थः । ननु साध्यतावच्छेदकावच्छिन्नसाध्याभावाभावेन कथं व्यभिचारः । न च व्यधिकरणधर्मावच्छिन्नसाध्याभावमादाय तदुक्तिरिति वाच्यम् । सिद्धान्ते तदनङ्गीकारादित्यत आह—**व्यधिकरणेति** ।

1 बाधकवत्-ख
2 एकदेशि-ख
3 न चोपाय एव-ग
4 तस्यानुमितिगोचरत्वे-ग
5 अत्रेति-ग
6 साध्यप्रसिद्धावपि-ग

काञ्चनमयवह्न्यभावरूपात् बाधात् अनुमानाभासत्वम्, व्यधिकरणप्रकारावच्छिन्नप्रतियोगिकश्चात्राभाव इति चेत्—न ।

वस्तुतो व्यभिचारस्यापि तत्र सत्त्वात् । ज्ञानं च तस्य बाधस्येवानुमित्यनन्तरमेव । किं च वह्नौ काञ्चनमयत्वस्यानुमितावेव भाने काञ्चनमयवह्निमानित्यनुमितिर्न स्यात् । विशिष्टस्य पूर्वमज्ञानात् । वह्नौ काञ्चनमयत्वांशेऽनुमितेराभासत्वम् , वह्नौ लिङ्गस्यासिद्धेः व्यभिचाराच्च ।

न च अनुमितेर्विषयाभावाधीनमप्रमात्वम् , किं तु हेत्वाभासाधीनम् । यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः । न च साध्याभावो ज्ञातः प्रतिबन्धक इति न स हेत्वाभासः ।

वस्तुतस्तु उपनीतस्यानुमितौ भाने मानाभावः । प्रत्यभिज्ञादौ च प्रतीतिबलेनैव तत्कल्पनम् । अन्यथा पूर्वोपस्थितसकलपदार्थभाने यथार्थानुमित्युच्छेदः ।

प्रकाशः

मतान्तरे तु बाधोऽपि नेत्याशयेन समाधत्ते -- **वस्तुत इति** । **अज्ञानादिति** । विशिष्टवैशिष्ट्यावगाहिज्ञाने विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्यैव कारणत्वमतेनेदमुक्तम् विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेन विशिष्टवैशिष्ट्यावगाहिज्ञानसंभवादिति ध्येयम् ।

नन्वेवं धूमेन वह्न्यनुमितौ वह्नित्वानुमितिरपि न स्यात् । धूमे तन्निरूपितव्यभिचारादिसंभवात् । अथ साध्यतावच्छेदकावच्छिन्नसाध्यनिरूपितव्यभिचारादिकं दोषः, तदा प्रकृतेऽपि तुल्यमित्यपरितोषादाह—**न चेति** । **न च साध्याभाव इति** । तथा च काञ्चनमयवह्न्यभावोऽपि न बाध इति भावः ।

ननु साध्यतावच्छेदकस्य हेतुनिष्ठव्याप्त्यनिरूपकत्वात् तन्निरूपितव्यभिचारस्यादोषत्वेऽपि वह्नौ काञ्चनमयत्वाभावज्ञानस्य ग्राह्याभावज्ञानत्वेन प्रतिबन्धकत्वं स्यादेव । तथा चान्यत्र साध्याभावस्यापि हेत्वाभासत्वम् , ग्राह्याभावत्वाविशेषात् तज्ज्ञानस्यापि प्रतिबन्धकत्वादित्यस्वरसादाह–**वस्तुतस्त्विति** ।

तर्कचूडामणिः

वस्तुतोऽनुमित्याभासताप्रयोजकत्वं नाभासताप्रयोजकम् , व्यभिचारिणापि कदाचित् सदनुमितिदर्शनादिति मन्तव्यम् ।

अपि चैवं परार्थानुमानेऽप्युपनीतभाने बाधितोऽर्थ उपनीतोऽयं मम भात इत्युद्भावनादेव विजयेत वादी। उद्देश्यानुमितेरप्रतिबन्धान्न तत्र बाधो दोष इति चेत्, तुल्यं स्वार्थानुमानेऽपि।

प्रकाशः

तथा च वह्नौ काञ्चनमयत्वानुमितिसामग्रीविरहादेव न तज्ज्ञानं, न तु बाधादिति भावः।

नन्वेवं प्रत्यक्षमात्रस्याप्ययथार्थत्वं प्रसज्येत सर्वत्र पूर्वोपस्थितसकलभानापत्तेः। न चादृष्टादिकं, नियामकम् प्रकृतेऽपि तुल्यत्वात्। फलव्यतिरेकस्यात्राप्यसिद्धेः। लाघवेन प्रमाणत्वावच्छेदेनैवोपनयसहचारितासंभवाच्च।

अथोपनितभानसामग्री प्रत्यक्षादौ प्रत्यक्षादिप्रमाणसामग्रीसहाया वाच्या न तु स्वतन्त्रा, प्रत्यक्षादिसामग्र्यभावेऽपि जननापत्तेः। तथा चोपनीतभानेऽपि ज्ञानलक्षणेन्द्रियप्रायासत्तिसत्त्वात् अस्तूपनीतांशेऽपि प्रत्यक्षत्वम्। अनुमितिसामग्री तु व्याप्त्यादिका, न चोपनीते सास्तीति कथं तत्सहाया तत्रोपनितसामग्री, कथं वा सा धीरनुमितिः। विषयैक्यं विना सामग्र्योरन्योन्यसहकारित्वस्यातिप्रसङ्गेनासाधकत्वादिति चेत् – एवं तर्हि ईश्वरानुमाने कर्त्रैक्यमपि न भासेत। न च लाघवोपनीतभानसामग्रीं प्रमाणमात्रसहकारिणीति तदुपनीतं भासत इति वाच्यम्। तस्या अपि स्वतन्त्राया अजनकतया प्रत्यक्षसामग्रीसहिताया एव जनकत्वाभ्युपगमप्रसङ्गात्। तस्याश्च व्याप्त्यादिरूपाया अभावात्। न च व्याप्त्यादिसामग्रीसाहित्यमात्रं विवक्षितम्, न तु व्याप्त्यादिसामग्रीसाहित्यं गौरवादिति वाच्यम्। अत्रापि तुल्यत्वात्। यथा च कर्त्रैकत्वं भासते तथाग्रे वक्ष्यत इत्यपरितोषादाह — **अपि चेति। तुल्यमिति।**

तर्कचूडामणिः

ननु साध्याभावस्याबाधत्वेऽपि काञ्चनमयत्वावच्छिन्नवह्न्यभावस्य तत्त्वं स्यादेवेत्यत आह–**तथा चेति**। विषयाभावत्वाविशेषादिति भावः।

नन्वेवं विशेष्यानुमाने कथं बाधस्य हेत्वाभासत्वम्, तत्र व्यभिचारस्यापि संभवादित्यत आह — **तथा चेति**।

नन्वनुमितावुपनीतभाने मानाभावेऽपि बाधस्य हेत्वाभासत्वे किमायातमित्यत आह–**तथ चेति**। ननु प्रत्यक्षस्थले सुरभि चन्दनमिति विशिष्टज्ञानदर्शनेन तत्र सहकारित्वम्। न चात्र तादृशानुभवः। तथा सति विवादाभावप्रसङ्गादित्यनुशयादह- **लाघवेनेति**। प्रयक्षत्वापेक्षया प्रमाणत्वस्य सामान्यतो ऽयुक्त्वादित्यर्थः। ननु माभूत्तत्रापि कर्त्रैक्यमनुमितिविषय इत्यत आह- **यथाचेति**।

अत एव यत्र सामान्यतोदृष्टानुमानमेवेतरबाधसहायं विशेषानुमापकं [1]तत्र बाधकानाभावासत्वे तत्प्रयुक्तं सामान्यतोदृष्टस्याप्याभासत्वमिति बाधस्यासांकर्यात्। न च यदि विशेषविप्रतिपत्तौ सामान्यस्य प्रतिज्ञा तदा अर्थान्तरम्, सामान्यविप्रतिपत्तौ तु नेतरत्र बाधकापेक्षेति वाच्यम्। स्वार्थानुमान एवैवं बाधासंकरस्योक्तत्वादित्यपास्तम्। अनुमित्यप्रतिबन्धेन तत्र बाधस्यादोषत्वात्।

प्रकाशः

तथा चोद्देश्यानुमितेरनाभासत्वात् तदाभासत्वप्रयोजकत्वेनापि नोपनीतभानपक्षे बाधो दोषः। उद्देश्यानुमितिप्रतिबन्धकतया तदा ासताप्रयोजकतया वा हेत्वाभासत्वाभ्युपगमादिति भावः। [3]तत्र बाधकानामिति। तथा च [4]बाधकगताभासत्वस्यैव सामान्यतो[5]दृष्टानुमाने आभासत्वप्रयोजकत्वात् बाधरूपो दोष इति ावः। बाधस्येति। बाधकगतोभासत्वरूपस्येत्यर्थः।

तर्कचूडामणिः

यद्यपि लाघवादि[6]ज्ञानानन्तरभाविलघ्वर्थविषयकत्वावच्छेदेनैव [7]लाघवप्रयुक्तोपनयस्य हेतुत्वं वक्ष्यत इति न तदवष्टम्भेनानुमितिमात्रे उपनयस्य सहकारिता। तथापि [8]द्विकर्तृकघटादौ लाघवोपनीतैकमात्रकर्तृकत्वस्य बाधावतारदशायां नानुमितिविषयत्वमिति तत्रैव तस्य हेत्वाभासत्वमित्यत्र तात्पर्यम्।

अत एवेत्यादिमणेरयमर्थः—शब्दपक्षकद्रव्याश्रितत्वानुमानं यदा पृथिव्यादिरूपविशेषानुमापकं तदा तस्याभासत्वम्। तदाभासतायां च शब्दो नाकाशाश्रितः बाह्येन्द्रियप्रत्यक्षत्वादित्यनुमानाभासत्वमेव प्रयोजकमिति बाधस्य दोषत्वमिति।

नन्वेवमपि [9]बाधकानुमानगतमाभासत्वं भवतु हेत्वाभासतोपाधिः, बाधस्य तत्त्वे किमायातमित्यत आह - तथा चेति। [10]बाधकगताभासत्वमेव दोष इत्यत्र हेतुमाह— सामान्यत इति। बाधशब्दस्य साध्याभावपरत्वभ्रमं वारयति -- बाधकेति।

---

1 'तत्प्रयुक्तं' इत्यतः प्राक् 'सिद्धे' इत्यधिकपाठः।
2 'नेतरबाधापेक्षा' इति पाठान्तरम्
3 उत्र-ख
4 बाधकाभास-ख
5 दृष्टाभासत्व-ख
6 ज्ञानान्तर-क
7 लाघवोपयुक्तो-ग
8 घटादौ-ग
9 बाधानुमान-ग
10 बाधगता-ग

ननु पक्षे साध्याभावग्रहवत् साध्याभावव्याप्यग्रहोऽपि दूषकः विरोधित्वाविशेषात्। तथा च साध्याभावसंबन्धो व्यभिचारः। साध्याभावव्याप्यसामानाधिकरण्यं बाधः, साध्याभावव्याप्यं च वह्नित्वादिकमेवेति चेत्—न। पक्षे हि साध्याभावे ज्ञाप्यमाने ज्ञाते वा यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिस्तदा व्यभिचार एव। अथ पक्षे साध्याभावबुद्धिं विनैव सा, तर्हि हेतुसाध्याभावव्याप्ययोरगृह्यमाणविशेषयोः सत्प्रतिपक्षत्वम्।

अथ तुल्यबलेन सत्प्रतिपक्षोऽधिकबलेन बाध इति चेत्—न। गमकतौपयिकरूपसाकल्यं हि बलम्। तच्च द्वयोर्ज्ञातमिति कथं न सत्प्रतिपक्षत्वम्। गमकतावहिर्भूतं च न बलम्। अथ साध्याभावव्याप्यबुद्धेरनन्यथासिद्धत्वं बलम्, तदा ततः साधनवति पक्षे साध्याभावानुमितावनैकान्तिकत्वमेव।

प्रकाशः

वह्नित्वादिकमेवेति। वह्निरनुष्ण इत्याद्यनुमान इति भावः। **तर्हीति**। हेतौ साध्याभावव्याप्यसामानाधिकरण्यभाने [1]पक्षे [2]साध्याभावव्याप्यवत्त्वस्यापि भानात्, सामानाधिकरण्यस्य च तदधिकरणाधिकरणत्वरूपत्वात्। अन्यथा विरोधिविषत्वाभावादिति भावः।

अनैकान्तिकत्वमेवेति। वस्तुतः साध्याभाव[3]व्याप्यवत्त्वबुद्धेरनन्यथासिद्धत्वं न साध्यव्याप्यबुद्धेरन्यथा[4]सिद्धत्वबुद्धिं विना। अन्यथा सत्प्रतिपक्षस्यैव सत्त्वप्रसङ्गात्। [5]तथा च तदेव तत्र दोषः, न तूक्तरूपो बाधः। तेन रूपेण क्वचिदपि प्रतिबन्धकत्वाकल्पनात्। अत एव न मणिमन्त्रादि[6]वदुभयप्रतिबन्धकत्वमिति भावः।

तर्कचूडामणिः

ह्रदपक्षकवह्न्यनुमाने वह्नित्वस्य तदव्याप्यत्वादसंगतिनाशङ्क्याह—**वह्निरिति**।

ननु साध्याभावानुमितिसमये व्यभिचारज्ञानसत्त्वेऽपि तत्पूर्वसमये तदभावात् अधिकबलत्वेन सत्प्रतिपक्षत्वाभावाच्च दोषान्तरमावश्यकमित्यत आह—**वस्तुत इति**। अन्यथासिद्धत्वं नामाप्रमाणत्वम्। अत एव—बाधस्य प्रतिबन्धकत्वाकल्पनादित्यर्थः।

---

1 कण्ये भासमाने-ख
2 साध्याभाववत्त्वस्यपि-क
3 व्याप्यबुद्धे-क
4 सिद्धत्वं विना-ख
5 यथा च-ख
6 रिव तदुभय-क

पक्षे साध्याभावग्रहवदिति यदुक्तं तदप्यसिद्धम्। तस्य दोषत्वानभ्युपगमात्। अन्यथा हेत्वाभासान्तरतापत्तिः।

अथ हेतुतः साध्यसिद्धिसंभावनायां व्यभिचारासिद्धेः बाधेन हेतोरसाधकत्वे सिद्धे व्यभिचारसिद्धिरित्युपजीव्यत्वात् बाधः पृथक्। अन्यथा हेतोरसाधकत्वे सिद्धे साध्यसिद्धिसंभावनाविरहात् व्यभिचारबुद्धिः, तस्यां च सत्यां हेतोरसाधकत्वधीरित्यन्योन्याश्रय इति चेत्— न। साध्यसिद्ध्युन्मुखहेतुज्ञानस्य प्रमितसाध्याभावसहचरितहेतुविषयत्वेन व्यभिचारज्ञानतया दूषकत्वात्।

तथापि व्यभिचारे साध्याभावप्रमा तन्त्रम्, तां विना तदभावादिति सैव दोष इति चेत्--सत्यम्! किं तु साध्याभावप्रमा व्यभिचारज्ञानत्वेन दूषिका, क्लृप्तत्वात्, न स्वतन्त्रा। अत एव पक्षे साध्याभावज्ञानत्वेन प्रतिबन्धकत्वं न तु साध्याभावसामानाधिकरणसाधनज्ञानत्वेनेति प्रत्युक्तम्। तस्य लघुत्वेऽप्यक्लृप्तत्वात्।

अथ प्रत्यक्षादौ प्रमामात्रं प्रति स्वातन्त्र्येण बाधो दोषत्वेन क्लृप्त इत्यनुमितावपि स एव दोष इति चेत्—न तर्हि हेत्वभासः, अनुमित्यसाधारणदोषस्य तत्त्वात्। मनोयोगाभावघत् स्वरूपसत एव प्रतिबन्धकत्वात्। हेतुत्वाभिमतावृत्तित्वेनासाधकतालिङ्गत्वाभावाच्च। बाधितपक्षकत्वलिङ्गमिति चेत्—न। अन्यत्र तथा दूषकत्वाकल्पनात्।

इति बाधपूर्वपक्षः

प्रकाशः

हेत्वाभासान्तरतापत्तिरिति। पक्षनिष्ठसाध्याभावस्येति [1]शेषः। तस्य त्वदभ्युपगतबाधानन्तर्भूतत्वादिति भावः।

स्वरूपसत एव प्रतिबन्धकत्वादिति। साध्याभावप्रमा बाध इति मतेनेदं बोध्यम्। अन्यत्रेति। प्रत्यक्षादावित्यर्थः। [2]अत्रैव तथा दूषकत्वकल्पने गौरवादिति भावः।

तर्कडामणिः

बाधस्य हेत्वाभासान्तरत्वमिष्टमेवेत्यत आह-- पक्षेति। त्वन्मते साध्याभावस्य बाधत्वानङ्गीकारादिति भावः।

---

1 शेषः-क 2 तत्रैव-ख

उच्यते। पक्षे साध्याभावनिश्चयः साध्याभावज्ञानप्रमात्वनिश्चयात्। ज्ञानमात्रादर्थनिश्चये प्रामाण्यग्रहवैयर्थ्यम्, भ्रमत्वेन ज्ञातादर्थनिश्चयप्रसङ्गश्च। तथा चोपजीव्यत्वेनाधिकबलत्वेन वा पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चये सव्यभिचारो नान्यथेत्युभयथापि साध्याभावनिश्चयाधीनव्यभिचारज्ञानात् पूर्वं ज्ञातं साध्याभावज्ञानप्रमात्वमेव दोषः, उपजीव्यत्वात्।

प्रकाशः

ज्ञानमात्रादिति। ज्ञानमात्रस्यार्थनिश्चयरूपत्वे प्रामाण्यग्रहवैयर्थ्यम्, भ्रमत्वेनापि ज्ञायमानस्याप्यर्थनिश्चयत्वप्रसङ्गश्चेत्यर्थः। **तथा चेति**। अत्र पक्षे साध्याभावनिश्चयो यदि व्यभिचारज्ञानत्वेनैव दोषो वाच्यः तदा तदुपजीव्यत्वेन पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयोऽपेक्षणीयः। यदि च बाधत्वेनैव स दोषो वाच्यस्तदा तद्बलाधिकबलरूपत्वेन सोऽप्यपेक्षणीय इत्याशयेन उपजीव्यत्वेनाधिकबलत्वेन विकल्प उक्तः। **अधिकबलेत्यत्र** अधिकं च तद्बलं चेति कर्मधारयो न तु बहुव्रीहिः। तेनाधिकबलत्वस्य [1]प्रमात्वनिश्चयधर्मत्वलाभ [2]इति ध्येयमित्याहुः। **व्यभिचारः** व्यभिचारनिश्चयः। **उपजीव्यत्वादिति**।

तर्कचूडामणिः

ननु साध्याभावज्ञानस्य प्रमात्वनिश्चयं विना अर्थनिश्चायकत्वाभावेऽपि तन्निश्चयरूपतया व्यभिचारनिश्चयत्वं स्यादेवेत्यत आह-**ज्ञानेति**। **अर्थनिश्चयरूपत्वे**—तत्कार्यप्रवृत्त्यादिहेतुत्व इत्यर्थः। एवमग्रेऽपि। ननु व्यभिचारनिश्चयत्वेनैव तन्निश्चयस्यानुमितिप्रतिबन्धकतया अधिकबलत्वं तत्राप्रयोजकम्। न च साध्याभावो बाध इति मतनिरासाय तं प्रति साध्याभावनिश्चयाभिप्रायेणाधिकबलत्वाभिधानमिति वाच्यम्। तथा सति तन्निश्चये प्रमात्वनिश्चयस्य हेतुत्वेनाधिकबलत्वेन वेति विकल्पानुपपत्तेरित्यत आह—**अत्रेति**। अधिकं प्रमात्वनिश्चयरूपं बलं यस्य साध्याभावनिश्चयस्येत्यङ्गीकारे तद्बलस्य साध्याभावनिश्चयधर्म(त्व)स्य प्रमात्वनिश्चयधर्मत्वं न स्यात्। तथा च अधिकबलत्वेन प्रमात्वनिश्चये सति' इति ग्रन्थासंगतिरित्यत आह—**अधिकेति**।

---

1 प्रमात्वस्य निश्चय-ख 2 इत्यवधेयमित्यप्याहुः-ख

यदि च पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयो नानुमितिविरोधी तदा व्याप्तिपक्षधर्मतया हेतुज्ञानं विशेषदर्शनत्वेन पक्षे साध्याभावज्ञानं परिभूय साध्यं साधयेदेव पर्वते धूम इव वह्निम् । न च साध्याभावबुद्धिरेवागृह्यमाणविशेषा सत्प्रतिपक्षवत् प्रतिबन्धिकेति वाच्यम् । रजते नेदं रजतमिति ज्ञानेऽपि विशेषदर्शनेन रजतत्वस्य शङ्खे पीतत्वज्ञाने शुक्लत्वस्य चानुमानात् । वादिवाक्येन पक्षे साध्याभावज्ञानादनुमानोच्छेदप्रसङ्गाच्च ।

प्रकाशः

ननु पक्षे साध्याभाव[1]ज्ञानस्य प्रमात्वं साध्याभाववति साध्याभावप्रकारकत्वम् । तथा च तन्निश्चयोऽपि पक्षे साध्याभावनिश्चय एव । अन्यथा पक्षनिष्ठसाध्याभाववत्त्वांशविषयत्वाभावे[2] विरोधिताया अप्यसंभवात् ।

एतेन यत्र विशेष्यावृत्त्यप्रकारकत्वरूपप्रमात्वग्रहादधिकबलत्वं तत्र व्यभिचाराविषयत्वमित्यपास्तम् । तथा सति विरोध्यविषयत्वेन प्रतिबन्धकत्वासंभवात् ।

तस्मात्तस्यापि साध्याभावसहचरितहेतुविषयतया व्यभिचारज्ञानत्वेनैव[3] प्रतिबन्धकत्वमुपेयम् न तु [4]साध्याभावज्ञानप्रमात्वज्ञानत्वेन, तथा प्रतिबन्धकत्वाकल्पनात् । तज्ज्ञानस्यैव व्यभिचारज्ञानतयोपजीव्यत्वस्याप्यभावात् । यदि च तन्निश्चये हेतुर्न भासते तदा असिद्धिरेवेति चेत्-

---

तर्कचूडामणिः

असिद्धिरिति । अज्ञानासिद्धिरित्यर्थः ।

ननु स्मृत्यनुभवसामग्र्योरनुभवसामग्र्या बलवत्त्वात्[5] पूर्वतोऽनुमितिसामग्र्या बलवत्त्वाच्च [6]परामर्शानुमितिरेव न तु साध्याभावज्ञानप्रमात्वस्मरणम् । किं च तत्कालीनतया साध्याभावविषयकमेव ज्ञानं प्रतिबन्धकम्, इतरथा अतिप्रसङ्गात् । न च स्मृतेस्तत्कालीनसाध्याभावावगाहित्वं, पूर्वं तेन रूपेण तत्र तदभावाननुभवात् । यदपि शाब्दज्ञानमित्युक्तं, तदपि न ।

---

1 ज्ञानप्रमात्वं–क
2 तस्याप्यनुमितिविरोधितायाः असंभवात्–क
3 दोषत्वमभ्युपेयम्–ख
4 साध्याभावप्रमात्व–ख
5 सर्वत्रानुमिति–ग
6 परामर्शादनुमिति–ग

अथ पक्षे साध्याभावप्रमैव साध्याभावहेतुविषया व्यभिचारज्ञानत्वेन दोषः न तु तस्याः प्रमात्वज्ञानमपीति चेत्—तर्हि तस्याः प्रमायाः अप्रमात्वज्ञाने भ्रान्तानुमितिर्न स्यात्, न स्याच्च पक्षे साध्याभावज्ञानप्रमात्वभ्रमात् अनुमितिप्रतिबन्धः ।

प्रकाशः

न । यत्र परामर्शानन्तरं पक्षे साध्याभावज्ञानस्य प्रमात्वस्मरणं शब्देन वा तज्ज्ञानं, तत्र तस्य हेत्वविषयतया व्यभिचाराविषयत्वात् । न च तदा असिद्धिसांकर्यमेवेति वाच्यम् । परामर्शस्य हेतुविषयस्य तदानीमपि सत्त्वेन तदसंभवात् ।

किं च शब्दादौ तज्ज्ञानस्य तत्त्वेनैव प्रतिबन्धकत्वकल्पनात् व्यभिचारादिसांकर्येऽपि [1]तस्य दोषत्वम्[1] , मणिमन्त्रादिवदुभयोरपि [2]प्रतिबन्धकत्वं कल्प्यते, अन्यत्र[2] क्लृप्त[3]सामर्थ्यत्वेन विनिगमकाभावात् ।

अपि च परामर्शोत्तरकालीनस्य [4]तज्ज्ञानस्य यदि न बाधत्वेन [5]प्रतिबन्धकत्वं कल्प्यते, तदा अव्यवहितोत्तरक्षणे विनश्यदवस्थेन परामर्शेनानुमितिजननापत्तेः । व्यभिचारज्ञानस्य परामर्शविघटकस्य तस्मिन् सत्यकिंचित्करत्वात् ।

तर्कचूडामणिः

परामर्शकालीनशाब्दज्ञानसामग्र्याः ग्राह्याभावज्ञानजनिकायाः परामर्शरूपविरोधिसामग्री[6]प्रतिबध्यत्वेन [7]ज्ञानाजनकत्वात् । न च प्रत्यक्ष एव विरोधिसामग्र्याः प्रतिबन्धकत्वमिति वाच्यम् तथा सति [8]विरुद्धार्थकशब्दस्थले शाब्दप्रतिबन्धानापत्तेरित्यपरितोषादाह—**किं चेति ।**

ननु शाब्दज्ञानेऽप्ययोग्यतानिश्चयो न प्रतिबन्धकः, तन्निश्चयेऽपि वाक्यादर्थज्ञानदर्शनात् [9]अन्यथा तदनुवादाद्यनुपपत्तेः । अत एवोक्तम्–'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति । प्रवृत्त्याद्यभावश्चाप्रामाण्यशङ्कादिनाप्युपपद्यते । किं च शाब्दस्थले तन्निश्चय[10]प्रतिबध्यतावच्छेदकं शाब्दत्वम् , न तु ग्राह्यपरोक्षज्ञानत्वम् , स्मृतेरपि प्रतिबध्यतापत्तेः । न च तद्भिन्नपरोक्षत्वम् , तदपेक्षया शाब्दत्वस्यैव लघुत्वादित्यनुशयादाह–**अपि चेति ।**

---

1 दोषत्वं–ख
2 अन्यत्र–क
3 क्लृप्तसामर्थ्येन–क
4 तज्ज्ञानस्य–ख
5 साक्षात्प्रतिबन्धकत्व–ख
6 प्रतिबन्धकत्वेन–ग
7 ज्ञानजनक–ग
8 विरुद्धशब्द–ग
9 अन्यथानुवादत्वानु–ग
10 प्रतिबन्धकताव–ग

ननूपजीव्यत्वेऽप्यत्र साध्याभावप्रमेति ज्ञानं न स्वतो दूषकम्, क्लृप्तत्वात् पक्षे साध्याभावनिश्चयं कुर्वत् व्यभिचारज्ञानद्वारेति चेत्-न। अत्र साध्याभावप्रमेति ज्ञानान्नियमतः साध्यज्ञानानुदयात् तस्यैव प्रतिबन्धकत्वात् शब्दादौ तथा दर्शनात्।

प्रकाशः

न च परामर्शोत्तरं व्यभिचारज्ञानावकाशोऽपि, अव्यभिचरितसामानाधिकरण्यरूपव्याप्तिविषयकपरामर्शस्यैव व्यभिचारग्राहपरिपन्थित्वात्, [1]भावाभावज्ञानयोरन्योन्यं प्रतिबध्यप्रतिबन्धकभावदर्शनात्।

[2]यत्र च पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावग्राहस्य पाण्डरवह्निमानित्यादौ पक्षीयवह्निमात्रविरहग्राहस्य वा ग्राह्याभावग्राहत्वेनानुमितिप्रतिबन्धकत्वं तत्र तज्ज्ञानस्य हेतुविषयत्वेऽपि साध्यतावच्छेदकावच्छिन्नसाध्याभावसामानाधिकरण्यरूपव्यभिचार विषयत्वासंस्पर्शात् बाधस्य व्यभिचारासंकीर्णत्वाच्च।

तर्कचूडामणिः

नन्वेतदयुक्तम्। परामर्शानन्तरकालीनसाध्याभावज्ञानस्य [3]प्रतिबन्धकतया हेतुसाध्याभावसामानाधिरण्यविषयकत्वस्यावश्यकतया पूर्वोत्पन्नपरामर्शविषयकाप्रामाण्यसंशयादिकमन्तरेणोत्पत्त्यनुपपत्तेः। अप्रामाण्यशङ्काशून्यग्राह्यप्रत्यक्षस्य तदभावप्रत्यक्षविरोधित्वाच्च। न च यत्रानुमितिरूपपरामर्शानन्तरं पक्षे साध्याभावप्रत्यक्ष तत्राप्रामाण्यशङ्कादिकमन्तरेणापि तत्संभव एवेति वाच्यम्। तथा शङ्खे पीतिमादिज्ञानवत् तज्ज्ञानस्यानुमित्यप्रतिबन्धकत्वात्। यदि च तत्र नाप्रामाण्यशङ्का तदा परामर्शे तच्छङ्काऽवश्यकीति कारणाभावादेव नानुमितिः, न तु प्रतिबन्धकवशादित्यस्वरसादाह—यत्र चेति। वह्न्यभावस्य [4]पाण्डरवह्न्यभावान्यत्वादिति भावः।

---

1 भावाभावयोरन्योन्यप्रतिबन्धकभावकल्पनात्—ख
2 यत्र तु—क
3 प्रत्यक्षतया—ग
4 पाण्डरवह्न्यभावस्वादिति—ग

साध्याभावप्रमाविषयवृत्तित्वस्य हेतुवृत्तित्वात् [1]असाधारणत्वेन साध्याभावप्रमाया हेत्वाभासत्वम्। साधारण्येऽपि ज्ञायमानं सत् यदनुमितिं प्रतिबध्नाति तस्यैव हेत्वाभासत्वम्। न च साध्याभावप्रमात्रेति निश्चयदशायां पक्षे साध्याभावहेत्वोर्ज्ञानात् व्यभिचार इति वाच्यम्। प्रमात्वज्ञानस्य साध्याभावनिश्चयहेतुत्वेन तद्दशायां तदभावात्।

प्रकाशः

एतेन पक्षे साध्याभावप्रमात्वज्ञानं न प्रत्यक्षेण, तस्यपरतो ग्राह्यत्वात्। [2]किं त्वनुमानेन। तच्च पक्ष निष्ठसाध्यव्याप्यवत्त्वग्रहेण सत्प्रतिपक्षितं सत् साध्याभववत्त्वघटितस्य तत्प्रमात्वस्य ग्रहे कथं समर्थस्यात्। न चानुमानयोः पक्षभेदे कथं सत्प्रतिपक्षत्वमिति वच्यम्। विषयविरोधस्यैव सत्प्रतिपक्षे तन्त्रत्वेन पक्षाभेदस्यातन्त्रत्वादिति [3]निरस्तम्। स्मृत्यादिरूपस्य प्रमात्वग्रहस्य संभवात्[3]।

अत्रेदं चिन्त्यम्। भवतु बाधस्य [4]व्यभिचारासांकर्यम्[4]। तथापि तत्प्रमात्वज्ञानं नानुमितिप्रतिबन्धकम्, तत्र मानाभावात्। विरोधिज्ञानस्य सत्प्रतिपक्षादौ तथा प्रतिबन्धकत्वाकल्पनात्। किं तु स्वरूपसत्साध्याभावज्ञानमेव। नन्वेवं पीतभ्रमानन्तरं शङ्खत्वादिना अपीतत्वानुमितिर्न स्यात्। न चाप्रामाण्यशङ्काशून्यं तज्ज्ञानं प्रतिबन्धकम्। तच्छङ्कायास्तत्रोत्तेजकत्वात्[5] साध्यज्ञाने सिषाधयिषावत् पीतभ्रमश्चाप्रामाण्य[6]शङ्काकलङ्कित एव। अन्यथा अपीतत्वानुमितेरनुत्पत्तिरिति वाच्यम्। एवं हि पीतत्वज्ञाने अप्रामाण्यसंदेहोऽपि न स्यात्। तस्यापि शङ्खे पीतत्वाभावत्त्ववसंशयपर्यवसन्नतया तत्पूर्वं तदनास्कन्दितेन पीतत्वज्ञानेनैव निवर्तनीयत्वात्। एवं चाप्रामाण्यानुमितिरपि न स्यात्। तस्मादनन्यगत्या प्रमात्वग्रह एव प्रतिबन्धक इतिचेत्—

---

1 असाधकत्वेनेति पाठान्तरम्
2 नाप्यनुमानेन–क
3 निरस्तम्–ख
4 असांकर्यम्–ख
5 उत्तेजकरूपत्वात्–ख
6 शङ्कास्कन्दित एव–ख
7 रनुत्पत्तेरिति–ख

प्रकाशः

न । अप्रामाण्यग्रहसामग्र्या [1]अप्युत्तेजकत्वात् । उत्तेजकत्वप्रतिबन्धकत्वयोः फलबलकल्प्यत्वात् । तथा च तदसंवलितस्य [2]साध्याभावग्राहस्य प्रतिबन्धकत्वम् । अतो नोक्तदोषावकाशः । न च तादृशसाध्या[2]भावग्राहपेक्षया [3]तत्प्रमात्वग्राहस्य लाघवात् प्रतिबन्धकत्वम्, [4]उत्तेजकाभावादिघटितत्वेन तस्या[4]भावादिघटितत्वादिति वाच्यम् । तस्य गुरुत्वेऽप्यावश्यकत्वात् । अन्यथा साध्याभावज्ञानप्रमात्वज्ञानं यत्राप्रामाण्यशङ्कास्कन्दितं तत्राप्यनुमितिप्रतिबन्धापत्तिः । न च तत्प्रमात्वज्ञानमपि प्रमात्वेन ज्ञातं प्रतिबन्धकमिति [5]वाच्यम् । अनवस्थाप्रसङ्गात् ।

एवं रजते नेदं रजतमिति ज्ञानेऽपि विशेषदर्शनेन यत्र रजतत्वग्रह[6]स्तत्रापि रजतत्वाभावग्राहस्याप्रामाण्यशङ्कास्कन्दितत्वेनैवाप्रतिबन्धकत्वम् । अन्यथा रजतत्वग्राहानुपपत्तेः । [7]न च विरोधिविशेषदर्शनस्याप्युत्तेजकतया तत्संवलितस्याप्रतिबन्धकत्वम् । तथा सति बाधस्यानुमितिप्रतिबन्धकत्वानापत्तेः । तृतीयलिङ्गपरामर्शरूपविशेदर्शनरूपोत्तेजकसंवलिततया तस्याप्रतिबन्धकत्वात् ।

तर्कचूडामणिः

एवं चेति । अपीतत्वज्ञानस्यैव तत्र प्रतिबन्धकत्वापातादित्यर्थः ।

नन्वेवं गौरवमित्यत आह—**उत्तेजकत्वेति** । आवश्यकतामाह—**अन्यथेति** । गौरवदोषे सत्येव दोषान्तरमाह—**अनवस्थेति** ।

ननु रजतज्ञानानन्तरं तदभावज्ञानदर्शनेन प्रमात्वग्राह एव प्रतिबन्धकः । अन्यथा तदभावज्ञानं न स्यात् । तच्छङ्काशून्यस्य तस्य सत्त्वादित्यत आह--**एवमिति** । अन्येषां समाधानं निरस्यति-**न त्विति** । यत्र **न चेति** पाठस्तत्रापि न त्वियर्थः ।

---

1 अप्युत्तेजकरूपत्वात्-ख
2 साध्या-ख
3 तत्र प्रमात्व-क
4 तस्या-क
5 शक्यं वक्तुम्-ख
6 तत्र तस्याप्रामाण्य-क
7 न हि-ख

'न तु' इति व्याख्यानसंमत; पाठः

प्रकाशः

यदि च नैवं तदा अप्रामाण्यशङ्कास्कन्दितपीतत्वसमानाधिकरणशङ्खत्वज्ञानस्य व्यभिचार-ज्ञानत्वेनापीतत्वानुमिताव[1]प्रतिबन्धकत्वात् व्यभिचारज्ञानस्यापि प्रमात्वेनैव ज्ञातस्य प्रतिबन्धकत्वं कल्प्येत। अपि च शङ्खत्वा[2]नुमितशुक्लत्वेनापीतत्वानुमाने चाप्रामाण्यशङ्काक्रान्तशुक्लत्वाभावग्रहस्य स्वरूपासिद्धिज्ञानत्वेनाप्रतिबन्धकत्वात् तज्ज्ञानस्यापि प्रमात्वेनैव ज्ञातस्य [3]प्रतिबन्धकत्वं कल्प्येत ।

किं च यत्र योग्येऽयोग्ये वा लिङ्गे अनुमितिरूपव्याप्तिग्रहसामग्र्यनन्तरं व्याप्यत्वासिद्धि-निश्चयस्तत्र तन्निश्चयस्य बाधत्वेनैव प्रतिबन्धकत्वं वाच्यम् । तथा च [4]तत्प्रामाण्याग्रहात् तस्य व्याप्तिग्रहप्रतिबन्धकत्वं न स्यात्, न स्याच्च हेत्वाभासता। तज्ज्ञाने सत्यनुमित्युत्पत्तेः । तथा चासिद्ध्यादिष्वपि तत्तज्ज्ञानप्रमात्वमेव तत्तद्धेत्वाभासः स्यात् । [5]ततश्च परामर्शविषयाभावत्वेन सर्वासिद्धिसंग्रहः[6]साधु सामर्थितः स्यात् ।

यदि च साध्याभावग्राहस्य नानुमितिविरोधित्वम्, तदा विरोधिसामग्रीत्वेन सत्प्रति-पक्षस्याप्यनुमितिविरोधित्वं न स्यात् ।

ननु प्रमात्वेनागृहीतमपि साध्याभावज्ञानं नानुमितिप्रतिबन्धकम्, तद्ग्रहं विना अधिक-बलत्वाभावादिति चेत्—न । अनन्यथासिद्धसाध्याभावज्ञानत्वेनैव तस्याधिकबलत्वात् । न हि

तर्कचूडामणिः

यदि च नैवमिति । अप्रामाण्यशङ्काशून्यज्ञानत्वेन यदि न प्रतिबन्धतता, किं तु प्रमात्वानिश्चयत्वेन तदेत्यर्थः ।

इष्टापत्तिमाशङ्क्याह—[2]**तथा चेति** । तत्रापि तामाशङ्क्याह—**ततश्चेति** ।

ननु तदपि नासिद्धत्वमित्युक्तमेवेत्यतो दोषान्तरमाह—**यदि चेति** ।

अनन्यथासिद्धेति । अप्रामाण्यशङ्कानास्कन्दितेत्यर्थः ।

---

1 अप्रतिबन्धकत्वं-ख
2 शंखत्व-ख
3 तत्प्रमात्वं
4 तत्प्रमात्वग्रहात्-ख
5 तथा च-क
6 संग्रहहोऽपि-ख

प्रकाशः

प्रमात्वग्रहा[1]धीनमेव सर्वत्रा[1]धिकबलत्वम्, अन्यत्र तथा अदर्शनात्। किं तु स्वाभावाधीनम्। अत एवानुमानापेक्षया प्रत्यक्षस्याधिकबलत्वेन तयोर्न सत्प्रतिपक्षत्वम्।

वस्तुतस्तु विरोधिविषयत्वे सत्यन्यूनबलत्वमेवानुमितिप्रतिबन्धकत्वे तन्त्रम्, न त्वधिकबलत्वम्। अन्यथा सत्प्रतिपक्षज्ञानमति प्रमात्वेनागृहीतं न प्रतिबधकं स्यात्। न हि संभवति विरोधिविषयत्वाविशेषेऽपि साक्षादेव हि विरोधिविषयं साध्याभावज्ञानं तत्प्रतिबन्धाय प्रमात्वज्ञानमपेक्षते, न पुनः परम्परया विरोधिविषयं साध्याभावव्याप्यत्वज्ञानमिति। न च तदपि गृहीतप्रामाण्यमेव प्रति[2]बन्धकमिति [2]वाच्यम्। एकत्र विरुद्धोभयव्याप्यद्वयज्ञानप्रमात्वज्ञानस्याशक्यत्वात् अपसिद्धान्ताच्च।

अत एव यदि साध्याभावज्ञानमुक्तरूपं बाधनिश्चयः स्यात्, तदा सत्प्रतिपक्षस्थल इव नैकस्मिन्नपि फलोदयः स्यात्। विरोधिज्ञानस्य विद्यमानताया अविशेषात्। तथा च बाधेनाधिकबलत्वमन्यहेतावपि गतमित्यपास्तम्। उक्तरूपत्वेनैव बाधस्याधिकबलत्वात्।

ननु यदि साध्याभावज्ञानं स्वरूपसदेव [3]प्रतिबन्धकम्, तदा तत् हेत्वाभासो न स्यात्। ज्ञायमानप्रतिबन्धकस्यैव हेत्वाभासत्वेन [4]ग्रन्थकृदभिमतत्वादिति चेत्–न। इष्टत्वात्। [5]पक्षनिष्ठसाध्याभावस्यैव हेत्वाभासत्वात्, तस्य च ज्ञायमानत्वेन प्रतिबन्धकत्वात्। अत एव–'बाधो हि

तर्कचूडामणिः

ननु बाधस्थलीयपरामर्शस्यापि तच्छङ्काशून्यतया अधिकबलत्वापत्तिरित्यत आह··–**वस्तुत इति**। नन्वेकत्र विरुद्धव्याप्यद्वयग्रहवत् तद्ग्रहोऽपि संभवत्येवेत्यत आह—**अपसिद्धान्तादिति**। तदज्ञानदशायामनुमित्यप्रतिबन्धापत्तिश्चेति बोध्यम्।

उक्तरूपत्वेन–अन्यथासिद्धत्वेन।

न चापसिद्धान्तोऽपीत्याह—**अत एवेति**। नन्वेवं शाब्दोऽपि तत्प्रमात्वग्रहो न प्रति-

1 धीनमेव–ख
2 बन्धकं–क
3 अनुमितिप्रतिबन्धकम्–ख
4 कर्तृकसंमतत्वात्–ख
5 तद्विषयस्य च ज्ञायमानस्य प्रतिबन्धकत्वात्–ख

पक्षधर्मताबलेन प्रसिद्धं बाधान्न सिध्यतीति बाधः पृथक् । [1]प्रसिद्धाभाववति पक्षे व्यभिचारान्न तत्सिद्धिरिति चेत्–[2]तर्ह्यसत्प्रसिद्धाभाववति सपक्षे व्यभिचारात् तमपि न साधयेत् । तदज्ञानात्तत्साधनेऽनुमितिरप्रमास्यात् ।

प्रकाशः

पक्षे विषयापहारः' इति सिद्धान्तप्रवादोऽपि । अन्यथा परामर्शानन्तरमप्रामाण्यशङ्काशून्यसाध्याभावग्रहेऽप्यनुमितिः स्यात् । न च तत्प्रमात्वग्रहादेव तत्रानुमितिप्रतिबन्ध इति वाच्यम् । [3]तत्प्रमात्वदिग्रहस्यानुमितिरूपतया पक्षज्ञानप[4]रामर्शा जन्यतयाविलम्बितत्वेनानुमितिसामग्रीबलवत्तयाचानुमितेरेवोत्पत्तेः । अत एव शब्दादौ तथा दर्शनादित्यसंगतम् । उक्तयुक्त्या तत्रापि प्रमात्वग्रहस्याप्रतिबन्धकत्वात् । न चैवमत्र साध्याभावप्रमेति [5]ज्ञानानन्तरमनुमितिप्रतिबन्धो न स्यादिति माच्यम् । तज्ज्ञानस्यापि साध्याभावकिषयतानियतत्वेन तेनैव रूपेण प्रतिबन्धकत्वात् । [6]इत्येवमपरितोषं हृदिनिधायाह—पक्षधर्मताबलेन प्रसिद्धमित्यादि । अत्र च बाधपदं साध्याभावपरम्, अतो नोक्तदोषावकाशः । अत्र व्यभिचाराद्यभावादेव बाधस्य न तज्ज्ञानसांकर्यं शङ्कास्पदमिति भावः ।

अत्र वदन्ति—[7]प्रसिद्धस्य पक्षान्यवृत्तिसाध्यस्य सिद्धौ भ्रमरूपानुमितिः स्यात् । तथा च यवाङ्कुरं प्रति कलमबीजस्येव भ्रमरूपानुमितिविशेषं प्रति सत्यपरामर्शस्याकरणत्वादेव-

---

तर्कचूडामणिः

बन्धकः स्यादित्यत आह-अत एवेति । प्रमात्वं यदि तद्वद्विशेष्यकत्वं तदाह–तज्ज्ञानस्येति । यदि विशेष्यावृत्त्यप्रकारकत्वादि तदाह–अन्यथेति ।

उपाध्ययोक्तदोषमाह–अत्रेति । भ्रमरूपेति । न च पर्वते प्रसिद्धवह्न्यभावेऽपि वह्नित्वेन

---

1 'प्रसिद्धवह्न्यभाववति' इति पाठान्तरम्
2 'तह्य प्रसिद्धवह्न्यभाववति' इति पाठान्तरम्
3 प्रमात्व–ख
4 परामर्शाद्यधीनतया–ख
5 ज्ञानादनुमिति–ख
6 इत्येवमेव –ख
7 प्रसिद्धपक्षान्य–ख

अथ पक्षवृत्तेरन्य एव धूमादिः सपक्षे, तर्हि गोत्वपृथिवीत्वद्रव्यत्वादेरप्रसिद्धसास्नाद्यनुमानं स्यात् सास्नादिप्रत्येकव्यभिचारात्। यदि च

प्रकाशः

ततो न प्रसिद्धसाध्यानुमितिः, ननु बाधात् अन्यथा समानप्रकारकज्ञानस्य विरोधित्वात् वह्नित्वेन रूपेण [1]बाधानवगमात् [2]प्रसिद्धोऽपि वह्निः पक्षे [3]भासेतैव। पक्षान्यवृत्तिसाध्यं पक्षे नास्तीत्यादि[4]रूपस्य बाधस्य भिन्नप्रकारकत्वात्।

न च समानप्रकारकत्वेन बाधस्य प्रतिबन्धकत्वमेव नेति वाच्यम्। एवं हि निर्वह्निपर्वते[5] अपर्वतवृत्तिवह्निर्नास्तीति ज्ञाने लिङ्गपरामर्शोऽप्यनुमितिर्न स्यात् [6]पर्वतीयवह्नेरभावात्। पक्षातिरिक्तवह्नेर्बाधितत्वात्। न चेष्टापत्तिः। दृश्यमानप्रवृत्त्यादिविरोधात्। तथा च तत्रानन्यगत्या [7]तादृशं बाधमवधूय वह्नित्वेन रूपेण [8]बाधित एव पक्षातिरिक्तवह्निर्भासत इत्युपेयम्। तस्मात् सत्यस्थलेऽपि[9] न तादृशबाधस्य प्रतिबन्धकत्वम्, किं तु तादृश[9]साध्यविषयकानुमितेर्भ्रमत्वनियमेन तज्जन्यकदोषस्यायथार्थपरामर्शस्य[10] तत्राभावान्न तदनुमितिरिति।

मैवम्। अयथार्थपरामर्शस्य दोषत्वाभावात्। अन्यथा द्विकर्तृकघटे कार्यत्वेन सकर्तृकत्वानुमितिर्लाघवभ्रमेणैककर्तृकत्वविषया भ्रान्ता न स्यात्, दोषाजन्यत्वात्। प्रमा च

तर्कचूडामणिः

प्रकारेण तद्विषयकज्ञानं [11]प्रमैव। यत्र यदवच्छेदकावच्छिन्नमस्ति तत्र तज्ज्ञानं प्रमेति तल्लक्षणत्वादिति वाच्यम्। लाघवात् यत्र यदस्ति तत्र तज्ज्ञानमित्येव तल्लक्षणत्वादिति भावः।

जयदेवसमाधिमाह — मैवमिति। एककर्तृकत्वेति। एकमात्रकर्तृकत्वेत्यर्थः।

---

1 बाधानवकाशात्-ख
2 प्रसिद्धो हि-ख
3 भासते पक्षान्य-ख
4 रूपबाधस्य-ख
5 पर्वतेतरवह्नि-क
6 पक्षीय-क
7 तादृशवह्निबाधे एव-ख
8 अबाधित-ख
9 तादृश-क
10 तत्राभासत्वे तपनुमिति-ख
11 प्रमा यत्र-ग

साध्यत्वावच्छेदकसास्नात्वादिसामान्यावच्छिन्नप्रतियोगिकाभाववति न गोत्वादिकमिति न व्यभिचारः, तर्हि धूमेऽप्येवं व्यभिचाराभावात् साध्यतावच्छेदकेन प्रकारेण अप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेत् यदि बाधो न दोष इति वयम् ।

प्रकाशः

स्यात् गुणजन्यत्वात् । वह्निमति पर्वते [1]बाष्पे धूम[2]भ्रमाज्जायमानानुमितिर्भ्रान्ता वह्न्यंशेऽपि स्यात् दोषजन्यत्वादेव । अत एव न यथार्थपरामर्शस्य गुणत्वम् । गन्धप्रागभावावच्छिन्ना पृथिवी गन्धवतीत्यत्र बाधानवतारदशायामनुमितेर्भ्रान्तत्वानुपपत्तेः । तस्मादबाधितत्वप्रमा गुणः तद्भ्रमश्च दोषः ।

न चैवं प्रसिद्धवह्नेरबाधितत्वभ्रमाभावादेव पर्वते न भानं न तु बाधादिति वाच्यम् । बाधस्य तत्रोपजीव्यत्वात् । अन्यथा व्यभिचारज्ञानादेरपि प्रतिबन्धकत्वं न स्यात् । तस्मिन् सति परामर्शाभावादेवानुमितिप्रतिबन्धात् ।

तर्कचूडामणिः

न च मात्रार्थस्य कर्त्रन्तरविरहस्यानुमितिविषयत्वे गौरवात् एककर्तृकत्वमनुमितिविषयः, तत्र च न भ्रमत्वमिति वाच्यम् । इश्वरानुमानेऽप्येकमात्रकर्तृकस्यासिद्धिप्रसङ्गात् । यद्वा एतदम्बरसादाह-**वह्निमतीति** । लिङ्गोपधानपक्षे लिङ्गांशे भ्रमत्वमिष्टमेवेत्यत आह–**वह्न्यंशेऽपीति**। **अत एवेति** । उक्तानुमितेर्भ्रमत्वानुपपत्तेरेवेत्यर्थः । नन्वेवं गुणाभावेऽनुमितिप्रमात्वमाकस्मिकं स्यादित्यत आह–**तस्मादिति** ।

तत्रेति । [3]अबाधितत्वभ्रमानुत्पन्नावित्यर्थः । कारणाभवात्कार्याभावोपपत्तौ न तस्य प्रतिबन्धकत्वमित्यत आह–**अन्यथेति** । तथा चानुमित्यनुत्पादव्याप्यत्वमेव प्रतिबन्धकत्वम् , तच्च बाधज्ञानेऽप्यस्तीति भावः ।

---

1 धूम–ख 2 वस्त्वभावत्वभ्रमा–ग
3 'तत्' नास्ति–क 4 तज्ज्ञानकारणत्व–ख

प्रकाशः

न चाबाधितत्वज्ञानस्यानुमितिजनकत्वेः [1]मानाभावः । बाधज्ञानस्यानुमितिप्रतिबन्धकतया तदभावस्यैव हेतुत्वात् । प्रत्युताबाधितत्वज्ञानस्य साध्यग्रहपर्यवसन्नतया सिद्धसाधनापत्तिरिति वाच्यम् । संशयनिश्चयसाधारणस्यैव [2]तज्ज्ञानस्य योग्यताज्ञानवत् कारणत्वाभ्युपगमात् । गुणानुरोधेनैव [3]तत्कारणत्वकल्पनाच्च । अन्यथा अयोग्यताज्ञानस्य शाब्दज्ञानप्रतिबन्धकयता तदभावस्यैव तत्कारणतापत्तौ योग्यताज्ञानकारणत्वानुपपत्तेः । अभावकारणत्वापेक्षया भावकारणत्वस्य लघुत्वाच्च ।

न च प्रत्यक्षेऽनवस्था[4]भयात् तज्ज्ञानस्याकारणत्वात् बाधज्ञानाभावस्यैव प्रतिबन्धकाभावतया कारणत्वकल्पनादत्रापि तथेति वाच्यम् । तत्र [5]प्रत्यक्षबाधमात्रस्यैव प्रतिबन्धकतया तदभावस्य प्रत्यक्षं प्रति कारणत्वकल्पनेऽपि [6]बाधज्ञानसामान्याभावस्यानुमितिहेतुत्वमत्रैव कल्पनीयम् । [7]तथा च लाघवावतारात् । अत एव [8]अबाधितत्वबोधनाय निगमनमिति [9]सिद्धान्तप्रवादोऽपि ।

तर्कचूडामणिः

न चेति । तथा च यत्सामान्ये यत्सामान्यमिति [10]न्यायानवतारात् तत्प्रमापि न प्रमानुमितौ हेतुरिति भावः । नन बाधकाभावेऽपि साधकाभावान्न तस्य कारणतेत्यत आह— **गुणानुरोधेनेति** । गुणानुरोधेनाबाधितत्वप्रमाया अनुमितिविशेषहेतुत्वे यद्विशेषयोरिति न्यायेन [10]तज्ज्ञानस्यानुमितिमात्रहेतुत्वमित्यर्थः । नन्वत्रेष्टापत्तिरित्यस्वरसादाह–**अभावेति** ।

न चेति । लाघवेन ग्राह्याभावज्ञानत्वस्यैव प्रतिबन्धकतावच्छेदकत्वकल्पनादिति भावः । **बाधज्ञानेति** । तन्निश्चयेत्यर्थः ।

---

1 मानाभावात् बाधस्य प्रतिबन्धकतया–ख
2 ज्ञानस्य–क
3 तज्ज्ञानकारणत्व–ख
4 भिया तज्ज्ञानकारणत्वात्–ख
5 प्रत्यक्षे बाध–क
6 अबाधज्ञानसामान्यस्य–ख
7 तथा च बाधे लाघवा–ख
8 अबाधितत्वादिज्ञानाय–ख
9 सिद्धान्तोऽपि–च
10 न्यायेन–ग

तर्कचूडामणिः

अत्रेदं चिन्त्यम्—बाधज्ञानाभावहेतुतायामनन्यथासिद्धत्वमात्रं कल्पनीयम्। नियतपूर्ववर्तित्वस्य तत्रोभयसिद्धत्वात्। अबाधितत्वज्ञानस्य तु नियतपूर्ववर्तित्वमनन्यथासिद्धत्वं च कल्पनीयमित्यपि गौरवम्। अपि च ग्राह्याभावव्याप्याभावज्ञानमप्यनुमितिहेतुः स्यात्। ग्राह्याभावव्याप्यज्ञानाभावापेक्षया भावत्वेन लघुत्वात्। यदि च केवलान्वयिनि तज्ज्ञानासंभवेन व्यभिचारः, तदा तदभावव्याप्यज्ञानाभावोऽपि हेतुर्न स्यात्। यदि च साध्यसिद्धिविरोधिसिद्धिजनकज्ञानाभावत्वेन हेतुत्वमिति न व्यभिचारः, तदा तादृशज्ञानविषयाभावज्ञानत्वेन हेतुत्वमिति तुल्यम्।

किं चाबाधितत्वज्ञानहेतुतायां बाधज्ञानस्य व्यभिचारज्ञानवत् करणविघटकत्वापत्तौ साक्षादनुमितिविरोधित्वमिति सिद्धान्तो व्याकुप्येत। अपि च यत्र परामर्शानन्तरं [1]पक्षे साध्याभावज्ञानं तत्रापि पूर्वोत्पन्नपक्षीयसाध्य[2]संशयस्याबाधितत्वज्ञानरूपतया तत्राप्यनुमित्यापत्तिः। किं चानुमानिकबाधज्ञानेऽपि प्रत्यक्षेणाबाधितत्वज्ञानसंभवेन तत्राप्यनुमित्यापत्तिः। न च तत्राबाधितत्वज्ञानमप्रामाण्यशङ्कास्कन्दितमेव, तदनास्कन्दितं च [3]कारणमिति वाच्यम्। अबाधितत्वसंशयस्यानुमित्यहेतुत्वापत्तेः। संशयोऽप्रमेति ज्ञानेऽप्यनुमितिदर्शनात्।

किं च घनगर्जितादावनुमितिर्न स्यात्। तत्र संशयरूपस्यापि तज्ज्ञानस्याभावात्। न च तत्रानुमितिरेव नेति वाच्यम्। अनुभवविरोधात् पक्षताग्रन्थविरोधाच्च। [4]न चेश्वरीयं तज्ज्ञानं तत्रेति वाच्यम्। बाधावतारेऽपि व्यधिकरणाबाधितत्वज्ञानमादायानुमित्यापत्त्या सामानाधिकरण्यस्यैव तत्र हेतुत्वाभ्युपगमात्। अन्यथा सर्वत्र तन्निश्चयस्यैव हेतुत्वसंभवे संशय[5]हेतुत्वाभ्युपगमविरोधात्। न चैवं योग्यताज्ञानमपि न हेतुरिति वाच्यम्। इष्टापत्तेः। अत एवाबाधितत्वप्रमापि न गुणः, घनगर्जितादौ व्यभिचारादिति दिक्।

---

1 पक्षसाधनाभाव–ग
2 संबन्धस्य–ग
3 तत्कारणमिति–ग
4 न च बाधान्न ज्ञानं तत्रेति–ग
5 विरोधित्वाभ्युप–ग

प्रकाशः

तद्धेतुत्वानभ्युपगमेऽपि पक्षतावच्छेदकावच्छेदेन पक्षे ज्ञाप्याभावति लिङ्गज्ञानस्य दोषत्वम् । [1]तद्वति च[1] लिङ्गज्ञानस्य गुणत्वम् । तथा च प्रसिद्धानुमितिजनकदोषस्य सत्वात् बाधादेव प्रतिबन्धः ।

सामानविषयत्वेन च ज्ञानस्य [2]विरोधावश्यकत्वं न तु सामानप्रकारकत्वे[3]नापि, गौरवात् । अन्यथा पक्षे पक्षीयः पक्षातिरिक्तवृत्तिश्च वह्निर्नास्ति, वह्नौ पक्षवृत्तित्वं नास्तीत्यादिबाधानन्तरमनुमितिः स्यादेव [4]वह्नित्वप्रकारिका । बाधस्य भिन्नप्रकारकत्वेनाविरोधात् । न चैवं भ्रमानुमितेरनुपपत्तिः । पक्षान्यवृत्तिरेव वह्निरित्यवधारण इष्टापत्तेः । तदनवधारणे तु वह्नित्वेन ज्ञातस्य [5]तत्राबाधात् । वह्नित्वेन ज्ञातं च पर्वतत्वादिकं संभवत्येव । ज्ञानं च संशयादिसाधारणम् । वह्निमत्वेन ज्ञातस्याभेदारोपाद्वा पर्वतस्यापि वह्निमत्वेन संशय[6]विषयत्वात् ।

तर्कचूडामणिः

एतदस्वरसादाह—**तद्धेतुत्वेति** । गन्धप्रागभावावच्छिन्नपक्षकगन्धानुमितेः भ्रमत्वसिद्धये पक्षतावच्छेदकावच्छेदेनेत्युक्तम् । घटपक्षकसकर्तृकत्वानुमितेः एकमात्रकर्तृकत्व[6]विवक्षया तत्सिद्धये साध्यपदं विहाय ज्ञाप्येत्युक्तम् ।

ननु बाधितानामप्याकारान्तरेणानुमितिविषयत्वं स्यादित्युक्तमित्यत आह— **समानेति** । आवश्यकतामेवाह—**अन्यथेति** । न च यावद्विशेषाभावस्य सामान्याभावव्याप्ततया तज्ज्ञानस्यापि यद्वीरिति न्यायेन प्रतिबन्धकत्वमिति वाच्यम् । व्याप्यत्वेन तदज्ञानदशायामनुमित्यापत्तेः । नन्वनुमितिपूर्वसमये पर्वतस्य वह्नित्वेन [6]निश्चयानियमान्नैतदुपपद्यत इत्यत आह—**ज्ञानं चेति** । पर्वतो वह्निमान्न वेति संशये पर्वतत्वं स्वरूपेणैव भासते, न तु वह्नित्वेन, पर्वतत्वं वह्निरित्यप्रतीतेः । पुरोवर्तिनि पर्वतत्ववैशिष्ट्यभानेऽपि वह्निवैशिष्ट्याभाने वह्न्यर्थिप्रवृत्त्यहपपत्तेश्चेत्यस्वरसादाह—**वह्निमत्त्वेनेति** ।

---

1 तद्वति–क
2 विरोधावश्यकत्वात्–ख
3 अपि विरोधित्व°–ख
4 वह्निप्रकारिका–ख
5 तत्रारोप्यत्वात्–ख
6 विषयायाः–
7 निश्चयानेतत्–ग

प्रकाशः

[1]वस्तुतस्तु पर्वते तद्धर्मो वा तदन्यवृत्तिधर्मे नास्तीति भिन्नप्रकारकबाधानन्तरमपि वह्न्यनुमितेरनुभूयमानत्वात् तत्तद्बाधत्वेनैव प्रतिबन्धकत्वम्, तदननुगमस्यादोषत्वादिति तत्वम् ।

यत्तु [1]दोषप्राबल्येन बाधमवधूय भ्रमोत्पत्तेः पीतः शङ्ख इत्यादाविव निर्णयात् बाधितोऽपि दोषबलादेव वह्निर्भासत इति । तन्न । तथा [2]सति बाध[2]प्रतिबन्धकत्वे [3]मानाभावात् । तस्मिन् सत्यप्यनुमितेस्तादृशदोषाभावादेव च सत्यस्थले प्रसिद्धाभानोपपत्तेः । अत एव पीतः शङ्ख इत्यत्रापीतत्वानुमितिरूपबाधस्याप्रतिबन्धवतया प्रत्यक्षबाधत्वेन प्रतिबन्धकत्वं कल्प्यते ।

तर्कचूडामणिः

ननु सामानविषयकनिश्चयस्य विरोधित्वे संशय एव दुर्लभः, कुतस्तद्विषयाभेदारोपः । किं च सामानविषयकत्वेन विरोधित्वे वायौ रूपसंशयो रूपत्वपुरस्कारेण प्रसिद्धरूपविषयो न स्यात् । विशेषरूपाणां तद्रूपत्वेन बाधितत्वात्. वक्ष्यमाणयुक्त्या सामानविषयबाधज्ञानस्य प्रतिबन्धकत्वाच्चेत्यपरितोषादाह–**वस्तुतस्त्विति** । **भिन्नप्रकारकेति** । सामानविषयकेत्यपि द्रष्टव्यम्। तथा चात्रैव व्यभिचारान्न सामानविषकत्वेन प्रतिबन्धकत्वम् । वह्नौ पक्षवृत्तित्वं नेत्यादिपूर्वोक्त बाधस्थले समानप्रकारकत्वाभावेन व्यतिरेकव्यभिचारात् न समानप्रकारकत्वेनापि प्रतिबन्धकत्वमित्यनुगतप्रतिबन्धकतावच्छेदकस्यानिरूपणात् तद्बाधत्वेनैव प्रतिबन्धकत्वमित्यर्थः ।

यत्त्विति । सामानविषयत्वेनैव बाधस्य प्रतिबन्धकत्वम् । न चैवं भ्रमानुमित्यनुपपत्तिरित्याह **बाधित इति** । बाधितस्यापि दोषबलात् भाने निदर्शनमाह—**दोषप्राबल्येनेति** । ननु सत्यस्थले प्रसिद्धवह्न्यभानमेव मानमित्यत आह—**तादृशेति** । न च दोषविशेषाभावसहकृत बाधस्य प्रतिबन्धकत्वमिति नोक्तदोष इति वाच्यम् । तथा सति बाधस्य सिद्धसाधनवत् हेत्वाभासतैव न स्यात्, अविशेषितप्रतिबन्धकत्वाभावादिति भावः । का तर्हि पीतशङ्खस्थले गतिरित्यत आह—**अत एवेति** । **प्रत्यक्षबाधत्वेनेति** । अप्रामाण्यशङ्काशून्येति द्रष्टव्यम् । अत एव नेदं रजतमिति भ्रमानन्तरं विशेषदर्शनेन रजतनिश्चय इति भावः ।

---

1 यत्तु–ख 2 सति–ख
3 मानाभावः–क

राजकीय संस्कृत संस्थान ग्रन्थालय 23692 जयपुर

प्रकाश

असाधकतायां [1]हेतूपरागेण यद्यप्यस्य [2]लिङ्गत्वे प्रसिद्धांशस्य वैयर्थ्यम् । तथापि [3]याव-द्विषयत्वेन दोषत्वं तावदन्तर्भावो हेतात्वस्त्येवेति अस्य तथात्वमिति विभावनीयम् ।

तर्कचूडामणिः

ननु प्रसिद्धवह्न्यभावरूपबाधस्य हेत्वभिमतावृत्तित्वेन न तन्मात्रस्य साधकतालिङ्गत्वम्, किं तु साध्याभाववत्पक्षकत्वादिरूपेण हेतुप्रवेशेनैव । तच्च नोपपद्यते । व्यभिचारादेः केवलस्यैव लिङ्गत्वदर्शनादिति शङ्कते—**असाधकतायां चेति** । **हेतूपरागेणेति** । हेतुप्रवेशेनेत्यर्थः । यद्यपि धूमादिहेतोः न धूमत्वादिना प्रवेशः, तथापि साध्याभाववान् पक्षो यस्य हेतोरित्यपदार्थत्वेन प्रवेश इति भावः । हेतूपरागेति न तस्य [हेतूपरागेण न तस्य] लिङ्गत्वमित्याह—**प्रसिद्धां-शस्येति** । धूमः प्रसिद्धवह्न्यसाधकः प्रसिद्धवह्न्यभाववत्पक्षकत्वात् इत्यत्र वह्न्यभाववत्पक्षकस्यैव साधकत्वे प्रसिद्धेति विशेषणवैयर्थ्यमिति भावः । आद्यदोषं परिहरति—**यावद्विषयत्वेनेति** । न हि हेत्वाभासतोपाधिमात्रस्यासाधकतालिङ्गत्वमिति नियमः, किं तु भावतस्तदुपाधेरसाधकता-लिङ्गप्रवेश इति। अन्यथा सत्प्रतिपक्षस्यापि तथात्वं न स्यात् । प्रतिसाधनस्यैव तत्र तदुपाधितया तस्य हेत्ववृत्तित्वात् । तद्वत्त्वस्य हेतुवृत्तित्वेऽपि तस्य परामर्शरूपज्ञानात्मकतया तज्ज्ञानस्या-प्रतिबन्धकत्वादिति भावः । द्वितीयदोषस्तु वह्न्यभावापेक्षया प्रसिद्धवह्न्यभावस्यान्यत्वेन अखण्डा-भावगर्भत्वान्न वैयर्थ्यमिति बहिरेव सामाधेयः ।

अलिङ्गत्वमिति पाठे यद्यपि हेतूपरागेण हेतुसंबन्धेन लिङ्गत्वं न संभवति, हेतुसंबन्धस्या-भावात् । कथंचित् हेतुसंबन्धेऽपि पूर्वोक्तन्यायेन प्रसिद्धांशस्य तत्र वैयर्थ्यमिति शङ्काग्रन्थः कथंचिन् द्योतयितुं [योजयितुं] शक्यते : तथापि दोषद्वयेऽपि परिहारानभिधानात् परिहारग्रन्थ-साङ्कर्यमिति स उपेक्षणीयः ।

---

1 च हेतूपरागेण-ख
2 लिङ्गत्व प्रतिबधकत्वे च तद्वैयर्थ्यम्-ख
3 यावद्विशेषत्वेन-ख
(**सूचना** अत्र चूडामणौ ग. पुस्तके ग्रन्थपातः ।

साध्याभाववन्मात्रसहचारो न व्यभिचारः, साध्यप्रागभावध्वंसवद्वृत्तित्वेन व्यभिचारितया पृथिवीत्वादिना गन्धादेः, द्रव्यत्वादिना गुणस्यानुमानभङ्गप्रसङ्गात् । किं तु साध्यात्यन्ताभाववद्रामित्वम् । एवं च स्वप्रागभावध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगिसाधने पक्षे व्यभिचारो नेति बाधो दूषणम् ।

प्रकाशः

कल्पान्तरमाह—**साध्याभाववन्मात्र[1]सहचार इति** । साध्याभाववन्मात्रे सहचारो हेतुसाध्याभावयोरिति शेषः । क्वचित् **साध्याभावमात्रसहचार** इति पाठः, स च सुगमः । **एवं चेति** । रूपप्रागभावावच्छिन्नो घटो रूपवान् घटत्वात् इत्यादौ [2]पक्षशरीरभूते धर्मिणि [3]रूपात्यन्ताभावाभावान्न व्यभिचार इति प्रागभावरूपसाध्यविरहज्ञानमेव तत्रानुमितिप्रतिबन्धकम् । [4]अतो बाध एव तत्र दूषणमिति भावः ।

ननु रूपप्रागभावविशिष्टो घटादिरत्र पक्षः । तत्र च रूपात्यन्ताभावो न तत्प्रागभावः, विशेषणांशे रूपादेः सर्वथैवावृत्तेः । तथा च तत्र व्यभिचार एवेति चेत्—

तर्कचूडामणिः

पूर्वत्रैव कल्पे व्यभिचारसांकर्यशङ्कानिरास इति भ्रमं वारयति—**कल्पान्तरमिति** । साध्याभाववन्मात्रेण सहचार इत्यर्थो न संभवति । साध्याभावाधिकरणसहचारस्य केनापि व्यभिचारत्वानभ्युपगमेन तन्निषेधानुपपत्तेरित्यत आह—**साध्याभाववन्मात्र इति** । ननु रूपप्रागभावविशिष्टे रूपात्यन्ताभाव एव कुतो न व्यभिचारः । तत्र तदत्यन्ताभावाभावे वा कुतो बाधः । साध्यात्यन्ताभावस्य बाधत्वादित्यत आह—**एवं चेति** । [एवं चेतीति] । **धर्मिणीति** । विशेष्यघटमात्र इत्यर्थः । द्वितीयदोषं परिहरति-**प्रागभावरूपेति** ।

तथापि विशिष्टे तदत्यन्ताभाव एवेति शङ्कते-**नन्विति** । **विशिष्ट इति** । उपलक्षणत्वे दोषस्य वक्ष्यमाणत्वादिति भावः । व्यभिचार एवेति । यदि विशिष्टे घटत्वहेतोरभावात्

---

1 सहचरित इति-क
2 पक्षीभूते-ख
3 रूपात्यन्ताभावावच्छिन्नो व्यभि-ख
4 अतोऽत्र बाधो दूषण-क

प्रकाशः

न । प्रागभावपदस्य स्वसमयपरत्वात् । अत एवानु[1]पदमेव तथा[1]विभावयिष्यति । तथा च तत्समये रूपप्रागभाव एव, अतो न व्यभिचारः ।

अत एव रूपप्रागभावे विशेषणे घटत्वादेरभावात् विशिष्टे स्वरूपासिद्धिरेव । तस्याप्युपलक्षणत्वे सिद्धसाधनमेवेति निरस्तम् तत्समयस्य विशेषणत्वात् तत्र च घटत्वादेः सत्त्वात् ।

यद्यपि तत्समयरूपविशेषणेऽपि रूपान्तरसत्त्वात् विशिष्टेऽपि न बाधः, किं तु सिद्धसाधनमेव । तथाप्येकस्यापि रूपस्य विशिष्टे वृत्तिर्नेति तत्र बाधः । तद्घटत्वेन तदीयरूपसाधने तथाप्यप्रतीकाराच्चेति भावः ।

तर्कचूडामणिः

न व्यभिचार इति मतम्, तदा हेतोः स्वरूपासिद्धिरेवेति तत्सांकर्यमेव दूषणम् इति शङ्कितुर्हृदयम् । **प्रागभावपदस्येति** । स्वप्रागभावेत्यादिग्रन्थस्यति शेषः । समयविवक्षायाः ग्रन्थकृदसंमततां निराकरोति–**अत एवेति** । **तत्समय इति** । यद्यपि तत्समये रूपात्यन्ताभावोऽस्त्येव, तस्य नित्यत्वात् । तथापि घटत्वे नास्तीति न विशिष्टवृत्तित्वं विशेषणविशेष्योभयवृत्तेरेव विशिष्टवृत्तित्वादिति भावः । अतएव 'विशिष्टं' च नान्यत् इति ग्रन्थकृतैवोक्तत्वात् विशेषणविशेष्यात्मकत्वाद्विशिष्टस्य विशेषणे च तदत्यन्ताभावसत्त्वात् व्यभिचार इति प्रत्युक्तम् । अनन्यत्वेऽपि उभयवृत्तेरेव विशिष्टवृत्तित्वाङ्गीकारात् ।

द्वितीयं दोषं परिहरति—**अत एवेति** ।

रूपान्तरेति । घटान्तररूपस्येत्यर्थः । विशेष्ये च तद्घटरूपस्यैव सत्त्वात् विशिष्टरूपमेव न बाध इत्यर्थः । यद्यप्युभयत्र रूपसत्त्वेऽपि तत्प्रागभावात्मको बाधो वर्तत एव, तथाप्यत्यन्ताभावरूपबाधो नेति तात्पर्यम् । प्रागभावश्च न विरोधी, तस्य प्रतियोगिसमानाधिकरणत्वादिति भावः । **एकस्यापीति** । रूपान्तरस्य घटेऽवृत्तेः तद्रूपस्य प्रागभावसमयेऽवृत्तेरिति भावः । ननु तथाप्युभयत्र किंचिद्रूपसत्त्वेन रूपसामान्यात्यन्ताभावः, तस्यैव च साध्यत्वमित्यत आह—**तद्घटत्वेनेति** । तद्घटरूपप्रागभावसमयविशिष्टः स घटस्तद्घटीयरूपरूपवान् तद्घटत्वादित्यत्रैं–

1 पदमेव–क
2 तत्संशये–क
3 रूपप्रागभावस्व विशेषणत्वे–क
4 तस्य च लक्षणत्वे–क
5 साधनत्वमेतेति–ख
6 कारश्चेति–ख

प्रकाशः

ननु साध्याभाववद्भामित्वं न व्यभिचारः, द्रव्यत्वेन गुणाननुमानापत्तेः । न च साध्यतावच्छेदकावच्छिन्नतदत्यन्ताभाववद्भामित्वं [1]तथेति वाच्यम् । [2]द्रव्ये तद्वृक्ष[0]त्वादिना संयोगविशेषाननुमानापत्तेः । न च प्रतियोग्यसमानाधिकरणत्वमपि विशेषणम् । तर्हि तादृशाभाववद्भामित्वमेव व्यभिचारोऽस्तु, किमत्यन्ताभाव[3]पर्यन्तग्रहणेन । रूपप्रागभावस्य प्रतियोगिसमानाधिकरणतया [4]तावतापि व्यभिचारशङ्काविरहादिति चेत्–न । अत्यन्ताभाव–पदस्यैव तत्र तात्पर्यात् । न च रूपप्रागभावसमयविशिष्टे घटे कदापि रूपानुत्पत्तेः प्रतियोग्य–समानाधिकरणसाध्याभावसत्त्वात् व्यभिचार इति वाच्यम् । एवं हि प्रथमक्षणविशिष्टे घटे कदापि रूपानुत्पत्तेस्तादृशसाध्याभावसत्त्वात् व्यभिचारप्रसङ्गेन द्रव्यत्वेनापि गुणानुमानभङ्गप्रसङ्गात्।

तस्माद्विशेषणानन्तरावच्छेदेन तादृशसाध्याभावो न व्यभिचारप्रयोजकः, अतिप्रसङ्गात् ।

तर्कचूडामणिः

त्यर्थः । वस्तुतः प्रागभावरूपोऽपि बाधोऽत्र भवत्येवेति द्रष्टव्यम् । तद्भानस्यापि स्वावच्छेदेन प्रतियोगिसिद्धिविरोधित्वात् । समयभेदेन सामानाधिकरण्यादविरोधे घटतदत्यन्ताभावयोरपि समयभेदेन सामानाधिकरण्यात् घटात्यन्ताभावज्ञानमपि न घटानुमितिप्रतिबन्धकं स्यादिति ।

उभयत्र कः परिहार इत्यपेक्षायामाह — **तस्मादिति** ।

नन्वेवं नीलधूमादौ नैल्यविशेषणावच्छेदेन व्याप्त्यभावोऽपि न दोषः स्यात् । तथा सति केवलधूमप्रयोगेऽपि रूपविशेषणावच्छेदेन व्याप्त्यभावस्य दोषत्वप्रसङ्गात् । एवं प्रागभावविशेषणावच्छेदेन कृते बाधोऽपि न दोषः स्यात् । पर्वतोऽग्निमानित्यादावपि रूपादिविशेषणावच्छेदेन वह्न्यभावस्य बाधत्वप्रसङ्गात् इति चेत् — न । वैषम्यात् । नीलधूमे हि नैल्यावच्छेदेन व्याप्तिः परामर्शविषय इति तदवच्छेदेन तदभावज्ञानं तादृश परामर्शविघटनेनानुमितिविरोधि, नैवं केवलधूमप्रयोगे रूपावच्छेदेन तद्भानम् । अतस्तदभावो न तत्र दोषः । एवं प्रागभावावच्छेदेन साध्यभानमनुमितावितिं तदवच्छेदेन साध्या

1 तदिति–ख 2 तद्वृक्ष-ख
3 ग्रहपयन्तेन–ख 4 तावतापि पक्षे इति–क

प्रकाशः

ननु रूपप्रागभावसमयावच्छेदेन रूपसाधकाभावादेव न रूपानुमितिः, न तु बाधात्। न च पक्षधर्मतायाः पक्षतावच्छेदकविशेषणावच्छेदेन पक्षे साध्यसाधकत्वात् तद्बलमेव तत्साधकमिति वाच्यम्। पक्षधर्मता हि लिङ्गस्य पक्षे वृत्तिरेव। सा च साध्यसामान्यव्याप्तिमतस्तस्य पक्षीयं साध्यविशेषं विनानुपपन्नेत्यतो व्याप्त्या सह परामृश्यमाना पक्षसंबन्धसाध्यं साधयति, न तु पक्षताच्छेदकत्वेन यदुपादीयते तदवच्छेदेन पक्षस्य साध्यसंबन्धम्, बीजाभावात्। तं विना तस्यानुपपत्त्यभावात्। तदवच्छेदेन पक्षे

तर्कचूडामणिः

भावज्ञानमनुमितिविरोधि। पर्वतोऽग्निमानित्यत्र च न रूपावच्छेदेन साध्यभानम्। यद्युभयत्र विशेषणावच्छेदेन व्याप्तिसाध्ययोर्भानं तदा रूपिधूमादिति रूपविशिष्टः पर्वत इति च प्रयुज्येत। व्याप्तिग्रहस्य तु विशेषणानवच्छेदेनैव हेत्वधिकरणे साध्यसंबन्धिविषयत्वमिति तदवच्छेदेन साध्याभावो न व्यभिचारप्रयोजक इति।

सा चेति। हेतोः पक्षवृत्तिः कुतः साध्यं विनैव अनुपपन्ना नान्यं विनेत्यत्र हेतुगर्भं विशेषणमुक्तम्—**साध्यव्याप्तिमत इति**। पक्षातिरिक्तवृत्तिसाध्यविशेषव्याप्तित्वे तं विनाप्युपपत्तेः कथं पक्षीयसाध्येनैव शान्तिरित्यत उक्तं—**सामान्येति**। सामान्यव्याप्तस्या पक्षवृत्तित्वं 'निर्विशेषं न सामान्यं' मिति न्यायेन यं कंचन विशेषमपेक्षते, न सर्वमपि। न च तथापि पक्षीयविशेषापेक्षया किं विनिगमकमिति वाच्यम्। स्वाधिकरणवृत्तिविशेषसापेक्षत्वे अर्थात् पक्षीयत्वादिति लाभ इति भावः। बीजाभावमेवाह—**तं विनेति**। अनुपपत्त्यभावमेव स्फोटयति—**तदवच्छेदेनेति**। नन्वेवं साध्यस्य पक्षतावच्छेदकधर्मसामानाधिकरण्यमपि न सिध्येत्, तेन विना हेतोः पक्षधर्मताया अनुपपत्त्य-

---

1 पक्षे–ख
2 तद्बलेनैव तत्साधकमेव वाच्यम्
3 साध्य–ख
4 साध्यस्य पक्षसंबन्धम्–ख
5 बीजाभावान्–क

प्रकाशः

साध्यसंबन्धं विनापि प्रकृते घटत्वादिहेतोर्व्याप्तिपक्षधर्मताया उपपन्नत्वात् स्वभावादेव सा तस्य तं [1]साधयतीति [2]राजनिदेशनात्रत्वात्। तथा च पक्षधर्मताबलेन साध्यस्य पक्षतावच्छेदकधर्मसामानाधिकरण्यम् अर्थवशसंपन्नै सिध्यति। तच्च तयोः पक्षेऽधिकरणे नानावच्छेदेनापि [3]वृत्तौ निर्वहत्येव।

अत एव "पक्षधर्मतानुपपत्तिनिरासमात्रक्षममेव साध्यं पक्षधर्मताया बलात् सिध्यति न त्वन्यादृशमपि" इत्याचार्यचरणैरुक्तम्। अत एव **परिमले जगद्गुरुणोक्तम्**— "उत्पत्तिकनोऽयं घटो रूपवान् घटत्वादित्यत्र हेतुर्बाधादेव दुष्टः" इति। न तूत्पत्तिकालीनस्यैवा कदाचिद्पत्त्वेन बाधाभावात् पक्षविशेषणेन तु तत्सामानाधिकरण्यं सिध्यतीति। अत एव 'पक्षधर्मताबलात् पक्षतावच्छेदकधर्मसामानाधिकरण्यं साध्यस्य सिध्यति' इत्यत्राधिकरणशब्देन देशकालावुभावपि विवक्षितौ। तेन यदा यत्र पक्षतावच्छेदकं तदा तत्रसिध्यति। अन्यथा तत्कालीनवह्न्यर्थिप्रवृत्तिर्न स्यादिति परास्तम्। तत्कालीनसाध्यं विनापि पक्षधर्मताया उपपन्नत्वेन तादृशस्वभावाकल्पनात्। स्वकीयविवक्षामात्रस्यातिप्रसञ्जकत्वात्। तत्कालवह्नि[4]सिद्धिश्च कलिकाप्याप्तिग्रहव्युपपन्ना[5]।

तर्कचूडामणिः

भावात्। तथा चानुभवविरोध इत्यत आह — **तथा चेति**। पक्षधर्मताबलात् पक्षसाध्यसंम्बधभाने पक्षतावच्छेदकविशिष्टविषयपरामर्शस्य तद्विशिष्टविषयानुमितिजननस्वाभाव्यात् पक्षे पक्षतावच्छेदकस्य भानेऽर्थात् तयोः सामानाधिकरण्यं सिध्यति, न तु पक्षधर्मतानुपपत्तिबलात्। तदेतदाह — **अर्थवशसंपन्नमिति**। ननु सामानाधिकरण्यमपि तदवच्छेदेन सिद्धावेव निर्वहतीति प्रकृते बाध एवेत्यत आह— **तच्चेति**। भिन्नावच्छेदेन विद्यमानयोरपि संयोगतदत्यन्ताभावयोः घटतदत्यन्ताभावयोश्च सामानाधिकरण्यानुभवादिति भावः।

---

1 साधय–ख
2 रादिनिदेशायमानत्वात्–ख
3 निर्वहत्येव–क
4 सिद्धश्च–ख
5 उपत्तिः–क

प्रकाशः

न च यथा शब्दस्थले तात्पर्यवशेन क्वचिदेकस्य द्वयं क्वचिद्विशिष्टवैशिष्ट्यं चेत्यन्वयबोधे द्वैविध्यं तथा अनुमित्सावशादनुमितावपि द्वैविध्यमिति वाच्यम्। सिषाधयिषायाः [1]पक्षता-शरीरनिष्पादकत्वेन अन्यथासिद्धतया व्यभिचारेण चानुमितावहेतुत्वात्। न चानुमितिविशेषहेतु-त्वम्ः मानाभावात् पक्षताया अहेतुत्वापाताच्चेति चेत्—

अत्राहुः। प्रमाणस्यायं स्वभावो यत् बाधकं विना विशिष्टवैशिष्ट्यज्ञानमेव जनयति।

तर्कचूडामणिः

न च यथेति। स्वर्गकामो यजेतेत्यत्र एकस्य पुरुषस्य स्वर्गकामत्वं यागकर्तृत्वं चेति द्वयं-न तु विशिष्टवैशिष्ट्यम्। कामनाविरहदशायामपि यागकर्तृत्वसंभवात्। कृत्याश्रयत्वरूपकर्तृत्वस्य कामनायामसंभवाच्च। लोके च वासस्वी देवदत्तपदवाच्य इत्यत्र एकस्य वासस्वित्वं देवदत्तपद-वाच्यत्वं चेत्येकस्य द्वयं न तु विशिष्टवैशिष्ट्यम्, वाससो वाच्यत्वाभावात्, वाससोऽभावेऽपि देवदत्तस्य वाच्यत्वात्। अरुणया क्रीणातीत्यादौ आरुण्यादिविशिष्टव्यक्तेः क्रियासाधनत्व-वैशिष्ट्यम्। लोके च गच्छन् गायतीत्यादौ विशिष्टवैशिष्ट्यमित्यर्थः। सिषाधयिषायाः किमनु-मितिमात्रहेतुत्वं, उत सिद्ध्युत्तरकालीनानुमितौ? आद्य आह—**सिषाधयिषाया इति। पक्षताशरीरनिष्पादकत्वेनेति**। सिद्ध्यभावरूपपक्षतायां सिषाधयिषाया विशेषणत्वेन कारणता-वच्छेदकप्रविष्टतया अन्यथासिद्धत्वादित्यर्थः। ननु स्वतन्त्रत्वेन कारणत्ववादिनं प्रति कारणता वच्छेदकत्वमेवासिद्धमित्यत आह—**व्यभिचारेणेति**। घनगर्जितादिस्थल इति शेषः। द्वितीय-मुत्थापयति—**न चेति**। ननु सिद्ध्युत्तरकालीनानुमितेः सिषाधयिषां विनानुपपत्तेः अन्वय-व्यतिरेकसहकृतप्रत्यक्षमेव मानमित्यत आह—**पक्षताया इति**। इष्टापत्तावपसिद्धान्त इति भावः।

किं च प्रतिबन्धकाभावरूपसामान्यकारणादेव कार्यसिद्धौ न सिद्ध्युत्तरकालीनानुमितित्वं कार्यतावच्छेदकम्, न वा सिषाधयिषात्वं कारणतावच्छेदकं कल्प्यते गौरवात्।

जयदेवमतमाह—**अत्रेति**। बाधावतारदशायामपि विशिष्टवैशिष्ट्यासिद्धिप्रसङ्गं वारयति—**बाधकं विनेति**।

---

1 पक्षतासंपादकत्वेन—क

प्रकाशः

अरुणायेत्यादिशब्दस्थले तथा दर्शनात्। तथा च [1]सामान्यसामग्रीबलादेव तदवच्छेदेनानुमितिः स्यात् यदि बाधो न दोष इति।

वयं तु ब्रूमः। एवं सति पर्वते काञ्चनमयत्वासिद्धिरपि हेत्वाभासो न स्यात्। तत्सामानाधिकरण्यं विनापि पक्षधर्मताया उपपन्नत्वेन तत्साधकाभावादेव तदसिद्धिसंभवात्। यदि च फलबलेन तद्विषयपरामर्शस्य बाधकं विना पक्षतावच्छेदकविशिष्टपक्षज्ञानजनकस्वभावत्वमप्यनन्यगत्या कल्प्यम्, तदा तदवच्छेदेनापि साध्यज्ञानजनकत्वं कल्प्यम्।

अत एव शृङ्गावच्छिन्नपर्वतो वह्निमानित्यत्र शृङ्गावच्छिन्नवह्न्यनुमितिरनुभवसिद्धा। अत एव तदवच्छेदेन संदेहो न वा तदनवच्छेदेन प्रवृत्तिरिति।

तर्कचूडामणिः

अरुणयेति। इदं च प्रागेव व्याख्यातम्। न चात्र तात्पर्यबलेनैव विशिष्टवैशिष्ट्यबोधकत्वं न त्वनुमानेऽनुमित्सावलात् तथात्वम्, अनुमित्साया हेतुत्वनिरासादिति वाच्यम्। तत्र तात्पर्यस्यापीश्वरीयस्य न्यायैकगम्यत्वात्। न्यायस्य 'बाधकं विना विशेषणत्वम्' इत्यादिरूपस्यानुमानेऽपी तुल्यत्वात्। मीमांसकमते इच्छागर्भतात्पर्यस्य वेदेऽभावेन तत्प्रमितिजनकत्वस्यैव तस्य वक्तव्यत्वात् तस्यानुमानसाधारणत्वाच्चेति भावः। **शब्दस्थल इति**। तथा च तत्र लाघवात् प्रमाणत्वावच्छेदेनैव तादृशस्वभावः कल्प्त इति भावः। नन्वेवमपि विशिष्टवैशिष्ट्यानुमितिप्रापकं किमपि विशेषकारणं नोक्तमित्यत आह—**तथा चेति**। मा भूद्विशेषकारणमिति भावः।

ननु फलव्यतिरेकनिश्चये क्लृप्तस्यापि प्रमाणस्वभावस्य त्याज्यत्वात् फलसिद्धौ च तद्बलादेव विशिष्यानुमानेऽपि तादृशस्वभावकल्पनसंभवात् किं प्रमाणमात्रस्वभावोपन्यासेनेत्याशयेनाह—**वयं त्विति**। अत्र हि पूर्वपक्षिणा पक्षतावच्छेदकसामानाधिकरण्यभानमङ्गीकृत्य विशिष्टवैशिष्ट्यभानमाक्षिप्तम्। तत्र यत एव सामानाधिकरण्यबोधकत्वं तत एव विशिष्टवैशिष्ट्यबोधकत्वमपि सेत्स्यति। **किं तत्र** युक्त्यन्तरगवेषणयेत्याशयेनाह—**एवं सतीति**।

यत्र क्वाप्यनुमाने विशिष्टवैशिष्ट्यबोधकत्वे सिद्धे प्रकृतेऽपि विशिष्टवैशिष्ट्यबोधः प्राप्नुयादित्याशयेनाह—**अत एव शृङ्गेति**। तत्राप्यनुभवे विवदमानं प्रत्याह—**अत एवेति**।

1 ज्ञानसामग्री—ख

अथावच्छेद्ये सिद्धसाधनम् । अवच्छेदके हेत्वसिद्धिः । विशिष्टं च नान्यदिति चेत्--तर्हि प्रागभावप्रध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयतापि स्यात् ।

अथ यत्समयावच्छेदेन तत्र प्रागभावः प्रध्वंसो वा न तत्समयावच्छेदेन प्रतियोगीति चेत्- -तर्हि तदवच्छेदेन प्रतियोगिसाधने न सिद्धसाधनम्, किं तु बाध एव। अन्यथा भावास्यात्यन्ताभावयोरप्यव्याप्यवृत्तित्वभङ्गः एकवृत्तित्वात्। अवच्छेदभेदेन वृत्तिरिहापि तुल्या। तत्र देशभेदोऽवच्छेदकोऽत्र तु समयभेद इति ।

प्रकाशः

अवच्छेदक इति । एतच्च यथाश्रुतमभिप्रेत्योक्तम् । प्रागभावपदस्य स्वसमयपरत्वे असिद्ध्यसंभवादिति द्रष्टव्यम् । **तर्हीति** । सिद्धसाधनं हि उद्देश्यसिद्धौ संभवति । उद्देश्यं चात्र प्रगभावसमयावच्छेदेन घटे रूपवत्त्वं तत्सिद्धिश्चेत् तदा प्रागभावप्रतियोगिनोरेकालतापि स्यादित्यर्थः । प्रागभावश्च प्रध्वंसश्च प्रागभावप्रध्वंसं, तच्च प्रतियोगी च प्रागभावप्रध्वंसप्रतियोगिनौ तयोरित्यर्थः ।

अन्यथेति । एकवृत्तितामात्रेण परस्परावच्छेदेनापि वृत्त्यभ्युपगमे संयोगादितदत्यन्ताभावयोरव्याप्यवृत्तित्वं भज्येतेत्यर्थः ।

तर्कचूडामणिः

एकवृत्तित्वमात्रेण सिद्धसाधने आपादिते कथं तावन्मात्रेण एकसमहत्वत्वापादनमित्यत आह–**सिद्धसाधनं हीति** । ननु प्रागभत्वप्रध्वंसप्रतियोगिनां बहुत्वात् कथं द्विवचनमित्यत आह–**प्रागभावश्चेति** । प्रागभाकश्च प्रध्वंसश्च प्रागभावप्रध्वंसमिति समाहारद्वन्द्वः । तच्च प्रतियोगि च तयोरित्यपि द्विवचनमुपपद्यत इति द्रष्टव्यम्।

असिद्धेरपि बाध एवोपजीव्यः। न चैवमुपजीव्यत्वात् बाधवत् सिद्धसाधनवत् पृथक्। उपजीव्यत्वेऽपि स्वतोऽदूषकत्वात्। न हि साध्यज्ञानं तद्बुद्धिविरोधि। धाराबाहिकज्ञानोदयात्। नाप्यनुमितिविरोधि। अनुमित्सया प्रत्यक्षसिद्धेऽप्यनुमानदर्शनात्। तदुक्तम्—'प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्सन्ते तर्करसिकाः' इति। श्रवणानन्तरं मननदर्शनाच्च। तस्मात् सिद्धिमात्रार्थिनः सिद्धौ तदिच्छा। सिद्धिविशेषार्थिनः सास्तीति तस्यानुमितिरेव। एवं च सिषाधयिषितपक्षविघटनद्वारा सिद्धसाधनं दूषणं न स्वतः।

प्रकाशः

ननु साध्याभावनिश्चये संशयादिघटितपक्षताविरहात् पक्षासिद्धिरेव दोषः स्यात् न तु बाध इत्यत आह—**असिद्धेरपीति**। **असिद्धेः** पक्षासिद्धेः। तथा चोपजीव्यत्वात् बाध एव तत्र दोषो [1]नासिद्धिरिति भावः। इदं च प्राचीनमतेन। वस्तुतो बाधेऽपि न पक्षताविरह इति ध्येयम्। **सिषाधयिषितेति**। एतदपि संप्रदाय[2]मतानुरोधेनैव। [3]ग्रन्थकारमते तस्य साक्षात्प्रतिबन्धकत्वेऽपि [2]न ज्ञायमानस्य[4] प्रतिबन्धकत्वमिति न हेत्वाभासत्वम्।

ननु तथापि साध्यं हेत्वाभासोऽस्तु, तस्य ज्ञायमानस्य प्रतिबन्धकत्वादिति चेत्—न। यन्निश्चयो ह्यनुमितिप्रतिबन्धाय नान्यदपेक्षते तस्यैव हेत्वाभासत्वम्, साध्यं तु न तथा। तन्निश्चयेऽपि तदर्थं सिषाधयिषाविरहापेक्षणात्। अन्यथा श्रवणानन्तरं मननाभावप्रसङ्ग इत्याहुः।

तर्कचूडामणिः

पूर्वोक्ताश्रयासिद्धेरसंभवात् असिद्धेरित्यनुपपत्तिरित्यत आह—**नन्विति**।

अन्यथेति। सिषाधयिषाविरहविशेषणाभाव इत्यर्थः।

---

1 न त्वसिद्धिरिति- ख
2 मतेनैव-ख
3 ग्रन्थकृन्मते-ख
4 ज्ञायमानस्य-ख

[1]नन्वभावधीरपि न भावधीप्रतिबन्धिका । नेदं रजतमिति भ्रमानन्तरं रजतनिश्चयात् । न चाभावप्रमा तथा, अपीतः शङ्ख इति प्रमापयत एव पीतोऽयमिति भ्रमदर्शनादिति चेत्-न । विरोधिज्ञानं हि प्रतिबन्धकम् । प्रत्यक्षभ्रमस्य च प्रत्यक्षप्रमा विरोधिनी । सा च शङ्खादौ दोषात् नास्त्येव । अनुमितौ त्वभावप्रमामात्रमेव विरोधीति कथमभावप्रमायां भावानुमितिरिति ।

प्रकाश

ननु चेति । तथा च रूपप्रागभावादिरूपो [2]बाधो न दोष इति भावः । रजतनिश्चयादिति । विशेषदर्शनेनेति शेषः । प्रत्यक्षप्रमेति । अप्रामाण्यशङ्काशून्य[3]प्रत्यक्षप्रमेत्यर्थः । अनुमितौ त्विति । प्रमाग्रहणं वास्तवाभिप्रायेण । अप्रामाण्यशङ्काशून्यमभावज्ञानं प्रमाभ्रमसाधारणं न तु [4]प्रमात्वमपि तत्र तन्त्रमित्यर्थः । बाधश्च यद्यपि साध्यात्यन्ताभावसाध्यप्रागभावसाध्यसंबन्धाभावसाध्यवद्भिन्नत्वादिरूपतयानेकः । तथापि प्रतिरोधातिरिक्तत्वे

तर्कचूडामणिः

प्रकृते किमायातमित्यत आह—तथा चेति । विपरीतनिश्चये सति विशेषदर्शनं विना न प्रतियोगिनिश्चयः । यद्यप्यधिकरणे प्रतियोग्यारोपानन्तरं तदभावनिश्चयो विशेषदर्शनं विनैवेति व्यभिचारः । तथाप्यनाहार्यविपरीतनिश्चये सतीति विशेषणीयमित्यत आह—विशेषेति । अनेनापि प्रतिबन्धदर्शनादाह—अप्रामाण्येति । अप्रामाण्यशङ्काशून्यमिति ।

अत्र केचिदाहुः—तृतीयलिङ्गपरामर्शात्मकविशेषदर्शनानन्तरोत्पन्नसाध्याभावज्ञानस्य प्रामाण्यग्रहणमन्तरेण अप्रामाण्यशङ्काशून्यत्वाभावेन उपजीव्यतया लाघवेन च प्रमात्वज्ञानस्यैव प्रतिबन्धकत्वम् ।

किं च तादृशसाध्याभावज्ञानात् तृतीयलिङ्गपरामर्शे प्रामाण्यसंशयो नाधीयते इति त्वया

---

1 'ननु चाभावधीरपि' इति प्रकाशसंमतः पाठः । 2 बाधोऽपि न-ख
3 प्रत्यक्षमिति यः-ख 4 प्रत्यक्षप्रमात्वमपि-ख

स चायं दशविधः । धर्मिग्राहकमानबाधितम् घटोऽव्यापकः सत्त्वादिति प्रत्यक्षेण, परमाणवः सावयवाः मूर्तत्वादित्यनुमानेन, मेरुः पाषाणमयः पर्वतत्वादिति सुवर्णमयत्वबोधकागमेन , साध्यप्रतियोगिग्राहक बाधितम्–वह्निरनुष्णः कृतकत्वादिति प्रत्यक्षेण, शब्दोऽश्रावणो गुणत्वादि-

---

प्रकाशः

सति साक्षादनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकत्वेन स्वरूपसतानुगतत्वात् सव्यभिचारबदेक एवेति ध्येयम् ।

तर्कचूडामणिः

वाच्यम् । सुदृढप्रमाणमूलत्वात् । यथा अर्थापत्तिस्थले प्रमाणद्वयोपनिपातेऽपि योग्यानुपलब्धि-गृहीतचैत्राभावे अन्यथा प्रामाण्यशङ्कास्कन्दनादेव परामर्शस्यानुमित्यजनकत्वे किं तादृशसाध्या-भावज्ञानप्रतिबन्धकत्वकल्पनेन । तथा च परामर्शेनैव तत्राप्रामाण्यमासञ्जनीयमिति न तत्राप्रामाण्यसंशयः । किं तु तन्निश्चय एवेति न्यूनबलत्वमेव । तथा चान्यूनबलतयैवा-धिकबलत्वं विनापि प्रतिबन्धकत्वमित्ययुक्तम् , न्यूनबलत्वस्य तत्रावश्यकत्वात् ।

न चान्यतरत्रापि नाप्रामाण्यशङ्कानियमः सत्प्रतिपक्षवत् । तथा च तुल्यबलतयैव प्रति-बन्धकत्वमिति वाच्यम् । सत्प्रतिपक्षेऽप्युभयत्राप्रमाण्यशङ्कायाः सर्वसंमतत्वात् ।

न चैवमप्राण्यशङ्काशून्यपरामर्शाभावादेव नानुमितिरिति किं सत्प्रतिपक्षेणेति वाच्यम् । परामर्शान्तरोत्पत्त्या यावदप्रामाण्यासञ्जनं तावदनुमित्यभावस्य सत्प्रतिपक्षं विना अनुपपत्तेः । न च साध्याभावज्ञानेऽप्येष न्यायः । तत्राप्रामाण्यासञ्जनात् प्रागनुमितिर्भवत्येवेत्यत्रापि सुवचम् । तथा अननुभवात् । तथा च सत्प्रतिपक्षे अप्रामाण्यशङ्काशून्यत्वेनैव प्रतिबन्धकत्वं न बाध इति ।

किं च साध्याभावज्ञानं प्रतिबन्धाय प्रमात्वज्ञानमपेक्षते । न प्रतिरोधस्तत्र । विरुद्धानुमितेसामग्रीत्वेन प्रतिबन्धकत्वम् । तत्राप्रामाण्यशङ्काशून्यत्वेनैव । न तु ज्ञातप्रमा-त्वपरामर्शेन, प्रमात्वस्याप्यनुमेयतया अनवस्थापत्तेः अनुभवविरोधाच्चेति न प्रतिबन्धकतायां

त्यनुमानेन, गवयत्वं गवयपदाप्रवृत्तिनिमित्तं जातित्वादित्युपमानेन, साध्यग्राहकबाधितम्–नरशिरः कपालं शुचि प्राण्यङ्गत्वादित्यत्रागमेन, हेतुग्राहकबाधितम्—जलानिलावुष्णौ पृथिवीतो विपरितस्पर्शवत्त्वात् तेजोवदिति

प्रकाश;

[1]आगमेनेति। 'नारं स्पृष्ट्वास्थि [2]सस्नेहं सचेलो जलमाविशेत्' इत्यादिनेत्यर्थः।

तर्कचूडामणिः

प्रमात्वज्ञानापेक्षा। साध्याभावज्ञाने तु पीतः[त]शङ्खव्युदासाय विशेषणमावश्यकम्। तच्च लाघवात् (प्रमा) प्रमात्वज्ञानमेवेति।

अत्रेदं प्रतिभाति। यत्तावदुक्तम् अप्रामाण्यशङ्कानियम इति। तन्नोपपद्यते। साध्यतदभावयोर्विरोधस्फूर्तौ साध्याभावसाध्यव्याप्ययोश्च तदस्फूर्तौ अप्रामाण्यशङ्काविरहस्य स्वत एव संभवात्। अत एव नं न्यूनबलत्वमपि। उक्तयुक्त्या अप्रामाण्यनिश्चयनियमाभावात्। अत एव सत्प्रतिपक्षे हेत्वोर्विरोधाप्रतिसन्धाने विरुद्धोभयव्याप्यपरामर्श इत्युक्तम्।

यदपि बाधस्थलेऽप्रामाण्यासञ्जनात् पूर्वमनुमितेरिष्टत्वादिति। तदपि न। एवं सति बाधस्थले सर्वत्रानुमितिप्रसङ्गात्। प्रमात्वनिश्चयपक्षे प्रमात्वस्यानुमेयतया पक्षज्ञानादिविलम्बेन तत्पूर्वमनुमितिसंभवात्। पीतज्ञाने चाप्रामाण्यशङ्कानन्तरमेव श्वेत्यानुमितिः नान्यथा।

यदपि किं चेत्यादि, तदपि न। प्रमात्वनिश्चयेऽपि अप्रामाण्यशङ्कायामनवस्थापत्तेः। अनुभवविरोधस्य च प्रमात्वपक्षेऽपि तुल्यत्वात्। अस्तु चाप्रामाण्यशङ्काविरहे प्रमात्वनिश्चयस्योपजीव्यत्वम्, तथाप्यनवस्थाप्रसङ्गेनाव्यापकतया न प्रमात्वनिश्चयस्य तथात्वम्। किं तु गुरुत्वेऽपि अप्रामाण्यशङ्काशून्यज्ञानस्यैव, अनवस्थाप्रसङ्गाभावात्।

किं च प्रसिद्धवह्न्यभावस्थले रूपप्रागभावस्थले च नाप्रामाण्यशङ्का सामान्यव्याप्यस्य विशेषाभावेनाविरोधादिति तैरेवोक्तम्। तथा च तत्र प्रमात्वनिश्चयस्यानावश्यकतया तत्साधारण्यार्थमपि अप्रामाण्यशङ्काशून्यत्वमेव विशेषणमिति संक्षेपः।

---

1 आगमेति–क

2 सस्नेहः सवासा जडम्–ख

प्रत्यक्षेण, मनो विभु ज्ञानसमवाय्याधारत्वादित्यनुमानेन, राजसूयं ब्राह्मण-कर्तव्यं स्वर्गसाधनत्वादग्निष्टोमवदिति राजसूयकर्तव्यताबोधकागमेनेति ॥

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे

बाधप्रकरणम्

प्रकाशः

राजेति। 'स्वाराज्यकामो राजा राजसूयेन, ब्राह्मणो वाजपेयेन यजेत' [1]इति श्रुत्या क्षत्रियकर्तव्यताबोधिकया [2]अर्थात् ब्राह्मण[2]कर्तव्यतानिषेधादिति भावः ॥

इति श्रीरुचिरदत्तकृते तत्त्वचिन्तामणिप्रकाशे

अनुमानखण्डे बाधप्रकरणम्

तर्कचूडामणिः

ननु न राजसूयश्रुतेः साक्षाद्ब्राह्मणकर्तव्यतानिषेधकत्वमित्यत आह—अर्थादिति। यद्यत्कर्तव्यतया बोधितं तत्तेनैव कर्तव्यं नान्येनेत्यर्थात् गम्यत इत्यर्थः ॥

[3]दीक्षितेन्द्रकृतेः शेषपूर्तिर्यद्यपि मादृशैः।
कारीषकाष्ठखण्डेन चन्द्रार्धस्यैव पूरणम् ॥
तथापि दक्षिणामूर्तिप्रसादाद्गुर्वनुग्रहात्।
तदेव बलमास्थाय कृतवानस्मि साहसम् ॥
तत्प्रीत्या सम्यगालोच्य क्षन्तुमर्हन्ति सज्जनाः।

यदत्र शिष्टं विवृतं न पूर्वं
श्रीधर्मराजाध्वरिणा स्फुटत्वात्।
मन्दप्रबोधाय यथास्वबोधं
व्याख्याति तत् संप्रति जातवेदाः ॥

इति श्रीरुचिदत्तकृते तत्त्वचिन्तामणिप्रकाशे

अनुमानखण्डे बाधप्रकरणम्

---

1 इत्यत्र श्रुत्या—क 2 ब्राह्मण——क

3 पुस्तके इमे श्लोकाः न दृश्यन्ते ग

अथ असाधकतासाधकत्वप्रकरणम्

अथ हेत्वाभासानामसाधकतासाधकत्वेन सदुत्तरत्वम्, जात्यादीनां चासाधकतासाधारण्येन परासाधकतासाधकतया स्वव्याघातकत्वादसदुत्तरत्वम्।

अथ विरुद्धत्वादिज्ञानादेव स्वानुमितेरिव परानुमितेः प्रतिबन्धे किमसाधकतानुमानेन। यद्वचसि वाद्युक्तदूषणावगमः स निगृहीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यम् अन्यथार्थतन्त्रत्वादिति चेत् —

प्रकाशः

उपोद्घातसंगतिमाह — **हेत्वाभासानामिति**। तथा च [1]असाधकत्वाज्ञाने सदुत्तरत्वापरिचये हेत्वाभासनिर्वचनमेव निरर्थकमापद्यतेति भावः।

किमिति। तथा चासाधकता[2]साधकत्वं न सदुत्तरत्वमिति भाव।

तर्कचूडामणिः

नन्वसाधकतानिरूपणग्रन्थस्य हेत्वाभासग्रन्थेन संगतिसिद्धावपि संगतिप्रदर्शकवाक्यस्य कथं हेत्वाभासग्रन्थसंगतिरित्यत आह-**तथा चेति**। **निरर्थकमिति**। यद्यपि च्छलादिनिरूपणवत् साफल्यं भवेत्, तथापि यदि तद्वदेव हेत्वाभासस्यासदुत्तरत्वं तदा सद्धेतौ हेत्वाभासव्यावृत्तत्वज्ञानाय तन्निरूपणं व्यर्थम्। सत्यपि हेत्वाभासत्वे छलादिसत्त्व इव सद्धेतुत्वानपायादिति भावः।

ननु मा भूत् तदनुमानमित्यत आह-**तथा चेति**। यद्वा ननु तदनुमितावपि तत्साधकत्वस्यादित्यत आह-**तथा चेति**।

प्रत्यक्षादिविधया तत्साधकत्वाभावेन पारिशेष्यादनुमापकत्वमेव वाच्यम्। तदपि चेन्न स्यात् असाधकतासाधकत्वमेव न स्यादित्यर्थः। ननु न दूषणमात्रज्ञानं प्रतिबन्धकम्,

---

1 असाधकताज्ञाने-ख 2 साधनत्वम्-ख

न। द्वयं तूद्देश्यं परानुमितिप्रतिबन्धः, स्थापनायाः असाधकतासाधनत्वं च। तत्राद्यं दूषणमात्रज्ञानादेव। द्वितीयं तु लिङ्गत्वज्ञापनात्। प्रतिबन्धकत्ववदनेनापि रूपेण दूषकत्वसंभव इत्यभिप्रायेण वा असाधकतासाधनम्।

नन्वेवं पञ्चावयवप्रयोगापेक्षा स्यात्, अन्यथा न्यूनतापत्तिरिति

प्रकाशः

परेति। परेण यामनुमितिमुद्दिश्य प्रयोगः कृतः तत्प्रतिबन्ध इत्यर्थः। तत्राद्यमिति। तथा च तदर्थमिदमनैकान्तिकमित्येवोद्भाव्यमिति भावः। द्वितीयं त्विति। इदमसाधकम् अनैकान्तिकत्वादित्यादिकमेव [1]लिङ्गत्वाभिधानादित्यर्थः। नन्वसाधकतासाधनमुद्देश्यमित्यत्रैवाक्षेप इत्यत आह —प्रतिबन्धकत्ववदिति। दूषकत्वसंभवः अपकर्षसूचकत्वसंभव इत्यर्थः। तथा च कथकसंप्रदायानुरोधात् अत्यन्ताशक्तिज्ञापनार्थं तदुद्देश्यमिति भावः।

तर्कचूडामणिः

हेत्वविषयत्वं तस्य तत्त्वादर्शनादित्यत आह—तथा चेति। अनैकान्तिकमिति। साध्याभाववद्वृत्तीत्यर्थः। ननु स्थापनायाः असाधकतासाधने तस्या अलिङ्गत्वज्ञापनमेव भवतीति लिङ्गत्वज्ञापनादित्यनुपपन्नमित्याशंक्य दोषाणां लिङ्गत्वज्ञापनं विवक्षितमिति व्याचष्टे— इदमिति। इतिशब्दः प्रभृत्यर्थः। आक्षेप इति। प्रयोजनाभावेन तत्र उद्देश्यतायाः इच्छाविषयतायाः असिद्धेरित्यर्थः। नन्वसाधकतानुमापकतया न दूषकत्वसंभवः असाधकताज्ञानस्यानुमित्यप्रतिबन्धकत्वादित्यत आह — अपकर्षेति। हेतोरिति शेषः। ननूद्भावितस्यमिचारादिदोषादेवापकर्षोऽपि सूचितः इत्यत आह—अत्यन्तेति।

नन्वत्यन्ताशक्तिज्ञापनमप्यनुमितिप्रतिबन्धाय कार्यम्। स च दोषमात्रादेवेति तद्वैयर्थ्यमेवेत्यत आह—कथकेति। उदाहरणे [2]दृष्टान्ताभिधानवदिति भावः। कथकसंप्रदाय [3]विरोध-

---

1 अलिङ्गत्वा–ख
2 दृष्टान्तविधान–ग
3 विरोध इत्यस्यरसं–ग

चेत्—न। दूषणस्यासाधकताव्याप्यत्वमङ्गीकृत्य कथेति पक्षधर्मताया एवोद्भाव्यत्वात्। अन्यथा अधिकतापत्तेः।

नन्वेवं कृतकत्वेनानित्यत्वानुमाने व्याप्तिर्नाभिधेया, उभयसिद्धत्वादिति चेत्—न। कथायां समयविषयतया दूषणे त्वसाधकताव्याप्त्युपस्थितेरावश्यकत्वात्, अन्यथा कथकत्वविरोधात्।

प्रकाशः

पक्षधर्मताया इति। यद्यप्यसाधकता[1]प्रयोगे विरुद्धत्वादित्येवोद्भाव्यम्[2], न तु पक्षधर्मतापि। धूमवत्त्वादित्यत्रैवानाकाङ्क्षितत्वात्। तथापि विरुद्धोऽयमिति प्रथमोद्भावनममितेत्योक्तमिति द्रष्टव्यम्। विरुद्धं चेदमित्युपनयैकदेशः पक्षधर्मतोपदर्शनाय कार्य एवेत्यप्याहुः। [3]अबाधितत्वबोधनाय निगमनं किमिति न क्रियत इति चिन्त्यम्।

केचित्तु—उदाहरणं विना चत्वारोऽवयवाः कार्या एव। पक्षधर्मताया एवेत्येवकारव्यवच्छेद्या व्याप्तिरित्याहुः।

अधिकेनेति। अनाकाङ्क्षिताभिधानापत्तेरित्यर्थः।

समयेति। एतेन सामयिकत्वप्रदर्शनेन यत्र न समयस्तत्रासाधकतासाधनं न क्रियत इति सूचितम्। **आवश्यकत्वादिति।** अन्यथा वादिप्रतिवादिनो[4]स्तादृशसमयकरणमेव न संभवति।

तर्कचूडामणिः

मस्वरसबीजं सूचयति-**अपि चेति** [अपीति]। एतन्मत एव दोषान्तरमाह-**अबाधितत्वेति**।

संप्रदायविरोधमेव हृदि निधायाह-**केचिदिति। एवेति।** व्याप्तिवदन्येषामुभयसिद्धत्वाभावेनेति भावः।

हेतुद्वयाद्यनुपन्यासादधिकेत्यनुपपत्तिरित्यत आह-**अनाकाङ्क्षितेति**।

दोषे स्वसाधकताव्याप्त्युपस्थितिनियमाभावे बाधकमाह **अन्यथेति। तादृशेति।**

---

1 अनुमाने-ख
2 इत्यादिकमेव प्रयोज्यम्-ख
3 अबाधितत्वादि-ख
4 तावत्समय-क

नन्वेवं कृतकत्वेनानुमाने तद्व्याप्तिमनङ्गीकृत्यापि कथासंभवात् यस्तु कथारम्भे बाधकस्यासाधकत्वव्याप्तिं नाङ्गीकरोति तं प्रति तद्दूषणत्वं प्रसाध्य पञ्चावयवप्रयोगः कर्तव्य एव ।

प्रकाशः

असाधकत्वाव्याप्तेन दूषणेन तत्साधनासंभवादिति भावः । यस्त्विति । व्याप्तिमात्रानङ्गीकर्ता चार्वाकादिरित्यर्थः । बाधस्येति । बध्यतेऽनेनेति व्युत्पत्तेर्दूषणमात्रं बाधः । दूषणत्वमिति असाधकत्वव्यप्यत्वमित्यर्थः । कर्तव्य एवेति । एवकारो भिन्नक्रमः । तथा च तं प्रति दूषणत्वं प्रसाध्यैव पञ्चावयव[1]प्रयोगः कर्तव्यः[1], विवादपदसाध्यसाधनायेति शेषः । तथा चासाकता[2]साधने तत्रापि नोदाहरणादि विधेयमिति भावः ।

तर्कचिन्तामणिः

यद्वचसि वा युक्त[3]दोषावगतिः स निगृहीत इति समयेत्यर्थः । (अनुमितिरिति शेषः) तत्साधनेति । असाधकत्वसाधनेत्यर्थः । ननु वह्निधूमादिवत्रियतसहचारसत्त्वे तदनङ्गीकारायोग इत्यत आह – व्याप्तीति । तर्हि बाधोक्तिरयुक्ता, दोषमात्रस्यैव तेन 'तदङ्गीकारादित्यत आह– दूषणस्येति । बाध्यत इति । प्रतिबध्यत इत्यर्थः । अनुमितिरिति शेषः । ननु व्याप्तिविवाददूषणत्व[5]प्रसाधनं युक्तमित्यत आह – असाधकत्वेनेति [असाधकत्वेति] । व्याप्तिविवादसमये पञ्चावयवप्रयोगः कर्तव्य एवेत्युक्त्यनुपपत्तिरित्यत आह – एवकार इति । नन्वेवं संप्रदाय[6]विरोधादवयवप्रयोगकथानुपपत्तिरित्यत आह — विवादेति । सकर्तृकत्वाद्विसिद्ध इत्यर्थः । नन्वेवं पक्षधर्मतायां एवोद्भाव्यत्वमित्यनुपपन्नम् , चार्वाकादिकं प्रति दोषाणामसाधकताव्याप्तेरपि साधनीयत्वादित्यत आह–तथा चेति ।

---

1 प्रयोगः । —क
2 नुमने - ख
3 दोषो भवति स बाधकः—ग
4 तदनङ्गीकारात् —ग
5 प्रतिसन्धानं - ग
6 विरोधावदेव यत्प्रयोग—ग

यत्तु दूषणे पक्षधर्मतामात्रमुद्भाव्यं तत्र यत्र वादिनोस्तथा समयः अन्यत्र तु पञ्चावयवप्रयोग एवेति । तन्न । कथासंप्रदायविरोधात् ।

अथासाधकत्वं न पक्षे साध्यप्रत्ययाजनकत्वम् । तेनापि तत्त्वेनाज्ञानदशायां पक्षे साध्यभ्रमजननात् कदाचिदजनकत्वं सद्धेतावपि ।

प्रकाशः

[1]अन्यतोऽपि कदाचित् परस्य परामर्शसंभवेन [2]स्वकर्तव्यतया [3]यथा पञ्चा[3]वयवप्रयोग क्रियते, तथा असाधकतानुमानेऽपि [4]पूर्वेण स्वव्यापारस्य कर्तुमुचितत्वादित्याह–यत्त्विति । कथेति । तथा चापसिद्धान्तभिया पञ्चावयवप्रयोगस्तत्र न कार्य इत्यर्थः ।

तेन । विरुद्धादिना, तत्त्वेन–विरुद्धत्वादिनेत्यर्थः ।

तर्कचूडामणिः

ननु दूषणे पक्षधर्मतामात्रमुद्भाव्यं नान्यदिति समयाभावेऽपि न पञ्चावयवप्रयोगः कार्यः। व्याप्त्यादेरुभयसिद्धत्वेन उदाहरणादिकं विनापि तत्प्रतीत्युपपत्तेरित्यत आह–अन्यतोऽपीति । यथा केवलान्वय्यनुमान इति शेषः । ननु कथकसंप्रदायविरोधो न निग्रहस्थानान्तर्गत इति तत्सत्त्वेऽपि न क्षतिरित्याशङ्क्य कथकसंप्रदायानुगतसिद्धान्तविरोध एवात्र विवक्षित इत्याह–तथा चेति । तादृशप्रत्ययाजनकत्वं किं सार्वकालिकं दोषज्ञानकालीनं वा ।

आद्ये तेनापीत्युक्तम् । तत्र तत्पदेन प्रकृतस्यासाधकत्वादेः [5]परामर्शशङ्कां वारयति–विरुद्धादिनेति ।

---

1 अनुमाने–ख 2 स्वतोऽपि–ख
3 पञ्चा–क 4 पुरुषेण–ख
5 परामर्श—क

नन्वेतत्काले साध्यविशिष्टपक्षज्ञानाजनकत्वं तत् । न हि दूषणत्व-ज्ञानदशायां पक्षे भूमरूपाप्यनुमितिः, साध्यविशिष्टपक्षज्ञानं च हेतुत्वेन ज्ञानदशायां, प्रसिद्धमिति चेत्-न । सद्धेतावसत्प्रतिपक्षतादशायामपि पूर्वकाले साध्यविशिष्टपक्षज्ञानाजनकत्वमस्तीत्यसाधकताप्रसङ्गात् ।

अथ पक्षे साध्यभूमजनकत्वं तत् । बाधविरुद्धयोरपि तत्त्वाज्ञान-दशायां भमजनकत्वादिति चेत्-न ।

प्रकाशः

नन्वेतत्काल इति । दूषणज्ञानकाल इत्यर्थः । तथा च तत्कालीनसाध्यविशिष्ट-पक्षज्ञानाजनकत्वमसाधकत्वमिति विशेषणत्वस्याग्रे [2]सिद्धान्ततया तत्कालीनत्वस्योपलक्षणत्वपक्ष-माश्रित्य दषयति—सद्धेताविति ।

सद्धेतौ सत्प्रतिपक्ष इति ।

तर्कचूडामणिः

एतत्पदेन विरुद्धत्वादिदोषविवक्षायामुक्तदोषतादवस्थ्यमित्यत आह—दूषणेति । ननु दोषज्ञानकालीनं तादृशज्ञानजनकत्वमप्रसिद्धमित्यतः तस्याभावविशेषणत्वमाह—तथा चेति। विशेषणत्वविवक्षायामतिव्याप्यप्रसङ्गादाह—विशेषणत्वस्येति । नन्वसाधारणस्य तत्त्वेन ज्ञानदशायां विरुद्धव्याप्तिधीसामग्रीत्वेन प्रतिबन्धकत्वमते न साध्यसंशयजनकत्वम् । मतान्तरे ऽपि न प्रमात्वम्, संशयस्य अप्रमत्वादित्यत आह असाधारणस्येति । सत्प्रतिपक्षोत्थापनपक्ष-

---

1 ज्ञानजनकत्वम्-ख
2 सिद्धान्ततया-क
3 तत्कालीनस्य-ख
4 असाधारणस्य-क
5 साधारणेनासाधारणस्य-क
6 अव्याप्तिरेवेति-ख
7 भावः-क

सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्त्वेन ज्ञानदशायां साध्यभ्रमजनकत्वात् अज्ञानेसाध्यभ्रमाजनकत्वात् । नापि व्याप्तिपक्षधर्मतान्यतररहित्यम् । सत्प्रतिपक्षासाधारणसद्धेतोरभावात् दशाविशेषे तस्य दोषत्वात् साध्याप्रसिद्धौ प्रकृतसाध्यव्याप्त्यप्रसिद्धेश्च ।

नाप्यनैकान्तिकाद्यन्यतमत्वम् । यत्किंचिदनैकान्तिकत्वस्यातिव्याप्तेः । प्रकृतसाध्यानैकान्तिकत्वस्याप्रसिद्धत्वेन केवलान्वयिसाधनेऽप्रसिद्धेः ।

प्रकाशः

असाधारणस्य संशयोत्थापकत्वपक्षे साध्यांशे तस्यापि प्रमात्वादव्याप्तिरिति भावः । साध्याप्रसिद्धावव्याप्तिरित्यपि बोध्यम् । सत्प्रतिपक्षेति । इदं चोपलक्षणम्, बाधाव्याप्तिरित्यपि बोध्यम् । अप्रसिद्धसाध्यकेऽसिद्धत्वादावव्याप्ति[1]रित्याह—साध्याप्रसिद्धाविति । इदमुपलक्षणम्, अवृत्तिसाध्यकेऽपि[2] तदप्रसिद्धिरित्यपि द्रष्टव्यम् ।

घटोऽभिधेयोलोष्टत्वादित्यादौ स्वरूपासिद्धेः प्रकृतसाध्यानैकान्तिकत्वाप्रसिद्ध्या असाधकत्वं न स्यादित्याह केवलेति । इदं चोपलक्षणम्, यत्साध्यनिरूपितं सत्प्रतिपक्षादिकं न जायते तत्साध्यकेऽप्रसिद्धसाध्यके चासिद्ध्यादावव्याप्तिरित्यपि द्रष्टव्यम् ।

तर्कचूडामणिः

इत्यपि बोध्यम् । मानससंशये लिङ्गयोरसाधारणधर्मत्वेन हेतुत्वादित्यर्थः । असाधारण इति । शब्दोऽनित्यः प्रमेयत्वादित्यादावित्यर्थः । बाधितसाध्यके तत्राव्याप्तिपक्षाभावात् यत्किंचिन्निरूपितव्याप्त्यादिराहित्यस्य सद्धेतुसाधारणतयाप्रकृतसाध्यनिरूपितत्वराहित्यं वाच्यम । तदप्यनुपपन्नमित्युक्तं साध्याप्रसिद्धाविति । तदनुपपन्नम् । तादृशस्य व्यतिरेकिणः सद्धेतुत्वादि यत आह—[अ] प्रसिद्धेति । क्षणिकत्वादि साध्यके व्याप्यत्वसिद्ध्यादावित्यर्थः । वस्तुतोऽपार्थकत्वमेवः न तु हेत्वाभासत्वम् । अन्यथा सिद्धान्तव्याहतेः । ननु केवलान्वयिसाध्यकं लिङ्गं सद्धेतुरव्यभिचारादित्यत आह—घट इति । सत्प्रतिपक्षादिकामित्यादिपदात् असाधारणानुपसंहारिसंग्रहः ।

---

1 इत्यत आह-ख

2 अनाध्यकेऽपि-ख

3 निरूपितपक्षादिकं--ख

अंशतः सिद्धसाधनात् साध्यविशेषाच्च ।

प्रकाशः

अंशत इति । अनैकान्तिकाद्यन्यतमत्वे[1] साध्ये अनैकान्तिकत्वस्य साध्यांशस्य [2]सिद्धस्यैव साधनादित्यर्थः । अथ तत्र सिद्धम् , तत्राह–साध्येति । असिद्धत्वेन साध्याविशेष इत्यर्थः ।

यद्वा नन्वनैकान्तिकाद्यन्यतमत्वं न साधनीयम् । किं तु यत्रानैकान्तिकत्वं तत्र तदेवासाधकत्वम् , यत्रासिद्धत्वं तत्र तदेवासाधकत्वमिति केवलान्वयिसाधनेऽनैकान्तिकत्वाप्रसिद्ध्या न कोऽपि दोष इत्यत आह–अंशत इति । असाधकत्वनिर्वचन इति शेषः । एवं सति सिद्धसाधनं साध्यविशेषश्चेत्यर्थः ।

तर्कचूडामणिः

ननु पक्षैकदेशे साध्यासिद्धेः पक्षतावच्छेदकनानात्वाभावाच्चाशत इत्यनुपपत्तिरित्यत आह–अनैकान्तिकेति । इदमुक्तान्यतमत् अनैकान्तिकत्वादित्यत्रेत्यर्थः । ननु साध्याविशेषो हेतुसंशयदशायामेव दोषो न तु निश्चयेऽपि । सिद्धसाधनेऽप्यनुमित्सयानुमितिसंभवात् । असाधकतानुमितेश्च [3]सामयिकतया अनुमित्साधीनत्वादित्यत आह – अथेति । हेतुसाध्ययोर्विशिष्टाविशिष्टोपाधिरूपतया अत्यन्तभेदादविशेषानुपपत्तिरित्यत आह–असिद्धत्वेनेति । अनिश्चितत्वेनेत्यर्थः ।

ननु साध्यतावच्छेदकप्रकारेण तत्सिद्धावेव सिद्धसाधनं, न तु तदेकदेशसिद्धावपि । अन्यथा कृतिमज्जन्यत्वादौ साध्ये जन्यत्वस्य सिद्धतया तद्दोषापत्तेरित्यस्वरसात् उपाध्यायमतमाह –यद्वेति । [4]नन्वेवं सिद्धसाधनमेव, न त्वंशतस्तदित्यतोऽध्याहारेण व्याचष्टे - असाधकत्वेति। अंशत इत्यनन्तरमेतत् योज्यम् । अथैतद्दोषपरिहाराय हेतोरप्यसिद्धत्वामिष्यते, तदाह–साध्येति ।

---

1 अन्यतरत्वे-क 2 प्रसिद्धस्यैव–क
3 समयिकतया-ग 4 यद्येवं-ग

यत्तु एतत्कालीनएतत्पक्षीयत्वावच्छिन्नप्रतियोगिकैतत्साध्यप्रमाकरणत्व-भावः तत्तत्कालतत्तत्पक्षविषयसाध्यत्वाभिमतनित्यत्वादिप्रमाजनकत्वाभावो वा असाधकत्वम्। न च प्रतियोग्यप्रसिद्धिः। एतत्कालीनैतत्पक्षीयत्वतत्तत्काल-तत्तत्पक्षविषयत्वयोर्व्यधिकरणयोरेव प्रतियोगितावच्छेदकत्वादिति।

प्रकाशः

यत्त्विति। अत्र एतत्कालपदेन व्यभिचारादिधीकालोविवक्षितः। [1]अत्र एतत्पुरीयत्वमपि विशेषणम्। तेन सद्धेतुसत्प्रतिपक्षादौ पुरुषान्तरीयतादृशप्रमाकरणत्वान्नाव्याप्तिः। अत एवाग्रे [2]प्रतियोग्यप्रसिद्धिरिति वक्ष्यति। न चेति। [3]यद्यप्येतत्कालस्याभावविशेषणत्वेन [4]नाप्रसिद्धिः, तथापि जलह्रदोऽग्निमानित्यादौ पक्षविषयतादृशप्रमाया अप्रसिद्धिरेवेति। व्यधिकरणयोरिति। एतच्च [5]तत्साध्यव्याप्यहेत्वन्तरे [6]यदा न[7] तत्पुरुषीयसाध्यप्रमाकरणत्वं तदा बोध्यम्। बाधे तदपि न संभवतीति ध्येयम्।

तर्कचूडामणिः

व्यभिचारादिकालपरत्वे पूर्वोक्तव्याप्तेराह अत्रेति। तादृशाप्रमाकरणत्वाद्या अव्याप्तिः सा नेत्यर्थः। [8]नन्वेतन्मते भवत्वयमपि दोषः, किं तन्निरासायासेनेत्यत आह-अत एवेति। तत्पुरुषीयत्वाविवक्षायां पुरुषान्तरीयप्रमामादाय प्रसिद्धिसंभवे तच्छङ्कातन्निराकरणप्रयासश्च न स्यादिति भावः। जलेति। एतच्चोपलक्षणम् यत्र पक्षे यस्य पुंसः तत्साध्यप्रमा कदापि नावतीर्णा तत्राप्यप्रसिद्धिर्बोध्या। एतच्चेति। हेत्वन्तरे तादृशप्रमाकरणत्वसत्त्वे तदभावस्य प्रकृतहेतौ सत्त्वे व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमानुपपत्तेरिति भावः। तदपीति। हेत्वन्तरे तादृशप्रमाकरणत्वमित्यर्थः। तत्पक्षकतत्साध्यकप्रमायास्तत्राप्रसिद्धिरिति भावः। ननु तादृशाभावस्य

---

1 अत एव तत्पुरुषीय-ख
2 प्रतियोग्यप्रसिद्धिं वक्ष्यति-ख
3 यद्यप्येतत्कालीनत्वस्य-ख
4 त्वे प्रसिद्धिः-ख
5 यत्साध्यव्याप्यहेत्वन्तरे-ख
6 यदा-ख
7 करणं-ख
8 नन्वेव" तन्मते-ख

तन्न सद्धेतोः सत्प्रतिपक्षत्वज्ञानदशायामपि तादृशप्रमायामकरणभावेनासाधकतापत्तेः। नापि तृतीयलिङ्ग[1]परामर्शस्य प्रमात्वं तत्। विरुद्धादौ परामर्शाभावात् सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्प्रमात्वाच्च। नाप्यनुमिति हेतुभूताभावप्रतियोगिज्ञानविषयत्वं तत्। सद्धेतावपि कदाचित् व्यभिचारित्वसत्प्रतिपक्षत्वज्ञानस्यानुमितिप्रतिबन्धक[2]त्वात्।

अथानुमितिप्रतिबन्धकप्रमाविषयत्वमसाधकत्वम्, सद्धेतौ व्यभिचारादिभ्रमः प्रतिबन्धकः। अनुमितिप्रतिबन्धकत्वं च व्यभिचारादिप्रमायास्तृतीयलिङ्गपरामर्शविघटनद्वारा [3]तुल्यबलतया विषयतया वेति चेत्– न। सत्प्रतिपक्षयोर्विरुद्धयोर्वास्तवतुल्यबलत्वाभावेन तद्भ्रमस्य प्रतिबन्धकत्वात्।

प्रकाशः

तन्मतेनैव दूषयति–तन्नेति।

[3]तुल्यबलतेति। विवद्धोभय[4]व्याप्तिपक्षधर्मताविषय[5]तयेत्यर्थः। तद्भ्रमस्येति। एकत्र विरुद्धोभयव्याप्यपक्षधर्मयोरभावात् तज्ज्ञानस्य[6] [6]भ्रमत्वनियमादित्यर्थः। हेत्वाभासलक्षणं चर यथा मुम्थं तथोक्तम्।

तर्कचूडामणिः

दूषितत्वेन लक्षणाप्रसिद्ध्या अव्याप्त्यभिचारानवपत्तिरित्यत आह– [7]तन्मतेनेति। तदभ्युपगमेनेत्यर्थः। ननु [7]तुल्यत्वज्ञानं न प्रतिबन्धकम्। तदज्ञानेऽपि विरोधिपरामर्शमात्रस्य प्रतिबन्धकत्वात्। एकसाधकलिङ्गद्वये तुल्यबलत्वज्ञानेऽपि तदप्रतिबन्धकत्वाच्चेत्यत आह–विरुद्धेति। ननु क्वचित् भ्रमत्वेऽपि क्वाचित्कप्रमाणाय लक्षणं स्यादित्यत आह–एकत्रेति। यद्यप्यविरुद्धलिङ्गद्वयसत्प्रतिपक्षे तस्य न भ्रमत्वमिति नियमानुपपत्तिः, तथाप्युत्सर्गे तात्पर्यम्।

---

1 'परामर्शस्याप्रमात्वम्' इति पाठान्तरम्
2 'तुल्यबलताविषयतया' इति पाठान्तरम्।
3 तुल्यबलेति–क
4 व्याप्य–ख
5 तयेत्यर्थः–ख
6 तद्भ्रमादित्यर्थः–ख
7 ननु ग

न च तुल्यबलतया ज्ञायमानेन बोधितसाध्यविपर्ययकत्वज्ञान प्रतिबन्धकम्, तच्च प्रमैवेति वाच्यम्। तुल्यबलताज्ञानमेव हि प्रतिबन्धकम्, न तु ज्ञायमानत्वज्ञानम्, गौरवादसिद्धेश्च। न च सत्प्रतिपक्षेऽन्यतराङ्गवैकल्यप्रमैव प्रतिबन्धिकेति वाच्यम्। अन्यतरत्वं तदतद्वत्ति। न च तदतद्वत्तिसामानाधिकरण्येन ज्ञायमानस्य दोषत्वम्। धर्ममात्रस्य व्यभिचारज्ञानादनुमित्युच्छेदपत्तेः। अन्यतराङ्गवैकल्यज्ञानोपजीव्यस्य तुल्यबलत्वज्ञानस्यैव प्रतिबन्धकत्वाच्च। अन्यथा व्याप्यत्वासिद्ध्यन्तभावापत्तेः।

अथानैकान्तिकादिज्ञानस्य तत्तदनुमितिप्रतिबन्धकत्वमसाधकत्वम्।

प्रकाशः

धर्ममात्रस्येति। धूमादावपि व्यभिचारिणमादायानयोरन्यतराङ्गवैकल्यमिति प्रमायाः सत्त्वादनुमानमात्रच्छेदापत्तिरित्यर्थः। नन्वन्यतराङ्गवैकल्यज्ञानं सत्प्रतिपक्षयोरसिद्ध्यादिसंशयाधायकत्वेन दूषणं स्यादेव। धूमादौ तु तज्ज्ञानं न तत्संशया[1]धायकमिति विशेषदर्शनात्[2] तद्दर्शनदशायां तत्रापि[3] तज्ज्ञानस्यानुमितिप्रतिबन्धकत्वस्येष्टत्वादित्यपरितोषादाह—**अन्यतरेति**।

अथेति। यद्यपि हेत्वाभासत्व[4]नियतमसाधकत्वं ज्ञाने नास्ति, तथापि तादृशज्ञान

तर्कचूडामणिः

प्रमाप्रतिबन्धकत्वोक्तौ ज्ञानादनुमितिप्रतिबन्धापादनमयुक्तम्, [5]निश्चिताव्यभिचारे धूमादौ तज्ज्ञानानुपपत्तिश्चेत्यत आह—**धूमादाविति**। समानप्रकारकमेव तत्प्रतिबन्धकमिति भावः। **विशेषेति** धूमस्य व्याप्त्यादिनिश्चयादिति भावः। [6]असाधक[6]ताया ज्ञानवृत्तित्वे विरुद्धत्वात्तदनुमानं न स्यादिति बाधकं सूचयितुमाह **हेत्वाभासत्वेति**। एतस्य ज्ञानविशेषणत्वे दृष्टान्ते साधन-

---

1 धायक—ख
2 तददर्शन—ख
3 तज्ज्ञानादनु—ख
4 नियमसाधकत्व—क
5 अनिश्चिता—ग
6 साधक—ग

तथा हि इदमनैकान्तिकादिज्ञानम् एतत्साध्यवत्तयैतत्पुरुषस्य एतत्कालीनैतत्पक्षकानुमितिप्रतिबन्धकम्, एतदनैकान्तिकज्ञानत्वात् एतदन्यतज्ज्ञानवत् इति चेत्—न। एतत्साध्यवत्तयैतत्पक्षकत्वानुमितेः कदाचिल्लिङ्गभ्रमात् प्रसिद्धावप्येतत्कालीनैतत्पुरुषस्य तादृशानुमित्यप्रसिद्धेः।

नापि समीचीन[1]साध्यविशिष्टपक्ष[प्र]त्ययाजनकत्वम्। बाधविरुद्धा-

---

प्रकाशः

विषयत्वमसाधकत्वमिति मन्तव्यम्। एतदिति। एतद्धेतुविषयकानैकान्तिकज्ञानत्वादित्यर्थः। स्अत एव तत्पुरुषीयेत्यपि हेतुविशेषणम्। तेन परकीयज्ञाने न व्यभिचारः। केचित्तु तत्र साध्यसत्त्वान्त व्यभिचारः, तस्यापि प्रतिबन्धकत्वात्। न च तथा सति तत्सत्त्वे [2]अनुमितिर्न स्यादिति वाच्यम्। अत्र पुरुषे परकीयतादृश[3]ज्ञानाभावादित्याहुः। अत्र च मतेप्रकृतहेतोः प्रकृतसाध्यव्याप्यत्वस्योभयसिद्धत्वाभावः तादृशसमयाभावादित्युदाहरणमपि [4]कर्तव्यमेव। अत एय तत्रैव [5]दृष्टान्तमाह—एतदन्यतज्ज्ञानवदिति।

तर्कचूडामणि;

वैकल्यम्। अनैकान्तिकविशेषणत्वे [6]प्रकृतसाध्याभाववद्वामिताविषयकहेत्वन्तरविषयकानैकान्तिकज्ञाने एतल्लिङ्गकानुमितिप्रतिबन्धकत्वाभावेन व्यभिचारापत्तिरित्यत आह--एतदिति। अत्र एतल्लिङ्गकेत्यपि बोध्यम्। अन्यथा तत्पक्षकतत्कालीनलिङ्गान्तरजन्यानुमितिसंभवेन बाधापत्तेः। अत्र पुरुष इति। अत एव मणित्वेन प्रतिबन्धकत्वेऽपि न व्यधिकरणेन तेन दाहप्रतिबन्ध (क) इति भावः। नन्वसाधकताप्रयोगे उदाहरणावयवाभावात् दृष्टान्तवचनानर्थक्यमित्यत आह—अत्र चेति। दोषमात्रस्य सामान्यतोऽसाधकताव्याप्त्युपस्थितावपि प्रकृतहेतुविषयकत्वघटितहेतोः एतत्पक्षकत्वादिघटितसाध्यस्य च व्याप्त्युपस्थितिनियमाभावादिति भावः।

---

1 साध्यपक्षप्रत्ययेति प्रकाशसंमतः पाठः; 2 नानुमितिरिति-क
3 ज्ञानस्याभावात्-ख 4 कार्यमेव-ख
5 वह्निकदृष्टान्तमाह-क 6 प्रकृतसाध्यान्वराभाववत्-ग

सिद्धेषु साध्यानधिकरणे पक्षे सत्यसाध्यप्रतीत्यप्रसिद्धे. वह्निमति बाष्पे धूम भ्रमात् वह्न्यनुमितेः सत्यत्वाच्च ।

न चान्य एव वह्निस्तत्र भाति, मानाभावात् तद्वह्नेः प्रत्यभिज्ञानात् एकव्यक्तिके तदसंभवाच्च ।

न च सानुमितिर्लिङ्गविषयत्वेन भ्रमः । अनुमितौ लिङ्गभाने मानाभावात् ।

किं च भावोऽभावो वोभयथापि[1] प्रमेयमिति सत्यानुमितौ भावत्वा भावत्ववति प्रमेयत्वज्ञाने एकत्र तयोरभावादसत्यानुमितिः स्यात् ।

प्रकाशः

न च यत्रानैकान्तिकज्ञानमन्यत्र जातं तत्र दृष्टान्तासिद्धिः । [2]तत्र सामान्यव्याप्त्या भिप्रायेण तत्संभवादिति भावः [3]साध्ये च एतत्पक्षकेत्युद्देश्यसिद्धये । पक्षान्तरेऽपि सत्या नुमिति प्रतिबन्धकत्वादित्यवधेयम् । [4]साध्यप्रत्ययेति । साध्यविशिष्टपक्षप्रत्ययेत्यर्थः ।

एकेति । गोत्वादिसाध्यक इत्यर्थः ।

तर्कचूडामणिः

न चेति । पुरुषान्तरस्यापीति शेषः । ननु बाधाश्रयासिद्ध्यादेः [5]पक्षान्तरानुमित्य प्रतिबन्धकत्वेऽपि अनैकान्तिकताज्ञानस्य पक्षान्तरेऽपि तल्लिङ्गकानुमितावपि प्रतिबन्धकत्वात् तत्पक्षकत्वस्य व्यर्थतेत्यत आह — [6]साध्ये चेति । नन्वसाधकतानुमितेरपि साध्यगोचर तया असंभवः वक्ष्यमाणाप्रसिद्ध्यनुपपत्तिश्चेत्यत आह — साध्यविशिष्टेति ।

नन्वेकव्यक्तिगोत्वादि लिङ्गकसास्नाद्यनुमानेऽपि तत्संभव एवेत्यत आह—गोत्वादीति ।

ननु भावाभावान्याप्रसिद्ध्या तदन्यतरत्वस्य लिङ्गत्वाशङ्कानुपपत्तिरित्यत आह–भावत्वेति ।

---

1 उभयथापीति पाठान्तरम्
2 सामान्य–ख
3 साध्ये तत्पक्ष–ख
4 साध्यवत्तयेति–ख
5 पक्षेतरा–ग
6 साध्यत इति–ग
7 साधनाद्यर्थ–ग

न चान्यतरत्वं लिङ्गम्। तद्व्याप्तिमविदुषोऽप्यनुमितेः व्यर्थविशेषणत्वाच्च।

अथ साध्यव्याप्यत्वमेव तत्र तन्त्रम्, तत्र च बाधो नास्तीति चेत्—तर्हि कूटलिङ्गादनुमितौ वह्निव्याप्यवत्त्वमेव तन्त्रम्, वह्निव्याप्यं च किंचित्तत्रास्त्येव।

अथ कूटलिङ्गे वह्निव्याप्याभेदः प्रतीयते। तथा च वह्नौ कूटलिङ्गव्यापकाभेदोऽपि। अन्यथा कूटस्यैव वह्निव्याप्यत्वाप्रतीतेः। एवं च कूटलिङ्गव्यापकोवटित्वेन भासत इति वह्न्यनुमितिरसत्यैवेति चत्--न।

वह्निव्याप्यालोके धूमारोपात् यत्रानुमितिः तत्रासिद्धिभेदेऽसत्यत्वाभावापत्तेः, आलोकव्यापके धूमव्यापकाभेदात्।

प्रकाश;

अन्यतरत्वमिति। भावत्वाभावत्वान्यतरत्वं लिङ्गम् लिङ्गतावच्छेदकम्, न तु भावाभावान्यतरत्वं लिङ्गमित्यर्थः, प्रतियोग्यप्रसिद्धेरिति ध्येयम्। [1]तद्व्याप्तिमिति। तद्धर्मावच्छिन्न[2]व्याप्तिमित्यर्थः।

साध्यव्याप्यत्वमेवेति। साध्यव्याप्यत्वमेवानुमितिविषयत्वे तन्त्रम्। तथा च भावोऽभावो वा उभयथापि प्रमेयमित्यनुमितौ प्रमेयत्व[3]व्याप्यत्वमेव विषयः स्यात्। [4]तत्र च बाधो नास्त्येवेत्यर्थः।

द्विवव्याप्येति। इदं चाभ्युपेत्य समाहितम्। वस्तुतो वह्निव्याप्याभेदे भासमाने वह्निस्तव्यापकत्वेन भासते, न तु कूटव्यापके वह्नित्वं भासते सामग्रीविरहादित्यवधेयम्।

तर्कचूडामणिः

ननु तस्य लिङ्गत्वे प्रमेयत्वस्य साध्यतापत्तौ प्रमेयपदस्य विशेष्यनिघ्नतया पुंलिङ्गतापत्तिरित्यत आह—लिङ्गतेति। ननु भावत्वाद्याश्रयलिङ्गज्ञानादनुमित्या व्याप्त्यज्ञानमसिद्धमित्यत आह—तद्धर्मेति।

सामग्रीति। कूटव्यापकपदार्थान्तरस्यानवगमादित्यर्थः। संशयविषयीभूतभावत्वादौ

---

1 तद्व्याप्तीति
2 व्याप्यमेव—ख
3 व्याप्तीयथ—
4 तच्चास्त्येवेत्यर्थ ख

अथ लिङ्गमनुमितिविषयः नियमतः पक्षधर्मताज्ञानविषयत्वात् व्याप्तिज्ञानविषयत्वात् नियमेनानुमितिहेतुविशेषणधीविषयत्वाच्च पर्वतत्ववत् साध्यवच्च ।

किं चैकविशेषणवत्त्वेन ज्ञाते विशेषणान्तरधीसामग्री तत्रैव विशिष्टवैशिष्ट्य ज्ञानमिति धूमविशिष्ट एव वह्निवैशिष्ट्यानुमितिरिति ।

प्रकाशः

नियमत इति । पक्षधर्मतानिश्चयविषयत्वादित्यर्थः । तथा च येन रूपेण तादृश-निश्चयविषयत्वं, तेन रूपेणानुमितिविषयत्वं साध्यम् । अतः संदेहविषयीभूतभावत्वादौ न व्यभिचारः । नियमत इति तादृशज्ञानविषयोदासीनवृक्षादिव्यभिचारवारणाय । ननु तत्पक्षे पक्षधर्मताज्ञाने नियमेन भासमानत्वं वृक्षादेरपि, सर्वत्र [1]तथात्वे पर्वतत्ववदित्यसंगत-मिति चेत्—न । यद्विषयत्वेन पक्षधर्मताज्ञानस्यानुमिति[2]जनकत्वं तत्त्वस्य विवक्षितत्वात् । **व्याप्तीति** । अत्रापि यद्विषयत्वेन व्याप्तिज्ञानस्य कारणत्वं तत्त्वादिति विवक्षितमिति न वृक्षादौ व्यभिचारः । एवमग्रेऽपि ।

युक्त्यन्तरमाह—**किं चेति** । अत्र च मते पूर्वज्ञानोपनीतं वृक्षादिकमप्यनुमितौ भासत एव, युक्तेस्तौल्यात् । पूर्वकल्पे तु कारणीभूतज्ञानविषयत्वेन तद्विषयत्वमिति मन्तव्यम् ।

तर्कचूडामणिः

व्यभिचारादित्यत आह — **पक्षेति** नन्वयतस्त्वप्रकारकनिश्चयविषयत्वात् व्यभिचार (तया) तादवस्थ्यमित्यत आह — **तथा चेति** । धूमालोकादीना प्रत्येकं व्यभिचारा दिति दोषे सत्येवाह — **पर्वतत्वादिति** । **एवमिति** । अनुमितिहेतुज्ञाने यत् विषयतया अवच्छेदकं तत्त्वादित्यर्थः ।

ननु शाब्दज्ञानेऽपि पूर्वोपस्थित विशेषणभानापत्तेः किं चेति ग्रन्थानुपपत्तिरित्यत आह — **युक्तिमिति** । तत्र पदजन्योपस्थितिरूपविशेषणसामग्रीविरहान्नातिप्रसङ्ग इति भावः ।

---

1 तथापत्तौ-क 2 जनकत्वस्य-ख

नन्वनुमितौ व्यापकत्वभानेऽनुमित्यविच्छेदः। न च फलीभूतज्ञानन्यूनविषयस्यैव परामर्शस्यानुमितिहेतुत्वम्, गौरवात्। विषयान्तरसंचारान्नानुमितिरित्यपि न। परामर्शस्य चरमकारणत्वात् प्रत्यक्षादिसामग्रीतो बलवत्त्वाच्चेति चेत्— न। सिद्धसाधनेन विच्छेदात्।

यद्यप्येवं [1]लिङ्गांशेऽप्रमात्वेऽपि साध्यप्रमात्वात् कथं तस्यासाधकत्वम्,

---

प्रकाशः

शङ्कते—विषयेति। ननु चरमकारणस्यापि [2]प्रतिबन्धकसंभवान्न फलजनकत्वं स्यादत आह— [3]प्रत्यक्षादीति। तथा [4]चानुमित्यनन्तरमनुमित्यन्तरमेव स्यात् नानुव्यवसायादिरूपविषयान्तरसंचार इत्यर्थः। सिद्धेति। पक्षताविरहादित्यर्थः।

यत्तु अनुमितौ लिङ्गाभाने धूमाद्वह्निमनुमिनोमीत्यनुव्यवसायो न स्यात् उपनायकाभावादिति। तत्तुच्छम्। ज्ञानान्तरोपनीतस्यापि धूमजन्यत्वस्य तद्विषयत्वसंभवात्। अन्यथा लिङ्गभानपक्षेऽपि परामर्शेन धूमजन्यत्वानुपस्थापनात् तादृशानुव्यवसायासिद्धि प्रसङ्गात्। न चेदेवम्, 'चक्षुषा रूपं पश्यामि' [5]'पदेनार्थमधिगच्छामि' इत्यनुव्यवसायबलात् चक्षुःपदयोः चाक्षुषज्ञानविषयत्वापत्तिः।

तर्कचूडामणिः

नन्वनुमितिसामग्रीतत्त्वे विषयान्तरसंचारापत्तिः, भिन्ने विषये बलवत्त्वच्चेत्याशङ्काग्रन्थानुपपत्तिरित्यत आह—शङ्कत इति। कामिनीजिज्ञासुशङ्केत्यर्थः। तस्या असार्वत्रिकत्वेन विषयान्तरज्ञानमेव संचारत्वेन विवक्षितमिति वक्तव्यमित्युत्तरग्रन्थार्थ इति भावः। समानविषयायास्तस्या दुर्बलत्वमेवेत्यत आह — तथाचेति। अनुमित्यतिरिक्तं हि ज्ञानमनुमितिसमानविषयमन्यविषयं वा। आद्येऽपि न शाब्दादिरूपम्, तत्सामग्रीविरहात्। नापि प्रत्यक्षम्, अलौकिकस्य तस्यानुमितिसामग्रीतः बलवत्त्वादित्यर्थः। सिषाधयिषासत्त्वे तदकिंचित्करमित्यत आह— पक्षतेति।

उपनायकेति। अनुमितिगतधूमजन्यत्वस्यायोग्यतयालौकिकसंनिकर्षाभावादिति भावः। परामर्शेनेति। अनुमित्या चेत्यपि बोध्यम्।

---

1 'लिङ्गज्ञानेऽप्रमात्वेपि' इति पाठान्तरम्
2 प्रतिबन्धसंभवात्—ख
3 प्रत्यक्षादिति—क
4 चानुमित्यनन्तरमेवानुमितिः स्यात्—ख
5 पदेनामुमधि—क

तथाप्युक्तमसाधकत्वमस्त्येवेति चेत्–अस्तु तावदेवम्। तथापि दैवात्तत्र धूमसत्त्वे कथं तदंशेऽप्यसत्यता।

अत एवार्द्रेन्धनप्रभवो वह्निर्धूमव्यापको नान्यः। न च वह्नित्वेन व्यापकत्वादन्योऽपि तथा। तेन विनापि धूमसत्वात्। एवं वाष्पे धूमभ्रमात् धूमव्यापको वह्निर्भासते, स च तत्र नास्त्येवेति न सानुमितिः सत्येति निरस्तम्। दैवात् धूमसत्त्वे सत्यत्वात्।

प्रकाशः

उक्तमिति। लक्षणवाक्येन सर्वांशे समीचीनसाध्यप्रत्ययाजनकत्वमुक्तम्[1], तच्चाक्षतमेवेत्यर्थः। अस्तु तावदिति।

अत्रेदं चिन्त्यम्। [2]दैवात्तत्र धूमसत्त्वेऽपि स नानुमितिविषयः। तस्य वह्निव्याप्यत्वेनापगमर्शात् तदुपनीतत्वेन लिङ्गभानाभ्युपगमात्। अन्यथा तस्य सद्धेतुत्वेनासंग्राह्यत्वात्। तथा च [3]वाष्पस्य मत्वेन परामर्शविषयत्वात् तदुपनीतस्यैव धूमत्वेनानुमितिविषयत्वम्। अन्यथा परामर्शोऽपि तत्र भ्रान्तो न स्यात् इति तदंशे [4]कथमनुमितेः सत्यत्वमिति।

अत्र केचित्। लिङ्गस्यानुमितौ भाने [5]मानाभावः। न चोक्तानुमानं तथा, अप्रयोजकत्वात्। नापि कारणीभूत लिङ्ग[6]ज्ञानभातत्वं तथा, अप्रयोजकत्वादेव। नन्वेकविशेषणवत्तया

तर्कचूडामणिः

ननु क्वचिदंशेऽपि सत्यज्ञानजनके तत्त्वाभावात् उक्तमिति ग्रन्थासंगतिरित्यत आह—लक्षणेति। अन्यथा व्यभिचारिण्यपि धर्म्यंशेऽनुमितेः प्रमात्वात् असंभवापत्तिरिति भावः।

अन्यथेति। परामर्शस्य तद्विषयत्व इत्यर्थः।

---

1 त्वमित्युक्तम्–क
2 दैवादत्र–क
3 बा धूमत्वेन–क
4 कथमनुमितिसत्येति–क
5 मानाभाव एव–ख
6 ज्ञान–ञ

उच्यते । स्वज्ञानदशायां पक्षे साध्यप्रत्ययाजनकत्वमसाधकत्वम् ।

प्रकाशः

ज्ञाते विशेषणान्तरधीसामग्रीत एव विशिष्टवैशिष्ट्यप्रतीतिरित्युक्तमिति चेत्—न । पक्षत्रिषयक-साध्यानुमितित्वेन कार्यथाव्याप्यत्वप्रकारकपक्षधर्मताज्ञानत्वेनकारणता । तथा च लिङ्गभानं प्रति स्वरूपायोग्यत्वात् परामर्शस्य न ततस्तद्विषयानुमितिः । यथा [1]प्रत्यक्षानुपस्थितमपि शाब्दबोधे न विषयः तथा प्रकृतेऽपि । उक्तबाधकात् न च लिङ्गविषयत्वमपि कार्यतावच्छेदकमध्यप्रविष्टम्, प्रमाणाभावात्, इति वदन्ति ।

तन्न । एवं हीश्वरानुमाने कर्त्रेकत्वमपि विषयो न स्यादित्युक्तम् ।

[2]वयं तु—पक्षपदं पक्षतावच्छेदकविशिष्टपरमवश्यंवाच्यम् । अन्यथा पर्वतत्वादेरपि भान-प्रसङ्गात् । लिङ्गे च पक्षतावच्छेदकमेवेति कथं न तद्भानम् । न हि लिङ्गान्यत्वगर्भं पक्षता वच्छेदकम् ; गौरवात् . क्वचिल्लिङ्गस्यापि तथात्वाभ्युपगमाच्च । यद्वत्तया हि परामर्शे पक्षो विषयः तदेव पक्षतावच्छेदकम् । अत एव काञ्चनमयत्वसामानाधिकरण्येन कदाचित् वह्न्यनु-मितिवत् पर्वतत्वसामानाधिकरण्येनाप्यनुमितेः न वा सिद्धसाधनशङ्कापीति ब्रूमः ।

[3]स्वज्ञानदशायामिति। विरुद्धत्वाद्यन्यतमहेत्वाभासोपाधिविशिष्टस्वप्रमादशायामित्यर्थः ।

तर्कचूडामणिः

सामान्यसामग्र्यां सत्यामपि विशेषसामग्रीविरहात् न लिङ्गानुमितिरित्याह—नेति । प्रत्यक्षे चोपनीताशेऽपिज्ञानं प्रत्यासत्तिरिति भावः । यथेति ! अत एव लाघवादुपनयस्य मानमात्रसहकारित्वमपास्तम् ।

जयदेवमतं दूषयति—तन्नेति ।

मानान्तरदेवेश्वरानुमाने एकत्वसिद्धिरस्त्वित्यत आह—वयं त्विति ।

स्वपदस्य लिङ्गमात्रपरत्वे प्रमा वविवक्षायामपि सद्धेतावतिव्याप्तिः तज्ज्ञानस्यापि धर्मांशे सत्त्वादित्यत आह-विरुद्धत्वेति ।

---

1 प्रत्यक्षानुप-ख 2 वयं तु-ख

प्रकाशः

अतो न विरुद्धत्वादिभ्रममादाय सद्धेतावतिव्याप्तिः । सत्प्रतिपक्षस्थले च येन संबन्धेन यथ तत्प्रमा तथोक्त हेत्वाभासलक्षणव्याख्यानावसरे । तद्दशा च नोपलक्षणम्, किं तु विशेषणम्। तेन सत्प्रतिपक्षोत्तीर्णसद्धेतौ नातिव्याप्तिः । तदा सत्प्रतिपक्षत्वाभावेन तादृशाप्रमाविरहात् । न च यदा न तादृशप्रमा, किं तु विरुद्धोभयव्याप्तिपक्षधर्मता[1]ज्ञानमात्रम्, [2]तत्र तादृशप्रमाविराहेणव्याप्तिरिति वाच्यम्। प्रतिपक्षरूपदोषस्य पूर्वोक्तसंबन्धेन हेतुनिष्ठत्वेन अन्यत्र ईश्वरप्रमाया अप्रावश्यकत्वात् ।

एतेन [3]तद्दशाविशेषणत्वपक्षे अज्ञायमानदशायां सव्यभिचारादावव्याप्ति[4] । न च तस्य नासाधकत्वमिति वाच्यम्। तस्य हेत्वाभासत्वसमानेयतत्वादिति निरस्तम् ।

अत एव न घटादिविरुद्धे कन्दरा (र) वृत्तितृणादिव्यक्तविशेषे अस्मदाद्यज्ञायमानेऽव्याप्तिः । न चैवं लिङ्गत्वभ्रमदशायां विरुद्धेऽव्याप्ति तदा साध्यप्रत्ययजनकत्वादिति वाच्यम्। किंचित्कालीनतज्जनकत्वाभावस्यैव विवक्षितत्वात्। तथा सति यथा न हेतौ व्यर्थविशेषणत्वं तथाग्रे वक्ष्यते ।

तर्कचूडामणिः

एतेनेति । ईश्वरज्ञानमादाय व्यभिचारिण्यपि लक्षणसत्वेनेत्यर्थः । अयमेवानदशब्दार्थः ।

नन्वेवं विधौ साधकत्वस्य केवलान्वयितया सर्वत्र सत्त्वात् विरुद्धत्वादिहेतौ व्यर्थतेत्यत आह—**तथा सतीति** ।

ननु केवलहेत्वाभासत्वसाधने अर्थान्तरता, केवलस्यासाधकतारूपत्वानुपपत्तेः इति यदि

---

1 परामर्शमात्रम्-क
2 तत्तादृश-क
3 दृशा-ख
4 अतिव्याप्ति-क
5 व्याप्तिः--ख

तथा हि विरुद्धत्वादिज्ञानदशावर्तीदं पक्षे साध्यप्रत्ययाजनकम्, विरुद्धादित्वात्। पक्षविशेषणमहिम्ना तत्तद्दशायां पक्षे साध्यप्रत्ययाजनकत्वं सिध्यति। बाधितादावपि लिङ्गत्वभ्रमात् पक्षे साध्यप्रत्ययजनकत्वमिति न प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धिः।

प्रकाशः

विरुद्धत्वादिज्ञानदशावर्तीदमिति। ननु चात्र विरुद्धत्वादौ [1]लिङ्गत्वभ्रमात् पक्षगोचरसाध्यप्रत्यय[2]जनकत्वात् व्यभिचार इति चेत्। अत्र केचित्। न हि सर्वकालीनतज्जनकत्वाभावः साध्यः। किं तु तज्जनकत्वाभावमात्रम्। तच्च तत्र [3]किंचित्कालीनत्वज्ञानवत्त्वविरहसत्त्व एवाप्रत्यूहम्। एवं च यद्यपि वस्तुमात्र एव [4]यथाश्रुतसाध्यसत्त्वात् विरुद्धत्वादिहेतोः स्वरूपविवेचने व्यर्थविशेषणत्वदोषप्रसङ्गः, तथापि हेत्वाभासत्वनियतपक्षगोचरसाध्यप्रत्ययजनकत्वाभावः साध्योऽत्राभिमतः। स च न वस्तुमात्र इति न वैयर्थ्यमित्याहुः।

तन्न। हेत्वाभासत्वस्य साध्यप्रविष्टत्वेऽधिकस्य व्यर्थत्वात्। तद्धर्मासाधकत्वस्यानिरुक्तत्वात्। तत्साधनेऽर्थान्तरत्वाच्च।

अन्ये तु साध्यप्रत्ययाजनकत्वं साध्यप्रत्ययजनकतावच्छेदकरूपविरहः। तत्प्रत्ययजनकतावच्छेदकं तु तत्प्रत्ययजनकज्ञानविषयतावच्छेदकम्, तदवच्छेदकत्वादीनि च अव्यभिचरितत्वादीनि अबाधितत्वासत्प्रतिपक्षत्वपर्यन्तानि। तज्ज्ञानकरणत्वस्य संप्रदायसिद्धत्वात्। अत एव निगमनमर्थवत्। एवं च सव्यभिचरितत्वादिरेव पर्यवसितः। तथा सत्यपि

तर्कचूडामणिः

ब्रूयात् तदा दोषमाह — तद्धर्मेति।

अपदेवनतमाह — अन्ये त्विति। ननूक्तजनकतावच्छेदकाभावः सद्धेतावपि व्याप्तिज्ञानत्वादेस्तदवच्छेदकस्य धूमादावभावात्। तथा नेदमसाधकत्वमित्त आह — तत्प्रत्ययेति। अबाधितत्वज्ञानहेतुत्वे मानमाह — अत एवेति। तस्य तद्बोधकत्वेनै

---

1 लिङ्गत्वभ्रमात्-क
2 जनकात्-क
3 [illegible]
4 साध्य-क

प्रकाशः

[1]यथा वा न साध्याविशेषः [2]तथाग्र एव स्फुटम् ।

एवमपि सद्धेतौ सत्प्रतिपक्षितत्वरूपतादृशावच्छेदकविरहस्य कदाचित्संभवेन सत्प्रतिपक्षतोत्तीर्णेऽप्यसाधकत्वं मा प्रसाङ्क्षीदिति तद्विरः स्वज्ञानकालीनतया विशेषितः । स च तादृशो नान्यदा [3]तज्ज्ञानरूपविशेषणाभावेन विशिष्टाभावात् । एवं च स्वज्ञानविरहकाले विशिष्टाभावाद्विरुद्धेऽपि व्यभिचारो मा भूदित्यभिसन्धिना साध्य निष्कृष्याह – तथा हीति । तथा च [4]स्वज्ञानकालस्य पक्षतावच्छेदकतया तत्कालीनत्वं साध्यस्य, न तु तस्यापि साध्ये प्रवेशः, येन व्यभिचारः । न च व्यर्थविशेषणता, विवक्षितसाध्यस्यासार्वभिकत्वादिति वदन्ति ।

तच्चिन्त्यम् । तथा हि स्वज्ञानकालस्य[5] साध्यप्रवेशेऽपि न तदभावाधीन[6]साध्याभावात् व्यभिचारः । ईश्वरज्ञानमादाय विशेषणस्य सर्वदा सत्त्वात् । न ह्यस्मदादिज्ञानघटितमेव

तर्कचूडामणिः

बोधयोगादिति भावः । स्फुटयिति । हेतुसाध्यतावच्छेदकभेदादिति भावः ।

कदाचिदिति । विरहसंबन्धमात्रं विवक्षितम ; न तु तत्कालीन [तत्कालीनत्वम्] विशेषणान्तरवैयर्थ्यादिति भावः । स्वज्ञानकालीनत्वस्य साध्यशरीराप्रवेशे बीजमाह — **एवं चेति ।** अत्र ज्ञानपदानि यथासंभवं प्रमापराणि । **निष्कृष्य** -- पृथक्कृत्य किंचिद्विशेषणं पक्षतावच्छेदकीकृत्य अपरं साध्यं कृत्वेत्यर्थः । नन्वेवमसाधकता न सिद्धा, तदेकदेशस्यैव साध्यत्वादित्यत आह -- **तथा चेति ।**

साध्यनिष्कर्षबीज दूषयति -- **तथा हीति ।** ननु पुरुषान्तरं प्रति सत्प्रतिपक्षि लिङ्गं विशेषदर्शनवत् पुरुषान्तरं प्रत्यसाधकं मा भूदिति तत्पुरुषीयत्वं प्रमाविशेषणमिति नेश्वरमादाय समर्थनं युक्तमित्यत आह – **न हीति ।** असाधकत्वं सामान्यत इह लिलक्षयिषितम्

1 यथा–ख
2 तथाग्र एव–ख
3 तज्ज्ञानरूप–ख
4 स्वज्ञानस्य–क
5 कालसाध्य–क
6 विशिष्टाभावात्–ख

प्रकाशः

तल्लक्षणम्, तथा सति अस्मादाद्यज्ञायमाने व्यभिचारिणि विरुद्धे वा व्यक्तिविशेषे प्रसङ्ग। अस्मदाद्यज्ञायदशायां सर्वत्रैव विरुद्धादावप्यन्तिप्रसङ्गात्।

किं च स्वज्ञानविरहकाले विशिष्टाभावसत्त्वेऽपि न व्यभिचारः। प्रतियोग्यसमानाधिकरणसाध्याभावसामानाधिकरण्यस्य व्यभिचारत्वात्। अन्यथा द्रव्यत्वेन गुणाननुमानापत्तेः।

तर्कचूडामणिः

न तु तत्पुरुषासाधकत्वम्, हेत्वाभासत्ववदापादकाभावात् न पुरुष विशेषं प्रत्यसाधकतापत्तिरिति भावः न केवलं कन्दरवर्तिविरुद्धाद्यव्याप्तिः, प्रसिद्धे प्रमेयत्वादावपीत्याह — अस्मदादीति। ननु यत्र हेत्वाभासत्वं तत्रासाधकतानियमः। न तु यदा तत्वं तदासाधकत्वनियमः तथा च कदाचित्कज्ञानमादाय मेयत्वादौ तत्सत्त्वान्न दोष इत्युनुशयादाह- किं चेति। एतच्चं विशिष्टाभावे विशेष्यं प्रतियोगि विशेषणं तदवच्छेदकमिति मते। संबन्धस्य प्रतियोगित्वे विशिष्टाभावस्य प्रतियोग्यसमानधिकरणत्वेन प्रकृतग्रन्थासंगतेरिति बोध्यम्।

ननु प्रतियोग्यसामानाधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरणत्वमेव वाच्यम्। अन्यथा अयं घटवह्निरूपद्वयवान् धूमादित्यादौ वह्निव्याप्त्यापत्तेः। एकसत्त्वे [1]द्वयाभावाभ्युपगमेन तस्य प्रतियोगिसमानाधिकरणत्वात। एवं च प्रकृते व्यभिचारो दुर्वारः। किं च तत्रैव विशिष्टं न पदार्थान्तरं यत्र विशेष्यसामान्यात्कं, यत्र तु सामान्यं विशेष्यं तत्र तदर्थान्तरमेव। अत एव घटत्वान्नीलघटत्वादिकमन्यदिति तस्योपाधिरूपत्वम्। न च विनिगमकाभावः, दण्डिनि पुंसि पुरुषभेदाप्रत्यययात्। [2]नीलघटत्वंघटत्वं नियतपूर्ववर्तित्वं कारणत्वं नेत्यादिप्रत्यययात्। एवं च स्वप्रमाकालीनत्वविशिष्ट[3]साध्यप्रत्ययाजनकत्वं साध्य[3]प्रत्ययाजनकत्वादन्यदेवेति[4]विशिष्टाभावस्य प्रतियोग्यसमानाधिकरणत्वमपि। न च प्रकृते न सामान्यं विशेष्यं, किं त्वभाव एवेति वाच्यम्। तादृशावच्छेदकाभाववत्त्वस्योपाधेरेवात्रविवक्षितत्वात्। [5]न च [6]तस्यतद्वत्त्वस्य चाभेद एवेति वाच्यम्। प्रतीतेर्विरोधात्। अत एव धूमधमवत्त्वयोः

1 द्वयाभ्युपगमे पि तत्र—ग
2 नीलघटत्व—ग
3 साध्य—ग
4 प्रकृ॰ विशिष्टाभावप्रति—ग
5 न च—क

प्रकाशः

विरुद्धे च तादृश[1]साध्यास्वीकारे लक्षणाव्याप्तिरेवदोषःस्यात्। तस्मात् साध्यप्रत्ययाजनकत्वस्य केवलान्वयित्वेन हेतौ व्यर्थविशेषणत्वशङ्कायां स्वप्रमाकालीनत्वमपि साध्ये प्रवेश्यमेव। विशिष्टा यैव साधकत्वेन[2]तत्साधनस्योद्देश्यत्वाच्च। [3]तच्च हेत्वाभासत्वसमनियतमिति न विरुद्धादिहेतौ-व्यर्थविशेषणत्वमिति वयमालोचयामः।

नन्वेवं विरुद्धत्वाद्यन्य[4]तमविशिष्टस्वप्रमाकालीनत्वमेव लक्षस्तमस्तु। साध्यप्रत्यया.

तर्कचूडामणिः

भेदमभिप्रेत्य [5]धूमे हेतौ मतुपूर्वैयर्थ्यम्, न तु धूमवत्त्व इत्युक्तमिति चेत्— न। ईश्वरज्ञान [6]मादायसर्वत्र[6]विशेषणस्य [7]सत्त्वादिति पूर्वदोषे तात्पर्यादिति।

तादृशेति। [8]विशिष्येत्यर्थः। [9]हेतुविशेषणवैयर्थ्यस्य परिहाराय साध्ये विशेषण-दानानुपपत्तिरित्यत आह—**विशिष्टस्यैति**।

अत्रेदं चिन्त्यम्। यदि साध्ये तत्कालीनत्वं विशेषणम्, [10]पक्षे तद्विशेषणवैयर्थ्यम्[10]। न च तत्साध्येनैवान्वितं[11] व्याख्यायत इति वाच्यम्। इदम्पदेन [12]व्यवधानेन स्वारस्यविरहात् पक्षविशेषणेति ग्रन्थविरोधाच्चेति। [13]तस्मज्जायदेवमतानुसरणमेवोचितम्। न च तत्र पि विशिष्टसाध्ये [14]व्यभिचाराभावेन साध्यस्य पृथग्भाव[15]करणानुपपत्तिः। विशिष्टसाध्यव्याप्त्यस्फुरण-दशायामिदं प्रकारान्तरमित्याशयात्। अत एवेदानीन्तन[16]वह्न्यनुमितेः कालिकव्याप्त्यसंभवेऽपि धूमकालः पक्षतावच्छेदक इत्युक्तम्। न चोक्तावच्छेदकविरहस्य बाधादिरूपतया वक्ष्यमाणा.

---

1 साध्यातात्त्वस्वीकारे-ख
2 तत्साधनत्वस्य—क
3 उद्देश्यत्वाद्वा-क
4 तमत्व—ख
5 धूमहेतौ मतुपो—ग
6 मादाय—ग
7 व्यर्थत्वादिति—ग
8 विशेष्येत्यर्थः—ग
9 ननु हेतु—ग
10 वैयर्थ्यम्—ग
11 वानन्वितं-ग
12 व्यवधाने स्वारस्यभानात्—ग
13 तज्जयदेव—ग
14 व्यभिचाराभावात्—ग
15 कारणा-ग
16 वह्निमानिनुत्यमितेः—ग

यद्वा अनुमितिप्रतिबन्धकतावच्छेदकरूपवत्त्वसाधकत्वम् । तथा हि-इदानीमिदमनुमितिप्रतिबन्धकतावच्छेदकरूपवत् अनैकान्तिकादित्वात् ज्ञानवत् । अनुमितिप्रतिबन्धकतावच्छेदकं च रूपं ज्ञाने विषयतया अनैकान्तिकादित्वमेव । न च साक्ष्याविसेषः ; उपाधि-विशेषस्यानुमेयत्वात्, तोयत्वेन पिपासोपशमनसमर्थतावच्छेदकरूपपरत्वानुमानवत् ।

प्रकाशः

जनकत्वस्यविवक्षितस्य केवलन्वयित्वेनाव्यावर्तकत्वात् । [1]अपि चाप्रसिद्ध[1]साध्यके असिद्ध्यादौ वं प्रतियोग्यप्रसिद्ध्या अव्याप्तिरित्यरुचेर्लक्षणान्तरमाह—यद्वेति । तद्वत्त्वं चात्र तद्वर्तमानत्वं [2]विवक्षितम् । तेन कदाचित् सत्त्वेऽपि सत्प्रतिपक्षोत्तीर्णे नातिव्याप्ति । [3]इदं च हेत्वाभासत्व-समनियतमेव न सार्वत्रिकमिति न हेतोर्व्यर्थविशेषणतेति [3]ध्येयम् । ननु व्यभिचारित्वादिकं नानुमितिप्रतिबन्धकम् । तत्सत्त्वेऽप्यनुमितिप्रतिबन्धाभावादित्यत आह — अनुमितीति ।

तर्कचूडामणिः

साधकत्वाभेद इति वाच्यम् । अत्र जनकतावच्छेदकाभावत्वेन तत्र [5]प्रतिबन्धक[5]तावच्छेदक-त्वेत दोषाणां[6]प्रविष्टइया [7]आकारभेदेन भेदात् ।

ननु स्वप्रमाकालीनत्वस्याजनकत्वविशेषणतया यथोक्तविशेषणविशेष्यभावे न व्यर्थतेत्यत आह—अपि चेति । अप्रसिद्धेति । क्षणिकत्वादिसाध्यक इत्यर्थः ।

नन्विदमप्यनुपपन्नम् । तत्रापार्थकस्यैव दोषतया हेत्वाभासत्वानभ्युपगमेन [8]तन्नियत-साधक (त्व) स्याप्यवाच्यत्वादिति चेत्—तर्ह्यस्वरसान्तरमत्र द्रष्टव्यम् । तथा हि--असाधकत्वं मतान्तरसाधारणमेव वाच्यम्, न तु स्वमात्रसिद्धम् । दूषणस्यासाधकताव्याप्तिमङ्गीकृत्य-

---

1 अप्रसिद्ध-क
2 विवक्षितमिति न सत्प्रतिपक्षोत्तीर्णो तिव्याप्तिः
3 इत्थं च-क
4 शङ्केति ध्येयम् -ख
5 प्रतिबन्धकतवच्छेदकाभावत्वेन तत्प्रतिबन्धक-ग
6 अप्रविष्टतया-ग
7 कालभेदेन-ग
8 तन्नियतसाधकस्याप्यवश्यवाच्यत्वात्-ग

अन्ये त्वनैकान्तिकबाधितविरुद्धेष्वव्याप्यत्वं व्याप्यत्वासिद्धेऽनैकान्तिकत्वं स्वरूपासिद्धसत्प्रतिपक्षासाधारणेषु दशाविशेषेऽनुमितिप्रतिबन्धकज्ञानविषयत्वमसाधकत्वम् । न चैवमनैकान्तिकोऽसाधक इति सहप्रयोगानु-

---

प्रकाशः

तथा चानुमितिप्रतिबन्धकज्ञानविषयता तावच्छेदकत्वमसाधकत्वमिति फलितोऽर्थः । सत्प्रतिपक्षस्थले यथा तद्वत्त्वं तथोक्तं प्राक् ।

उक्तसाध्याविशेषपरिहारेण ये न तुष्यन्ति तेषां मतमाह—**अन्ये त्विति** । **बाधितेति** । पक्षवृत्तिबाधितेत्यर्थः । एतन्मते गन्धप्रागभावावच्छिन्नो घटो गन्धवानिति [1]बाधितम् । **व्याप्यत्वासिद्ध इति** । एतन्मते नीलधूमादौ व्याप्तिरस्त्येव, न तत्र व्याप्यत्वासिद्धिरिति मन्तव्यम् । **स्वरूपासिद्धेति** । यद्यपि स्वरूपासिद्धस्य हेत्वाभासत्वं सर्वदापि संभवति, तथापि दशाविशेष एव तस्योक्तरूपासाधकता[2]व्यक्तौ न कश्चिद्दोषः । यत्र हेत्वाभासत्वं [3]तत्रासाधकत्वमिति [4]नियमः, न तु यत्र यदा तत्त्वं तत्र तदावश्यकमिति केचिदाहुः ।

तर्कचूडामणिः

कथेत्युक्तत्वात् । एवं च ज्ञानगमकत्वमनुपपन्नम् । ईश्वरानभ्युपगन्तृमते तस्य व्यक्तिविशेषाव्याप्तत्वात् ।

नन्वनैकान्तिकत्वादिकमेवेत्युक्त्या [5]अनैकान्तिकत्वादीनामसाधकतारूपत्वमुक्तमिव भाति तथा [6]चान्यतम इवात्राप्यननुगम इत्यत आह—**तथा चेति** । ननु ह्रदपक्षकवह्निमाध्यकधूमानुमाने बाधिते नास्त्यव्याप्यत्वमित्यत आह-**पक्षेति** । ननु नीलधूमादौ तादृशे न न व्यभिचारितेत्यत आह-**एतदिति** । अधिकमेव तत्र दोष इति तन्मतमिति भावः ।

---

1 न बोधितम्-ख
2 वृत्तौ-ख
3 तत्रावश्यमसाधकत्वमिति-ख
4 केचिदाहु-खः
5 अनैकान्तिकादीना-ग
6 चायत्रवा-ग

पपत्तिः । तत्राव्याप्यत्वस्यासाधकशब्दार्थत्वात् । असाधकताननुगमेऽपि च हेत्वाभासत्वमनुगतमेव, यस्य ज्ञानमनुमितिप्रतिबन्धकं तस्य हेत्वाभासत्वा-[3] दिति ।

इति श्रीमद्गङ्गेशोपाध्यायविरविते तत्त्वचिन्तामणौ अनुमानखण्डे
असाधकतासाधकत्वप्रकरणम्

प्रकाशः

तन्न । एवं हि सर्वत्रैव तदेवासाधकत्वमनुगतमस्तु । किमननुगतासाधकत्वनिर्वचनेन । न ह्यनैकान्तिकत्वादौ दशाविशेषे अनुमितिप्रतिबन्धकज्ञानविषयत्वं नास्ति । तस्मादिदं [1]सत्प्रतिपक्षादावेव व्याप्यत्वाश्रयासिद्धिभिन्नासिद्ध्याश्रयत्वं, असाधकत्वं स्वरूपासिद्धे इति ध्येयम् ।

असाधारणेत्युपलक्षणम् । अनुपसंहार्यपि द्रष्टव्यः । अनुगतासाधकत्वसंभवो नाननुगतं तत् । एवं [2]चासाधकत्वशब्दस्य नानार्थत्वापत्तिरित्यत्रास्वरसर्वाजमिति भावः ।

इति श्रीरुचिदत्तकृते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे असाधकतासाधकत्व प्रकरणं समाप्तम्

तर्कचूडामणिः

उपाध्यायमतं दूषयति-तन्नेति । न हीति । न च यत्साध्यदृनिरूपितमनैकान्तिकत्वं केनापि कदापि न ज्ञातं तत्राव्याप्तिः । ईश्वरज्ञानमादायादोषात् । न च तस्य न प्रतिबन्धकतेति वाच्यम् । स्वाधिकरणे तस्यापि अनुमित्यभावनियतत्वेन तस्यापि तथात्वात् । स्वविरहादेव पुरुषान्तरानुमितावविरोधादिकम्, अन्यथा [illegible] शपत्वाद्यव्याप्तेरित भावः । नानार्थत्वेति । इदमापाततः—असाधकशब्दस्य वाक्यत्वेनाशक्तत्वात् । अतः पूर्वोक्त एव तात्पर्यम् ।

[3]इति श्रीधर्मराजविरचिते तर्कचूडामणौ
अनुमानखण्डे असाधकतासाधकतावादः समाप्तः

---

1 सत्प्रतिपक्षादेरेव—ख 2 चासाधक-ञ
3 इयं पुष्पिका नास्ति-ग

ईश्वरवादः

एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः, क्षित्यादौ कार्यत्वेन घटवत् सकर्तृकत्वानुमानात्। ननु क्षित्यादि प्रत्येकं न पक्षः, तस्य स्वशब्देनाभिधातुमशक्यत्वात्। नापि मिलितम्, एकरूपाभावात्। अत एव सकर्तृकत्वासकर्तृकत्वविचारारम्भकसंशयविषयः तथाभूतविवाद

प्रकाश

एवमियता प्रबन्धेन निरूपितस्यानुमानस्य प्रयोजनं दर्शयति- एवमिति। जगदिति। कार्यमात्रेत्यर्थः। ननु [1]तदप्रसिद्धौ साध्याप्रसिद्धेः कथं [2]तदनुमानमित्यत आह- क्षित्यादाविति। तथा च पक्षधर्मताबलात्तत्सिद्धिरिति भावः।

तर्कचूडामणिः

हेतुहेतुमद्भावसंगतिपरत्वं वाक्यस्य दर्शयति-एवमिति। ननु न जगन्निर्मातृतया पुरुषधौरेयत्वम्। अस्मदादेरपि यत्किंचिज्जगन्निर्मातृत्वात्, सकलतन्निर्मातृत्वस्य गगनाद्यनिर्मातृत्वेनाप्रसिद्धेः। न च जायते गच्छतीति जगत्पदेन कादाचित्कत्वं विवक्षितम्: ध्वंसासंग्रहापत्तेरित्यत आह — कार्येति। कार्त्स्न्यार्थो मात्रशब्दः। ननु कर्तृसिद्धावपि सर्वज्ञेश्वरे किमायातमित्यत आह— पक्षेति। द्व्यणुकाद्यनन्तकार्यपक्षीकरणे तावदुपादानाभिज्ञत्व-सिद्धेरिति भावः। [3]नन्वनेकपक्षतावच्छेदकमादायापि मिलितस्य पक्षत्वसंभवेन एकरूपेति दूषणानुपपत्तिरित्यत आह -एकेति। एतेन प्राचीनं प्रत्येकपदमनेकपक्षतावच्छेदकावच्छिन्नपरं

---

1 तदसिद्धौ-ख 2 अनुमान-ख
3 नन्वेक—ग

विषयो वा न पक्षः । एकरूपाभावेन तयोस्तावत् [1]ग्रहीतुमशक्यत्वात् , वादिनोर्निश्चितत्वेन संशयाभावात् ।

न च वाद्यमानुनयोस्तुल्यबलत्वेन मध्यस्थस्य संशयः । अनुमानाभ्यां तस्य संशयो मध्यस्थप्रश्नानन्तरं चानुमानमिति [2]परस्पराश्रयात् घटेऽपि कदाचित्तयोः संभवात् ,प्रत्येकं संशये विवादास्पदत्वेनामानुनेऽ

प्रकाशः

मिलितमिति एकपक्षतावकावच्छन्नमित्यर्थः । तयोरिति । संशयविषयत्वविवाद-विषयत्वयोरित्यर्थः ग्राहकाभावमुक्त्वा ग्राह्याभावमाह-वादिनोरिति ।

संभवादिति [1] विशेषादर्शनदशायामिति भावः । तथा च तस्यापि पक्षान्तर्भूतत्वे [3]अंशतः सिद्धसाधनमिति तात्पर्यम् । अभ्युपेत्याह—प्रत्येकमिति । क्षितिः सकर्तृका न वा [4]अङ्कुरः सकर्तृको न वेति प्रत्येकमित्यर्थः । विवादास्पदत्वेनेत्युपलक्षणम् । तादृश संशय-

---

तर्कचूडामणिः

व्याख्यातम् । तत्त्वेन संशयविवादविषययोः परिग्रहे तावत्सु इत्यनुपपत्तिरित्यत आह-य संशयेति । ननु संशयाभावे तयोस्तावत्त्वसिद्धेरिति वक्तव्यम् , न तु दुर्ग्रहत्वादितीत्याशङ्क न पूर्ववाक्यार्थे हेतुप्र इतिपरः किं तु दोषान्तरपर इति व्याचष्टे— ग्राहकेति ।

ननु कुलालकर्तृत्वेन निश्चिते कथं तत्संशय इत्यत आह-विशेषेति । ननु तस्यापि सकर्तृकत्वेन बाधानवतारात् तत्पक्षेऽपि न क्षतिरित्यत आह—तथेति । संशयस्यैव निरस्तत्वेन प्रत्येकमित्यसंगतिरित्यत आह—अभ्युपेत्येति ! प्रत्येकमित्यस्य प्रत्यात्ममित्यर्थभ्रमं वारयति—क्षितिरिति । तर्हि संशयविषयत्वपक्षे न दोष इत्यत आह-विवादेति ।

---

1 तावत्सु ग्रहीतुमिति पाठान्तरम् । तम् । तर्कचक्षु 2 अन्योन्याश्रयादिति पाठान्तरम्
3 तत्रचांशतः ग तत्रांशतः-ख 4 अङ्कुरा-ग

[1]र्थान्तरत्वापत्तेश्च ।

न च शरीरापेक्षेण कर्त्रा यन्न कृतं शरीराजन्यं जन्यंवा पक्षः, जन्यात्मविशेषगुणशब्दफूत्कारसर्गाद्यकालीनवेदघटादि लिप्यादिसंप्रदायानामीश्वरमात्रकर्तृकाणामसंग्रहात् , असिद्धेश्च ।

प्रकाशः

विषयत्वेनेत्यपि द्रष्टव्यम् । **अर्थान्तरत्वादिति** । विचाराङ्गसंशयविषयतावच्छेदकेन रूपेण पक्षे त्साध्यसाधनस्य तत्संशयनिवर्तकत्वेन प्रकृतार्थसंबद्धत्वम् , रूपान्तरेण च तत्र तत्साध्यस्य भिन्नप्रकारकतया तत्संशयानिवर्तकत्वेन त्प्रकृतार्थासंबन्धित्वादिति भावः ।

जन्येति । जन्यात्मविशेषगुणेऽप्यस्मदादिशरीरस्य कारणत्वात् सर्गाद्यकालीनवेदादावस्मदाद्यदृष्टोपार्जितेश्वरगृहीतशरीरस्य [1]कारणत्वादिति भावः । **असिद्धेरिति** । अप्रसिद्धेरित्यर्थः

तकचूडामणिः

ननूद्देश्यस्येश्वरस्य सिद्धौ कुतोऽर्थान्तरतेत्यत आह- **विचारेति** । **तत्संशयेति** । समानप्रकारत्वादिति भावः ।

ननु फूत्कारे शरीरापेक्षकर्तृजन्यत्वेऽपि न जन्यात्मविशेषगुणे तदपेक्षकर्तृजन्यत्वम् अस्मदादिकृतिजन्यत्वाभावात् तस्योयाशङ्क्य द्वितीयपक्षदोषपरत्वं तस्य दर्शयति — **जन्येति** । नन्वीश्वरस्याशरीरतया कथं वेदादिसंप्रदायेऽव्याप्तिरित्यत आह—**अस्मादादीति** । तथा च स्वादृष्टोपार्जितशरीरशून्यत्वमेवाशरीरत्वम् । न चेदानीमपीश्वरे अस्मददृष्टोपात्तशरीरापत्तिः । सति कार्ये इष्टत्वादिति भावः । ननु हेत्वभावे प्रसिद्धस्यासिद्धिशब्दस्य पक्षदूषणवेलायां प्रयोगानुपपत्तिरित्यत आह—**अप्रसिद्धेरिति** । उक्ताजन्यत्वविशिष्टजन्यत्वस्य पक्षतावच्छेदक-

---

1 अकारत्वरणात्—ख

अदृष्टद्वारा शरीरिणोऽपि क्षित्यादिकर्तृत्वात् ।

नापि जन्यकृत्यजन्यं जन्यम् उभयसिद्धकृति[1]जन्यान्यजन्यं वा पक्षः, क्षित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात् । नाप्यदृष्टजनककृत्य जन्यं जन्यकृतिसाक्षादजन्यं वा जन्यं पक्षः । ईश्वरकृतेरदृष्टजनकत्वेन क्षित्यादौ तदभावात् [2]घटादावप्येवं पक्षत्वेन अंशतः सिद्धसाधनात् ।

प्रकाशः

[3]अत्र हेतुमाह—**अदृष्टेति** । तथा च न [4]सर्वासंग्रह इति भावः ।

बाद्यन्तरमतं दूषयति—**नापीति** । द्वितीयलक्षणे दोषमाह–**घटादेरिति** । चेष्टाद्वारा

तर्कचूडामणिः

स्याप्रसिद्धेरित्यर्थः । ननु विशेषणासिद्धावदृष्टेत्यनेन हेतुरुच्यते, न तु विशिष्टाप्रसिद्धा-वित्यत आह— **तत्रेति** विशेषणासिद्धिहेतोः विशिष्टाप्रसिद्धौ परंपरया हेतुत्वात् अप्रसिद्धिहेतुत्वं तस्य युक्तमिति भावः ।

वयं तु असिद्धिपदमाश्रयासिद्धिपरम् , आश्रयविशेषणासिद्धेराश्रयासिद्धित्वेनोक्ततया पक्षविशेषणस्याजन्यत्वस्यासिद्धिरित्यर्थः । तत्र चादृष्टेत्यादिना साक्षादेव हेतुरुच्यत इति वदामः ।

नन्वत्रापि असंग्रहस्यैवाभिमततया पूर्ववाक्येनैव [5]एतदभिधाने चास्य वाक्यस्य वैयर्थ्यमि-त्यत आह—**तथा चेति** । सर्वेषामप्यत्रासंग्रह इति ततो भेदः । दत्तोत्तरत्वेन कल्पान्तरो-त्थानानुपपत्तिरित्यत आह–**वादीति** । ननु घटादेरदृष्टजनककृतिजन्यत्वेन तदजन्यत्वाभाव-त्तस्य पक्षत्वाभिधानानुपपत्तिरित्यत आह–**द्वितीय इति** । तथा च क्षितौ तदभावा-

---

1 'जन्यान्यद्वा जन्य पक्ष' इति पाठान्तरम्
2 'घटादेरप्येवम्,' इति प्रकाशसंमतः पाठः
3 तत्रेति चूडामणिमतः पाठः
4 सर्वसंग्रह–ग
5 तदभि–ग

न च क्षितिरेव पक्षः, अङ्कुरेण संदिग्धानैकान्तिकत्वात् । न च निश्चित-विपक्षे हेतुसंदेहात् स इति वाच्यम् । हेतौ साध्याभाववद्वृत्तित्वसंशयस्य दूषकत्वात् । स च साध्याभाववति हेतुसंदेहात् हेतुमति साध्याभावसंदेहाद्वा उभयथापि दोषः । न चैवं पक्षेऽपि तत् स्यात् । अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात् । अङ्कुरे हेतोरनिश्चयेन संदिग्धानैकान्तिकम् । तन्निश्चये च साध्यसंदेहवति साध्यानुमितिरेव, पक्षवत् सामग्रीसत्त्वात् । अत एवाङ्कुरः पक्षसम इति चेत् —

न । तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्थापनानुमानविषयत्वात् । तदा तस्यापि पक्षत्वे [1]प्रतिज्ञानुपपत्तिः । अनुमानान्तराधीनतत्साध्यानुमित्यनन्तरं च पक्षेऽनुमितावितरेतराश्रयान्नैकमप्यनमानं स्यात् तत्रापि क्षित्यादौ संदिग्धानैकान्तात् क्षितेर्विवादविषयत्वे अङ्कुरे प्रथमं [2]साध्यसाधने अर्थान्तराच्च । किं चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः ।

प्रकाशः

जन्यकृतेस्तत्र जनकत्वादित्यर्थः । **क्षितिरेवेति** । तथा च नार्थान्तरमिति भावः ।

तस्यापक्षत्वेनेति । परार्थानुमाने प्रतिज्ञाविषयस्यैव पक्षत्वं भवतीति [3]भ्रमवत इदमुत्तरं

तर्कचूडामणिः

मिधानं प्रथमकल्प इति सूचितम् । **तथा चेति** । क्षितित्वप्रकारकानुमितेरिति भावः । ननु तत्रापि, साध्यसंशयादिसत्त्वे [4]अपक्षत्वोक्तिरयुक्तेत्यत आह—**परेति** । ननु तस्य संशयविषयत्वेऽप्यङ्कुरः सकर्तृक इत्यनिर्देशात् न दोष इत्यत आह-**प्रतीति** । नन्वस्मदादिनां परमाणुगोचरलौकिकज्ञानाभावात् सामान्यादिप्रत्यासत्तिजन्यस्य [5]चाजनकत्वेन इदानींतन[6]द्व्यणुके अर्था-

---

1 प्रतिज्ञान्तरापत्तिरिति पाठान्तरम्
2 साध्यमाने इति पाठान्तरम्
3 भ्रमदशादुक्तं बोध्यम्-क
4 अपेक्षत्व-क
5 अजनक-क
6 द्व्यणुकत्वे —क

नापि सर्गाद्यकालीनं द्व्यणुकं पक्षः। परं प्रति सर्गाद्यसिद्धेः।

किं च सकर्तृकत्वम्, न तावत् कृतिमत्सहभावः कृतिमज्जन्यत्वं वा। अस्मदादिना सिद्धसाधनात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं तदिति चेत्—न। उपादानगोचरत्वं हदि यत्किंचिदुपादानगोचरत्वं तदा अस्मदादिना अर्थान्तरत्वम्। ज्ञानादिजन्यत्वमपि विवक्षितम्, न च घटोपादानगोचरापरोक्षज्ञानादीनां क्षितिजनकत्वं संभवति, व्यभिचारादिति त्—न। क्षितिजनकादृष्टजनकज्ञानादीनामुपादानविषयत्वनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात्। न च साक्षात्तज्जन्यत्वं विवक्षितम्। तद्धि न कृतिजन्याजन्यत्वे सति कृतिजन्यत्वं

प्रकाशः

बोध्यम्। पक्षत्वे। प्रतिज्ञाविषयत्वे। सर्गाद्येनि। इदानींतनं द्व्यणुकमस्मदादिनैव योग ज्ञानवता सकर्तृकं स्यादित्यर्थान्तरशङ्कया सर्गादीत्युक्तम्। अत्र संदिग्धानैकान्तिकत्वमपि बोध्यम्।

साध्यं दूषयितुं पृच्छति—किं चेनि। व्यभिचारादिति। क्षितिपूर्वमस्मदादि

तर्कचूडामणिः

नरा नवकाशे सर्गाद्येति व्यर्थमित्यत आह—इदानींतनेनि। मीमांसकेन तदनङ्गीकारादाह—स्यादिनि। त्वन्मतेनेति भावः। [1]सकर्तृकत्वदूषणस्य प्रकृतसंगतिमाह—साध्यमिनि। अन्वयव्यभिचारवत्त्वे हेत्वन्तरविलम्बात् तदा कार्यविलम्ब इति शङ्क्येत, अतो दुर्जनत्वविरोधिनं व्यभिचारमाह—क्षितीनि। नन्वीश्वरकृतिमादाय घटे [2]दीर्घसाध्यत्वात् न [3]साध्यवैकल्यमित्याशङ्क्य लिया व्यपितेश्वरकृतिमादाक तत्र साध्यग्रहणानुपपत्त्या

---

1 सकर्तृकत्वस्य दूषणस्य-क 2 द्वितीयसाध्य-ग
3 वैकल्य-क

स्वजनककृत्यव्यवहितोत्तरक्षणवर्तित्वं वा । घटदृष्टान्तस्य साध्यविकलतापत्तेः, घटादौ कुलालादिकर्तृकत्वाभाव प्रसङ्गाच्च । न च शरीरक्रिया दृष्टान्त इति वाच्यम् । घटेनानैकान्तिकत्वात् चेष्टात्वस्योपाधित्वाच्च ।

नापि क्षित्याद्युपादानगोचरत्वं विवक्षितम्, अप्रसिद्धेः न चोपादानशब्दस्य संबन्धिशब्दत्वेन घटक्षित्यादिपदसमभिव्यवहारे तत्तदुपादानगोचरत्वं चैत्रो मातृभक्तोमैत्रवदिति वाच्यम् । शाब्दे हि बोधे

प्रकाशः

घटोपादानज्ञानासंभवादित्यर्थः । घटेति । [1]कुलालकृतेश्चेष्टाद्वारा [2]तज्जनकत्वादित्यर्थः घटादाविति । उक्तस्य [3]तत्कर्तृताप्रयोजकस्य [4]तत्रासंभवादिति भावः । चेष्टात्वस्यति । न च कृतित्वंसादौ साध्याव्याप्तिः, पक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति भावः ।

तर्कचूडामणि

कुलालकृतिमादाय तद्वाच्यम् । तत्र च दोष उक्त इत्याशयेन आह -- कुलालेति । ननु कुलालादिकर्तृकत्वप्रयोजयमन्यम्, तदादाय तत्र तत् स्यादित्याशङ्क्य सामान्यप्रयोजकाभावे सामान्यव्यवहारवत् विशेषव्यवहारोऽपि न स्यादित्याशयेनाह -- उक्तेति । व्यभिचारव्यापकोपाध्यभावेव्यभिचारानुपपत्तिशङ्कापरिहारार्थं [5]चेष्टात्वोपाधित्वप्रदर्शनमयुक्तमित्याशङ्क्य [6]समवेतत्वं पक्षधर्ममाह -- न चेत्यादिना ।

एवंशब्दस्यानुमितावपि [7]तत्तदुपादानत्वेनोपादानोपस्थितावित्यर्थाभ्युपगमे घटादा-

---

1 कृतिः—क
2 तज्जनिकेत्यर्थः
3 तत्कर्तृकत्व
4 तत्रासत्त्वात्
5 चेष्टात्वस्योपाधित्वप्रदर्शन युक्त—ग
6 समवेत—ग
7 तत्तदुपादानत्वेनोपस्थितौ--ग

तथा, न चात्र शब्दः प्रमाणम्, वादेनोरनाप्तत्वात्। अनुमाने त्वनुगतेन व्यापकत्वग्रहे तेन रूपेण व्यापकसिद्धिः। तच्चोपादानत्वमेवेति कथं नार्थान्तरम्।

किं चैवं घटादावपि तत्तदुपादानत्वेनैवोपस्थित्या सामान्येन रूपेण कुत्राप्यनुपस्थितेर्व्याप्तिरेव न गृह्यत।

अपि च सामान्यलक्षणया योगजधर्मरूपया वा प्रत्यासत्त्या उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमता अस्मदादिना सिद्धसाधनम्। तेषां

प्रकाशः

[1]किं चैव मिति। [2]यद्यशाब्देऽपि बोधे तत्तदुपादानत्वेनैवोपस्थितिर्वाच्या [3]तदेत्यर्थः। ननूपादानगोचरत्वेन प्रत्यक्षादीनां जनकत्वं विवक्षितम्। तेन रूपेण तेषां [4]स्वविषयसमवेतकार्यं प्रत्येव जनकत्वम्। तथा चान्योपादानप्रत्यक्षस्याजनकत्वादेव नार्थान्तरमित्यत आह अपि चेति। इदं च नैयायिकमतेनैव दूषणं द्रष्टव्यम्। तद्वत इति। तदुपलक्षितस्येत्यर्थः। ननु विशिष्टस्य जनकत्वं विवक्षितम् अत आह—अदृष्टेति। यद्यपि [5]योगजज्ञानस्य नादृष्टद्वारकतासंभवः क्षीणदोषत्वेन योगिनोऽदृष्टासंभवात्। तथाप्येतदनुमानबलादेव 'धर्मिकल्पनात' इति न्यायात् दोषं विनापि [6]तस्यादृष्टजनकत्वं भवतु इत्यर्थान्तरापादानमेवेदमिति ध्येयम।

तर्कचूडामणिः

नित्यनुपपत्तिः। तत्र प्रत्यक्षेणैव तदुपस्थित्यभ्युपगमादित्यत [7]आह —यदीति। गुरुणा अलौकिकज्ञानानङ्गीकारादाह —इदं चेति। ननु तदभावे कथं तद्वत्त्वम्, 'तदस्य' (पा.सू. ५-२-९४) इति सूत्रे वर्तमानसंबन्धे मतुपो विधानादित्यत आह—तदुपलक्षितस्येति। अलौकिकप्रत्ययासत्तिद्वयजन्यज्ञानस्य [8]स्वरूपयोग्यत्वात् न तेनार्थान्तरशङ्कास्पदमपीति योगजं ज्ञानं वाच्यम्। तत्र शङ्कते—यद्यपीति। तस्येति। योगजज्ञानस्येत्यर्थः

---

1 किं चैव—क
2 यदि शाब्देऽपि—क
3 तदेत्यर्थः—क
4 स्वसमवेतकार्य—ग
5 योगिज्ञानस्य—ग
6 तस्य जनकत्वं—क, ग
7 आह—ग
8 स्वरूपायोग्यत्वात्—ग

क्षित्यव्यवहितपूर्वसमयासत्त्वेऽपि तद्वतः सत्त्वात् अदृष्टद्वारा तेषामपि जनकत्व-संभवात् ज्ञानादिसाक्षाज्जन्यत्वस्य च निरस्तत्वात् ।

अथ योगजधर्माजन्यसविकल्पकाजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्य-जन्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् ।

यद्वा अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यजन्यज्ञानादिमदजन्यं जन्यम्, अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्योपादानगोचरापरोक्ष-ज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यम् । ज्ञानाव्यवहितोत्तरसमयवर्तीच्छा तदव्यवहितोत्तरक्षणवर्तिकृतीनां जनकत्वं विवक्षितम्, न तु ज्ञानादीनां

प्रकाशः

अथेति । अत्र प्रत्यासत्त्यजन्यान्तं विशेषणं पक्षे पक्षासिद्धिवारणार्थम्, [3]साध्ये च सिद्धसाधनवारणार्थम् अदृष्ट[1]द्वारा योगजादिज्ञानानामपि जनकत्वस्योक्तवात् । एवमग्रेऽपि ।

ज्ञानाव्यवहितेति । इदं च वस्तुगतिमभिप्रेत्य, न त्विदं साध्यतावच्छेदकप्रविष्टम्, ज्ञानादिप्रत्येकविशिष्टजन्यत्वस्य साधने [2]साध्याप्रसिद्ध्यभावात् । पक्षधर्मताबलेन [3]विवक्षित ज्ञानादिसिद्धेः । अत एव सिद्धान्तेऽपि तथैव भविष्यति । न त्विति । विवक्षितमित्यनुषज्यते । साध्यतावच्छेदकप्रविष्टत्वेनेति शेषः ।

तर्कचूडामणिः

एतच्चोपलक्षणम्, परमाण्वदिगोचरयोगिज्ञानस्याविहितत्वेऽप्यनिषिद्धत्वेऽपि चादृष्टजनकत्वमतएव धर्मकल्पनालाघवात् कल्प्यत इत्यपि बोद्धव्यम् ।

क्षितिपूर्वसमये तेषामभावादेव नाश्रयासिद्धिसिद्धसाधने, अत आह-- अदृष्टेति ।

तथैवेति । ज्ञानाव्यवहितवाद्यनन्तर्भावेणेयर्थः । यौगपद्ये पौर्वापर्ययोर्वस्तुतो विद्यमानयोर्निराकरणानुपपत्तिरित्यत आह—विवक्षितमिति । ननु [4]दृष्टनते पौर्वापर्यं पक्षे तेषां यौगपद्यं वक्तुं [5]सिद्धान्ते दृष्टमेत्वेयत [6]आह--साध्येतेति ।

---

1 अदृष्ट
2 साध्याप्रसिद्ध्यभावात्-ग
3 विलक्षणज्ञानासिद्धे-ख-ग
4 दृष्टातपौर्वा-क
5 साध्येति-क
6 आह-ग

यौगपद्यं पौर्वापर्यं वा। अतो न साध्याप्रसिद्धिः, न वा क्षित्यादौ बाध इति।

मैवम्। योगजधर्मसामान्यज्ञानरूपप्रत्यासत्तीनामनागतगोचरसाक्षात्कारस्य तज्जनकप्रत्यासत्तीनां च परस्याप्रसिद्धतया तदजन्यस्य साक्षात्कारस्याप्रसिद्धत्वेन पक्षसाध्ययोर्विशेणासिद्ध्या परं प्रत्याश्रयासिद्धेः साध्याप्रसिद्धेश्च।

तत्सिद्धौ वा पक्षे तदजन्यत्वासिद्धेः क्षितिजनकादृष्टजनककृतिचिकीर्षासाक्षात्काराणां योगजधर्माद्यजन्यानामदृष्टद्वारा क्षितिजनकत्वेन सिद्धसाधनात्।

प्रकाशः

पक्षसाध्ययोरिति। पक्षविशेषणासिद्ध्या अश्रयासिद्धिः, साध्यविशेषणासिद्ध्या च साध्याप्रसिद्धिरिति [1]बोध्यम्।

सिद्धौ वेति। योगजधर्माद्यजन्योपादानगोचरज्ञानादिसिद्धौ वा तस्याप्यदृष्टद्वारा क्षित्यादिजनकत्वसंभवात् पक्षे तदजन्यत्वस्यासिद्धेरित्यर्थः। **सिद्धसाधनादिति।** यत्किंचिदुपादानाभिप्रायेणेदम्। वस्तुतोऽप्रयोजकत्वाद्विशिष्टसाध्ये न व्यापकत्वमिति [2]ध्येयम्, **साध्याप्रसिद्धेरिति।** यद्यप्यपरोक्षज्ञानजन्यत्वं स्वत एवाप्रसिद्धम्, अनुमितेरपरोक्षत्वाभावात् तथा च किं [3]सविकल्पकजन्यत्वोपवर्णनेन। तथापि घटादेस्तादृशप्रत्यक्षजन्यत्वं नास्ति

तर्कचूडामणिः

व्यत्ययेनान्वयाद्यनुपपत्तेः यथासंख्यं [4]तमाह–**पक्षेति।**

सिद्धावित्यत्य प्रत्यासत्तिसिद्धावित्यभ्युपगमे पक्षे [5]तदजन्यत्वाभावात् [तज्जन्यत्वाभावात्] तदजन्यत्वासिद्धेरित्यसंगतिः, [6]अत आह–**योगेति। ननु** स्वोपादानविवक्षायां कस्तर्हि दोष इत्यत आह–**वस्तुत इति। किमिति।** प्रत्यक्षत्वाभावादपि दृष्टान्ते [7]साध्यासिद्धिसंभवादिति भावः।

---

1 बोध्यम्–ख
2 ध्येयम्–क
3 सविकल्पकतोप–ख
4 आह–ग
5 'तदजन्यत्वा
6 इत्यत आह
7 साध्या सिद्धि–ग

न च तादृसाक्षाज्जन्यत्वंविवक्षितम् । घटादिदृष्टान्ते तदसंभवात्, दृष्टान्ते घटाप्तौजनकेष्टसाधनताज्ञानस्यानुवितित्वेन जन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन साध्याप्रसिद्धेश्च ।

ननु व्याप्तिवलेन साध्यं सिध्यति व्याप्तिश्च यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिज्ञकर्तृजन्यत्वमितिरूपा, न तु यद्यत्कार्यं तत्तत् यत्किंचि दुपादानाभिज्ञजन्यमिति । एवं च यत्र यत्र कार्यत्वं तत्र तत्र तदुपादानाभिज्ञ जन्यत्वमिति विशिष्य व्याप्त्या क्षित्यादौ कार्यत्व क्षित्याद्युपादानाभिज्ञ जन्यत्वमेव साधयति अतो न सिद्धसाधनमिति चेत् --न घटे पटे च कार्यत्वस्य व्याप्तिग्रहः किं प्रत्येकं घटोपादानाद्यभिज्ञ जन्यत्वेन, तत्तदुपादा नाभिज्ञजन्यत्वेन, उपादानाभिज्ञजन्यत्वेन वा । आद्ये घटोपादानाभिज्ञ जन्यत्वेदौ कार्यत्वस्य व्यभिचार एव । द्वितीय त्वननुगततत्तच्छब्दाभि धेयघटाद्युपादानगतानुगतरूपाभावात् कथं व्यकापकताग्रहः । तत्तच्छब्दास्तु स्वभावात् समभिव्याहृतपरतया नायदोष इति चेत् – न । अनुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वात् । अत एवेदानीं देवदत्तोबहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् । विद्यमानत्वे सति यो यदा यत्र नास्ति स

प्रकाशः

मानाभावादित्यपरोक्षपदमपास्य ज्ञानघटितमेव साध्यं कर्तव्यम् । एवं च तेन रूपेणाप्रसिद्धि रुक्ति भावः ।

वस्तुतस्त्वनुमितित्वेनजन्यसविकल्पकव्याप्तिग्रहजन्यत्वेन चेयर्थः । तथा च विशेषण विशेष्योभयविरहाद्विशिष्टसाध्याप्रसिद्धिरिति भावः ।

तर्कचूडामणिः

तादृशसाध्याभिधाने पक्षे प्रत्यक्षज्ञाननियमो न सिध्येत् । नित्यप्रत्यक्षवत् नित्यानुमितिसिद्धौ विरोधाभावात् । अतस्तादृशसाध्यमत्रानभिमतमेवेत्यरुचेर्जयदेमतमाह- वस्तुत इति । तथा च चकारोऽध्याहार्यः, अनुषञ्जनीयो वेति भावः ।

तदा तदतिरिक्तदेशेऽस्ति ; यथाऽहमेव बहिरसन् [1]गृहमध्ये तिष्ठामीत्यत्र पक्षदृष्टान्तसाधारणयत्त्वतत्त्वयोरनुगतयोरभावान्नान्वयी किं तु व्यतिरेकी [2]युक्तम् । तृतीये सिद्धसाधनमेव ।

अथ सर्गाद्यकालीनं व्यणुयं ज्ञानेच्छाकृतिसमानकालीनसामग्रीजन्यं कार्यत्वात् घटवत् अदृष्टसामग्रीजन्यत्वेऽदृष्टापत्तिरिति चेत् — न । परं प्रति सर्गाद्यसिद्धेः ।

प्रकाशः

उक्तमिति । त्वयेति शेषः ।

अथ सर्गेति । तथा च तत्कालेऽस्मदादिज्ञानाभावात् तदाश्रयेश्वरसिद्धिरिति भावः । न च ब्रह्माण्डान्तरवर्तिज्ञानादिकमादायार्थान्तरम् । तत्कालविशे[4]स्य सकलब्रह्माण्डसाधारणत्वेन युगपदेव तन्नाशसंभवेन तत्र मानाभावात् । अत्र च सर्गानन्तरज्ञानादिसमान[3]कालीनकालादि[3]यत्किंचित्कारणजन्यत्वेन सिद्धसाधनवारणाय सामग्रीपदम् । ननु तथापि तादृशादृष्टजनकसामग्र्या अर्थान्तरमस्त्वित्यत आह—अदृष्टेति । न ह्यदृष्टसामग्री अदृष्टप्रागभाव[3]घटिता अन्यत्र[3] जनिकेत्यर्थः । प्रागभावस्यान्यत्राजनकत्वादित्यर्थः ।

तर्कचूडामणिः

अनुषङ्गनीयो वेति भावः ।

ननु मीमांसकेनात्र व्यतिरेकिणोऽनङ्गीकारात् 'उक्तम्' इति तद्वाक्यायो इत्यत आह—त्वयेति । ननु स्वसामग्र्याः तादृशकृतिकालीनत्वसिद्धावपि किमायातमीश्वर इत्यत आह-तथेति । तदिति । प्रपञ्चनाशकेत्यर्थः । [4]नन्वदृष्टत्वेन तत्सामग्रीजन्यत्व तन्त्रम् , अन्योन्याश्रयात् इत्याशयान्तरमाह— न हीति । प्रागभावस्य प्रागभावत्वेन तन्मात्रजनकत्वादिति भावः ।

---

1 गृहे प्रतिष्ठामीति पाठान्तरम्
2 कालिन–ख
3 घटिता–ख
4 ननु दृष्टत्वेन ग

ज्ञानादीनां सिद्धावपि द्व्यणुकाजनकत्वात् उदासीनसिद्धावप्रयोजकत्वाच्च ।

प्रकाशः

यत्तु अत्रादृष्टसामग्रीध्वंसे अदृष्टसामग्रीजन्यस्वर्गे च व्यभिचार इति । तन्न । तामग्र्या नित्यकारणघटितत्वेन [1]ध्वंसासंभवात् । अदृष्टसामग्र्याः स्वर्गं प्रत्यजनकत्वाच्च । अदृष्टजनकयागादेरेव स्वर्गजनकतया बोधितत्वात् ।

[2]यदपि दृष्टसहकृतादृष्टसामग्रीजन्यत्वेन द्व्यणुकस्य नादृष्टतापत्तिरिति । तदपि न । लाघवाददृष्टसामग्रीजन्यत्वस्यैवादृष्टत्वप्रयोजकत्वात् इति भावः ।

ननु मास्तु ज्ञानादीनां द्व्यणुकजनकत्वं तथापि तदाश्रयत्वेनेश्वरसिद्धिः स्यादेवेत्य· आह—**उदासीनेति** । कार्यकारणभावादितर्काभावान्नोदासीनसिद्धिरिति भावः । उदासीनां सिद्धावपि न [3]त्वदभिमतेश्वरसिद्धिरित्यर्थ इत्याहुः ।

तर्कचूडामणिः

आद्यं दूषयति—**सामग्र्या इति** । सामग्रीध्वंसव्यवहारश्च सविशेषणे हीति न्यायात् किंचिद्ध्वंसविषय इति भावः । एतच्च सामग्रीशब्दस्य मेलनोपाधिककारणपरत्वे द्रष्टव्यम् । यदा च मेलनपरत्वं तदा तस्य ध्वंसप्रतियोगित्वमिष्टमेव । न चैवं तत्र [4]ध्वंसव्यभिचारः, [5]अदृष्टसामग्रीशब्दस्य यावत्कारणपरत्वेन तदप्रसङ्गात् । अन्यथा हेतोरसिद्ध्यापत्तेः । सामग्र्याः [6]अजनकत्वात् ।

अत एव वक्ष्यति–'सामग्री च न कारणं [7]क्षणविशेषत्वात्' इतीत्यत आह—**दृष्टेति** ।

---

1 तदूध्वंसा–ख
2 यदप्यदृष्ट–ग यद्यप्यदृष्ट–क
3 त्वदभिमतप्रयोजकेश्वर–ख–ग
4 ध्वसे–ग
5 दृष्टत्वेन–ग
6 जनकत्वात्–ग
7 पक्षविशेषणत्वात्–ग

एतेन सर्गाद्यकालीनं द्व्यणुकं द्व्यणुकासमवायिकारणसमानकालीन-कृतिजन्यमिति निरस्तम् । द्व्यणुकासमवायिकारणसमानकालीनकृतित्वेन गौरवाप्रयोजकाभ्यामजनकत्वात् ।

किं च कार्यत्वम् । न तावत् योगोपस्थितकृत्यर्हत्वम्, असिद्धेः । नापि पूर्वकालासत्त्वे सत्युत्तरकालसंबन्धित्वम् । तत्तत्पूर्वकालत्वस्याननुगतत्वात्, सकलपूर्वकालस्याप्रसिद्धेः । नापि कादाचित्कत्वम्, प्रागभावेनानैकान्तिकत्वात् । नापि प्रागभावप्रतियोगित्वम् ध्वंसेनानैकान्तिकत्वात् । नापि सत्त्वे सति तत्त्वम् । सत्ताजातेः परंप्रत्यसिद्धेः । स्वरूपसत्त्वस्य च ध्वंसेऽपि सत्त्वात् ।

प्रकाशः

द्व्यणुकासमवायीति । [1]तत्तद्व्यणुकासमवायीत्यर्थः । न च द्व्यणुकान्तरे व्यभिचारः । तस्य पक्षसमत्वादिति भावः ।

असिद्धेरिति । परं प्रतीति शेषः । न चादृष्टद्वारा कृत्यर्हत्वं [2]तव मतेऽपीति वाच्यम् । तथापि [3]ध्वंसेन व्यभिचारात् इति भावः ।

तर्कचूडामणिः

लाघवादित्यापाततः । वस्तुतो दृष्टप्रागभावादिघटितायास्तस्या अन्यत्र [4]जनकत्वासंभव इति बोध्यम् । ननूदासीनसिद्धावपि तर्कसत्त्वेन नाप्रयोजकतेत्यत आह— कार्येति । उक्तयुक्त्यात कार्यमात्रेन उदासीनस्यैवासिद्ध्या [5]तदभ्युपगमेनार्थान्तरापादनं युक्त[6]मित्यदोषसूचनायामपि पूर्वसर्गसिद्धद्व्यणुकासमवायिकारणकालीनामस्मदादिकृत्या अदृष्टद्वारिकया दोषवारणायाह— तदिति । तस्येति । तत्रापीश्वरमादाय साध्यमिति भावः ।

तथापीति । उपादानगर्भसाध्याभावादिति भावः ।

---

1 तद्व्यणुका– ग
2 तन्मतेऽपीति– ग
3 ध्वंसे व्यभि–ख ग
4 जनकत्वासंभवात्–ग
5 तदभ्युपगमेन नार्थान्तरापादनमयुक्तम्–ग
6 इत्यतो दोष —ग

यत्तु अयं घटः एतद्घटजनकानित्यज्ञानचिकीर्षाकृत्यतिरिक्तज्ञानादिजन्य कार्यत्वात् पटवदित्यादि। तन्न। विपक्षे बाधकाभावेनाप्रयोजकत्वात्। अन्यथा अयं घटः एतद्घटजनकानित्यादृष्टातिरिक्तादृष्टजन्यः कार्यत्वात् अपरघटवत्[1]। [2]एतत्सुखदुःखसाक्षात्कारौ एतज्जनकानित्यसुखदुःखातिरिक्तसुखदुःखसाक्ष्यौ सुखदुःखसाक्षात्कारत्वादिध्यादिना नित्यधर्माधर्मसुखदुःखाश्रयस्यापि सिद्धप्रसङ्गात्। अयंघटः स्वजनकानित्यज्ञानाद्यतिरिक्तज्ञानाद्यजन्यः घटत्वात् अपरघटवत् इत्यादिना सप्रतिपक्षाच्च।

केशिचत्तु दृश्यते तावदभिमतविषयग्राहिणीन्द्रिये मनो निवेशयतः

प्रकाशः

यत्त्विति। पक्षधर्मताबलान्नित्यज्ञानसिद्धिः। साध्ये एतत्पदमकिंचित्करम्। अप्रयोजकत्वमेव विशदयति--अन्यथेत्यादिना।

दृश्यते तावदिति। अनेन वक्ष्यमाणानुमाने साध्यप्रसिद्धिर्दर्शितेति भावः।

तर्कचूडामणिः

ननु घटजनकानित्यज्ञानभिन्नत्वसिद्धावपि न नित्यज्ञानसिद्धिः, दृष्टान्तवत् विशेषणाभावेनापि विशिष्टाभावपर्यवसानसंभवादित्यत आह - पक्षेति। घटजनकभिन्नत्वस्य बाधात् विशेष्यानित्यज्ञानभिन्नत्वं पर्यवस्यतीत्यर्थः। एतत्पदमिति। तदभावेऽपि पटे साध्यसत्त्वादिति भावः। अन्यथेत्यस्य प्रयोजकत्वार्थकत्वे व्यधिकरणता, न ह्येकस्य प्रयोजकत्वे इतरेषामपि साधकतापत्तिरित्यत आह — अप्रयोजकत्वमिति। तथा च तर्कमन्तरेणापि लिङ्गस्य गमकत्व इत्यन्यथार्थः।

सर्गाद्यकालीनत्वस्य क्रियाविशेषणत्वे विशेषणान्तरवैयर्थ्यम्। एवं मनोयोगविशेषणत्वे ज्ञानविशेषणत्वे च तत्तत्पूर्वप्रतीकवैयर्थ्यमित्यत आह--सर्गेति। तज्जन्यत्वस्य द्वितीयज्ञान-

---

1 पटवदिति पाठान्तरम् 2 एतौ सुखेति पाठान्तरम्

पुंसो मनःक्रियानुकूलो यत्नः । तथा च सर्गाद्यकालीनशरीरजन्यज्ञानध्वंसानाकारकालाधारज्ञानजनकात्ममनस्संयोगजनिका मनःक्रिया, तन्मनो-

---

प्रकाशः

तथा च सर्गाद्येति । सर्गाद्यकालीनं यच्छरीरं तज्जन्यं यत् ज्ञानं तद्ध्वंसानाधारः कालः तदाधारं यज्ज्ञानं तज्जनको य आत्ममनस्संयोगः तज्जनिका मनः क्रिया पक्षः । न च न्यायनये सर्गप्रलययोरनादित्वात् सर्गाद्यकालीनशरीर[1]जन्यज्ञान[1]ध्वसानाधारकालाप्रसिद्धिः । सर्गपदस्यैतत्सर्गपरत्वात् । [2]तथा चैतत्सर्गाद्यकालीन[3]ज्ञानजनकात्म[4]मनःसंयोग[4]जनकमनःक्रियापक्षत्वे [5]इदानींतनक्रियाणामस्मदादिप्रयत्नजन्यत्वान्नांशतः सिद्धसाधनमिति भावः । न च सर्गाद्यकालीनमनःक्रियेत्येवास्त्विति वाच्यम् । सर्गाद्यकालीनत्वस्या[6]न्यविशेषणत्वात् ।

तन्मन इति । तन्मनोगोचरप्रयत्नानाधारः तन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलतन्मनःक्रियाकारणाधारो यः कालः तदनन्तरकालानाधारा आद्यसत्ता उपत्तिर्यस्याः सा तथेत्यर्थः । अत्राकारणीभूतताद्दश[7]प्रयनाधारकालानन्तर[8]कालाधारत्वसिद्धिप्रसङ्गवारणाय तन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलकारणाधारेति विशेषणम् । एवं च कारणीभूतस्यैव तस्य सिद्धिः । न हि भवति इतरसकलक्रियाकारणसत्त्वेऽपि प्रयत्नव्यतिरेकेणोत्तरक्षणे क्रिया जायते अथ च त प्रयत्नः

तर्कचूडाणिः

विशेषणत्वे तज्जन्यचतुर्थपञ्चमादिज्ञानजनकक्रियाया अपि पक्षत्वे अस्मदादिना तत्रांशे सिद्धसाधनम् , ज्ञानध्वंसानाधारकालाप्रसिद्धिश्चेत्यत आह-**तज्जन्यमिति** । ज्ञानजनकत्वस्य क्रियाविशेषणत्वे असंभवः । आत्ममनोयोगजनकत्वस्य व्यर्थता चेत्यत आह—**तज्जनक इति** । इदानीं तनक्रियाणामस्मदादियत्नजन्यत्वेनयत् सिद्धसाधनं, तन्न, तासां पक्षत्वादिति भावः । [8]**अत्रेति** । तदनाधारकालनान्तरकालानाधारोत्पत्तिकत्वस्य अन्यथासिद्धव्यभिचारि-

---

1 ज्ञान–क
2 तथा च सर्ग–क–ग
3 ज्ञानाजनक–क
4 संयोग–क
5 इदानीक्रिया–क
6 स्यांशेऽपि विशेषणत्वात्–ग
7 प्रयत्नानाधार–क
8 कालानाधार–क

गोचरप्रयत्नानाधारतन्मनोगोचरप्रयत्नतद्व्याप्येतरसकलकारणाधारकालानन्तर कालानाधाराद्यसत्ताका, तन्मनः क्रियात्वात्, संमततन्मनःक्रियावत्। अर्थात् प्रयत्नाधारकालानन्तरकालाधारा सा क्रिया सिध्यति इत्याहुः।

तन्न। सर्गाद्यकाले ज्ञानजनकमनस्संयोगजनकक्रियायां मानाभावः। पूर्वक्रिययैव संयोगसंभवात्। ईश्वरवादिनां तन्मनोगोचरप्रयत्नानाधारः

प्रकाश

जन्येति। बाधवारणाय तन्मनोगोचरप्रयत्नानाधारेति विशेषणम्। तन्मनोगोचरप्रयत्नाना धारचरमक्षणे तदुत्पादितक्रियासत्त्वात् बाध इत्यत आह—आद्येति। अर्थादिति। प्रकारान्तरे बाधादित्यर्थः।

दूषयति—तन्नेति। तथा च पक्षासिद्धिरिति भावः। पूर्वेति। प्रलयकालीना क्रिययैवेत्यर्थः। इदं चोपलक्षणम्। तत्कालीनसंयोगेनापि ज्ञानसंभवात्, [1]पूर्वं सहकारि

तर्कचूडामणिः

साधारणत्वादिति भावः। बाधेति। तादृशसकल[2]कारणाधारस्य प्रयत्नाधारत्वसंभवेन तदुत्तरक्रियोत्पत्तिनियमेन तत्कालस्य क्रियानाधारत्वबाधादिति। भावः। चरमेति। ध्वंसेत्यर्थः। नन्वर्थापत्तिव्यतिरेकिणो [3]नार्थपदवाच्यत्वम्, तस्या एव मानत्वे उक्तानुमानस्य संगतत्वापत्तेश्चेत्याशङ्क्य पक्षधर्मता[4]बलमेव तत्त्वेन विवक्षितमिति सूचयितुमाह—प्रकारेति। प्रयत्नाजन्यत्वे उक्तसाध्यबाधादित्यर्थः।

पूर्वसर्गकालीनक्रियाया नष्टत्वेनाहेतुत्वादाह—प्रलयेति। ननु प्रलये क्रियाभ्युपगमे संयोगोऽप्यस्तु इत्याशयेनाह—इदमिति। न च प्रलयकालीनसंयोगस्य शरीरानवच्छिन्नोत्पत्तिकतया न ज्ञानजनकतेति वाच्यम्। मनोयोगस्य हि शरीरावच्छिन्नसत्ताकत्वेन हेतुता, न तु

---

1 पूर्वसहकारिशरीरविरहेग-क 2 साधारणधारस्य—ग
3 नार्थपत्तिवाच्यत्वम्—ग 4 बलेनैव—ग

कालोऽप्रसिद्ध एव। क्रियात्वस्यैव हेतुत्वे व्यर्थविशेषणत्वं च। किं चैवं प्रयत्नानाधारकालानन्तरकालानाधारत्वम्, अर्थात् तत्सिद्धौ मानान्तरात् ईश्वरासिद्धावर्थान्तरत्वमिति।

अत्रोच्यते। अदृष्टाद्वारकोपादानगोचरजन्तकृत्यजन्यानि समवेतानि जन्यानि,

---

प्रकाशः

विरहेणाजननात्। क्रियात्वस्येति। अत्रापि ईश्वरवादिनामित्यनुषङ्गनीयम्। तथा च तत्प्रयत्नमादाय क्रियामात्रे साध्यसत्त्वात् व्यर्थविशेषणत्वमित्यर्थः। किं चैवमिति। अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादित्यर्थः। [1]अर्थादिति। अनुमानान्तरादित्यर्थः[1]। तदनुकूलतया [2]तदुपन्यासे अप्राप्तकालत्वादिति ध्येयम्।

अदृष्टाद्वारकेति। स्मत्रोपादानपदं स्वोपादानपरम्। तथा च स्वोपादानगोचरजन्य-

---

तर्कचूडामणिः

तदवच्छिन्नाद्यसत्ताकत्वेन, गौरवादिति भावः। ननु गुरुमते तृणादिस्पन्दे व्यभिचारवारकं मनः पदमित्यत आह—अत्रेति। दत्तेऽपि मनः पदे गुरुमते नोदनजन्यमनः क्रियाय व्यभिचारापत्त्या न्यायनयेनायं हेतुर्वाच्यः, तत्र च तदन्वयमिति भावः। उपनीत[3]भानाङ्गीकारेणेदमित्याह—अनुमिनेरिति। पक्षधर्मतापरत्वेऽर्थान्तरानवकाशादाह—अनुमानेति। ननूक्तमनः क्रिया [4]यत्नजन्या उक्तसाध्यवत्त्वादिति परंपरयापि प्रकृतार्थसंबन्धेनार्थान्तरतेत्यत आह—तदिति। एतच्चोपलक्षणम्। मनसोऽतीन्द्रियत्वेन तद्गोचरयत्नाभावे साध्याप्रसिद्धिश्चेत्यपि बोध्यम्।

---

1 अर्थादिति-क 2 तूपन्यासेख-ग

3 भानानङ्गीकारमतेनेदं-ग 4 उक्तयत्न—ग

प्रकाशः

कृतिजन्याः घटादयः प्रसिद्धाः [1]तदन्यत्वे सति जन्यत्वं पक्षतावच्छेदकम् । एतेन यद्युपादान पदं यत्किंचिदुपादानपरं तदा अदृष्टाद्वारकरूपाद्युपादानमृदङ्गादिगोचरास्मदादिकृतिजन्यानां [2]शब्दादीनां पक्षता न स्यात् । [3]क्षित्याद्युपादानपरत्वेऽप्रसिद्धिरित्यपास्तम् ।

नन्वेवमदृष्टाद्वारकेति व्यर्थम् । अदृष्टद्वारककृतिमादाय ष्टकृते दोषासंस्पर्शादिति चेत्—अत्र वदन्ति । कास्यादावौषधलेपादिक्षनकयावद्गोचरास्मदादि कृत्या अदृष्टद्वारा यच्चलनं जन्यते [4]तस्येश्वरकर्तृकस्यासंग्रहः स्यादिति तद्विशेषणमिति । तन्न । [5]औषधलेप-चनककृतेः अदृष्टजनकत्वे मानाभावात् । औषधसंयोगद्वारैव तस्याश्चलनजनकत्वसंभवात् । न च तत्संयोगध्वंसानन्तरमपि चलनोत्पत्तेर्न तद्द्वारत्वमिति वाच्यम् । असिद्धेः तथा सति संयोगध्वंसस्यैव जनकत्वापत्तेश्च । न हि [6]संयोगत द्ध्वंस समययोश्चलनोत्पत्तौ [7]प्रमाणमस्ति । विषचलनादौ मन्त्रपाठादिसाध्ये यद्यप्यदृष्टद्वारत्वं संभवति कृतेः, तथापि न तदपादानविषादि-गोचरत्वत् । किं तु [8]कर्तृत्वादिगोचरत्वमेवेति तदर्थमपि नैतद्विशेषणमिति ।

तर्कचूडामणिः

एवमिति । स्वोपादानपरत्व इत्यर्थः । **उपाध्यायमतमाह — अत्रेति** । तदेति । औषधे जलेन क्षालिते चलनासिद्धेरिति भावः । चलनाभ्युपगमे बाधकमाय— **तथा सतीति** । **ध्वंसस्यैवेति** । प्रतियोगितद्ध्वंसयोरेकत्राहेतुत्वादिति भावः । ध्वंस-स्यानन्ततया सदा चलनापत्तिदोषात् समयस्येत्युक्तम् । न चेष्टापत्तिः । औषधसंयोगदशायां तदनुभवादिति भावः । प्रथमहेतुमुपपादयति— **न हीति** । ननु विषचलनादिसंग्रहाय तद्विशेषणमस्त्वित्यत आह— **विषेति** ।

---

1 तदन्यत्वं–क
2 शब्दानां–क
3 क्षित्युपादान–क
4 तस्य चेश्वरमाशंकतुकस्य–ख ग
5 'तन्न मानाभावात्' इति ग्रन्थस्तुटितः–क
6 संयोगध्वस न्यसमये–क
7 मानामस्तीति–ख ग
8 कण्ठतालवादिगोचर–ग

प्रकाशः

अन्ये तु विष्णुप्रतियोगिकस्वात्माभेदचिन्तनजनककृतिजन्यस्य स्वर्गस्य परमेश्वरकर्तृकस्यासंग्रहः स्यादिति अदृष्टाद्वारकेति विशेषणम्। तस्यस्वोपादानगोचरजन्यकृजन्यत्वात्। नचैवं तज्जनकादृष्टस्य इश्वरकर्तृकस्यासंग्रहः स्यात्। न ह्यदृष्टजननेऽन्यदृष्टं व्यापारः कृतेरिति वाच्यम्। अदृष्टाद्वारकपदस्यादृष्ट[1]प्राघभावव्याप्यप्रागभावप्रतियोगित्वपरत्वादित्याहुः।

तदपि न। [2]अदृष्टजनककृतिजन्यगङ्गास्पर्शादेरस्मदादिकर्तृकस्यपक्षान्तर्भूतत्वापत्तेः। न चेष्टापत्तिः, अंशतःसिद्धसाधनप्रसङ्गात्। न चोद्देष्यप्रतीतेरर्द्धेन तथा, पक्षतावच्छेदकनानात्व एव तस्य दोषत्वादिति वाच्यम्। एवं सति समवेतजन्यमात्रस्यैव पक्षतापत्तौ घटादिवारकविशेषणानुपपत्तेः। तथा च प्राचीनमतेनेदम्। न चैवं गङ्गास्पर्शस्यैवादृष्टजनकत्वं, न तु तज्जनककृतेरिति वाच्यम्। [3]एवमभेदचिन्तनस्यैव स्वर्गादिजनकत्वं न तु तज्जनककृतेरिति [4]तुल्यम्।

अत्राहुः। कालीशरीरे यत् [5]गौररुपमुत्पन्नं तत् कालीशरीरगोचरतपश्चरणादिकृत्य

तर्कचूडामणिः

अदृष्टप्रागभावेति। नन्वेवं प्रतियोग्यप्रसिद्धिः, कालिकव्याप्तेरेव विवक्षिततया जन्यकृतिमात्रस्य यत्किंचिददृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वात्। न चादृष्टपदं स्वजनकादृष्टपरम्। एवं ह्यभेदचिन्तनजन्यादृष्टस्यासंग्रहापत्तिः। चिन्तनानुकूलकृतेस्तज्जनकादृष्टोत्तरकालीनतयातादृशप्रागभामप्रतियोगित्वाभावादिति चेत् — न। अदृष्टाजनकत्वे उक्तस्य तात्पर्यात्।

अत एव आह — **अदृष्टजनकेति**। ननु तर्हि तथैव कुतो न कृतमित्यत आह — **तथा चेति**। तुल्यमित्यापातनः। वस्तुतो विधिनाप्रकृतिप्रत्ययार्थयोरुभयोरपि विनिगमकाभावात् इष्टहेतुत्वं बोध्यत इत्युभयमपि हेतुः। तथा च गङ्गास्पर्शादेरसंग्रहएवेति भावः। अदृष्टजनकत्वोपादानं दत्ते विशेषणे न दोष इति ज्ञापनार्थम्।

---

1 अदृष्टारकत्वं—ख
2 अदृष्टजन्यकृति—ग
3 एव ह्यभेद—ग
4 तुल्यत्वात्—ग
5 गौरं—ख—ग

प्रकाशः

जन्यते। सा च कृतिरदृष्टद्वारिका तद्रूपोपादानकालीशरीरगोचरा चेति तद्रूपेऽव्याप्तिवारणाय [1]एतद्विशेषणमिति। न चैवमपि निदिध्यासनादेरसंग्रह इति वाच्यम्। तत्र तदुपादानगोचर [2]जन्यकृत्यनभ्युपगमात् : [3]अभ्युपगमे वा अस्मदादिकर्तृकत्वेनासंग्राह्यत्वात्। अदृष्टाद्वार-कतदुपादानगोचरकृतेरेव तत्कर्तृतानिर्वाहकत्वात्।

[4]न चादृष्टाद्वारकत्वमात्मगुणाद्वारकत्वमिति वाच्यम्। कृतिद्वारीभूतात्मगुण [5]एवाव्याप्तेरिति

तर्कचूडामणिः

न चैवमिति। स्वोपादानात्मगोचरतादृशकृतिजन्यत्वादिति भावः। जन्यात्म [6]विशेषगुणत्वात्तस्य पक्षत्वं वाच्यमिति भावः। अनभ्युपगमादिति। तत्र निदिध्यासनानु-कूलमनोयोगहेतुम[7]नोवहनास्यामेव यत्न इति भावः।

ननु श्रवणादि[8]विधिना निदिध्यासनस्य कर्तव्यतावगमेन यागादाविव तादृशयत्नजन्यत्वम अङ्गीकार्यम्। न ह्यस्मदाद्यकर्तृके अस्मदादिकर्तव्यत्वेन विधानं संभवति। न चास्मदादि-कृतिजन्यत्वमात्रेण विधिसंभवो मन्त्रजपादाविवेति वाच्यम्। मन्त्रजपादिविधावुच्चारण एव कर्तृत्वविधानात्। अन्यथा 'ऋचं जपेत्' इत्यनन्वयादित्यत आह—अभ्युपगम वेति। असंग्राह्यत्वात् पक्षत्वेनेति शेषः।

नन्वेवमपि निदिध्यासनकृतिजन्यस्वात्मसाक्षात्कारेऽव्याप्तिः। निदिध्यासनस्य प्रतिबन्ध कध्वंसद्वारा साक्षात्कारजनकत्वेन तत्कृतेरदृष्टाद्वारकत्वादिति चेत्—न। तस्यापि अस्मदादि-कर्तृकत्वेनापक्षत्वात्। उक्तकृतेरेव तत्कर्तृतानिर्वाहकत्वात्। लाघवेन तत्रादृष्टस्यैव द्वारतया अव्याप्त्यनवकाशाच्चेति भावः।

आत्मविशेषगुणमात्रस्यास्यदाद्यकर्तृकत्वं प्रतिबन्धकध्वंसस्य च निदिध्यासनाद्वारत्वमङ्गीकृत्य यत् जयदेवेन उक्तसाक्षात्कारेऽव्याप्तिसमाधानमुक्तं [9]तद्दूषयितुमाह—न त्विति। उक्तसाक्षा-कारश्च निदिध्यासनद्वारा कृतिजन्य इति नाव्याप्तिरिति भावः। आत्मगुण इति।

---

1 चैतत्—क
2 जन्यकृतेरेवानभ्युपगमात्—ख ग
3 तदभ्युप—ख
4 'न तु' इति चूडामणिसंमतः पाठः
5 एवाव्याप्तयापत्तेरिति—क
6 विशेषणत्वात्—क
7 मनोवहननाभ्यामेव—ग
8 विधानान्निदि—ग
9 तद्दूषयति—ग

प्रकाशः

एवं चैतन्मते अभेदचिन्तनजन्य'स्वर्गेऽव्याप्तिवा'रणायाप्येतद्विशेषणम्। तज्जनकादृष्टं तु अस्मदादिकर्तृकमेवेति संक्षेपः।

तर्कचूडामणिः

निदिध्यासन इत्यर्थः। तस्याप्यात्मगुणत्वेनास्मदाद्यकर्तृकत्वादिति भावः।

ननु कालीरूपमपि अस्मदादिकर्तृकमेव, स्वोपादानगोचरास्मदादिकृतिजन्यत्वात्। गौरवेणादृष्टद्वा'रकत्वस्याप्रयोजकत्वात्। घटभोक्तुरपि तदुपादानकृतिविरहादेव अकर्तृकत्वोपपत्तेरिति चेत्—एवमीश्वरसिद्धेरप्रत्यूहत्वेन एतादृशमते 'अदृष्टाद्वारकपदमहिम्नैवोपादानपदस्य स्वोपादानपरत्वलाभ इति न विशेषणवैयर्थ्यम्। येषां मते व्यवहारोपयुक्तं सकर्तृकत्वमत्र सिषाधयिषितं न तु प्रकृतोपयुक्तमात्रम्, तन्मते पृथगेव तत् उपादेयम्। अत एव वक्ष्यति—'घटभोक्ता तत्कर्ता न व्यवह्रियते' इति। एवं चाभेदचिन्तनजन्यस्वर्गादावुक्तसत्त्वेऽपि अस्मदादि'कर्तृकगत्वाव्यवहारात् अदृष्टाद्वारकत्वविशेषणं प्रामाणिकमिति तद्विलम्बात् न कालीरूपादौ कर्तृत्वमस्मदादेरिति तदसंग्रहोऽवश्यवाच्य इत्याशयेनाह—एवं चेति। अदृष्टद्वारकत्वादिघटितकृतेः कर्तृताप्रयोजकत्वमत इत्यर्थः। नन्वेवमपि तादृशस्वर्गजनकाद्रष्टेऽव्याप्तिरित्यत आह—तदिति।

नन्वदृष्टस्यातीन्द्रियतया कथमस्मदादेस्तत्कर्तृत्वम्। किं च गङ्गास्पर्शजनककृतेरपि यत्किंचिज्जनकादृष्टद्वारकतया तादृशस्पर्शस्यापि पक्षतापत्तिः। किं च तादृशकृतिजन्यकिंचिदन्यत्वं घटादावपि। तादृशयावत्त्वम् अङ्कुरे दुर्ग्रहम्। तावतां प्रतियोगिनामनुपस्थितेः। अनुगतस्वपदार्थाभावेन तद्घटितकृतिजन्यत्वस्याप्यनुगतस्याभावेन तेनापि रूपेण तेषामनुपस्थितेः।

अत एव तादृशजन्यत्वावच्छिन्नप्रतियोगिकसामान्यान्योन्यभावः पक्षतावच्छेदक इति प्रत्युक्तम्। घटादावनुगतस्य तादृशजन्यत्वस्याभावात्।

---

1 स्वर्गेऽप्यव्याप्ति–ग
2 वारणायैतत्–ख ग
3 द्वारकस्याप्र–क
4 अदृष्टद्वारकत्वपद–ग
5 कर्तृकत्वे व्यवहारात्–क

तर्कचूडामणिः

ननु तादृशकृति[1]जन्यानां यावन्तोऽन्योन्याभावा इह विवक्षिताः। न च तावतां तत्तत्प्रतियोगिताच्छेदकरूपेणानुपस्थितेर्न तावदभावग्रह इति वाच्यम्। प्रागभावप्रत्यक्षानुरोधेन सप्रकारकप्रतियोगिज्ञानस्यैव अभावार्थहेतुत्वेनातिप्रसक्तजन्यत्वेनोपस्थितानां तावताम भावग्रहाविरोधादिति चेत— न। तथापि फलीभूताभावज्ञानसमानप्रकारकत्वेन प्रतियोगिज्ञानस्य हेतुतया प्रकृते तावत्प्रतियोगितैकधर्माभावेन तत्तदभावानां तत्तदवच्छिन्नाभावत्वेनैव ग्राह्यतया तत्तदवच्छिन्न[2]तत्तदनुपस्थितौ तत्तदभावानुपस्थित्या पूर्वोपस्थितधर्मावच्छिन्न[2]घटादन्यन्यभावसमुदायस्य पक्षतावच्छेदकत्वे पूर्वानुपस्थितासदादिकर्तृत्वस्यापि पक्षत्वे अंशतः सिद्धसाधनमिति चेत्— न तावदाद्यः। उपादानप्रत्यक्षस्यैव कर्तृत्वप्रयोजकतया उपादेयप्रत्यक्षस्य प्रयोजकत्वात्। उपादेयघटादेरपि प्रवृत्तिपूर्वमप्रत्यक्षत्वाच्च। अत एव क्रियाया अतीन्द्रियत्वमतेऽप्यस्मदादेर्यागादिकर्तृत्वम्। न द्वितीयः। स्वजनकत्वस्याप्यदृष्टविशेषणत्वात्। न हि गङ्गास्पर्शजनकादृष्टं तदानीतनतदुपादानगोचरकृतेर्द्वारम्। न तृतीयः। तावदन्योन्याभाववत्त्वस्यैव पक्षतावच्छेदकत्वात् तावतां च तत्तद्धर्मणानुपस्थितावपि अतिप्रसक्तेनाप्युपादानगोचरजन्यकृतिजन्यत्वेनोपस्थितिसंभवात्।

वस्तुतस्तु अदृष्टाद्वारकोपादानगोचरकृतित्वावच्छिन्नजनकताप्रतियोगिभिन्नत्वं विवक्षितम्। अदृष्टाद्वारकं च जनकताविशेषणम्। गङ्गास्पर्शजनककृतौ च स्पर्शजनकता स्वर्गजनकता चेति जनकताद्वयम्। तत्राद्यअदृष्टाद्वारिकेति तत्स्पर्शे नातिव्याप्तिः। द्वितीया तु तद्द्वारिकैवेति स्वर्गादेः संग्रहः। शब्दो [शब्द] फूत्कारादेरन्योपादानगोचरजन्यकृतिजन्यत्वेऽपि नहि कृतित्वेन तज्जन्यत्वम्! तेन रूपेण कृतेः स्वविषयसमवेतकार्य एव[3]हेतुत्वात्।

न चैवं कृतिध्वंसेऽव्याप्तेरभावात् तद्द्वारकाग्रिमविवक्षानुपपत्तिः। उक्तविवक्षाविरहे तदिति तस्यापि कल्यान्तरत्वात्। तादृशविवक्षयापि शब्दफूत्कारादावव्याप्तिनिरासात् स्वविषयसमवेतकार्य एव त्रयाणां जनकत्वादिति। एतदभिसन्धायाह – संक्षेप इति।

---

1 जन्या यावन्तो–ग 2 घटादौ अन्योन्या–ग
3 हेतुत्वात्–ग

अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादनगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि

प्रकाशः

ध्वंसे गोत्वादौ चातिव्याप्तिवारणाय समवेतपद[1]जन्यपदे। तत्पक्षतायामंशतो बाधापत्तेरिति भावः[1]। [2]अत्राष्टाजनकेत्युक्ते बाधः, इश्वरकृतेरप्यदृष्टजनकत्वादिति तद्वारणाया तनेवार्थं नञ्यन्तरेणाह–अदृष्टेति। अत्र व्याप्तिश्च [3]कालिकी, न तु दैशिकी।[3] दैशिकत्वे अदृष्टस्य कुलालेऽपि संभावितत्वेन व्यभिचारसंदेहात् व्याप्त्यग्रहापत्तेः।

ननुपादानपदं यत्किंचिदुपादनापरं प्रकृतोपादानपरं वा। नाद्यः, शब्दा दिनाअंशतां सिद्धसाधनात्। न च ज्ञानेच्छयोर्न कारणत्वं, किंतु कृतिमात्रस्यैव, मिलितानां [4]तेषु स्वविषय[4]समवेतकार्यं प्रत्येव [5]जनकत्वादिति वाच्यम्। तथापि ज्ञानादिघटितं [6]प्रत्येकं साध्य[6]त्रयम्। [7]तथैवाग्रे ग्रन्थकृता [8]विभावनात्। तथा च कृतिमादाय अंशतः सिद्धसाधनतादवस्थ्यात्। नान्त्यः, अप्रसिद्धेरिति चेत्–मैवम्। उपादानगोचरत्वेन यस्य ज्ञानादेर्जनकत्वं [9]तादृशतज्जन्यत्वं साध्यम्। [10]तेन च रूपेण स्वविषयसमवेतकार्यं प्रत्येव[11] तस्य जनकत्व मिति नांशतः सिद्धसाधनम्।

तर्कचूडामणिः

ननु घटव्यजनककुलालज्ञानादेः तज्जनकादृष्टप्रागभावसमानाधिकरणत्वेन दैशिकव्याप्तौ साध्यविकलता दृष्टान्तस्येत्यत आह–अत्रेति। [12]कुलालज्ञानादीनां घटजनकादृष्टोत्तरकालतया तत्प्रगभावो न व्याप्य इति भावः।

नन्वेवमपि साध्यवैकल्यम्, कुलालज्ञानादीनामपि प्रागभावस्य यत्किंचिददृष्टप्रागभावं प्रति

---

1 जन्यपदे।–क ख
2 अत्राप्यदृष्टा-क
3 कालिकी–ख.ग.
4 स्वविषय–क
5 जनकत्वनियमादिति–क
6 साध्य–क
7 तथाग्रे–क
8 अभिधानात्-क
9 तादृशजन्यत्वं
10 तेन–क
11 जनकत्व-क
12 समवेतकालज्ञानादीनां–ग

प्रकाशः

[1]नन्वेवमप्यदृष्टप्रागभावेत्यादिविशेषणं व्यर्थम् । जन्मान्तरीयज्ञानादीनां तेन रूपेणा-जनकत्वातया सिद्धसाधनानवकाशादिति चेत्-न । कालीरूपे अभेदचिन्तनजन्यस्वर्गे चांशतः सिद्धसाधनवारकत्वादिति ।

[2]अत्राप्यदृष्टपदं [3]स्वजनकादृष्टपरम् । न चैवं क्वचित् पक्षः क्वचित् दृष्टान्त इति पूर्वोक्ताननुगमस्तदवस्थ एवेति वाच्यम् । सामान्यव्याप्तिग्रहे तस्यादोषत्वात् तस्या एव च प्रकृतानुमानाङ्गत्वेनाभिमतत्वात्[4] । द्वितीयसाध्ये [5]स्वपदोपादानेन तथैव ग्रन्थकृत्तात्पर्योन्नयनात् । अन्यथा स्वपदानुपादानेऽपि जनकत्वगर्भं साध्यमननुगतमेव स्यादिति ।

तर्कचूडामणिः

कालतोऽपि व्याप्यत्वादित्यत आह-अत्रेति । अभिमतत्वे हेतुमाह-द्वितीयेति । अत्र ब्रूमः । यत्तद्वयां सामान्यव्याप्तिर्नानुमानाङ्गमिति ग्रन्थकृता अर्थापत्तौ एतत्पूर्वपक्षे चोक्तत्वात् नात्र तस्यास्तदभिप्रेतत्वम्, विरोधात् । न च स्वजनकत्वाप्रवेशो साध्यवैकल्यम् । अदृष्टेत्यादिविशेषणेन [6]अदृष्टाद्वारकताया विवक्षितत्वात् । मृत्पिण्डगोचरज्ञानादीनां च अदृष्टाद्वार-कत्वेनोक्तदोषाभावात् । न चेश्वरकृतिजन्यत्वात् तज्जन्यक्षिजनकत्वाच्चादृष्टस्य पक्षे बाध इति वाच्यम् । तदेव ह्यदृष्टद्वारकं यत् [7]तद्व्यवधाने न जनयति । न चेश्वरकृतिस्तथा, तस्याः स्वत एव तज्जनकत्वात् । अन्यथा पक्षे जन्-पदवैयर्थ्यापत्तेः । न च स्वपदगर्भद्वितीया साध्यानुपपत्तिः । तस्य क्षितिमात्रपक्षकानुमानाभिप्रायतया स्वपदस्य तत्र क्षितिपरत्वात् ।

अत एव कालीरूपे[8]नांशतः सिद्धसाधनम् । तत्र साध्ये [9]तस्यापक्षत्वात् । न च यत्किंचित्क्षिति जनकादृष्टोत्तरवमेतक्षितिजनकादृष्टजनकपुरोडाशादिज्ञानानामपीति दोषताद्वस्थम् । यावत्क्षिति-जनकाष्टोत्तरत्वं न कपालादिज्ञास्येति साध्यवैकल्यमिति वाच्यम् । इदानींतनक्षितेरेव पक्षतया तस्य

---

1 नन्वेवमदृष्ट-क
2 अत्रादृद्-क
3 स्वविषयकादृष्टपरम्-ख
4 अनुमतत्वात्-क
5 स्वोपादानपदेन-ख
6 अदृष्टद्वारक-ग
7 तदुपाधानेन-ग
8 णांशतः-ग
9 तस्यापक्षदोषत्वात्-ग

स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमच्ज-
न्यानि वा अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयिभूतोपादानानि वा

प्रकाशः

अत्र यद्यपि प्रत्यक्षेत्येव वक्तुमुचितम्। घट इति वाच्ये नाघट इत्यप्रयोगात्। तथापि प्रत्यक्षत्वस्येन्द्रियजन्यत्वपरत्वे बाधः। साक्षात्त्वजातिपरत्वे परं प्रत्य प्रसिद्धिरिति [1]उभयप्रसिद्धापरोक्षेत्युक्तम्। तदर्थस्तु लिङ्गादिकरणकज्ञानान्यज्ञानत्वमुभयसाधारणमेवेतिध्येयम्।

स्वजनकेत्यादि। [2]अत्र स्वजनके[2]यादिविशेषणं कालीरूपादावंशतः सिद्धसाधनवारणाय। [3]शब्दे च पूर्वोक्तप्रकारेण अंशतः सिद्धसाधनवारणम्। **अपरोक्षेति।** तादृशज्ञानविषयोपादन[4]समवेतानीत्यर्थः। च्व्यर्थलउर्थयोरविवक्षितत्वादत्रेति ध्येयम्।

ननु कालीरू[5]पेऽभेदचिन्तनजन्यस्वर्गे चांशतः सिद्धसाधनमिति चेत् – न। स्वजन-

---

तर्कचूडामणिः

एव स्वशब्दार्थत्वात्। न च प्राचीनसर्गवर्तिघटादौ व्यभिचारः। [6]इदानींतनत्वस्य कार्यविशेषणत्वादिति।

एवकारार्थेहेतु माह **घट इति। परिमिति।** तेन गुणगतजातेरनङ्गीकारादिति भावः।

शब्देचेति। उपादानगोचरत्वेन जनकताया विवक्षितत्वादिति भावः। ननु तादृशोपादानमृदङ्गादिमत्त्वं जनकतासंबन्धेन शब्दादावपीत्यंशतः सिद्धसाधनमित्यत आह – **तदृशेति।** ननु कुलालादि[7]ज्ञानादीनां अयौगपद्ये। दृष्टान्ते वर्तमानार्थलऽर्थाभावात् साध्यवैकल्यम्। अभूतभूतार्थस्य चत्रेः नित्यज्ञानादिविषयोपादानसमवेते पक्षे बाधश्चेत्यत–आह **अत्रेति।** [8]अत्रादृष्टोत्तरत्वमदृष्टाधिकरणक्षणोत्तरवर्तित्वमात्रम्, न तु तादृशक्षणोत्पत्तिकत्वामिति बधः।

---

1 उभयप्रसिद्धयेऽपरोक्षे–ख ग
2 स्वजनक—क
3 शब्दे-ख पूर्वरूपेणांश–च
4 समयःवेतस्थेमि—ग समवेतानीयीथात्–ग
5 काली—क
6 इदानींत्वस्य–क
7 ज्ञानानां—ग
8 अदृष्टो-

समवेतत्वे सति प्रागभावप्रतियोगित्वात् । यदेवं तदेवं यथा घटः , तथा चैतानि , तस्मात्तथा । उक्तपक्षे कस्यचित् अनन्तर्भावेऽपि तदादाय तथैव निरुक्तस्य पक्षत्वनिर्देशे समूहालम्बनरूपैवानुमितिरुत्पद्यते । न च जन्यकृत्यजन्यत्वं तावदननुगतेष्वेकरूपाभावेन ग्रहीतुमशक्यमिति वाच्यम् । जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्य-लक्षणया तावताप्युपस्थितेः ।

प्रकाशः

कादृष्टोत्तरापरोक्षज्ञानादिविषयोपादानसमवेतत्वस्य विवक्षितत्वात् । [1]न चादृष्टजननोत्तर-कालीनतादृशज्ञानादिविषयत्वस्यापि संभवात् पुनः सिद्धसाधनमेवेति वाच्यम् । ज्ञानादेः स्वजनकत्वेनापि [2]विशेषणीयत्वात् । उपाधिभेदाच्च न पूर्वसाध्यावैशिष्टलम् ।

समवेतत्व इति । ध्वंसे व्यभिचारवारणाय सत्यन्तम् । गोत्वादौ व्यभिचारवारणाय प्रागभावेत्यादि । पूर्वं निदिध्यासनादेरभेदचिन्तनजन्यादृष्टस्य च [3]स्वोपादानगोचरजन्यकृति-जन्यत्वानभ्युपगमात् अभ्युपगमे वा अस्मदादि[4]कर्तृकत्वमेवेति न कोऽपि दोष इत्युक्तम् [5]। संप्रति[5] अस्तु तादृशजन्यकृतिजन्यत्वेन पक्षानन्तर्भूतत्वं, मास्त्वस्मदादिकर्तृकत्वम् , तेषां जन्यात्मविशेषगुणानामीश्वरमात्रकर्तृकत्वस्य पूर्वमुक्तत्वात् । तथापि तमादाय पक्षत्वनिर्देशान्न

तर्कचूडामणिः

ध्वंस इति । ननु परमतेध्वंसोऽधिकरणात्मा, तत्र च न व्यभिचारः । नित्याधि-करणे विशेष्याभावात् , अनित्ये च साध्यसत्त्वादिति चेत् —न । स्वमताभिप्रायेणोक्तत्वात । **सत्यन्तमिति ।** ननु समवायत्वं नित्यसंबन्धत्वम्, तथा चान्यतरासिद्धिः । गुरुमते तस्यानित्यत्वात् । प्रसाध्याङ्गकस्याप्युपादाने [6]तावत्त्वस्यात्यागानुपपत्तेरिति चेत्--न । नीलो घट इति बुद्धिविषयसंबन्धत्वस्य [7]समवायस्योभय[7]सिद्धत्वात् । **तथापीति ।** प्रौढिमात्रम् ।

---

1 न चादृष्टजनकोत्तर—ख—ग
2 विवक्षणीयत्वात्—ख·ग
3 स्वोपादानागोचर—ख
4 कर्तृकमेवेति—क ग
5 संप्रति स्वर्गजनकादृष्टस्य—ग
6 सततावत्वस्य—क
7 उभय—ग

न च जन्यत्वविशेषणव्यावर्त्याप्रसिद्धिः, प्रमेयो घट इति वदव्यावर्तकत्वेऽपि तदुपरक्तबुद्धेरुद्देश्यत्वेन तस्योपरञ्जकत्वात् । उक्तान्यतमत्वमेव सकर्तृकत्वम् । अत एव घटभोक्ता न घटकर्तेति व्यपह्रियते । एवं च शब्दफूत्कारादीनां पक्षतैव । ज्ञानेच्छादीनामपि पक्षत्वान्न संदिग्धानैकान्तिकता । उपादानस्य सिद्धत्वेऽत्युपादेयस्यासिद्धत्वात्तद्वत्त्वेन तत्रापि चिकीर्षा ।

प्रकाश;

कोऽपि दोष इति अभिप्रेत्याह—उक्तेति ।

न च जन्यत्वेति । दोषायेति शेषः । तदुपरक्तेति । उभयसिद्ध[1]प्रयोजनकत्वतन्त्रम्, न तु प्रयोजनस्योभयसिद्धिरिति भावः । ननु [2]सकर्तृकत्वे विवादात् साध्यान्तरे क्रियमाणे अर्थान्तरमित्यत आह–उक्तेति । ननु कृतिजन्यत्वमेव सकर्तृकत्वम्, न त्वदृष्टप्राभावादिघटितमित्यत आह–अत एवेति । एव हि भोजकादृष्टद्वारा भोक्तृकृतिजन्ये [3]घटे भोक्तृत्ववत् कर्तृत्वव्यवहारापत्तिरित्यर्थः ।

तर्कचूडामणिः

वस्तुतस्तस्य पक्षबहिर्भाव एव । अन्यथा तत्रांशतः सिद्धसाधनापत्तेः । प्रौढिसूचनाग वअनन्तर्भावेऽपीत्युक्तम् ।

व्यावर्त्याप्रसिद्धेः निराकर्तुमशक्यत्वादाह—दोषायेति । नन्वेवमपि मीमांसकस्य तदुपरक्तबुद्धिः नैयायिकस्य आश्रयासिद्धिनिरासः प्रयोजनमिति उभयसिद्धप्रयोजनस्याभावाद्दोषतादवस्थ्यमित्यत आह–उभयेति । किं विशिष्टस्य गौरवात् सकर्तृकत्वव्यवहारानङ्गत्वम् उतानुकूलतर्काभावात् अव्यापकत्वम् । अन्त्ये तर्कस्य वक्ष्यमाणत्वात् आद्य आह अत इति : नुन कुलालस्यापि घटभोक्तृत्वसंभवेन भोक्तुः तद्व्यवहारनिषेधानुपपत्तिः । कुलालादन्यस्य च तदनुकूलकृतिविरहादेव न कर्तृत्वमित्यत आह—एवमिति । भोक्त्रिति । यावद्भोक्त्रित्यर्थः ।

---

1 प्रयोजनत्वं–क 2 सकर्तृकेऽपि विवादात्–ख

3 घटे भोक्तृकत्वव्यव–ख

यद्वा पक्षे हेतौ च समवेतत्वं न विशेषणम् , तेन ध्वंसोऽपि पक्षः । साध्ये चोपादानपदं कारणमात्रपरम्, [1]अनुपादेयमेव वा । जन्येच्छाकृत्य-जन्यत्वं च पक्षे विवक्षितम्, तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपीच्छा-जन्यत्वाभावात् पक्षत्वम् ।

प्रकाशः

ननु यद्युक्तान्यतमत्वमेव सकर्तृकत्वं तदा ध्वंसः सकर्तृको न स्यात् । तथा चानुमानात् [2]जगन्निर्माणकर्तृसिद्धिरित्यपि न स्यादित्यत आह —यद्वेति ।

ननु पक्षेऽप्युपादान[3]पदं [3]यथाश्रुतमेव वा स्वोपादानपरं वा । आद्ये [4]शब्दादेरसंग्रहापत्तिः । अन्ये कृतिध्वंससंग्राहार्थं जन्येच्छा[5]कृत्यजन्यत्वविशेषणमनर्थकम् । [6]तस्य स्वोपादानाभावेन स्वोपादानगोचरजन्यकृतिजन्यान्यत्वेन संगृहीतत्वात् । न चोपादानमधिकरणं विवक्षितम्, मृदङ्गादेश्च न [7]शब्दाधिकरणत्वं, किं त्वधिकरणतावच्छेदकत्वमिति वाच्यम् । अधिकरणत्वं, समवायेन विवाक्षिता संबन्धमात्रेण वा ? नाद्यः, उक्तदोषात् । नान्त्यः। अवच्छेद्यावच्छेदकभावसंबन्धेन मृदङ्गादेरपि शब्दाधिकरणत्वात् । अत एव शरीरस्यापि भोगाधिकरणत्वम् । अत एव च मृदङ्गादौ शब्द इति प्रतीतिरिति चेत् —

तर्कचूडामणि

इष्टापत्तिमाशङ्क्याह—तथा चेति ।

जयदेवमतं निरस्यति—न चेति । उक्तदोषादिति । विशेषणनैयर्थ्यादित्यर्थः । ननु शरीरे सुखमिति प्रत्ययात् अस्तु शरीरस्य तदधिकरणत्वम् न चेह तथेत्यत आह—अत इति ।

---

1 'उपादेयमेव' इति पाठान्तरम्
2 जगन्निमातृकर्तृ—क
3 पदं कारणपरम्—ख ग
4 आद्ये—ख ग
5 कृत्यजन्यत्व दिशेषणमसमर्थकम्—स
6 तस्याः—ख
7 शब्दाधिकरणत्वावच्छेदकत्व—ख

प्रकाशः

[1]मैवम् । पक्षेऽप्युपादानपरं कारणमात्रपरम् . [2]अनुपादेयमेव वा । जन्येच्छेत्यत्र जन्यज्ञानेच्छेत्यर्थः । अन्यथा प्रतियोगितया [3]इच्छाजन्ये विरोधिगुणत्वेन जन्यकृतिजनिते इच्छाध्वंसे पक्षतावच्छेदकाव्याप्त्यापत्तेः[4] । एवं च शब्दादीनां [5]संग्रह एव । मिलितानां ज्ञानादीनां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वात् । अत एव तत्रास्मदादिना नांशतः सिद्धसाधनम् ।

न चैवमुक्तस्य साध्यस्य ध्वंसे बाध एव स्यात् , [6]तस्यासमवेतत्वात्, ज्ञानादीनां च स्वविषयसमवेतकार्यं प्रत्येव जनकत्वादिति वाच्यम । अनित्यानामेव तेषां [7]तथात्वावधारणात् । ध्वंसे च नित्यानामेव तेषां[8] जन्यत्वस्य [9]साध्यतात्पर्यावसानात् ।

न चैवं [10]कुत्रापि महाक्षितिध्वंसादौ नास्मदादीनां कर्तृत्वं स्यादिति वाच्यम् । [11]तन्मत इष्टापत्तेः । अत एव ध्वंसमात्रस्यैवेश्वरकर्तृकत्वात् ध्वंसोऽपि पक्ष इत्येव ग्रन्थकृतोक्तं

तर्कचडामणिः

शब्दसंग्राहायाह — **जन्येति** । **मिलितानामिति** । [12]अदृष्टाद्वारकाणामिति शेषः । तत्र—शब्दादौ ।

न चैवमिति । [13]तथा चाग्रिमग्रन्थविरोध इति भावः । **एतदिति** । ध्वंससाधारण-पक्षत्वमत इत्यर्थः ।

ननु मिलितानां स्वविषयसमवेतकार्य एव जनकत्वमित्ययुक्तम् । न हि तादृशकार्यत्वं-मिलितजन्यतावच्छेदकम्, ज्ञानादीनां ज्ञानत्वादिना हेतुत्वेन मिलितत्वेनाजनकत्वात् । अत एव ग्रन्थकारोऽपि तथा विभावयिष्यति । नापि कृतित्वादिना निरूपितकारणताप्रतियोगिकार्य

---

1 न–ख
2 अनुपदमेवाजन्येच्छेत्यत्र–ख
3 इच्छया विरोधिगुणत्वेन कृत्या जनिते–क
4 काव्याप्तः–क
5 च संग्रहः मिलितानां–क
6 तस्य समवेतत्वात्–क
7 तथावधारणात्–ख
8 जनकत्वस्य–क
9 साध्ये तात्पर्यावसायात्–क
10 महा–ख
11 एतन्मत इति व्याख्यानपाठः–ख
12 अदृष्टद्वारारणमिति–ग
13 तथाग्रिम–क

तर्कचूडामणिः

तावच्छेदकम् । [1]मृदङ्गादिगोचराम्मदादिकृतेः शब्दाहेतुत्वापत्तेः । यदपि [2]चानित्यानामेवेति । [3]तदप्ययुक्तम् लाघवेन ज्ञानादिमात्रे तथावधारणात् व्यावर्त्याप्रसिद्ध्या अनित्यत्वान्तर्भावेणनव्याप्तिग्रहासंभवाच्च ध्वंसोऽपीत्युक्तिरपि न ध्वसमात्रपक्षत्वं गमयति । पक्षे समवेतत्वं । विशेषणमित्युक्त्या विशेषणान्तरस्य पक्षतावच्छेदककोटिप्रवेशाभ्युपगमप्रतीत्या अस्मदादिकृत्यजन्य ध्वंसस्यैव पक्षत्वलाभात् । न हि क्षितिरेव पक्ष इत्युक्तिमात्रात सकलक्षितिपक्षकत्वम् , महासमुद्रन्यायेन महाक्षितेरस्मदादिकर्तृकत्वेन तत्रांशतः सिद्धसाधनतापत्तेरिति चेत्—न ।

पक्ष उपादानपदं यथाश्रुतमेव , न त्वनुपादेयम्, कारणमात्रपरं वा । शब्दादेरसंग्रहापत्तेः । अत एवोक्तम् 'साध्ये चोपादानपदं [4]कारणमात्रपर'मिति । अन्यथा पक्षसाध्ययोरित्येव ब्रूयात् । न चैवमपि शब्दासंग्रहः, उपादानगोचरकृतित्वावच्छिन्नकारणताप्रतियोगिभिन्नत्वस्य तदर्थत्वेनोक्तत्वात् उक्तकृतित्वस्य हेतुतावच्छेदक (त्व) लाभायैव जन्येच्छाकृत्यजन्यत्वं विवक्षितमित्युक्तमिति नाग्रिमग्रन्थविरोधः । यथाश्रुते विरोधिगुणत्वेनेच्छाजन्ये तद्ध्वंसेऽव्याप्तेः ।

साध्ये च कृतित्वादिगर्भधर्मावच्छिन्नजनकताकत्वं विवक्षितमीति न शब्दादावंशतः सिद्धसाधनम् । समवेतकार्यत्वावच्छेदेनोपादानगोचरकृतित्वस्य हेतुतावच्छेदकत्वेन मृदङ्गादिकृतेस्तेन रूपेणाहेतुत्वात् न चैवं ध्वंसे बाधः । तत्रापि कारणकृतित्वेन कृतेर्हेतुतया कृतित्वगर्भधर्मावच्छिन्नहेतुताप्रतियोगित्वसत्त्वादिति ।

नन्वेवं , घटादिध्वंसेऽस्मदादिकृतिमादायांशतः सिद्धसाधनम् , तत्रापि मुद्गरादिगोचरकृतित्वेन तस्याः कारणत्वेन[5] उक्तसाध्यसत्त्वादेनमृदङ्गादिगोचरकृतित्वावच्छिन्नजनकताकास्मदादिकृतिमादाय शब्दादावपि दोषतादवस्थ्यम् । मृदङ्गादिगोचराणामस्मदादिज्ञानादीनामन्वयव्यतिरेकाभ्यां कार्यविशेषे हेतुत्वेन, तत्त्यागायोगात् इत्यपरितोषात् क्षितिरेवेति पक्षान्तरमुक्तम् । एवं कारेण ध्वंसशब्दादेः पक्षत्वं निराकुर्वतो ग्रन्थकर्तुः एवं तात्पर्योन्नयनात् ।

---

1 मृदङ्गगोचर–ग
2 च नित्यानामेव–ग
3 तथा वारणात्–ग
4 कारणपरमिति–ग
5 उक्ततया साध्य–ग

क्षितिरेव वा पक्षः । न चाङ्कुरे संदिग्धानैकान्तिकत्वम् । पक्षपक्षसमनैरपेक्ष्येण घटादौ निश्चितव्याप्तेर्लिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात् । न त्वनुमित्योरन्योन्यापेक्षत्वं, येनान्योन्याश्रयः स्यात् । प्रतिज्ञाया अविषयत्वात्तत्र पक्षसमव्यपदेशः । न चाङ्कुरस्य पक्षत्वेनानिर्देशात्तत्र न पक्षधर्मताज्ञानमिति वाच्यम् । सिषाधयिषाविरहसहकृतसाधक-

---

प्रकाश.

न तु ध्वंसविशेष इति दिक् ।

अत्र च मते कृतिमात्रघटितं न [1]साध्यमिति शब्दे नांशतः सिद्धसाधनम् । तृतीय साध्ये उपादानपदं कारणपरं बोध्यम् न तु देयमेवेति ।

पक्ष इति । प्रतिज्ञाविषय इत्यर्थः । **तयोरिति** । सप्तम्यन्तस्य पक्षपक्ष[2]समयोरित्यर्थः ।

तर्कचूडामणि.

न च तत्राप्यस्मदादिकर्तृकमहाक्षितेरपि पक्षत्वेनअंशतः सिद्धसाधनमिति वाच्यम् : [3]नविनमताभिप्रायेण तस्य कल्पस्योत्थानेन पक्षतावच्छेदकैक्ये तस्यादोषत्वात् । तथा च क्षिति । क्षित्युपादानगोचरकृतिजन्या क्षितित्वात् अस्मदादिकर्तृकमहाक्षितिवत इत्यपि योज्यमितिदिक् । एतदभिसन्धायोक्तं **दिगिति** ।

ननु ज्ञानादिगर्भं सायत्रध्यमिति वक्ष्यमाणतया कृतिघटितसाध्ये शब्दे अंशतः सिद्ध. साधनम् । तत्र मिलितानामिति [4]न्यायानवतारादित्यत आह **अत्रेति** । ननु तृतीयसाध्ये तादृशपुरोडाशादिज्ञानेनार्थान्तरम् , तत्रोपादानकारणपदयोरनुपादेयत्वोक्त्या केनापि संबन्धेनाङ्कुरादेस्तद्वत्त्वादित्यत आह— **तृतीयति**

नन्वङ्कुरादेरपि संशयविषयत्वात् सिद्धयभावसत्त्वाच्च पक्षत्वे नैव काप्यनुपपत्तिरित्यत आह—[5]**प्रतिज्ञेति** ।

---

1 साध्यमतो नांशत.—ख ग
2 पक्ष—ख
3 नध्यमता ग
4 न्यायावतारात्—ग
5 प्रतिज्ञति—क

[1]प्रमाणविरहवति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात् । तच्च क्षितौ पञ्चावयवेन अङ्कुरे स्वत एवेति न कश्चिद्विशेषः । यदि च क्षितौ हेतुनिश्चयदशायां हेतुमत्तयाङ्कुरस्य न निश्चयस्तदा क्व संदिग्धानैकान्तिकत्वम् ।

अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयात् हेतौ व्याप्तिग्रह एव नोत्पद्यते, उत्पन्नोऽपि वा बाध्येतेति चेत्-तर्हि महानसेऽपि धूमे व्याप्तिग्रहो न स्यात्, भूतोऽपि वा बाध्येत । संदिग्धवह्निकपर्वतपर्वतधूमवतामेकधर्माभावेनायोग्यत्वात्[2] ।

तस्मात् साध्यसंदेहवति हेतुनिश्चयो न दोषः, किं तु गुण एव । अन्यथा अनुमानमात्रमुच्छिद्येत ।

पक्षादन्यत्र तद् दूषणमिति यदुक्तम्, तत्र पक्षान्यत्वंसिषाधयिषितसाध्यान्यत्वं यदि, तदा अनपेक्षितानुमितिर्न स्यात् । अथ संदिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं [3]वा विवक्षितम्, तदा अङ्कुरेऽपि तन्नास्ति । अथ प्रतिज्ञाविषयान्यत्वम्, तदा स्वार्थानुमित्युच्छेदः

नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात् सर्वविषयज्ञानसिद्धिः ।

प्रकाशः

तस्मादिति । [4]यथा च व्यभिचारज्ञानस्य [5]दूषकत्वं तथोक्तं साधारणानैकान्तिकलक्षणव्याख्यानावसरे ।

[6]ननु सर्वत्र घटादेः पक्षानन्तर्भूतत्वात् तदुपादानगोचरत्वेन [7]ईश्वरज्ञानस्यासिद्धि

तर्कचूडामणिः

[8]ननु उपाध्याद्याहितोऽपि तत्संशयो न प्रतिबन्धकः स्यादित्यत आह-यथा चेति । सर्वत्रेति । क्षितिमात्रपक्षके अङ्कुरादिसाधारणपक्षत्वे चेत्यर्थः । एतेन क्षितिमात्र-

---

1 प्रमाणाभावत्रतीति पाठान्तरम्
2 अपक्षत्वादिति पाठान्तरम्
3 'वा कालिच्मु पुस्तका ।
4 तथा-च ग
5 दूषणत्व-क ख
6 ननु-ख
7 ईश्वर-ख
8 प्रतिज्ञेति-क

साध्ये च ज्ञानेच्छाप्रयत्नानां विशेषणत्वेन विशिष्टस्य साधनत्वं विवक्षितम्। तेन न तदुपलक्षितक्षेत्रज्ञेनार्थान्तरम्। सामान्यतोऽपि साध्यनिर्देशे पक्षधर्मताबलेनाभिमतविशेषसिद्धेः।

नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव

प्रकाशः

सर्वविषयत्वसिद्धिरित्यत् आह–नियतेति। उपादानगोचरेति विशेषणान्नाश्रयासिद्धिः। तृतीयकोटेरभावात् [1]नियतविषयज्ञानजन्यत्वबाधेऽनियत[1]विषयज्ञानजन्यत्वसिद्धिरित्यर्थः। एत चोपनीतभानवादिमते। ननु साध्यगतेनोपादानपदेन न क्षित्याद्युपादानमेव [2]विवक्षितम्, किं तु घटाद्युपादानमपि। तथा च घटाद्युपादान[3]गोचरापरोक्षज्ञानादीनां [4]क्षित्याद्यजनकत्वेऽपि तदुपलक्षितास्मदस्मदेर्जनकत्वसंभवादर्थान्तरता[5]। न च तेषां न सर्वविषयत्वम्। अनादौ संसारे योगिनस्तादृशज्ञानादेरपि संभवादित्यत आह–साध्ये चेति। साधनत्वं–जनकत्वम्।

नन्वितिन नूपादानगोचरत्वेन जनकत्वस्य पूर्वं विवक्षणात् घटोपादानगोचर[6]स्यातथात्वान्नेयं

तर्कचूडामणिः

पक्षकानु[7]मानेन [7]कथं [8]सार्वज्ञ्यसिद्धिरित्याशङ्कापरिहाराय नियतेति ग्रन्थ इति केषांचित् व्याख्यानमनादेयमिति सूचितम्। उभयत्र योजयितुं शक्यत्वात्। ननु तादृशहावेः पुरोडाशादिगोचरज्ञानजन्यत्वेन तदजन्यत्वरूपपक्षविशेषणासिद्धया आश्रयासिद्धिरित्यत आह—उपादानेति। उपादानगोचरत्वावच्छिन्नजनकतावेत्यर्थः। नन्वेवं विशेषबाधे सामान्यज्ञानस्य नापरविशेषविषयत्वनियमः। गोत्वबाधसमानकालीनद्रव्यत्वज्ञानस्याश्वत्वाविषयत्वादित्यत आह–तृतीयेति।

ननु [9]क्षेत्रज्ञस्य क्षित्युपादानसाक्षात्काराभावे कुतस्तदुपलक्षितत्वमित्यर्थान्तराशङ्कानुपपत्तिन्नरित्यत आह–नन्विति। लिङ्गत्वभ्रमं वारयति–जनकत्वमिति। तेनवेति। अत एव मूलकृत

---

1 नियत-ख
2 दानत्वमेव
3 गोचरज्ञानादीनां–ख
4 क्षित्यादेः स्वजनकत्वे पि–ख
5 अर्थान्तरम्–ख
6 स्य तथात्वात्–ग
7 मानेन–ख
8 सर्वज्ञासिदिरित्याशङ्क्याह–ग
9 क्षेत्रज्ञानस्य–ग

जनकत्वमायात्वित्यर्थान्तरम् । न च तेषां व्यभिचारात् क्षित्यादौ न कारणत्वमिति वाच्यम् । अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिव्यणुकादिपूर्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात् । न च सर्गाद्यकालिनस्यापि पक्षत्वात्तत्रेश्वरसिद्धिः । परं प्रति तदसिद्धेरिति चेत्—न ।

ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तदविषयत्वात् । अत एवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम् । तृतीयसाध्ये तु नार्थान्तरम् , क्षित्यादेर्घटाद्युपादानासमवेतत्वात् ।

ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यत्वमेवास्तु । तथा चेश्वरे न प्रत्यक्षं न वेच्छाप्रयत्नौ । तयोः समानाधिकरणज्ञानाविषयेऽसत्त्वात् । न च तादृशप्रत्यासत्त्यजन्यत्वं पक्षे विशेषणम् , परं प्रत्ययसिद्धेरिति चेत्—न ।

प्रकाशः

शङ्केति चेत् — न । तेनैव रूपेण जनकत्वमत्राप्यायात्विति अर्थान्तरापादन[1]संभवात् । न च तेषामसर्वविषयत्वान्न तैरर्थान्तरमिति वाच्यम् । व्यापकतावच्छेदक[2]प्रकारनैयत्यमनुमितौ यन्मते तत्र सर्वविषयत्वसिद्धलर्थमग्रे प्रकारान्तरमेव भविष्यतीति तन्मतेनैतत्संभवात् ।

ज्ञानादीनामिति । अस्मदादीनामदृष्टाद्वारकाणामिति शेषः । **अत एवेति** । बाधेन तद्विसद्धिप्रसङ्गाभावादित्यर्थः ।

तर्कचूडामणिः

[3]अयात्वित्युक्तमिति भावः ।

नन्वेवमीश्वरज्ञानादीनां ध्वंस[4]जनकत्वानुपपत्तिरीत्यत आह– **अस्मदादीति** । ननु तादृशज्ञानाजन्यत्वस्य पक्षे सत्त्वेनकथं तद्विशेषणत्वानुपपत्तिरित्यत आह– **बाधेनेति** ।

---

1 संभवात्—क
2 प्रकारानैयत्य—ख
3 आश्रयात्विग्युक्त—ग
4 जनकत्वापत्ति—ग

द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपिघटादात्वकर्तृतक-त्वात् क्षित्यादौ सकर्तृकत्वनिर्वाहकं ज्ञानं सिध्यत् समुद्रादिषु हस्तक्षेपात् परमाणुद्वयसंयोगे च व्यणुकेष्वस्मदादिकर्तृकत्वादंशतः सिद्धसाधनमिति वाच्यम्। तत्र हि क्षितिनाशे अस्मदादीनां कर्तृत्वं न खण्डक्षितौ, अवस्थितसंयोगेम्य एव तदुपदत्तेः। सकलतदुपादानगोचरज्ञानेच्छाकृती-नामभावाच्च। अत एव द्व्यणुकेऽपि न कर्तृत्वम्। जलक्षेपादधिकपरि-माणसमुद्रादेः सपक्षत्वमेव घटस्येव।

प्रकाशः

द्रव्यत्वेनेति। प्रत्यासत्त्येति [1]शेषः। तद्विलक्षणमिति। तथा च सामान्य-ज्ञानप्रत्यासत्तिजन्यप्रत्यक्षयोः स्वरूपायोग्यत्वात् [2]न तज्जन्यत्वेनार्थान्तरम्। न च योगिप्रत्यक्ष-मादाय दोषः तादृशनानायोगिकल्पने गौरवात् [3]लाघवादेकस्यैव सिद्धेरिति [4]भावः। कर्तृत्वमिति एतच्च न यन्मते ज्ञानादीनां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वं [5]तन्मतेनेति [6]ध्येयम् सकलेति ज्ञानानुरोधात् सकलेत्युक्तम्। इच्छाकृत्योस्तु खण्डक्षित्युपादानेअदेशविषयत्वमपि नेति [7]बोध्यम्। अत एवेति। द्व्यणुकोपादानपरमाणुगोचरप्रत्यक्षादेरभावादित्यर्थः। सपक्ष-त्वमेवेति। [8]तत्र प्रक्षिप्त जलबिन्दुसमुद्रयोरेव अवयवत्वेनोपादानगोच[9]रज्ञानादिसंभवात् अस्मदादेरेव कर्तृकत्वमित्यर्थः।

तर्कचूडामणिः

गौरवादित्यु पलक्षणम्। तादृशयोगिशरीरनिर्मातृत्वेनेश्वरसिद्धे[10]रावश्यकत्वाच्चेत्यपि बोध्यम्। ननु सकलतदुपादानज्ञानाभावेऽस्मदादेरकर्तृत्वात् कथं सपक्षतेत्यत आह–प्रक्षिप्तेति। ननु

---

1 शेषः–क
2 तज्जन्यत्वेन नार्था–ग
3 एकस्यैव–ग
4 अर्थः–क
5 तत्रेति–क
6 ध्येयम्–ग
7 ध्येयम्–ख
8 अत्र–क
9 ज्ञानत्वसंभवात्–क
10 गोचरत्वज्ञानादिसंवात्–ख

ननु घटे साध्यविकलत्वम् , अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात्, न तु तदाश्रयस्य धर्मिग्राहकस्य अन्वयव्यतिरेकस्य वा ग्राहकस्याभावात् । न च घट आत्मजन्यः उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम् । आत्मसमवेतत्वस्योपाधित्वात् । घट आकाशजन्यः उत्पत्तिमत्त्वात् शब्दवत् इतिवत् अप्रयोजकत्वाच्चेति चेत्—मैवम् । प्रयत्नवदात्मसंयोगश्चेष्टाद्वारा घटहेतुः अतः [1]प्रयत्नवत् आत्मापि हेतुः । न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम्, असमवायिकारणं विना कार्यानुत्पत्तेः । न चात्मसंयोगस्य कारणत्वेऽपि संयोगे परिचायकमात्रमात्मेति वाच्यम् । संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात् ।

प्रकाशः

ननिति । तथा च घटादौ व्यभिचारोऽपीति भावः । आत्मेति । आत्मवृत्तित्वस्येत्यर्थः । यद्वा समवेतत्वपक्षधर्मावच्छिन्नसाध्यस्य व्यापकोऽयमुपाधिरिति न ज्ञानध्वंसादौ साध्याव्यापकत्वम् । हेतुत्वादिति । विशेषणत्वे बाधकं विना उपलक्षणत्वस्यायुक्तत्वादिति भावः ।

तर्कचूडामणिः

निदिध्यासनादेस्तर्हि सपक्षत्वमास्त्वित्यत आह—तथा चेति । यथाश्रुते बाधकाभावान्न [2]गौणव्याख्या युक्तेत्याशयेनाह—यद्वेति । नन्वेवं लिङ्गविशेषितज्ञानस्यानुमिति हेतुत्वे लिङ्गस्यापि तत्त्वापत्तिरित्यत आह—विशेषणत्व इति । [3]न च तत्र व्यभिचारो बाधक इति भावः ।

क्रियाव्यतिरेकोक्तिसूचितक्रियाहेतुत्वाभावाभिधानं प्रकृत घटहे[4]तुत्वाविरोधादयुक्तमित्य

---

1 प्रयत्न इवेति पाठान्तरम्
2 गौरवव्याख्या-ग
3 ननु तत्र-क
4 हेतुत्वाभिधान-ग

आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकस्यासिद्धेर्नात्मसंयोगः कारण मिति चेत्—न। या क्रिया व्यधिकरण यदीयगुणजन्या सा तत्संयोगा समवायिकारणिका यथा स्पर्शवद्द्रव्यसंयोगजक्रियेति व्याप्त्या तत्सिद्धेः।

प्रकाशः

आत्मेति। तथा चात्मसंयोगस्य क्रियायामेव न हेतुत्वं, कुतस्तद्द्वारा [1]घटेऽपीत्यर्थः- [2]**या क्रियेति।** कपालरूपजन्यघटरूपे व्यभिचारादाह—**क्रियेति।** स्पन्द इत्यर्थः। गुरुत्वजन्यपतनक्रियायां [3]वेगजनितक्रियाया च व्यभिचारादाह- **व्याधिकरनेति।** [4]नन्यत्र दिपतने व्यभिचारः [5]स्वव्यधिकरणावयव क्रयादिजन्यत्वात् स्वाश्रयावयवसंयोगाजन्यत्वाच्चेत्य- आह—**गुणेति।** अत्र गुणजन्यत्वं गुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वम्। तेनेश्वरज्ञान [6]जन्यत्वेऽपि क्रियायां नेश्वरसंयोगोऽसमवायिकारणमिति व्यभिचारो न भवतीति। युक्तितौ- ल्यात् तस्याप्यसमवायिकारणत्वमित्वप्याहुः।

एतेन मन्त्रपाठजन्यविषचलनेऽपि व्यभिचारो निरस्तः। इष्टापत्तेः। अदृष्टाद्वारक- वेन विशेशणाद्वा। मन्त्रस्याशुविनाशित्वेनादृष्टद्वारकत्वात्।

तर्कचूडामणि.

शङ्क्याह—**तथा चेति।** धात्वर्थस्य क्रियमाणत्वस्य वा क्रियाशब्दार्थत्वे दोषतादवस्थ्या- **स्पन्द इति।**

युक्तीति। समवायिकारण[7]प्रत्य सन्यादेरविशेषादित्यर्थः। ईश्वरसंयोगस्य कार्यमा- न हेतुत्वम्, गुणकर्मादौ व्यभिचारात्। नापि कार्यविशेषे, मानाभावात्। न च प्रयत्न वदात्मसंयोगत्वं हेतुतावच्छेदकं तत्रापीति सोऽपि हेतुरिति वाच्यम्। अत्मदादिप्रयत्नविरह दशायामपि [8]ततश्चेष्टापत्त्या तद्व्यावृत्तस्यैव हेतुतावच्छेदकत्वादित्यस्वरसं सूचयति-**अपीति।**

इष्टेति। तत्रापिगगनसंयोगस्यसमवायिकारणत्वमिति भावः। उक्तादेवास्वरसादाह- **अदृष्टेति,**

---

1 फलेऽपित्यर्थ
2 क्रियेसि-ख ग
3 वेगजक्रियायां-ख
4 नन्वाद्यपतने-ख नन्वामादिपतने-ग
5 स्वव्यधिकरणस्वाश्रयावयवीयमादिजन्वत्वात्-ख ग
6 जन्यत्वे क हेश्वरज्ञानादिजन्यत्वे-ग
7 प्रत्यासन्नत्वादे-ख
8 तश्च चेष्टा-ग

प्रकाशः

ननु तुलायामेकदिगवास्थिताधिकगुरुत्वजन्यापरदिगवस्थितोन्नमन क्रियायां व्यभिचा इति चेत्—न । तत्राधिकगुरुत्वाश्रयद्रव्यसंयुक्तसंयोगस्यन्नमनहेतृत्वात् । [1]शाखादौ [पक्ष्यादौ] तस्य तद्धेतुत्वकल्पनात् । [2]गुरुत्वस्य चोन्नमनहेतुत्वाकल्पनान् ।

तत्कारणत्वाभ्युपगमेऽपि प्रत्यक्षपदमपि गुणविशेषणं देयम् । न चैवं व्यधिकारणपद. वैयर्थ्यमिति वाच्यम् । वेगादिजन्यक्रियायां तथापि व्यभिचारात् । न चादृष्टवदात्मसंयो-गस्यैवं कारणता न स्यादिति वाच्यम् । व्यास्यन्तरेणापि तत्संभवात् । तथा चानुपदमेव वक्ष्यामः ।

तर्कचडामणिः

विनिगमकाभावमाशङ्क्याह—'पक्ष्यादाविति' । अपरदिगवस्थितगुरुद्रव्याभावेऽपि पक्ष्यादावुन्नमनक्रियादर्शनेन [5]तादृशगुरुत्वस्य व्यभिचारेणाहेतुतया गुरुत्वाश्रयद्रव्यसंयोगस्य तत्र हेतुत्वकल्पनादिति भावः । यद्यपि पक्ष्यादावालोकादिवृत्तितादशायामुन्नहनाभावात् शाखावुत्तितादशायां तद्भावाच्च गुरुद्रव्यसंयोगस्य हेतुत्वेऽपि न भिन्नदिगवस्थितगुरुद्रव्यसंयुक्त-संयोगस्य हेतुत्वम्ः तथापि सामान्यतो गुरुत्वघटितसंयोगस्य उन्नमनहेतुतादर्शनात् अपरदिगवस्थि तपिण्डोन्नमने तद्विशेषे उक्तसंयोगविशेषस्य हेतुत्वं युक्तम् , दृष्टसाजात्यादिति भावः । नन्वेवं गुरुत्वस्योन्नमनहेतुत्व दृष्टम् , प्रत्युत यद्विरुद्धपतनहेतुत्वमेव दृष्टमित्याशयेनाह—गुरुत्वस्येति । वस्तुत उक्तस्थले गुरुत्वस्य परंपरासंबन्धेन हेतुतया साक्षात्संबन्धितादृशसंयोगस्यैव हेतुत्व लाघवात् । अत एव वक्ष्यति — 'फलोपपादकमपूर्वं फलाश्रय एव कल्प्यते' इति ।

प्रौढिवादेनाह– तदिति । न चैवमिति । गुरुत्वस्यातीन्द्रियतया पतने दोषाभावादिति भावः । एवम् उक्तव्याख्या इत्यर्थः ।

---

1 कम्पादौ–ग पङ्कादौ पक्ष्यादाविति व्याख्यानपाठ–ग
2 गुरुत्वे चोन्नमने–ख
3 अत्र कारणत्वा–क–न–ग
4 पक्षादाविति–ग
5 तादृशगुरुत्वाश्रयत्वैव संयोगस्य व
6 भावात्

प्रकाश;

नन्वेवमपि क्रियायामात्मकारणत्वसिद्धावपि घटे न तत्सिद्धिः। तथा च साध्यवैकल्यं तदवस्थमेवेति चेत् —न। मूर्तवृत्ति यत् कार्यं यदीयगुणनिमित्तकारणकं तत् तत्समानाधिकरण[1]गुणजन्यमिति व्याख्या तत्सिद्ध

[2]यदि चात्र व्यभिचारशङ्का, तदा विशेषणान्तरमपि प्रवेश्यम्। न चात्र विपक्ष-

तर्कचूडामणिः

शब्दजन्ये गगनसंयोगाजन्ये शब्दगोचरप्रत्यक्षे व्यभिचारादाह –मूर्तेति। तन्तुरूपवजन्ये तन्तुसंयोगाजन्ये पटरूपे व्यभिचारादाह— निमित्तेति। दण्डावयवीयदण्डनिमित्तके दण्डावयवसंयोगाजन्ये घटे तद्वारणाय -- गुणेति।

नन्वेवमपि पूर्वोक्तोन्नमनक्रियायां व्यभिचार इत्यत आह — यदि चेति। गुरुत्वभिन्नत्वविशेषणं देयम्। वस्तुतस्तस्य न जनकत्वमित्येव तात्पर्यम्। अत एव यदीत्युक्तम्।

अत्र संयोगजन्यत्वमेव साध्यम्, न तदसमवायिकारणकत्वम्। अदृष्टजन्ये आत्मसंयोगासमवायिकारणकत्वरहिते घटरूपे व्यभिचारापत्तेः। तादृशात्मघटसंयोगस्य रूपादिहेतुत्वान्नोक्तदोषः। ननु घटादि[3]वृत्तिदित्वे अपेक्षाबुद्धिजन्ये आत्मसंयोगाजन्ये व्यभिचारः, अदृष्टवदात्मसंयोगमादाय साध्यसत्त्वात्। न चात्मद्वयवृत्तिद्वित्वे व्यभिचारः। ईश्वरीयापेक्षाबुद्धिजन्यस्य तस्य तत्संयोगाजन्यत्वात्। विभुसंयोगाभावेन तत्र द्वित्वाश्रयस्य [4]ईश्वरासंयोगादिति वाच्यम्। मूर्तवृत्तिपदेनैव निरासात्। [5]न च प्रयत्नादृष्टादेः साक्षात्संबन्धा[6]भावेऽपि स्वाश्रयसंबन्धद्वारा हेतुत्वमायाति, न तु संयोगस्य तावता हेतुत्वम्, सुखसमानाधिकरणसुखादौ

---

1 संयोजाय–ग
2 यदि च व्यभि–ग
3 वृत्तित्वे–क
4 ईश्वरसंयोगात्–ग
5 ननु–क
6 भावे–क

न च क्रियाया मूर्तमात्रसमवेतासमवायिकारणत्वनियम इति वाच्यम् । कार्यमात्राभिप्रायेण ज्ञानादौ व्यभिचारात् विशिष्याप्रयोजकत्वात् असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च ।

अन्ये तु अनुकूलकृतिसमवायित्वं कर्तृत्वम् , न तु जनकत्व सति, गौरवात् । कर्तरि कारकव्यवहारश्चाभियुक्तानां 'सविशेषण' इति न्यायेन कृतिपर्यवसन्न एव । एवं ज्ञानेच्छाकृतिजन्यत्वमेव साध्यम् , तदाश्रयत्वमेवश्वरस्य कर्तृत्वम् ।

प्रकाशः

स्वाधकाभावः, अप्रत्यासन्नस्य जनकत्वेऽतिप्रसङ्गात् । [1]पूर्वव्याप्तावपि तदेव विपक्षबाधकमिति संक्षेपः ।

[2]विशिष्येति । क्रियाया इत्यत्र क्रियापदेन कर्ममात्राभिधान इत्यर्थः । **असमवायीति** । प्रकृताभिप्रायेण । कारणसंयोगाश्रयस्येत्यत्र तात्पर्यम् ।

विशेष्यबाधे सत्येव 'सविशेषणे हि' इति न्यायावतार इत्यपरितोषं हृदि निधायाह— **अन्ये त्विति** । कृतीत्युपलक्षणम्, [3]ज्ञानेच्छेत्यपि द्रष्टव्यम् । अत एवानुपदं तथैव विभावयिष्यति ।

तर्कचूडामणिः

वाश्रयसंयोगाभावादिति वाच्यम् । स्वाश्रयसंबन्धत्वापेक्षया संयोगत्वजातेः लाघवेनावच्छेदकत्वात् । आत्मसंयोगस्यान्यत्रेव स्वस्मिन्नपि सत्त्वेन सुखादौ व्यभिचाराभावात् । तदेतदाह—**संक्षेप इति** ।

ननु [4]निमित्तसंयोगाश्रयदण्डादेरपि हेतुत्वेनासमवायिपदवैयर्थ्यमित्याशयेनाह — **प्रकृतेति** ।

विभावयिष्यतीति । ज्ञानेच्छाकृतिजन्यत्वमेव साध्यमित्यत्रेत्यर्थः ।

---

1 पूर्वव्याप्तयामपि–ख 2 विशेष्येति–ख
3 ज्ञानमित्यपि–क 4 अनिमित्त–क

अथ घटे कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः। तच्च न प्रत्यक्षम्, चिकीर्षाविषयऽनागते [1]इन्द्रियासामर्थ्यात्। किं तु अनुमितिरूपम्। तथा च साध्यविकलो दृष्टान्तः साध्याप्रसिद्धिर्वेति चेत्—न। सिद्धवृत्त्यसिद्धविषया हि कृतिः सिद्धविषयप्रत्यक्षे सति संभवति। न हि मृदवयवानां संस्थानविशेषे कृतिसाध्येष्टसाधनतानुमितावप्यवयवस्य प्रत्यक्षेणोपस्थितिं विना प्रवृत्तिः। अत एव यागे शब्दात्तदुपजीविलिङ्गाद्वा कृतिसाध्येष्टसाधनत्वेऽवगतेऽपि हविरादीनां प्रत्यक्षेणानुपस्थितौ न प्रवृत्तिः। न चोपादानप्रत्यक्षं प्रवर्तकज्ञानोपक्षीणम्। अप्रत्यक्षे परमाणौ तत्क्रियायामिष्टसाधनताज्ञानेऽप्यप्रवृत्तेः। प्रवृत्तिविषयस्य मृदङ्गादेः प्रत्यक्षत्वान्न शब्दफूत्कारादिना व्यभिचारः।

प्रकाशः

साध्याप्रसिद्धिर्वेति। यद्युक्तदोषभिया दृष्टान्तरत्याज्यस्तदा [2]साध्या प्रसिद्धिरेव दोष इत्यर्थः। ननूपादानप्रत्यक्षं विनापि [3]शब्दादौ प्रवृत्तेर्व्यभिचार इत्यत आह—प्रवृत्ति-[4]विषयस्येति। न ह्युपादानप्रत्यक्षत्वेन कारणत्वं ब्रूमः किं तु प्रवृत्तिविषयप्रत्यक्षत्वेन। प्रवृत्तिविषयश्च न गगनादि, किं तु मृदङ्गादिकमेव। तच्च अस्मदादिप्रत्यक्षमेवेति न व्यभिचार इत्यर्थः। अत्र [5]वायवीयशरीरे प्रत्यक्षाभावेन द्वोचरप्रयत्नाभावात्तत्र कथं चेष्टेति चिन्त्यम्।

तर्कचूडामणिः

ननु साध्याप्रसिद्धौ तद्रूकल्योकयनुपपत्तिः, तस्य तत्प्रसिद्धिनिबन्धनत्वादित्यत आह—यदीति। ननु मृदङ्गादेः प्रत्यक्षत्वेऽपि किमायातमुपादानप्रत्यक्षत्व इत्यत आह—न हीति। तत्रेति। वायवीयशरीर इत्यर्थः। तत्र छिन्नगोधाचलनवद्दृष्टवदात्मसंयोग

---

1 इन्द्रियासंनिकर्षादिति पाठान्तरम् 2 प्रकृतसाध्या–ग
3 शब्दार्थिनः प्रवृत्ते–ख शब्दाद्यर्थिप्रे ग 4 प्रवृत्तिविषयेति–क
5 वायवीयशरीरप्र यत्नाभावात्–क वायवीयशरीपत्यक्षाख

न चाभिमतग्राहकेन्द्रिय[1]संयोगान्मनसि प्रयत्नजन्य[2]क्रियाप्रदर्शनाच्च व्यभिचारः । अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रयत्नान्नाडीक्रिया, ततः स्पर्शवद्वेगवन्नाड्या नोदनात् मनसि क्रिया न तु प्रयत्नात् । अत एव जलाद्यभ्यवहारमलोत्सर्गहेतुनाडीनामनाद्यभ्यासवासनावशात् अदृष्टसहकृतत्वगिन्द्रियेणोपलम्भात् तद्गोचरः प्रयत्नः ।

नन्वेवं घटादावनु[3]मितेर्जन्यत्वदर्शनात् ईश्वरेऽनुमितिरपि सिध्येत् । यथा च प्रत्यक्षस्येन्द्रियजन्यत्वेऽपि नित्यं तदीश्वरे, तथानुमिते[4]र्लिङ्गजन्यत्वेऽपि सा तत्र नित्यैव, अनित्येनानादिद्व्यणुकाद्यजननादिति चेत्—न । सुखदुःखाभावादिलाघवानुमितेर्हि घटादौ हेतुत्वं गृहीतम् । न च [5]भगवति

प्रकाश;

अदृष्टेति । न चादृष्टवदात्मसंयोगादेव तत्र क्रियोत्पत्तिरस्तु । किं प्रयत्नेनेति वाच्यम् । स्वतन्त्रान्वयव्यतिरेकानुविधायित्वादिति भाव. ।

न च भगवतीति । न चायथार्थैव सास्त्विति वाच्यम् । विशेषदर्शनवत ईश्वरस्य तदसंभवादिति भावः ह [7]ननु स्वसुखादिसाधनतानुमितित्वेन न कारणता, किं तु स्वेष्टसाधनतानमितित्वेन । तत्र च न बाधः, [8]विश्वस्येश्वरानुमितिविषयत्वादित्यपरितोषादाह

तर्कचूडामणिः

एव तत्र हेतुः । न च तत्रैव व्यभिचारात् प्रयत्नवदात्मसंयोगोऽन्यत्रापि न हेतुः स्यादिति वाच्यम् । कार्यवैजात्यकल्पनादिति समाधानमत्र द्रष्टव्यम् ।

तत्र क्रियेति । मनसीत्यर्थः ।

विशेषेति । यद्यपि विशेषदर्शनंभ्रमोत्पत्तौ प्रतिबन्धकम् । तथा च

---

1 संयोगाथ मनसि
2 क्रियादर्शनाच्चभि
3 मितिजन्यत्व
4 नित्ये जन्यत्वे पि
5 तावता
6 स्वसुखादि–ग
7 सर्वरयेश्वरेच्छाविषय–ख

शरीरादृष्टाभावेन सुखमस्ति, अतो न क्षित्यादौ [1]तस्यानुमितिर्यथार्था संभवति। न च तादृशानुमितेरनुमित्यन्तरस्य वा अनुमितित्वेन घटादौ-प्रवृत्तिविषयप्रत्यक्षवद्धेतुत्व गृहीतम्, अतो नेश्वरेऽनुमितिः।

ननु द्वेषजन्यकृतिसाध्य चिकीर्षाविरहात् व्यभिचारः तद्दृष्टान्तेत क्षित्यायौ द्वेषसाध्यत्वादीश्वरे द्वेषोऽपि स्यात्। द्वेषवतः संसारित्वेन भगवतोऽपि [2][रागवतोऽपि] तथात्वापत्तिरिति चेत्-न। न हि [2]सर्पादिद्वेषादेव तन्नाशानुकूलव्यापारे कृतिरुत्पत्तुमर्हति। प्रयोजनं विना दुःखैकफले प्रेक्षावतां कृतेरनुपपत्ते[3]ः। किं तु दुःखसाधनध्वंसं तत्साध्यदुःखानुत्पादं वा फलमुद्दिश्य तत्साधनताज्ञानात्। तथा चेष्टसाधनता-ज्ञानात्तत्रच्छास्त्यवेति सैव कृतिकारणं क्लृप्तत्वात्। द्वेषस्तु परंपरया तदुपक्षीणः।

प्रकाशः

न चेति। तथापि न तादृशानुमितित्वेन कारणता किं तु तादृशज्ञानत्वेन। तादृशं [4]च प्रत्यक्षमेव भवतीति पक्षधर्मताबलात्तदनुमितावपि प्रत्यक्षजन्यत्वमेव सिध्यतीति भावः।

रागवत इति। इच्छावत इत्यर्थः। द्वेषस्त्विति। दुःखे तत्साधने वा यतो द्वेष उत्पद्यते ततस्तदभावे इच्छा भवति [5]नान्यथा, द्वेषाविषयघटाद्यभावे इच्छाविरहात्।

तर्कचूडामणिः

नित्यभ्रान्तिसत्त्वेन विरोधः, तथापि तद्ज्ञानस्य भ्रान्तित्वे मानाभावान्त तथात्वम्। न च तस्य प्रमात्वेऽपि मानाभावः, तद्वत्त्वघटितप्रमात्वस्य तदभावघटिताप्रमात्वापेक्षया लघुशरीरत्वेन लाघवसहकृतोक्तानुमानेन तत्सिद्धेः। ज्ञानत्वेनेति। लाघवात् शाब्दज्ञानेन प्रवृत्तेश्चेत्यर्थः।

नन्वनुमानादिच्छासिद्धावपि नोत्कटेच्छारूपरागसिद्धिरित्यत आह—इच्छेति। पारंपर्यमाह—दुःख इति।

---

1 तस्य तथानु
2 रागवत इति व्याख्यानपाठः
3 अनुत्पत्तेः
4 तत्-ख ग
5 न त्वयथा-ख

कुतस्तर्हि द्वेषसिद्धिः, शत्रुं द्वेष्मीत्यबाधितप्रत्ययात् । न चादृश्यस्य कर्तुरनुपलब्धिबाधः । अनुपलब्धिमात्रस्य बाधकत्वेऽतीन्द्रियोच्छेदात् । योग्यानुपलब्धेश्चासिद्धेः, परमात्मनोऽयोग्यत्वनियमाम् । शशशृङ्ग प्रतिबन्धा च नादृश्यमात्रनिरासः । परमाण्वादिस्वीकारात् ।

नाप्ययोग्यकर्तृनिरासः, चेष्टया ज्ञानादिमतः परात्मनोऽनुमानात्

प्रकाशः

तथा च दुःखादिद्वेषः [1]दुःखाभावादाविच्छामुत्पादयति ततः [2]कृतिरिति चेच्छायामेव तदुपक्षय यत्यर्थः । इदं च प्रवृत्तिप्रयत्नमभिप्रेत्य । निवृत्तिप्रयत्ने तु द्वेषजन्यत्वमेव । समान-विषयतया लाघवेन प्रवृत्ति प्रत्येव चिकीर्षाया हेतुत्वात् । निवृत्तौ तु समानविषयतया द्वेष एव हेतुः [3]न भिन्नविषया चिकीर्षा । न च प्रवृत्तिविरह एव निवृत्तिः वैपरीत्यापत्तेः । तदुक्तं कुसुमाञ्जलौ— [4]'प्रवृत्तिप्रयत्नो रागात् निवृत्तिस्तु द्वेषात्' इति । न चैवं कथं व्यभिचारोद्धारः निवृत्तेः क्रियाविरहहेतुत्वेन प्रवृत्तिसाध्यतानियमेन च कार्याणां चिकीर्षाजन्यत्व-नियमात् ।

[5]नन्वेवं कुत इत्यादिग्रन्थः कथम् । इत्थम् । कारणान्तरमेव निवृत्तेः कल्प्यता मित्याक्षेपे शत्रुं द्वेष्मीत्यनुव्यवसायसाक्षिके तत्र न ततोऽन्यत् कारणं कल्प्यत इति परिहारः इत्यभिप्रायकत्वादिति ।

वस्तुतस्तु पवृत्तिविरह एव निवृत्तिः । न च वैपरीत्यम् । सुषुप्तिदशायामपि निवृत्ति[6]विरहसत्त्वेन प्रवृत्तिसाध्यचेष्टादिकार्यापत्तेः । न च तदा निवृत्तिरेवास्तीति वाच्यम् ।

तर्कचूडामणिः

मूलग्रन्थानार्जवापातात् । वक्ष्यमाणन्यायेन निवृत्तियत्ने मानाभावाच्च । पूर्वास्वरसं हृदि निधायाह — वस्तुत इति । नन्वेवं कुसुमाञ्ज[7]लिग्रन्थविरोधः

---

1 दुःखाभावादीच्छां–क
2 कृतिरिच्छामेव–ख
3 न चिकीर्षाविषयभिन्नविषयत्वात्–क
4 प्रवृत्तिप्रयत्नस्तु द्वेषात्–क
5 अत्रैव–ख
6 विरहस्य सत्त्वेन–ख ग
7 विरोधः,–क

परं प्रति तस्यायोग्यत्वात्। नापि शृङ्गे पशुत्ववदप्रयोजकम्, कर्तुः कार्यमात्रे कारणत्वावधारणात् प्रतिबन्दिमात्रस्यादूषणत्वात्। शशे पशुत्वेनायोग्यशृङ्गसिद्धिः कुतो नेति चेत्–न। अर्थान्तरत्वात्, विपक्षे [1]बाधकाभावेन व्याप्त्यसिद्धेः। शृङ्गत्वस्य योग्यसंस्थानविशेषव्यङ्ग्यत्वेनायोग्यस्य विरोधेन शङ्कितुमशक्यत्वात्। शशे शृङ्गस्यात्यन्ताभाव इति सर्वेषाम बाधितप्रत्यक्षबाधितत्वाच्च।

अथ कृतिकार्ययोर्नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः, त्वन्मते व्यापककृतेः सत्त्वे तद्देशे समये वा कृतिमात्रव्यतिरेकानिरूपणात। नित्यकृतेरन्वयोऽपि न गृहीतो वह्निमात्रव्यतिरेकोऽस्ति गृह्यते चति। न चैवमाकाशात्मनोरप्यसिद्धिः, समवायिमात्रस्य

प्रकाशः

तत्कारणद्वेषाभावेन तदभावात्। द्वेषाभावश्च तत्कारणदुःखसाधनताज्ञानाभावात्। तथा च प्राचीनमते ग्रन्थकर्तु[2]रनुशय एवायमिति मन्तव्यम्। एवं च यथाश्रुत एवा[3]ग्रिमग्रन्थः सुक्त इति।

यत्र तु वह्निधूमादौ व्याप्तिग्रहः सर्वसिद्धः, तत्र साध्यसामान्य[4]व्यतिरेकग्रहोऽस्त्येवेति न व्याप्तिग्रहस्तव्यभिचारीति दर्शयति—वह्निमात्रेति। समवायिमात्रस्येति। [5]आकाशात्मदेरपि व्यापकस्य समवायित्वाभ्युपगमादिति भावः।

तर्कचूडामणिः

इत्यत आह तथा चेति।

वह्निव्यतिरेकोक्तेः प्रकृतासंगतिमाशङ्क्याह—यत्रेति।

ननु सामान्मयो[6]हेतुहेतुमद्भावे गौरवस्य बाधकतया तदभावोऽसिद्ध इत्याशङ्क्य

---

1 बाधकाभावात्–क
2 अनुशयप्रकाश–ख ग
3 एव ग्रन्थः–ख
4 व्यतिरेको–क
5 आकाशादेरपि–ख
6 हेतु–ग

व्यतिरेकानिरूपणेन कार्यं समवायिकारणजन्यमिति व्याप्तेरसिद्धेरिति वाच्यम् । समवायिकारणत्वग्रहे हि तत्संसर्गाभावोऽप्रयोजको निमित्तमात्र-साधारणत्वात् । किं तु यत्समवायि तत्र कार्यं, यत्र समवायि तत्र नेत्यन्योन्याभावमादाय कार्यं समवायिजन्यमिति व्याप्तिग्रहसंभवात्, समवायित्वेन तयोरन्योन्याभावोऽस्ति गृह्यते च ।

यद्वा भावकार्यं समवेतमिति व्याप्तया तयोः सिद्धिरिति । यथा हि न यद्यद्वह्नेरन्वये धूमो गृहीतः तत्तद्व्यतिरेके धूममात्रव्यतिरेकग्रहात् वह्निधूम-मात्रयोर्व्याप्तेर्ग्रहः न तु पर्वतीयवह्नेरन्वयव्यतिरेकग्रहात् । न चान्यान्वयव्य तिरेकाभ्यामन्यव्याप्तिग्रहेऽतिप्रसङ्ग इति वाच्यम् । यद्विशेषयोरन्वयव्यतिरेक ग्रहः तत्सामान्ययोर्बाधकं विना व्याप्तिग्रहात् । स च वह्निधूमव्याप्ति-ग्रहे उत्पद्यमानः सकलधूमगोचरो, धूमत्वपुरस्कारेण प्रसिद्धधूमगोचर एव वा भवति । तथेहापि कृतिविशेषकार्यविशेषयोरन्वयव्यतिरेकग्रहो

प्रकाशः

ननु [1]द्रव्ये गुणकारणत्ववत् समवायिकारणत्वं विशिष्टं न ग्राह्यम् । किं तु समवायित्व-समाना[2]धिकरणं कारणत्वमेव तत् [3] । तथा चोभयग्राहकसमाजादुभयग्रहे आर्थः समाज इत्यपरितोषदाह—यद्वेति । बाधकं विनेति । सामान्यरूपेण व्यभिचारज्ञानाभावे सति ततो व्याप्तिग्रह इति भावः । **सकलधूमगोचर इति** । स्वमते । **प्रसिद्धधूमगोचर** इति परमते । तत्र सामान्यलक्षणानङ्गीकारादिति ध्येयम् ।

तर्कचूडामणिः

वाक्यसामान्यवक्तृवाक्यार्थज्ञानसामान्ययोर्हेतुहेतुमद्भावनिरासार्थोपात्तबाधकाभावपदस्य व्यभिचार [3]ज्ञानाभावोऽर्थ इत्याशयेनाह--**सामान्येति** ।

---

1 द्रव्ये स्वगुणकारणत्वं यत्समवायिकारणत्वं तन्न विशिष्टं ग्राह्यम्–क

2 अधिकरणम्–क कारणमेव तत्–ग

3 ज्ञानाभावादेकर्थो–ग

बाधकं विना कृतिकार्यत्वमात्रयोर्व्याप्तिग्रहे उपायः. न तु पक्षधर्मताबल-लम्भविशेषान्वयव्यतिरेकग्रहः. अनुमानमात्रोच्छेदप्रसङ्गात् । एतेनकार्य-त्वस्य विपक्षवृत्तिहतये संभाव्यतेऽतीन्द्रियः

कर्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति ।
दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्ता समाश्रीयते
[1]तत्त्यागोऽपि तदा तृणादिकमिति व्यक्तं विपक्षेक्षणम् ।।

इति निरस्तम् ।

ननु यदि कर्तृमात्र[2]व्याप्तिग्रहात् अदृश्यकर्तृसिद्धिः तदा वह्निमात्र-व्यप्तधूमात् अदृश्यजाठरीयवह्निसिद्धिरपि स्यात् । न स्यात् । अदृश्य वह्नेर्धूमानुत्पत्तेः दृश्यस्यैव तत्र हेतुत्वाम् ।

प्रकाशः

[3]कार्यत्वस्येति । कार्यत्वस्य हेतोर्विपक्ष[4]वृत्तित्वनिश्चये सर्वत्र तृणादेः कार्ये । अतीन्द्रियः कर्ता चेत् स्वीक्रियते, तदा [5]क्वापि तद्व्यतिरेकनिश्चयो नेति तद्बैधुर्यात्कथं व्याप्तिर्ज्ञा-येत । अथ [6]ततिरेकसिद्ध्यर्थितया दृश्य एव कर्ता स्वीक्रियेत तदा [7]तद्विरहेऽपि तृणादौ [8]कार्यत्वमस्त्येवेति तत्रैव विपक्षे तस्य व्यक्तमीक्षणमिति भावः ।

दृश्यस्यति । योग्यस्येत्यर्थः । तथा चाबिन्धनवह्नेर्दृश्यमानधूमोत्पत्तिः लमर्थिता तस्यापि योग्यत्वादिति भावः ।

तर्कचूडामणिः

दृश्य इति । दृश्यशरीरावच्छिन्नहत्यर्थः ।

विपक्षदर्शनमात्रं न प्रतिबन्धकमित्यतो व्याचष्टे—नत्रैवेति ।

अबिन्धनेवेनि । अयोगोलकादौ जलसंबन्धे धूमो जायमानोऽन्तर्हितवह्नेरेव ।

---

1 तत्त्यागोऽपि—क
2 व्यतिरेकग्रहात्—क
3 एतेन कार्यत्वस्येति—क
4 वृत्तये—ख
5 क्वचित्तद्व्यति—क
6 तद्व्यतिरेकसिद्ध्यर्थं तदा दृश्य एव—क
7 तद्व्यतिरेकेऽपि—क
8 कार्यत्वमस्तीति—क

ननु ज्ञानेच्छाप्रयत्नत्रयव्यतिरेकात् न कार्यव्यतिरेकः। किं तु एकैकव्यतिरेकात्। तथा च व्यर्थविशेषणत्वेन विशिष्टव्यतिरेको न हेतुव्यतिरेकव्याप्य इति न हेतोर्विशेष्टसिद्धिः, साध्याभावव्यापकाभाव-प्रतियोगि न एव साध्यगमकत्वादिति चेत्—न।

प्रकाशः

व्यर्थविशेषणत्वेनेति । अखण्डाभावानभ्युपगन्तृमतेनेदम् । **साध्याभावेति** । केवलान्वयी नास्त्येवेति । भावः ।

अत्र [1]केवलान्वयिव्यवस्थापनात् व्यतिरेकव्याप्तिविरहेऽप्यन्वयव्याप्तिसत्तामात्रेणानुमित्य-विरोधः । न चान्वयव्याप्तावेव[2] व्यर्थविशेषणत्वान्न विशिष्टव्यापकत्वग्राहः । विशिष्टकारणत्वेन विपक्षबाधकसंभवात्। अन्यथा [3]अर्द्रेन्धनविशिष्टवह्नापि धूमव्यापकत्वं न गृह्येत। न च तत्र वह्निमात्राद्धूमानुत्पत्तें[4]र्वैशिष्ट्यं कराणतावच्छेदकम्, प्रकृते चात्मत्वमेव तथा लाघवादिति वाच्यम्। आत्मनि ज्ञानादौ [5]सति आत्मनः कार्यस्य पटादेरुत्पत्तिप्रसङ्गभयेन ज्ञानादेरवश्यं कारणतावच्छेदकत्वात्। न च तेषामपि कारणत्वान्न [6]कारणतावच्छेदकत्वम्, अवच्छेदकत्वे न च कारणत्वं दण्डत्ववदिति वाच्यम्। उक्तहेतोरवच्छेदकत्वेऽपि ज्ञानाद्युत्कर्षेण

तर्कचूडामणिः

स च तदानीमप्रत्यक्षोऽपि [7]निध्यादिवत् योग्य एवेति भावः ।

नन्वेवं मेयत्वावेर्वाच्यत्वलीङ्गत्वं न स्यादित्यत आह–**केवलेति** । स्वमते इति भावः । **उक्तहेतोरिति** । ज्ञानादिशून्यात्मनः कारणत्वप्रसङ्गादित्यर्थः ।

---

1 केवलान्वयित्वव्यव–ख
2 व्याप्तेरेव–ख
3 आर्द्रेन्धनवह्नावपि–क
4 विशिष्टम्–क
5 असति–क
6 अवच्छेदकत्वम्–क
7 निदिध्यादिवत्–क निद्रादिवत् ग

यत एकैकव्यतिरेकात् न कार्यव्यतिरेकः, अत एव कार्यत्वादेरेकैकं सिध्यत् त्रयमपि सिध्यति । आर्थस्तु समाजः ।

स्यादेतत् । अशरीरसर्वज्ञनित्यज्ञानादिमान् कर्ता पक्षे विवक्षितः । घटादौ च कार्यत्वस्य तद्विपरीतकर्तृसहचारादिदर्शनात् विशेषविरुद्धत्वमिति चेत्—न । हेतोर्विवक्षितसाध्यविपरीतसहचारमात्रस्यादूषकत्वात् । अन्यथानुमानमात्रोच्छेदप्रसङ्गात् । न चानित्यज्ञानासर्वज्ञशरीरिकर्तृत्वेन समं

प्रकाशः

कार्योत्कर्षदर्शनात् तेषामपि कारणत्वात् । अत एव [1]आलोकरूपस्या[1]वच्छेदकत्वेऽप्यभिव्यञ्जकत्वमिति सिद्धान्त इति यद्यपि, तथाप्यभ्युपेत्याह—यत इति ।

अन्ये तु साध्ये न व्यर्थविशेषणता हेतुसमानाधिकरणाध्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य गुरुण्यपि[2] साध्यतावच्छेदके सुग्रहत्वात्। अवच्छेदकतायां [3]हि भवति गौरवं [3]दोष यथा हेतुनिष्ठनीलधूमत्वादौ । साध्यनिष्ठधर्मे त्ववच्छेदकत्वं [4]ग्राह्यमेव न किं तूक्तप्रतियोगितावच्छेदकत्वाभावः । स च गुरुण्यपि सुग्रह एवेति । अन्यथा तादशधर्मस्योक्तप्रतियोगितानवच्छेदकत्वस्य केनापि प्रमाणेनाग्रहे प्रतियोगितावच्छेदकत्वमेव सिद्धं स्यादित्याशङ्क्य अन्योन्याभावगर्भव्याप्तौ साध्यवत्त्वावच्छेदेन साधनसमानाधिकरणान्योन्याभावाप्रतियोगित्वस्य ग्राह्यतया तत्र कल्पे व्यर्थविशेषणत्वमेव । तदा [5]नीलधूमादाविवावच्छेद[6]कोटिप्रवेशादित्याहुः ।

तर्कचूडामणिः

जयदेवमतमाह—अन्ये त्विति । अन्योन्याभावगर्भव्याप्तिरपि तादशान्योन्याभावप्रतियोगितावच्छे[6]दकतावच्छेदकं यन्न तदवच्छिन्नसंबन्ध[7]रूपेति तत्रापि साध्यतावच्छेदके तादशावच्छेदकत्वाभावस्यैव[8] ग्राह्यत्वमित्यस्वरसोऽत्र बोध्यः ।

---

1 रूपस्य—ख
2 साध्यतावच्छेदकग्रहात्—क
3 गौरवं—क
4 ग्राह्यमेव—क
5 नीलधूमत्ववत्—ख ग
6 कावच्छेदक—ग
7 रूपे तत्रापि—ग
8 वाभावस्यैव—ग

कार्यत्वस्य व्याप्तिरस्ति, येन तद्विपरीतसाधने विरुद्धत्वं स्यात् । तादृश-व्याप्तिश्च त्वया मया वा नाङ्गीक्रियते । अङ्कुरादौ [1]योग्यानुपलम्भेन शरीरिकर्तृकत्वाभावात् ।

अथ यथादर्शनवसप्रवृत्तव्याप्त्या अनित्यज्ञानादिमान् कर्तोपनेयः, पक्षधर्मतया च नित्यज्ञानादिमान् । तथा चोपनेयविशेषयोर्विरोधेन व्याप्तिपक्षधर्मतयोर्विरोधात् परस्परसहकारितावरहान्नानुमानं विशेषविरोधादिति चेत्-न । अनित्यज्ञानादिकर्तृजन्यत्वेन [2]व्याप्तयभावात्, ज्ञानादिमत्कर्तृजन्यत्वव्याप्तेः पक्षधर्मताबललभ्यविशेषाविरोधात् , केवलाया व्याप्तश्च पक्षधर्मतायाश्च पृथगुपनायकत्वाभावाच्च एकवैयर्थ्यप्रसङ्गाच्च । तथा च निरपेक्षतादशायां विशेषानुपस्थानादेव [3]न विरोधज्ञानम् । सापेक्षतादशायां च सहोपलम्भादेव विरोधप्रतियोगिनोः सिद्ध्यसिद्धिभ्यां [4]विरोधभावज्ञानाभावाच्च ।

प्रकाशः

[5]योग्यानुपलब्ध्येति । शरीराभावस्य योग्यानुपलम्भेन [6]ग्रहात् विशिष्टाभावस्यानुमानादित्यर्थः । क्व तर्हि विशेषविरोधो दूषणम् । इत्यपेक्षायामाह-लिङ्गेति ।

तर्कचूडामणिः

ननु परात्मनोऽयोग्यत्वेन कथं योग्यानुपलब्ध्या बाध इत्यत आह—शरीरेति । प्रसङ्ग एवात्र संगतिरित्याशयेनाह—क्वेति ।

---

1 योग्यानुपलब्ध्येति प्रकाशसमतः पाठः
2 व्याप्तयग्रहात्-ख
3 स्थापनादेव-क
4 विरोधज्ञानाभावश्च-ख
5 योग्येति-ख ग
6 ग्रहे-ग

[1]लिङ्गविशेषेण साध्यविशेषेण च विरोधे च विशेषविरोधः यथा चन्दन-प्रभववह्निमानकम् असुरभिधूमवत्त्वादिति ।

ननु ज्ञानत्वनित्यत्वयोः कर्तृत्वाशरीरित्वयोश्च परस्परविरुद्धत्वेन एकधर्म्यसमावेशात् कथं नित्यज्ञानादिकर्तृसिद्धिरिति चेत्—न । उपसंहार स्थानस्याभावात् । तथा हीश्वरे तदबुद्धौ चाशरीरित्वकर्तृत्वे बुद्धित्व-नित्यत्वे च उपसंह्रियमाणे विरुद्धे न तु स्वाश्रयस्थिते, उभयोच्छेद प्रसङ्गात् । न चेश्वरस्तदबुद्धिर्वोपस्थिता । उपस्थितौ वा धर्मिग्राहक-मानेन तयोर्विरोधापहारात् । अनुपस्थिते च तद्वये विरोधज्ञानमकिंचि-त्करमेव । अस्मदादिबुद्धौ व्योमादौ कुविन्दे मुक्तात्मनि चोपस्थिते विरोधोपसंहारात् । बुद्धित्वनित्यत्वयोः कर्तृत्वाशरीरित्वयोरनधिगमेऽपि ईश्वरे अशरीरिकतत्वनित्यज्ञानादिसिद्धिरप्रत्यूहैव । अत एव नित्यत्वावयव-त्वयोर्विरोधज्ञानमकिंचित्करमेवेति परमाणुसिद्धिः । ईश्वर तदबुद्ध्यादिकं तर्कितमिति चत्—न । तर्कस्य प्रसञ्जनस्य संशयस्य चाज्ञातेऽसंभवात् ।

प्रकाशः

उपसंहारेति । [2]यद्यप्येवं घटत्वपटत्वयोरपि विरोधो न स्यात्, तथापि[3]तदुभयाश्रयैक साधकमानाभावात् तत्र सिध्यति । प्रकृते [4]च न तदभावः । अत एव यत्र तत्साधकमनं तत्र विरोधभानमकिंचित्करमित्याह—अत एवेति ।

तर्कचूडामणिः

संहार उपस्थानाभावो नातःशब्दार्थः, उक्तदोषादेव किं तु तदुभयाश्रयसाधकरूपत्व-मित्याशयेनाह—अत इति ।

---

1 'लिङ्गविशेषणसाध्यविशेषणविरोधे च' इति पाठान्तरम् ।
2 यद्यपि-ग 3 तदुभयैक-ख
4 च तदवतारः । स्वत एव यत्र-क

स्यादेतत्। घटादौ कृतिसाध्यता हस्तादिव्यापारादिद्वारैव न तु साक्षात्। न च पितापुत्रयोरेकघटसाधनत्वमिव प्रयत्नहस्तादिव्यापारयोः साक्षात् साधनत्व वाच्यमिति वाच्यम्। घटार्थं [1]हस्तव्यापारादिना व्याप्रियमाणकुलालसमीपदेशस्थस्य हस्तादिव्यापारशून्यस्य तद्घटकर्तृत्वापत्तेः। न च हस्तादिव्यापारवत्ता अशरीरस्य संभवति। अन्यादृशी च कृति-साध्यता न दृष्टा। शरीरतद्व्यापारौ चाङ्कुरे बाधिताविति कर्तुरपि बाध एव। अन्यथा [2]तदनुमानात् क्षेत्रज्ञ एव कर्तानुमीयेत, बुद्ध्यादिमत्परात्मनो योग्यानुपलब्धिबाधाभावात्। शरीरव्यापारद्वारैव क्षेत्रज्ञस्य हेतुत्वात् शरीरव्या-पारस्य चाङ्कुरे बाधात् स बाधित इति चेत्—तर्हि कतमात्रस्यापि तद्द्वारैव चेष्टेतरकार्ये [3]कर्तृत्वदर्शनात् तद्बाधे कतमात्रबाधोऽपि। एवं च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकमिति स एवोपाधिः। एव ज्ञानेच्छयोरपि इच्छाकृतिद्वारा जनकत्वमिति कथं द्वारं विना क्षित्यादौ जनकत्वमिति।

प्रकाशः

साक्षात् साधनत्वमिति। तथा च कृतेर्न हस्तादिव्यापारो द्वारमिति भावः। **तददारैवेति।** यद्यपि सर्गाद्यकालीनघटादिकं प्रति शरीराधिष्ठातुरीश्वरस्य न बाधः, तथापि परेण तदनङ्गीकारादिति भावः। **चेष्टेतरेति।** यदि चाभेद[4]चिन्तनादेरपि अस्मदादिकतकत्वं [5]तदा तदितरेत्यपि बोध्यम्, तत्रापि [6]चेष्टाबाधादिति। **एवं चति।** चेष्टेतर[7]कार्य इद बोध्यम् **द्वारं विनेति।** द्वारत्वस्य जन्यत्वगर्भत्वादित्यर्थः।

तर्कचूडामणि

शङ्काशयमाह—**तथा चति।** **तदनङ्गीकारात्**—सर्गाद्यनङ्गीकारादित्यर्थः। तत्र मनोवहनाडीगोचरैव कृतिः न त्वात्मगोचरेति सूचनाय यदिशब्दः। चेष्टायां साध्याव्यसेराह—**चष्टेति।** ननु तज्जन्यजनकत्वे सति तदधिकरणोत्तरक्षणवर्तित्वं तद्द्वारत्वमीश्वरेच्छा कृत्योरपि। न हि तत्त्वे सति तज्जन्यत्वं द्वारत्वं गौरवादित्यत आह—**द्वारत्वस्येति।** चक्रादेर्दण्डव्यापारत्वापत्तिभयेन गौरवं प्रामणिकमिति भावः।

---

1 'हस्तव्यापारवत्कुलालसमीपस्थस्य' इति पाठान्तरम्
2 त्वदनुमानात् 3 कतृत्वावधारणात् 4 चिन्तनादावपि-ग
5 तदितर-क 6 चेष्टाभावादिति 7 कार्यत्वेनेदं-क

उच्यते । जन्यमात्रे हस्तादिव्यापारजनककृतित्वेन न जनकत्वम्, चेष्टायां कृत्यादौ च व्यभिचारात् । किं तु घटादौ तथा जनकत्वमिति जन्यमात्रे कृतिमात्रस्य जनकत्वविरोधिविशेषयोर्जन्यजनकभावे बाधकं विना सामान्ययोरपि तथाभावनियमात् । न हि विशेषे विशेषप्रयोजकत्वेन सामान्य प्रयोजकत्वविरोधः । चेष्टेतरकार्ये शरीरव्यापारद्वारैव कृतेर्हेतुत्वात् तेन विना क्षित्यादौ न कृतिसाध्यत्वमिति चेत्—न । चेष्टेतरकार्यमात्रं शरीरव्यापारजनककृतित्वेन न जनकत्वं, क्षित्यादौ व्यभिचारात्, किं तु तद्विशेषघटादौ इत्युक्तत्वात् ।

न चैवमास्वात्जडीकृतकलेवरस्य प्रयत्नादेव घटोत्पत्तिः स्यात्, हस्तादिव्यापारं [1]विनैव कृतेर्हेतुत्वादिति वाच्यम् । घटे कृतिवत् हस्तादिव्यापारस्यापि हेतुत्वात् । यद्युक्तम्—"क्षेत्रज्ञ एव कुतो नानुमीयते" इति । तत्र हस्तादिव्यापारककृतिमान् यदि क्षेत्रज्ञोऽभिमतः तदा हस्तादिव्यापारस्याङ्कुरे योग्यानुपलब्धिबाधात् ॥ अथ हस्तादिव्यापार-रहितकृतिमानभिमतः तदोमित्युच्यते । स एव भगवानीश्वरः ।

अत एव सहभावनिरूपकत्वे नियतपूर्ववर्तित्वं कारणत्वम् । समवाय्य समवायिनोस्तथात्वेन निमित्तेऽपि तथा भावात् । अन्यथा प्रतिबन्धका-भावानन्तरं प्रतिबन्धकसत्त्वकाले कार्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात् । न च कृतेः सहभावनिरूपकत्वं स्वतः, कार्यसमयेऽभावात् । तथा च तत्परिचायितव्यापारद्वारा तस्याः सहभावनिरूपकत्वम् । अतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलायाः इत्यपास्तम् ।

प्रकाशः

प्रत्युतानुकूलमित्याह — विशेषयोरिति ।

अन्यथेति ॥ प्रतिबन्धकाभावस्य [2]मिलित्वादिति भावः । प्रतिबन्धकाभावस्येति ।

---

1 विनापीति पाठान्तरम् 2 निमित्तत्वात्-ग

समवाय्यसमवायिप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात् । तेन [1]तेषामभावे विनाशक्षणे च न कार्यम् । अन्यथा प्रतिव्यक्ति कार्यसहभावनिरूपणे कार्योत्पत्तेः प्राक् सहभावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चयेन क्वापि प्रवृत्तिर्न स्यादिति तज्जातीयत्वस्याविनश्यवाच्यत्वे विनश्यदवस्थं कथंसहभावेनापि व्यवच्छेद्यम् । अतः स्वरूपयोग्यतारूपा कारणत तत्रापि । कार्याभावस्तु सहकारिविरहात् । अन्यथा निमित्तानां प्रत्येकं कार्यसहभावनिरूपकत्वन जनकत्वे गौरवम् । प्रागभावस्य

प्रकाश;

प्रतिबन्धकप्रागभावस्येत्यर्थः ।

अन्वयत्यतिरेकादिति । अन्यथा निराश्रयं रूपाद्युत्पर्द्येतेति भावः । तत्रापीति । विनश्यदवस्थेऽपीत्यर्थः । गौरवमिति । एतच्च वस्तुगतिमनुरुध्योक्तम् । वस्तुतः [2]सहचारगर्भेऽपि हेतुत्वे यत्र [3]सहचारो न स्वतन्त्रः, तत्रास्तु हस्तादिव्यापारद्वारा, प्रकृते तु नित्यकृतेः

तर्कचूडामणिः

ननु प्रतिबन्धकध्वंसो न प्रागस्ति, तदत्यन्ताभावश्च प्रतिबन्धककालेऽपीत्यत आह [4]प्रतीति । वयं तु पूर्वं सत्त्वादित्यस्य पूर्वं समवहितत्वादित्यर्थः । एवं चात्यन्ताभावपरत्वेऽपि न दोषः । तस्य नित्यत्वेऽपि प्रतिबन्धककाले तत्र समवधानाभावादित्यर्थ इति बूमः ।

नन्वस्तु प्रतिबन्धकाभाववदसमवायिनोऽपि कार्यसहभावेन हेतुत्वम् , कुविन्दादिसमवधानेऽपि तन्तुसंयोगनाशदशायां पटानुत्पत्तेः । समवायिनस्तु न तत्त्वेन हेतुत्वम् , व्यतिरेकाभावात् । न च तन्तुनाशदशायां पटोत्पत्त्यापत्तिः । [5]तन्तुनाशो यदि स्वसमवायिनाशात् तन्नाशस्यापि तथाविधहेतु[6]जन्यत्वे वाच्ये द्व्यणुकपर्यन्तं तथा नाशे द्व्यणुकनाशस्यासमवायि[5]नाशजन्यत्वेनासमवायि[7]नाशस्याणुद्वयविभागजन्यत्वेन विभागस्य क्रियाजन्यतया परमाणुक्रियाकाले

---

1 तेन तेषामग्रिमविनाशक्षणे
2 सहभाव–ख
3 सहभावख ग
4 प्रतीतीति–ग
5 तन्तुनाशे सति स्व–ग
6 जन्यत्वे साध्ये–ग
7 नाशस्य–ग

प्रतियोग्यजनकत्वप्रसङ्गाच्च। अन्यथा उत्पन्नोऽपि पुनरुत्पद्येत, सामग्रीसत्त्वात्।

न च स एव तत्र प्रतिबन्धकः। अभावान्तरस्य तत्राकारणत्वेन कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात्।

प्रकाशः

स्वत एव [1]तत्सहचार इति किं तदपेक्षयेति बोध्यम्। इष्टापत्तिमाशङ्क्य प्रागभवहेतुत्वं साधयति—**अन्यथेति**। **विश्रामादिति**। एतेन [2]प्रतियोगिप्रतिबन्धकत्वाभ्युपगमेन[3] सर्वत्र प्रतिबन्धकाभावेऽपि [4]न कार्यसहभूतत्वेन जनकत्वम्। किं तु यत्र [5]तथान्वयाद्यनुविधानं [6]तत्रैव तथेति विभावितम्। अत एव विशिष्ट[7]सिद्धेः प्रतिबन्धकत्वेऽपि [8]तद्विरहरूपाया

तर्कचूडामणि

द्व्यणुकादिक्रियावश्यंभावेन तन्त्ववयवक्रियाकालस्य तन्तुक्रियाकालतया तन्तुसंयोगनाशस्य तन्त्ववयवसंयोगनाशसमकालतया तदव्यवहितोत्तरसमयतया वा तन्तुनाशकाले असमवायिकारण-विलम्बादेव तद्विलम्बात्। एवमसमवायिनाशस्य तन्तुनाशहेतुत्वेऽपि योज्यम्। अत एव वक्ष्यति—"स्वरूपयोग्यतारूपा हेतुता तत्रापि, कार्याभावस्तु सहकारिविरहात्" इत्यत आह—**अन्यथेति**। विनाशसामग्रीकालीन[9]घटे तेजस्संयोगात् घटनाशकाले रूपोत्पत्त्यापत्ति-रित्यर्थः। कार्यसहभूतत्वेन हेतुत्वस्यान्यथाशब्दार्थत्वं वारयितुमाह—**इष्टेति**। तथा च प्रागभावस्य प्रतियोग्यहेतुत्वं तदर्थ इति भावः। नन्वेवं प्रतिबन्धकाभावस्य कार्यसहभूतत्व-नियमोक्तिविरोध इत्यत आह—[10]**एतेनेति**।

---

1 तत्सहभाव—ख ग
2 प्रतियोगिनः प्रति--ख
3 गमेऽपि न सर्वत्र—ख
4 कार्य— ख
5 यथा वय-क
6 तत्रथेति-ख
7 बुद्धेः—ख
8 तद्विरहरूपप्रमायां पक्षताया कारणत्वमिति—ख
9 घटतेज—ग
10 एतेनेति—ग

न चैका सामग्री एकदा एकमेव कार्यं जनयति स्वभावादिति वाच्यम्। सामग्रीतद्विरहस्य कार्यतदभावप्रयोजकत्वेन सामग्र्यां सत्यां कार्यस्य, तदभावे [1]कार्याभावस्य वज्रलेपायितत्वात्।

प्रकाश.

पक्षताया न तथा कारणत्वमिति। **एकदेति**। एकमिति संपातायातम्।

तर्कचूडामणि

संपातेति। [2]उत्पन्नस्यैव पुनरुत्पत्त्यापादनेन कार्यन्तरापादनेन एकपद[3]स्यासंगतत्वादिति भावः। नन्वेवमपि न प्रागभावो हेतुः, स्वव्यतिरेकेण कार्याव्यतिरेकात्। उक्तस्थलेऽपि उपन्नघटसत्त्वेन व्यतिरेकाभावात्। न चोत्पत्त्यवच्छिन्नघटाभावस्तत्रास्ति, स एव सर्वत्र कारणाभावप्रयोज्य। इति वाच्यम्। प्रागभावध्वंसकालस्य त्पत्तिकालतया प्रागभावविरहकाले उत्पत्तिविशिष्टकार्याभावाभावात्। किं चोत्पत्तिराद्यसमयसंबन्धः। समयो घटादिश्च तदिरहश्च न प्रागभावविरहात्, किं तु आद्यसमयविरहादेव। न च स एव न कुत इति वाच्यम्। स्वकारणाधीनस्य तस्य दण्डाद्यप्रयोज्यत्वादिति चेत्—न।

यदभावे स्वानन्तरक्षणे उत्पत्तिविशिष्टकार्याभावः तस्य कारणत्वमिति विवक्षितत्वात्। किं च न केवलं कालगर्भो व्यतिरेकः, किं तु देशगर्भोऽपि। प्रदेशान्तरे दण्डे सत्यपि प्रदेशान्तरे घटानुत्पत्तेः। तथा ह मृत्पिण्डान्तरे[4] जायमानो घटो मृदन्तरे जायेत। यदि न हेतुः मृदन्तरस्य घटान्तरेऽपि स्वरूपयोग्यत्वात्। न च प्रागभावेऽपि दोषः। त प्रतियोगिकड प्रागभावत्वेन तस्य हेतुतया मृदन्तरे तत्प्रागभावाभावात्। न च [5]ममापि तत्तत्पिण्डत्वेनापि तत्तत्कार्यं प्रति हेतुतेति वाच्यम्। यत्र कैश्चित् तन्तुभिः पट एकस्मिन्नारब्धे पुनरपि तैरेव पटान्तरं पूर्वपटविनाशे सति उत्पद्यते तत्र प्रथमपटोत्पत्तिवेलायां द्वितीयोत्पत्त्यापत्तिः। न च [6]तवापि तदा द्वितीयपटप्रागभावस्य तत्र सत्त्वेन दोषसाम्यमिति वाच्यम्। तत्र प्रागभावद्वयघटित त[7]सामग्र्याः फलबलेन प्रतिबध्यप्रतिबन्धकभावकल्पनात्, धारावाहिकस्थले पूर्वज्ञानसामग्र्या उत्तरज्ञानसामग्रीप्रतिबन्धकत्ववत्: न हि सामग्र्यभेदे तवैवंविधपरिहार उपपद्यत इति दिक्।

---

1 सामग्रीविरहस्येति पाठान्तरम्। 2 एतेनेति-ग
3 स्यासंगत्वात्-क 4 सत्यपि-क
5 तथापि-ग 6 तदापि ग
7 सामग्र्योनिफल क

स्यादेतत् । कर्ता शरीरेण ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव कृतिद्वारैवेच्छा हेतुरित्यादिप्राथमिकव्याप्तिप्रत्यक्षविरोधात् नाशरीरनित्यज्ञानादिकर्तृसिद्धिः । अत एव शरीरमनित्यमेवेति नियमान्न कर्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे । न चाप्रयोजकत्वम् : निरुपाधित्वेन शङ्काकलङ्कानवतारात् । कार्यत्वसकर्तृकत्वयोर्यदि निरुपाधिकत्वमस्ति तदापि तुल्यबलत्वेन [1]सत्प्रतिपक्षात् तत्प्रतिबन्धोऽस्तु । न च कार्यत्वं पक्षधर्मताबलात् बलीयः, कर्ता शरीरेणेत्यादौ तु तन्नास्तीति वाच्यम् । ज्ञानमनित्यमिति व्याप्तेरेव क्षित्यादौ ज्ञानजन्यत्वविरोधित्वात् ।

एवं कार्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव । अविरोधे तु द्वयमपि स्यात् । तथा च क्षित्यादौ शरीरनित्यज्ञानपर्यवसाने [2]विरोध एव स्यात् ।

प्रकाशः

एकदैव जनयतीत्येव प्रकृतसंगतेरिति । बुद्धिरिति । कर्तृत्व[3]निर्वाहकं हेतुत्वं बुद्धेरिच्छाद्वारैवेति भावः । सत्प्रतिपक्षवदिति । एतेन सत्प्रतिपक्षच्छाययैवास्याः व्याप्तेः प्रतिबन्धकत्वे हेत्वाभासा[4]न्तरस्वशङ्का नेति दर्शितम् । बलीय इति । तथा च न सत्प्रतिपक्षत्वं [5]तुल्यबलत्वाभावादिति भावः । विरोधित्वादिति । तथा च पक्षधर्मताविनाकृताया अपि तस्या विरोधित्वात् तुल्यबलत्वैमस्त्येवेति भावः ।

तर्कचूडामणिः

स्वप्रत्यक्षादौ बुद्ध्यादेः साक्षाद्धेतुत्वादाह—कर्तृत्वेति । अस्त्येवेति । तथा च या व्याप्तिः पक्षधर्मतया विना न विरोधिनी तस्या एवानुमितिप्रतिबन्धकत्वे पक्षधर्मता तन्त्रमिति भावः ।

---

1 सामग्रीविरहस्येति पाठान्तरम् 2 बाध एवेति पाठान्तरम्
3 निर्वाहकहेतुत्वं-ख 4 न्तरशङ्का-क
5 तुल्यबलाभावात्-क

किं च ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेः तदव्यावर्तकतया नोपाधित्वनिश्चयः तत्संशयो वा। कार्यत्वसकर्तृकत्वव्याप्तिग्रहदशायां शरीरव्यापाराव्यभिचारात् उपाधेर्निश्चयः संशयो वास्तीति।

तन्न। ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः। विपक्षबाधकाभावेनाप्रयोजकत्वात्। निरुपाधिसहचारदर्शनव्यभिचारादर्शनादेव व्याप्तिग्रहः, निरुपाधित्वमेव वा विपक्षे बाधकमिति चेन्न। अवयवो महानेव तेज उद्भूतरूपमेवेत्यादित्याप्तिग्रहात् परमाणुनेत्रादेरसिद्धिप्रसङ्गात्।

प्रकाशः

किं चेति। ज्ञानमनित्यमेवेति व्याप्तौ संसारिज्ञानत्वनित्यज्ञानान्यज्ञानत्वादिकमुपाधिर्वाच्यः। स चेश्वरनित्यज्ञानयोर्व्यावर्त्ययोरभावान्न संभवतीत्यर्थ इत्याहुः।

वयं तु ज्ञानमनित्यमेवेति व्याप्तौ अनित्यत्वरूपसाध्यव्यापकस्योपाधेर्ज्ञानत्वरूप[1]साधनाव्यापकत्वं नास्मदादिज्ञाने ग्राह्यम्। तत्रोपाधि[2]सद्भावादेवानित्यत्वस्य [3]तद्व्याप्यस्यास्मदादिज्ञानेऽपि[4] सत्त्वात्। अन्यथा साध्यव्यापकत्वेनैवानुपाधित्वसिद्धेः। तथा च नित्यज्ञाने साधनाव्यापकत्वं ग्राह्यम्। तच्च न संभवति, तदसिद्धेः। अत एवाह—[5]तदव्यावर्तकतयेति। [6]तत्र ज्ञानत्वरूपसाधनाव्यापकतया य उपाधिस्तन्निश्चयः तत्संशयो वा नास्तीत्यर्थ इति विभावयामः। उपाधेरिति।

तर्कचूडामणि

भावः। व्यापके व्यर्थविशेषणत्वस्यादोषतया [7]तादृशज्ञानत्वस्य साध्यव्यापकता स्यादेव नित्यान्यज्ञानत्वं चोपाधिरिति नाप्रसिद्धिरित्यपरितुष्यन् [8]साधनाव्यापकत्वाभावान्नोपाधिसंभव इत्याशयमाह—वयं त्विति।

---

1 साधनव्यापकत्व –क
2 संभवादेव-क
3 तद्व्यापकस्य-ख
4 ज्ञाने-क
5 तदव्यापकतयेति-क
6 तत्र च साधनव्यापकतया रूपादिनिश्चयः-क
7 तादृशज्ञानत्वस्य-क
8 साधनाव्यापकत्वात्-ग

अथ द्रव्यचाक्षुषेऽनेकद्रव्यवत्त्वस्य, साक्षात्कारे विषयेन्द्रियसंनिकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादि सिद्धौ विरोधिव्यक्तेर्बाधः न तु वैपरीत्यं विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे; तर्हि [1]ज्ञानादिकार्यकारणभावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात् पक्षधर्मताग्रहसहितात् नित्यज्ञानादिसिद्धौ व्यभिचारान्न व्याप्तिः। अन्यथा साध्यं पक्षातिरिक्त एवेत्यादिनिरुपाधि सहचारात् व्याप्तिग्रहे सकलानुमानोच्छेदः।

वयं तु ब्रूमः। पक्षधर्मताबलान्नित्यं ज्ञानं सिध्यत् बुद्धिरनित्यैवेति व्याप्तिप्रत्यक्षेण न प्रतिबध्यते। अस्मदादिबुद्धिविषयकत्वेन भिन्नविषयकत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्रव्येऽविरोधात्। बुद्धिमात्रेऽनित्यत्वावगमात् कथं [2]तद्विशेषे नित्यत्वबुद्धिरिति चेत्—न। बुद्धिमात्रस्येश्वरानीश्वरबुद्धिपरत्वे विरोधात् व्यभिचाराच्च। अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात्।

प्रकाशः

शरीरव्यापार[3]जन्यत्वरूपस्येत्यर्थः। ननु यथा ज्ञानादिकार्ययोः कार्यकारण[3]भावस्तत्र विपक्षबाधकः [4]तथात्रापि ज्ञानत्वानित्यत्वयोः निरुपाधित्वस्य व्यवस्थापितत्वात् तदेवविपक्षबाधकमस्तु इत्यपरितोषादाह—इयं त्विति। यद्यपि ज्ञानत्वावच्छिन्ने [5]सर्वत्र

तर्कचूडामणि

[6]अव्यभिचारोपदर्शनेन शरीरव्यापारस्योपाधित्वं प्रतीयमानं घटादौ साध्याव्यापकत्वादयुक्तमित्याशङ्क्याह—शरीरेति। [7]"बाधोऽपीति। तस्य प्रसिद्धाभावमात्र[8]विषयत्वसंभवादिति

---

1 ज्ञानादिकार्ययोः कार्यकारणेति पाठान्तरं प्रकाशसंमतम्।
2 जन्यत्वस्योपाधेरित्यर्थः—ख
3 भावो विपक्षे बाधकः—क
4 तथा ज्ञानत्वानित्यत्व—क
5 सर्वत्रव—ख ग
6 व्यभिचारप्रदर्शने—ग
7 भावोऽपीति—ग
8 विषयत्वादिति—ग

बुद्धित्वं नित्यावृत्त्येवेत्यवगतम् अतस्तत्र कथं नित्यवृत्तित्वावगम इति चेत्—न। उभयसिद्धनित्यावृत्तित्वावगमेऽप्यतिरिक्तनित्यवृत्तित्वावगमे विरोधाभावात्।

बुद्धित्वमनित्यत्वव्याप्यमवगतं नानित्यत्वाभाववति ज्ञातव्यमिति चेत्—न। अनित्यत्वव्याप्यमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव। एतेन कर्ता शरीर्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमिति निरस्तम्।

ननु कर्तृजन्यत्वे जन्यत्वं नावच्छेदकम्, किं तु घटत्वादिकमेव, तेनैव रूपेणान्वयव्यतिरेकग्रहात् आवश्यकत्वाच्च। अननुगतमपि जन्यतावच्छेदकम्, वह्निजन्यतायां धूमत्वादिवत्।

अथ घटत्वादिवज्जन्यत्वमवच्छेदकम्। न हि विशेषोऽस्तीति सामान्यमप्रयोजकम्। तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत्। तस्मात् यद्विशेषयोः कार्यकारणभावः तत्सामान्ययोरपि बाधकं विना तथात्वनियम इति चेत्—न। तत्र बाधकाः

प्रकाशः

अनित्यत्वावगमात् [1]तदवच्छिन्ने न नित्यत्वावगमः। अन्यथा [2]बाधोऽपि प्रतिबन्धको न स्यात्। तथापि सामान्यलक्षणानङ्गीकर्तुस्तादृश[3]ज्ञानमेव न भवति। भिन्नविषयकं च ज्ञानं न प्रतिबन्धकम्। क्वचिन्नास्तीति ज्ञानानन्तरं क्वचिदस्तीति ज्ञानस्यानुभवसिद्धत्वात्।

तर्कचूडामणि

भावः। अस्मन्मते त्विति। न चोपाध्यभावेऽनुकूलस्तर्क इति वाच्यम्। साध्यवत्त्वप्रमादेरन्यत उपाधित्वसंभवात्। तदुक्तम्—'व्यभिचारे चान्यतः साध्यमेवोपाधिरिति'।

---

1 तदवच्छेदेन–क 2 बोद्धापि–ख
3 ज्ञानं–क

भावात्। अत्र च ज्ञानमनित्यमेवेत्यादिप्राथमिकबहुव्याप्तौ बाधात्। तुल्यत्वे वा व्याप्तिसंशयाधायकत्वात्। न च कार्यकारणभावमूलकत्वेन [2]कार्यत्वव्याप्तिर्बलीयसीति वाच्यम्। विरोधिप्रत्यक्षेण कार्यकारणभावस्यैवासिद्धेः।

एतेन धूमादौ वह्निजन्यतावच्छेदकमनुगतं न संभवति। इह तु जन्यत्वमनुगतमस्ति। अतो बाधकं विना न मुच्यत इति, निरस्तम्। ज्ञानमनित्यमेवेत्यादिसहचारावसायस्य बाधकं विना [3]पक्षधर्मव्याप्ति[4]पर्यवसायित्वेन बाधकत्वादिति।

मैवम्। निरुपाधित्वेन सहचारावसायस्य साधकंबाधकं चविना साधरण्येन व्याप्तिसंशयाधायकत्वात्। अन्यथा साध्यं पक्षातिरिक्त एव-

---

प्रकाशः

अस्मन्मते तु विपक्षबाधकाभावेन तादृशव्याप्तेरेवासिद्धिः[5]। न चैवं बाधोऽपि प्रतिबन्धको न स्यात् भिन्नविषयवादिति वाच्यम्। सामान्यलक्षणानङ्गीकर्तुरिदमनिष्टं नास्माकमित्याशयात्। सामान्यरूपेण कार्यकारणभावे सति उक्तरूपज्ञानमप्रामाण्यश[6]ङ्काकलङ्कीकृतमिति न प्रतिबन्धकवमिति वदन्ति। [7]व्यापिपर्यवसायितयेति। व्याप्तौ पर्यवसिततयेत्यर्थः।

तर्कचूडामणिः

न चेति। तन्मत इति शेषः।

उक्तव्याप्तिज्ञानात कार्यकारण[8]भाव एव कुतो न तदाशङ्का। यदि च तर्कसत्त्वासत्त्वे नियामके तत एव कव व्याप्तितदभावौ ग्राह्यौ इत्यस्वरसं सूचयति-अपीति। ज्ञानस्य न विषयरूपतया पर्यवसानमित्यत आह-व्याप्ताविति। पर्यवसायित्वं निश्चायकत्वं बोध्यम्।

---

1 व्याप्तिर्बाधात्, इति पाठान्तरम्
2 कार्यत्वसकर्तृकत्वव्याप्तिः इति पाठान्तरम्
3 व्याप्ति
4 पर्यवसायितयेति प्रकाशसंमत पाठ
5 असिद्धे
6 शङ्कास्कन्दितमित्यप्रतिबन्धकमित्यपि-ख
शङ्कारकन्दितमिति न प्रतिबन्धकमित्यपि-ग
7 व्याप्तेति-ख ग
8 भावज्ञान एव-ग

सुखं दुःखसंभिन्नमेवेत्यादित्याप्तिग्रहस्य कार्यकारणभावग्राहकबाधकत्वे तत्संशयाधायकत्वे वा [1]कार्यान् कारणानुमानोच्छेदे निरीहं जगज्जायेत। तस्मात् यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोः कार्यकारणभावो बलवता बाधकेनापनीयते। न चात्र तदस्ति। विरोधिव्याप्तिसाधकस्य विपक्षबाधकस्याभावात्।

नव्यास्तु कार्यं कर्तृजन्यमिति व्याप्तितोऽशरीरनित्यज्ञानकर्तृपस्थितौ ज्ञानमनित्यमेवेत्यनेन विरोधप्रतिसन्धानं न तु तां विना, प्रतियोग्यनुपस्थितौ विरोधानिरूपणात्। तथा चोपजीव्यबाधात् ज्ञानमनित्यमेवेति व्याप्तिज्ञानमकिंचित्करमेव। अत एव पक्षधर्मताविनाकृतं विरोधिव्याप्तिज्ञानं न हेत्वाभासतयोक्तम् विरोधप्रतियोगिसिद्ध्यसिद्धिपरहतत्वादिति।

प्रकाशः

नव्यास्त्विति। ज्ञानमनित्यमेव कार्यं ज्ञानजन्यमेव इत्यनयोः [2]स्वरूपतो विरोधाभावात्। द्वितीयव्याख्या पक्षधर्मतासहितया नित्यज्ञानोपस्थापने सति स स्यात्। तथा च विरोधज्ञानमकिंचित्करमेव[3] उपजीव्यविरोधादित्यर्थः। अत्रेदमनभिमतिबीजम्। ज्ञानमनित्यमेवेत्यनेन ज्ञानत्वावच्छेदेनानित्यत्वावगमात् पक्षधर्मताबलादपि ज्ञाने न [4]नित्यत्वावगमः। नित्यत्वानित्यत्वयोर्विरोधस्य पूर्वावधृतत्वादिति[5] परस्याभिमतम्. [6]न तु तस्य नित्यत्वानित्यत्वयोर्विरोधप्रतिसन्धानं प्रतिबन्धकत्वेनाभिमतम्, येनोपजीव्यविरोधः स्यात्। तथा च पूर्वोक्तमेव समाधानं द्रष्टव्यम्।

तर्कचूडामणिः

ननु ज्ञानमनित्यमेवेति व्याप्तिर्विरोधात् कार्यत्वस्य ज्ञानजन्यत्वव्याप्तिग्रहस्यैवासंभव इत्यत आह—ज्ञानमिति। अभावादिति। ग्राह्याभावानवगाहित्वादित्यर्थः।

---

1 'कार्यान्' इति न दृश्यते क्वचित्
2 स्वरूपसतोः—ख
3 करं—ख ग
4 नित्यत्वग्रह.—ख ग
5 इति हि—ख
6 नित्यानित्यज्ञानयोः—ख ग

स्यादेतत्। अस्तु शरीरजन्यत्वमुपाधिः। न च पक्षेतरत्ववत् पक्षमात्रव्यावर्तकविशेषणवत्त्वात् साधनविशेषितत्वात् साधनतुल्ययोगक्षेमत्वेन साध्यव्यापकत्वानिश्चयाच्च नोपाधित्व[1]मिति वाच्यम्। चेष्टेतरकार्येषु शरीरव्यापारद्वारैव कर्तुः कारणत्वात् शरीरसहकृतस्यैव स्वकार्ये कारणत्वाच्च। न हि शरीरविनाकृतः कर्ता शरीरक्रियां [2]चेष्टां घटादिकं[2] वा जनयति। न च यत्सहकृतं यज्जनकं तेन विना तज्जनकम्। अतोऽर्थाच्छरीरजन्यमेव कर्तृजन्यमिति साध्यव्यापकत्वनिश्चयात्। पक्षेतरत्वादौ च विपक्षबाधकाभावान्न साध्यव्यापकतानिश्चय इति तेषामनुपाधित्वे बीजम्। अत एव बाधोन्नीतं वह्नीतरत्वं वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभवत्वं वह्निमत्त्वम्, रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वमुपाधिः। विपक्षबाधकैस्तेषां साध्यव्यापकत्वनिश्चयात्।

न च साधनविशेषितत्वमपि। जन्यत्वं हि प्रागभावप्रतियोगित्वम्। शरीरजन्यत्वं च शरीरकारणवत्त्वम्। अन्यानिरुक्तेः। इतरपदसमभिव्याहारेण जन्यपदादितरकारणकस्यैव प्रतीतेस्तदर्थकत्वकल्पनादिति विधौ वक्ष्यते।

प्रकाशः

साधनेति। यद्यपि समवेतत्ववटितं साधनम्, तच्च न [3]विशेषितम्। तथापि ध्वंससाधारणपक्षत्वे जन्यत्वमात्रस्यैव साधनत्वमिति तदभिप्रायेणेदम्। साधनविशेषितवत् साधनैकदेशविशेषितोऽपि नोपाधिरित्यभिप्रायेणेदं बोध्यम्। आर्द्रेन्धनेति। इदं च

तर्कवडामणिः

तर्हि प्रथमानुमाने इयमुपाधिः स्यात् तदविशेषितत्वादित्यत आह--साधनेति।

---

1 उपाधित्वं क्वचित् 2 घटादिकं क्वचित्
3 विशेषणम्—क

अत एव शरीरिकर्तृकत्वमुपाधिः शरीरसहकृतस्यैव कर्तुः कारणत्वात् । व्याप्यं व्यापककोटावनिवेशयत एव प्रमाणस्य व्याप्तिग्राहकत्वात्। शरीरिकर्तृकत्वसकर्तृकत्वयोर्न व्याप्तिग्रह इति चेत् न। विशिष्टाविशिष्टभेदेन व्याप्यव्यापकभावाविरोधात् । अत एव जन्यत्वेन कारणजन्यत्वमनुमीयत इति ।

मैवम् । कर्तुर्हि शरीरसहकारिता किं घटादौ कर्तव्ये कार्यमात्रे वा स्वकार्ये वा । आद्ये कर्ता शरीरं विना घटादिकं न करोतीति किमायातं कर्तुः कार्यमात्रकरणे । द्वितीये च कार्यमात्रं कर्तृजन्यमिति न त्वया स्वीक्रियते । स्वीकारे वा शरीराजन्यमपि कार्यं कर्तृजन्यमिति साध्याव्यापकत्वम् । तृतीये तु स्वजन्यत्वं न स्वजन्यतावच्छेदकम् , आत्माश्रयात् तथापि यत्र सकर्तृत्वमस्ति तत्र शरीरजन्यत्वमावश्यकमिति तस्य साध्यव्यापकत्वम् , तुल्ययोगक्षेमत्वेन हेतुव्याप्यतासंशयाधायकत्वेन संदिग्धो-

---

प्रकाशः

पक्षमात्रव्यावर्तकविशेषणस्य साधनविशेषितस्य चोदाहरणं बोध्यम् । व्याप्यमिति । अभेदे व्याप्तिरूपसंबन्धाग्रहादिति भावः । विशिष्टेति । तथा च संबन्धितावच्छेदकभेदात् संबन्धग्रहो नानुपपन्नः नीलघटयोरभेदसंबन्धग्रहवदिति भावः । कारणजन्यत्वमिति । यद्यपि पदान्तरसमभिव्याहृतजन्यत्वस्य तत्कारणकत्वार्थत्वेन 'नात्र व्याप्यस्य व्यापककोटिप्रवेशः । तथापि कारणजन्यत्वं कारणप्रागभावव्यापकप्रागभावप्रतियोगित्वं, [2]प्रागभावप्रतियोगित्वमात्रं जन्यत्वं विवक्षितम् । शरीरजन्यत्वोपाधौ तु शरीरकारणकत्वमेव विवक्षितम् । तेन तस्य पूर्वोक्तसाधनविशेषितत्वोद्धारो नासंगत इति भावः ।

तर्कचूडामणिः

व्याप्तिरविरुद्धेत्यत आह-अभेद इति । आपातत्र इदम् । वस्तुतः संयोगादेर्व्याप्तिरूपत्वे तस्य द्विष्ठत्वेन वह्न्यादेरपि व्याप्यत्वापत्त्या तादृशसाध्याधिकरणवृत्तित्वे धर्मान्तरं धूमादिमात्रवृत्तीत्यवधेयम् ।

---

1 तत्र व्याप्यव्यापक-भ 2 जन्यत्वं-क

3 विशेषितोद्धारो-ख

संदिग्धोपाधित्वं वेति चेत्—न। लाघवेन बाधकं विना कर्तृजन्यत्वे सति जन्यत्वमवच्छेदकम्, न तु शरीरजन्यत्वं गौरवात्। तथा च शरीर-जन्यत्वं न सकर्तृकत्वव्यापकम्। घटादौ त्वार्थः समाजः। घटत्वेन शरीरजन्यत्वनियमात्। न तु व्यापकत्वप्रयुक्तः। मानाभावात्। शरीरजन्यत्वं न सकर्तृकत्वव्यापकं तद्व्याप्यजलत्वाव्यापकत्वात् नित्यत्ववदिति बाधकात् हस्तादिनापि कतत्वनिर्वाहेण शरीरस्याप्रयोजकत्वात्। प्रयत्नाधिष्ठे यजन्यत्वस्य साधनव्यापकत्वाच्च। शरीरकर्तृकत्वमपि नोपाधिः। जन्यमात्रे कर्तृः शरिरसहकारिताविरहात्।

प्रकाशः

ननु स्वजन्यत्वं न स्वजन्यतावच्छेदकमुक्तम्, किं तु स्वजन्ये शरीरं सहकारीति। तथा च स्वजन्यत्वं शरीरजन्यतावच्छेदकम्। एवं च शरीर[1]जन्यत्वस्य कर्तृजन्यत्वव्यापकत्वात् [2]तदव्याप्यवत्वेन जन्यत्वस्यैव सकर्तृकत्वाव्याप्यत्वमनुमेयमित्यपरितोषादाह—हस्तादिनापीति। साधनेति। परमाण्वादीनामपि साक्षात् ईश्वरप्रयत्नाधिष्ठितत्वेन तज्जन्यत्वस्य [3]पक्षे संभवादिति भावः। न च चेष्टाजन्यत्वमुपाधिः। चेष्टायामेव साध्याव्यापकत्वात्। न च चेष्टाश्रयजन्यत्वं तथा। अदृष्टद्वारा 'क्षित्यादेरपि तज्जन्यत्वात्। यद्यप्यदृष्टाजनकचेष्टाश्रयजन्यत्वोपाधौ नोक्तदोषः तथापि विपक्षबाधकतर्काभावान्नास्य' साध्यव्यापकत्वमिति भावः।

तर्कचूडामणिः

स्वपदं शरीरपरमात्मपरं वा। तत्राद्ये मूलकृता दूषणमुक्तमनूद्य द्वितीयं गृह्णाति नन्वित्यादिना। स्वजन्य इति। आत्मजन्य इत्यर्थः। स्वजन्यत्वमिति आत्मजन्यत्वमित्यर्थः। जन्यत्वस्येति। एतच्च ध्वंसासाधारणपक्षत्वे द्रष्टव्यम्। ननु पक्षे उपाधिविरहात् कथं तद्व्यापकतेत्यत आह—परमेति।

तज्जन्यत्वादिति। तथा च साधनव्यापकतेति भावः। यद्यपीति। यद्यपि घटादौ साध्य[illegible] [illegible]रस्यादृष्टजनकत्वात्। न चाजनकत्वं चेष्टाविशेषणम्, तथा

1 जन्यत्व-क
2 तदव्याप्यत्वाज्जन्यत्वस्यैव सकर्तृकत्वव्याप्यत्व-ग
3 पक्षेऽपि ख
4 क्षित्यादेरपि क
5 साध्य क

अथ यद्विशेषयोः कार्यकारणभावः तत्सामान्ययोरपि बाधकं विना तथा नियम इति त्वया निरटङ्कि। तथा च कर्तृविशेषशरीरजन्यविशेषयोः कार्यकारणभावनियमात् कर्तृमात्रशरीरजन्यमात्रयोरपि तथाभावः। तथा च शरीरजन्यत्वं कर्तृजन्यतावच्छेदकमिति भवत्युपाधिः।

न चैवं घटत्ववच्छरीरजन्यत्वं सकर्तृकत्वव्याप्यं न तु व्यापकमपीति वाच्यम्। उभयसिद्धसकलसकर्तृकवृत्तित्वेन साध्यव्यापकतानिर्णयात्। जन्यत्वेऽपि सकर्तृकत्वव्याप्यत्वग्राहकमस्तीति चेत्—तर्हि उभयत्र व्याप्तिग्राहकसाम्ये विनिगमकाभावात् व्याप्तिसंशयाधायकत्वेन संदिग्धोपाधिर्व्याप्यत्वासिद्धिर्वा। हेतुव्याप्यतासंशयाधायक एव हि संदिग्धोपाधिः। स च साध्यव्यापकत्वे साधनाव्यापकत्वे वा उभयत्र वा संदेहात्।

न च वाच्यं शरीरजन्यत्वसकर्तृकत्वयोरन्वयव्यतिरेकज्ञाने जन्यत्वसकर्तृकत्वयोस्तद्ग्रह आवश्यक इति लाघवात् तयोरेव व्याप्तिग्रहो न

प्रकाशः

उक्तोपाध्यभिप्रायेणैव साध्य[1]व्यापकत्वग्राहकं शङ्कते—अथेति। शरीरेति। चेष्टाश्रयेत्यर्थः।

शरीरजन्यत्वेति। ननु शरीरजन्यत्वं शरीरकारणकत्वमुक्तम्। अन्यथा साधनविशेषित-

---

तर्कचूडामणिः

च तादृशचेष्टाविशेषमादाय घटे साध्यसत्त्वमिति वाच्यम्। तथा सति तादृशचेष्टाश्रयादृष्टद्वारकशरीरजन्यत्वस्य पक्षे सत्त्वेन साधनव्यापकतापत्तेः। तथापि स्वजनकादृष्टाद्वारकत्वमदृष्टाजनकपदेन विवक्षितमिति भावः। ननु शरीरजन्यत्वस्य साधनव्यापकत्वात् हस्तादिजन्ये साध्याव्यापकत्वाच्च उपाधित्वाशङ्कानुपपत्तिरित्यत आह—उक्तेति। उक्ताभिप्रायेणाह—चेष्टेति। ननूपस्थितिलाघवमकिंचित्करम्, शब्दादिना युगपदुभयोपस्थितौ वस्तुलाघवस्यैव

---

1 व्यापकता - क

तूपाधिसाध्ययोः। हेतुसाध्ययोरन्वयव्यतिरेकज्ञानं च शरीरजन्यत्वानवगमेऽपि भवतीति विनिगमकमिति। यतो न कर्तृमात्रजन्यमात्रयोरन्वयव्यतिरेकाभ्यां व्याप्तिग्रहः, कर्तृमात्रस्य व्यतिरेकाभावात्। किं तु विशेषयोः अन्वयव्यतिरेकेण कार्यकारणभावेन वा सामान्ययोस्तथात्वग्रहः, तौ च तुल्यावेवेति चेत्-

उच्यते। अस्तु तावत् घटत्ववत् जन्यत्वशरीरजन्यत्वयोरपि कर्तृजन्यतावच्छेदकत्वेन सकर्तृकत्वव्याप्यत्वम् ग्राहकसमानतयात् विनिगमनाभावात् विरोधाभावाच्च। सकर्तृकत्वव्यापकत्वं तु शरीरजन्यत्वस्य कुतः? घटत्ववद्व्यापकस्यापि जन्यतावच्छेदकत्वात्। उभयसिद्धसकर्तृकेऽन्वयव्यतिरेकाभ्यां शरीरजन्यत्वस्य व्यापकत्वग्रह इति चेत्—न। शरीरजन्यत्वविनिवेद्यत्वेन तुल्यन्यायेन च प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं कल्प्यमिति तद्विरोधेन शरीरजन्यत्वस्य सकर्तृकत्वव्यापकत्वानवगमात्।

प्रकाशः

त्वापत्ते। तथा च कथं तद्ग्रहे जन्यत्वग्रह आवश्यक इति चेत् अत्र केचित्—शरीरजन्यत्वस्य गुरुत्वात् यावन्न तस्य व्यापकत्वग्रहस्तावदेव कर्तृजन्यत्वे जन्यत्वमवच्छेदकीकृत्य गृहीतम् उपस्थितिलाघवादित्याहुः।

अन्येतु—सकर्तृकत्वग्रहः प्रथममवश्यं वाच्यः। अन्यथा शरीरजन्यत्वस्य तद्व्यापकत्वासिद्धेः। तत्र चावच्छेदकत्वग्रहः प्राथमिक इत्यवच्छेदकं लाघवात् जन्यत्वमेव न त्वन्यदित्यभिप्रायकोऽयं ग्रन्थ इत्याहुः।

उक्तास्वरसेनैवाह-तुल्यन्यायेनेति[1]। तद्विरोधेनेति। न हि संभवति शरीरजन्यत्वं

तर्कचूडामणिः

वाच्यत्वात् इत्याशयेनाह-अन्ये त्विति। असिद्धेरिति। अनिश्चयादित्यर्थः। एतच्चोपलक्षणम्। अवच्छेदाग्रहे शरीरजन्यत्वग्रहासंभवाच्चेत्यपि द्रष्टव्यम्। अन्यदिति। घटत्वादिकमित्यर्थः।

उक्तेति। जन्यत्वशरीरजन्यत्वयोर्भिन्नघटितत्वेन तुल्यवित्तिवेद्यत्वादिति भावः। ननु परस्परविरहानात्मकत्वेन तदवगमे न विरोध इत्यत आह-न हीति। तद्व्यापकत्वानवगमस्या

---

1 न्यायत्वेनेति—ख

अत एव न संदिग्धोपाधित्वम् ।

ननु घटादौ शरीरजन्यत्वे कर्तृजन्यत्वमनुगतमवच्छेदकं बाधकाभावात् । न च लाघवात् घटत्वादिकमेव तथा । कर्तृजन्यत्वेऽपि जन्यत्वस्यातथात्वापत्तेः । एवं शरीरजन्यत्वस्य व्याप्यं सकर्तृकत्वं वह्नेर्धूम इवेति भवत्युपाधिः ।

किं च कर्तृजन्यत्वे जन्यत्वं शरीरजन्यत्वे वा सकर्तृकत्वमवच्छेदकमिति संशयेऽपि न हेतोः साध्यव्याप्यतानिश्चय इति चेत्—तर्हि घटादौ कर्तृजन्यत्वे गृहीते तस्य शरीरजन्यतावच्छेदकत्वं ग्रहीतव्यम् । घटे च घटत्ववत् जन्यत्वमपि बाधकं विना कर्तृजन्यतावच्छेदकं गृहीतम् । अतो जन्यमात्रे कर्तृजन्यत्वान्न शरीरजन्यत्वे तदवच्छेदकत्वम् । प्रथमगृहीतोपजीव्यविरोधात् ।

प्रकाशः

[1]सकर्तृकत्वव्याप्यजन्यत्वाव्यापकं सकर्तृकत्वव्यापकं चेति भावः । अत एवेति । सकर्तृकत्वव्याप्यजन्यत्वाव्यापकत्वेन[2] शरीरजन्यत्वस्य सकर्तृकत्वाव्यापकत्वेनानुपाधित्वनिर्णयादित्यर्थः ।

क. जन्यत्वऽपीनि । यद्विशेषयोरित्यादेर्व्याप्तिग्राहकस्योभयत्रापि सावादिति भावः । एवं शरीरेनि । जन्यतावच्छेदकस्य [3]व्याप्यत्वनियमादिति भावः ।

उपजीव्यविरोधादिति । नन्वननुगतस्यापि [4]व्याप्यतावच्छेदकत्वात् घटत्वाद्यवच्छेदेनैव

तर्कचूडामणिः

तश्शब्दार्थत्वे मूलासंगतिः । तदनिश्चयस्योपाधिसंदेहानुकूलत्वे[5]नाविरोधित्वादित्यत आह—सकर्तृकत्वेति । ननु बाधकाभावोऽसिद्धः,

---

1 'सकर्तृकत्व
2 स्वाव्यापकतया—ख ग
3 व्याप्यत्वानियमात्—क
4 जन्यतावच्छेदकत्वात्—ख ग
5 विरोध इत्यत—ग

अत एव न तस्य हेतौ व्याप्तिसंशयाधायकत्वमपि । एतेनानणुत्व-क्षित्यवयववृत्त्यन्यत्वादय उपाधित्वेन निरस्ताः । जन्यत्वस्य साध्यव्याप्यत्वेन

प्रकाशः

[1]कर्तृजन्यत्वं गृहीतं शरीरजन्यतावच्छेदकत्वेन गृह्यताम् । अत एव नोपजीव्यविरोधः । न च हस्तादिजन्ये व्यभिचारान्न शरीरजन्यतावच्छेदकं कर्तृजन्यत्वमिति वाच्यम् । शरीरपदस्य पूर्वोक्तचेष्टाश्रयपरत्वात् न च शरीरजन्यतावच्छेदकमेव घटत्वादिकमस्तु कर्तृजन्यतावच्छेदकं जन्यत्वमेवास्ताम्, विनिगमकाभावादि वाच्यम्[2] । [3]तथापि जन्यत्वे सकर्तृकत्वव्याप्यत्वानिश्चया-दिति चेत्–अत्राहुः–कर्तृजन्यत्वे जन्यत्वमवच्छेदकम्, शरीरजन्यत्वे सकर्तृकत्वं वा यद्विशेष-योरित्यादेर्ग्राहकस्य समानत्वादिति संशये लाघवाज्जन्यत्वस्यैव कर्तृजन्यतावच्छेदकत्वं [3]कल्प्यते, न तु कर्तृजन्यत्वस्य [4]शरीरजन्यतावच्छेदकत्वं, गौरवात्[4] । न चैकप्रतियोगिकजन्यतावच्छेदक[5]-द्वयोपस्थितौ लाघवावतारः, न चात्र तथा, उभयस्याप्युभय[6]जन्यतावच्छेदकत्वसंभवादिति वाच्यम् । उभयनिरूपितोभयजन्यतावच्छेदकत्वस्य प्रकृते विरुद्धत्वेन [7]एकत्रैवावच्छेदकत्व-कल्पनाप्रसक्तौ कुत्र तत् कल्प्यतामिति [8]लाघवावतारसंभवादिति । शरीरजन्यत्वस्य रूपादावपि सत्त्वेन तन्मते कर्तृजन्यत्वं न्यूनवृत्तितया तदवच्छेदकं न भवतीत्यप्याहुः ।

तर्कचूडामणिः

साधकाभावस्यैव बाधकत्वादित्यतः साधकमाह—**यद्विशेषयोरिति** । **अत इति** । उपजी-व्यत्वाभावादित्यर्थः । **विरुद्धत्वेनेति** । तथा च यत्रैकस्यावच्छेदकत्वमपरस्यावच्छदकत्वं विरुणद्धि तत्र लाघवं सहकारि । न त्वैकाधिकरण्यमपि, गौरवादिति भावः । [9]न्यूनवृत्तेरपि धूमत्वादेः वह्निजन्यतावच्छेदकत्वादसंगतिः । अन्यथा घटत्वादेरपि सिद्धान्ते तदवच्छद[10]कत्वं न स्यादित्यस्वरसं सूचयति--**अपीति** ।

---

1 कर्तृजन्यत्वग्रहे तच्छरीरजन्यतावच्छेदकं गृह्यताम्–क
2 वाच्यम् - क
3 कल्प्यताम्—ख
4 गौरवात् ख
5 उपस्थितौ क
6 उभय–क
7 एकत्रैवावच्छेदकल्पना —ख
8 लाघवतासं—ख
9 यत्रन्यून–ग
10 द कासं–ग

तेषां साध्याव्यापकत्वात् । तथापि क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात् गगनवत् इति सत्प्रतिपक्षोऽस्त्विति चेत —न । अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयकत्वात अप्रतीतप्रतियोगिकस्याभावस्य निरूपयितुमशक्यत्वात् । स्थापनानुमानञ्च पक्षधर्मताबलात् प्रसिद्धकर्तृभिन्नकर्तृकत्वसाधकम् ।

प्रकाशः

अस्य [1]प्रासिद्धेरिति। इदं च सर्वं सामान्यलक्षणानभ्युपगमेन परं प्रत्यापादनम् तस्य गोत्वाद्येकभावाभावविषयत्वेन [2]त्वया अवश्यं वाच्यत्वादिन्येवमर्थकतया तस्येत्यादिफक्किकापि योज्येति न स्वासिद्धान्त विरोध इत्याहुः ।

अप्रतीतेति । यद्यपि–परमते प्रतियोगितावच्छेदकप्रयारकज्ञानस्यैव अभावधीकारणत्वम्, न तु प्रतियोगिज्ञानस्य [4]अनावश्यकत्वात् अन्यथा तन्मते बोधोऽपि प्रतिबन्धको न स्यात् । न स्याच्च । घटादिसामान्याभावज्ञानम् , सामान्यलक्ष[5]णानभ्युपगमेन सकलप्रतियोगिज्ञान।–संभवात् – तथापि स्वमतावष्टम्भेनेदं द्रष्टव्यम् । वस्तुतः स्थापनानुमानस्य तर्कसचिवत्वात [6]अन्यस्य तदभावात् न्यूनबलत्वात् न सत्प्रतिपक्षत्वमिति भावः ।

तर्कचूडामणिः

[7]बाधोऽपीति । तस्य पक्षीयसाध्याभावानवगाहित्वादिति भावः । ननु साध्यान्तगभावगोचरत्वेऽपि तस्य समानप्रकारकतामात्रेण [8]प्रतिबन्धकत्वं परमते स्यादित्यनुशयादाह— न स्याच्चेति । ननु न्यायमते तत्पक्षीयसाध्याभावमप्यवगाहते । परमते च समानप्रकारकत्वमात्रेण प्रतिबन्धकते[9]त्थेकत्रानुमितेर्मतद्वयेऽपि प्रतिबन्धकत्वमवर्जनीयमित्यनुशयादाहु—वस्तुत इति ।

---

1 प्रसिद्धेति–ख
2 त्वया वाच्यत्वादित्येव परतया परं प्रत्येव तस्येत्यादि योज्येति ।
3 °धीकरणत्वम्
4 आवश्यकत्वात्
5 °णासंभवेन
6 तस्य च तदभावात् अतुल्यत्वात् न
7 तस्य–ग
8 प्रतिबन्धः
9 इत्यत्रानु°–ग

अतो भिन्नविषयकत्वात् न प्रतिबध्यप्रतिबन्धक भावः। अत एव तद्व्यापकरहितत्वादिकम् अभाव साधकं बाधकमपास्तम्, तस्य प्रसिद्धाभावविषयकत्वेन अप्रसिद्धाभावाविषयकत्वात्। व्यक्तिसाधकस्य च विशेषतोऽप्रसिद्ध व्यक्तिसाधकत्वनियमात्, अन्यथा अनुमानवैयर्थ्यात्।

कर्तृजन्यत्वमनुगतं घटादौ प्रसिद्धं यत् साध्यं तदभावो मया साध्यत इति चेत्, कर्तृजन्यत्वमनुगतमपि पक्षधर्मताबलेन प्रसिद्धं कर्तारमादाय पर्यवस्यति। तदभावस्तु प्रसिद्धस्य कर्तृरभावमादाय सिद्ध्यति नाप्रसिद्धस्य। अनुगतस्यापि कर्तृजन्यत्वस्य तदभावस्य च कर्तृव्याक्तिघटितत्वात्। अन्यथा व्याक्तितदभावासिद्धिप्रसङ्गात्। न चैवं सत्प्रतिपक्षोच्छेदः। तस्य गोत्वाद्येकभावाभावसाधकविषयत्वात्।

एतेन 'ज्ञानत्वं न नित्यवृत्ति ज्ञानमात्रवृत्तिर्धर्मत्वात् स्मृतित्ववत्', 'ज्ञानं न नित्यगुणवृत्ति गुणत्वव्याप्यजातियोगि चेतनविशेषगुणत्वात्,।

प्रकाशः

ज्ञानमात्रेति। यद्यत्र जातिपदमपि तदा अनित्यमात्रवृ-तीति साध्यार्थः ज्ञानातिरिक्तावृत्तित्वं च हेत्वर्थो विवक्षणीयः। तथा चावृ-तौ व्यभिचारवारणायेदं द्रष्टव्यम्।

केचि-तु कालादौ वर्तमानत्वेना प्रसिद्धिः स्यात्। जातिपदोपादाने तु जातित्व-निर्वाहकसंबन्धेन ज्ञानमात्रवृत्तित्वहेतुलाभ इत्याहुः। चेतनेति। रूपादौ संख्यादौ व्यभिचारवारणाय चे[2]तनपदविशेषपदे।

तर्कचूडामणिः

ननु ज्ञानमात्रवृ-त्युपाधावपि [3]साध्यसत्वेन जातिपदवैयर्थ्यमिति, अत आह—यदीति। यथाश्रुतहेतोर्गगनादावभावादाह-ज्ञानेति। ननु [4]'जातित्व विवेचने व्यर्थविशेषणता, समवेतत्वस्यैव हेतुविशेषणत्वादित्यनुशयादाह-केचित्त्विति। जातित्वेति। स च समवाय इति भावः।

---

1 च वृ-तौ
2 चेतनविशेषपदम्-ख
3 सध्वेन-ग
4 जातित्वविशेषणत्वे-ग

सुखवत् , 'आत्मा न नित्यविशेषगुणाधारवृत्तिद्रव्यत्वापरजातिमान् , विभुत्वान् गगनवत्' इत्याद्यपास्तम् । प्रसिद्धनित्ये व्योमादौ प्रसिद्धायाश्च रूपत्वजलत्वादिजातेः व्यतिरेकविषयत्वात् अप्रयोजकत्वाच्च ।

किञ्च क्षित्यादौ शरीराजन्यत्वमसिद्धम् । अदृष्टद्वारा तज्जन्यत्वात् । न चादृष्टाद्वारकजन्यज्ञानाजन्यत्व हेतुः । ज्ञाने जन्यत्वविशेषणस्याव्यावर्तकतया व्यर्थत्वात् । न च स्थापनायां पक्षादिशेषणेऽप्येष दोषः । 'प्रमेयो घटः' इतिवत् तदुपरक्तबुद्धेरुद्देश्यत्वात् ।

प्रकाशः

यद्यपि यथाश्रुतं भावनायां व्यभिचारि, परमाणुवृत्तिनित्यस्थितिस्थापकवृत्तिसंस्कारत्व[1]जातिसत्त्वात् तस्याम् , तथापि हेतौ गुणपदं [2]प्रत्यक्षत्वेन विशेष्यम् । एवं चात्मैकत्व[3]प्रत्यक्षपक्षे विशेषपदम् । आत्मेति । यद्यपि न नित्यविशेषगुणाधार इत्येव वक्तुमुचितम्, तथापि तन्मते शब्दस्य नित्यतया [4]आकाशे व्यभिचारः स्यात् । अस्मन्मते च ईश्वरात्मनः सिद्ध्यसिद्धिव्याघाते[5]नापक्षतया अस्मदाद्यात्ममात्रपक्षत्वे सिद्धसाधनं मा भूदिति [6]तादृशजातिगर्भं तादृश[6]साध्यमुपात्तमिति बोध्यम् ।

ननु अदृष्टाजनकशरीराजन्यत्वं हेतुः । न च हस्तादिजन्ये [7]तथापि व्यभिचारः[7] ।

तर्कचूडामणिः

यद्येवं विशेषपदवैयर्थ्यम् , आत्मैकत्वस्थाप्रत्यक्षत्वेन तत्रादोषप्रसङ्गादित्यत आह—एवं चेति ।

अदृष्टाजनकत्वं स्वजनकादृष्टाद्वारकत्वं स्मर्तव्यम् । भावत्वादेर्विशेषणस्य गोत्वादावपि सत्त्वादाह—व्यभिचारेति ।

---

1 जातिमत्त्वात् तथापि–ख
2 प्रत्यक्षेण–ख
3 प्रत्यक्षत्वपक्षे–ख
4 आकाश एव व्यभिचारः–ख
5 पक्षतया
6 तादृश
7 व्यभिचारः

अपि च शरीराजन्यत्वे व्यर्थविशेषणत्वम् , लाघवेन अजन्यत्वस्यैव व्याप्यत्वात् ।

न च निष्प्रयोजनविशेषणमसिद्धम् , व्याप्तिग्रहोपयुक्तविशेषणवत् पक्षधर्मतौपयिकविशेषणस्यापि [1]सप्रयोजनत्वात् । व्यभिचारवारकस्यापि सार्थकत्वेऽनुमितिप्रयोजकत्वस्यैव बीजत्वात् । व्यभिचारवारकविशेषणवत्येव व्याप्तिग्रह इति चेत्—न । निर्विशेषणेऽपि गोत्वादौ व्याप्तिग्रहात् । तत्रापि व्यक्तिविशिष्टे व्याप्तिग्रह इति चेत्—न । स्वतो व्यावृत्तगोत्वस्य [2]व्यभिचारात् । अन्यथा अन्योन्याश्रयात् । अपि च व्यभिचारवारकविशेषण-वत्येव व्याप्तिग्रह इत्यप्रयोजकम्, सहचारदर्शनादिसत्त्वे तदभावेन व्याप्तिग्रहा-

---

प्रकाशः

निर्विशेषण इति । व्यभिचारवारकविशेषणशून्य इत्यर्थः । अन्यथेति । [3]यदि जातिः [4]स्वतो न व्यावृत्ता, किं तु व्यक्तिव्यावर्तनीया तदा अव्यावृत्तपरस्परव्यावर्तनीयत्वेन[5] [6]परस्पराश्रयापत्तिरित्यर्थः । [7]ननु सहचारधीसत्त्वेऽपि व्यभिचारा[7]वारकविशेषणज्ञानं व्याप्ति-ग्रहप्रतिबन्धकमित्यभिप्रेत्य शङ्कते—व्यभिचारेति । विशेषणशून्ये--विशेषणज्ञानशून्य इत्यर्थः । अत एवोत्तरे प्रमेयत्वेन ज्ञायमानपर्यन्तमुपात्तमिति ।

तर्कचूडामणिः

ननु जातिगतव्यावृत्तिर्व्यक्तिगतव्यावृत्तिर्वा [8]नान्योन्यं हेतुः उभयोरनादित्वात् । नापि [9]तज्ज्ञानयोः परस्परहेतुत्वम् । गोत्वज्ञानमात्रस्य व्यक्तिव्यावृत्तिबुद्धौ गोव्यक्तिज्ञानमात्रस्य गोत्वगतेतरव्यावृत्तिबुद्धौ हेतुत्वादित्यत आह —यदीति ।

---

1 जनकत्वात्
2 स्याव्यभिचारात्
3 जातिः-ख
4 न स्वतो व्यावर्तिका-ग
5 व्यावर्तनीयत्वे-क
6 परस्परस्यान्योन्याश्रया-क
7 व्यभिचारा-ख ग
8 नन्योन्यहेतुः-क
9 तद्ज्ञानयोः-क

विलम्बात्। व्यभिचाराद्यारकविशेषणशून्य एव व्याप्तिग्रह इति चेत्–न। प्रमेयत्वेन ज्ञायमाने धूमे व्याप्तिग्रहात्।

अथ तत्रोपात्तव्यभिचाराद्यारकविशेषणशून्यत्वं विवक्षितम्, न च तत्र प्रमेयत्वं विशेषणमुपात्तमिति चेत्—न। विरोधात्, न हि तत्रोपात्तं तेन शून्यं चेति संभवति। यद्विषयकत्वेन परामर्शः कारणमनुमितौ तल्लिङ्गम्, प्रकृते च व्यभिचारात् अन्यथासिद्धेश्च न विशेषणविषयकत्वेन तत्त्वमिति चेत्—न। [1]धूमस्याप्यतत्त्वापत्तेः, व्यभिचारात् तद्विषयत्वेनानु-

---

प्रकाशः

[2]व्यभिचारादिति। आकाशादिपक्षके अजन्यत्वविषयतयैवानुमितिजनकत्वादित्यर्थः। अत एवान्यथासिद्धिरपीति भावः। धूमस्यापीति[2]। आलोकविषयतयापि [3]तज्जन्यत्वादित्यर्थः। अत्र यद्यपि व्यासज्यवृत्तिव्याप्तिर्यत्र [4]विशेष्यबाधस्तत्र वाच्या, यथा आर्द्रेन्धनप्रभवत्वह्निमत्त्वादौ। तच्च न संभवति, धूमादिसामानाधिकरण्यस्य संयोगविशेषस्य

तर्कचूडामणिः

अश्वादिव्यावृत्तत्वेन ज्ञातमेव गोत्वं व्यक्तिं व्यावर्तयति, न तु जातिज्ञानमात्रम्, गोगतसत्ताज्ञानस्यापि गव्यश्वादिव्यावृत्तिबुद्धिजनकत्वप्रसङ्गात्। [5]एवमश्वत्वादिव्यावृत्तत्वेन ज्ञाता व्यक्तिरश्वत्वादि[6]व्यावर्तिका, न तु व्यक्तिज्ञानमात्रम्, द्रव्यत्वादिना व्यक्तिज्ञानस्यापि तथात्वापातात्। तथा च व्यावृत्तिबुद्ध्योरन्योन्याश्रयत्वमित्यर्थः।

ननु व्याप्तिग्रहसामग्रीसत्त्वे व्यभिचारेति शङ्काग्रन्थानुपपत्तिरित्यत आह—व्यभिचारेति। ननु स्वरूपसदेव तत् प्रतिबन्धकत्वेन परस्याभिमतमस्तु, किं ज्ञानाध्याहारेणेत्यत आह—अत इति। अन्यथासिद्धिरिति। तृतीयान्यथासिद्धिरित्यर्थः।

---

1 धूमस्याव्याप्यत्वापत्तेः
2 धूमस्यापीति–ख
3 तस्य तस्य तज्जनकत्वादित्यर्थः–क
4 विशेष्ये बाधः–क
5 एवमश्वादि-ग
6 व्यावृत्तिजनिका–ग

मित्यकारणत्वात्। अथैकमवच्छेदकम् अपरत्र व्याप्तिः। यद्वा लाघवेन व्यासज्यवृत्तिरेकैव व्याप्तिरिति विशिष्टव्याप्त्यर्थः। तत्र विशेष्यतावच्छेदकस्य व्याप्यतावच्छेदकत्वेन विशेषणस्य तदवच्छेदकत्वमिति नियमात्। एकवृत्तित्वबाधे सत्येव व्यासज्यवृत्तित्वमिति व्याप्तेश्च न शरीरजन्यत्वाभावे नीलधूमादौ च व्याप्तिरिति विशेषमात्रे सा। तथा च स्वरूपासिद्धिः। तद्वारणार्थं विशेषणाभिधाने व्याप्यत्वासिद्धिरिति चेत्—न। अव्यभिचारस्य अनौपाधिकत्वस्य वा विशिष्टे नीलधूमादौ सत्त्वेन तद्व्यतिरेकसाधने बाधात्। न च विशेष्यत्वमुपाधिः, साधनव्यापकत्वात्।

प्रकाशः

वह्निधूममात्रनिष्ठत्वात्। अपि चार्द्रेन्धनादौ विशेषणे व्याप्यभावनिश्चयेऽपि तदवच्छिन्नवह्निविशेषे व्याप्तिग्रहादनुमितिः, तथापि प्रथमोक्तविशिष्टव्याप्यमिप्रायेण दूषयति—नेति। ननु नील[1]धूमे हेतौ साधनावच्छिन्नसाध्यव्यापकधूमाच्च मुपाधिः, तथा चानौपाधिकत्वाभाव साधनेन बाध इति शङ्कते—न चेति। साधनेति।[2] नीलधूमवति सर्वत्र धूमवत्त्व सत्त्वादित्यर्थः।

केचित्—उभयत्रोपाधिमाशङ्कते—न चेति। अदृष्टद्वारा शरीरस्य क्षित्यादावपि

तर्कचूडामणिः

ननु न संयोगरूपा व्याप्तिः, अतिप्रसङ्गादित्युक्तम्। किं च विशेष्ये सामानाधिकरण्य बाधेऽपि सामान्यवत्त्वविनाकृतास्मदादिघटितविशेष्ये अव्यभिचारविशिष्टसामानाधिकरण्यं बाधितमेवेत्यरुचेराह—अपि चेति। नन्विदमप्ययुक्तम्, अस्मदादिप्रत्यक्षत्वमात्रे नित्यत्व व्याप्तिविरहनिश्चयेऽपि विशिष्टव्याप्तिनिश्चयादनुमितेः। न च सामान्यवत्त्वे विशेषणे तदभावग्रहेऽपि अनुमितिरस्तीति वाच्यम्। अत एव व्यासज्यवृत्तित्वोपगमादिति चेत्—

अत्र ूमः। विशिष्टं द्विविधम्, सामान्यविशेष्यकं तदितरविशेष्यक च। तत्राद्यं पदार्थान्तरम्, यथा नीलघटत्वं कर्तृजन्यत्वम्। तदुभयं घटत्वजन्यत्वाभ्यां भिद्यते।

---

1 धूमहेतौ–क 2 न चेति–ख

तर्कचूडामणिः

द्वितीयं तु विशेषणविशेष्यसंबन्धात्मकमेव न त्वन्यत्। दण्डी पुरुषः पुरुषः, पाकजरूपं रूपम्, द्रव्यसमवेतं द्रव्यसमवेतं कर्म क्रियाघटसमवायः समवायः इत्यादिप्रत्यभिज्ञाविरोधात्। तथा च [1]यत्र विशिष्टं सामान्यं लिङ्गम्, तस्य पदार्थान्तरत्वात् व्याप्तिर्विशिष्ट एवार्थांतरे वर्तते, न तु विशेषणविशेष्ययोः [2]न च विशेषणावच्छिन्ने विशेष्यमात्रे इति न तद्गरोऽयं। ग्रन्थः। किं तु यत्र द्रव्यादिकं विशेष्यं तत्पर एव। यथा वह्निविशेषे धूमविशेषः- [3]यत्र विशेष्ये धूमे विशेषणे नैल्ये च वह्निविशेषव्याप्तिबाधात् द्वित्ववत् व्यासज्यवृत्तित्वमभिमतम्। विशेष्ये विशेष्यतावच्छेदकावच्छेदेन तद्बाधेऽपि विशेषणावच्छेदेना[4]बाधात्। विशेषणावच्छेदेन विशेष्यमात्रवृत्तित्वम् इत्यपरं मतम्।

तत्राद्यम् अतिस्थवीयः। नीलधूमादौ विशेषणनैल्यादेः साध्यासामानाधिकरण्यात्। न च स्वाश्रयसंबन्धघटितं तत्सामानाधिकरण्यं तत्रापीति वाच्यम्। तथा सति तत्र व्याप्त्यन्तर स्यात्, [5]न त्वियमेव। तादृशव्याप्तौ च धूमादेरवच्छेदकत्वं नैल्यस्यैव व्याप्यत्वम्। परम्परा-संबन्धघटितव्याप्तेः धूमावृत्तित्वात्।

[6]तस्मात् द्वितीयमेव [6]रमणीयम्। न च तत्रापि नीलधूमत्वमवच्छेदकम्, न नैल्यमात्रम्, अतिप्रसक्तत्वादिति वाच्यम्। नीलधूमत्वस्यावच्छेदकत्वे तद्घटकतया तस्यापि तथात्वात्। तावतैव च तस्यावच्छेदकत्वोक्तिरिति दिक्।

अयोगोलकादौ साध्याव्याप्तेराह—**साधनेति**।

ननु धूमनीलधूमयोः अभेदे कथं व्यापकतेत्यत आह—**नीलेति**। [7]व्यापकत्वा-

---

1 न–चेति
2 न वापि विशे
3 तत्र विशेषणे नैल्ये च–ग
4 नासाधारण्यात्-ग
5 यत्त्वियमेव–ग
6 द्वितीयमेव–ग
7 व्यापकत्वभेदे–ग

किं च सौरभविशेषवद्धूमरहितमिदं चन्दनप्रभववह्निरहितत्वात्, निर्धूनोऽयम् आर्द्रेन्धनप्रभववह्निरहितत्वादित्यादावपि कारणविशेषाभावेन कार्यविशेषाभावानुमानं न स्यात्। वह्निरहितत्वादिकं चोपाधिर्भवेत्। व्यतिरेकिण्यष्टद्रव्यातिरिक्तद्रव्यानाश्रितत्वं च हेत्वभावव्याप्यं न स्यात्। द्रव्यानाश्रितत्वस्यैव व्याप्यत्वात्। रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वादित्यादौ त्वयाप्यसिद्धिवारकविशेषणस्वीकाराच्च।

प्रकाशः

जनकत्वमिति [1]मूल एव स्फुटमिति शरीरा[1]जन्यत्वं नित्यमात्र[2]वृत्तीति अजन्यत्वोपाधेः साधनव्यापकत्वमित्यर्थ इत्याहुः। तन्न। एवं हि व्याप्यत्वासिद्धिमुद्धरतः स्वरूपासिद्ध्यापत्तेः। तथा च [3]शरीराजन्यत्वस्य पूर्वोक्ते तात्पर्यम्। तच्च क्षित्यादिवृत्तीति [4]न [4]साधनव्यापकत्वमिति।

ईदृशव्यर्थविशेषणतया त्वदभ्युपगतमप्यनुमानं न स्यादित्याह—किं चेति। उभयत्र वह्निरहितत्वमात्रस्यैव [5]गमकत्वादिति भावः। वह्निरहितेति। यदि चास्यायोगोलके साध्याव्यापकत्वात्।

तर्कचूडामणिः

मभेदेऽपीत्युक्तमिति भावः।

उभयत्र—[6]अकर्त्रनुमाने नीलधूमेन वह्न्यनुमाने चेत्यर्थः। केचित्तु—नीलधूमस्य [7]वह्निव्याप्त्यनुमाने विशेष्यत्वमुपाधिः। यत्र वह्निव्याप्यत्वं तत्र विशेष्यत्वस्य सत्त्वादिति मूलग्रन्थार्थमाहुः। तन्न। विशेष्यत्वस्य केवलान्वयित्वेन साधनाव्यापकत्वभ्रमासंभवात्।

---

1 शरीरा–ख ग
2 प्रतीतिजन्य–क
3 शरीरजन्य–क
4 साधनाव्यापक–ख ग
5 गमकत्वसंभवा–ख
6 कर्त्रनु–ग
7 वह्निव्याप्त्यनु–ग

अपि च गौरवेण विशिष्टस्य व्यापकतापि न स्यात् । तथा च स्थापनानुमाने उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यता, धूमेनार्द्रेन्धनप्रभववह्निः घटत्वेन शरीरजन्यत्वमपि नानुमीयेत ।

यत्तु [1]जन्यान्योन्याभावापेक्षया शरीरजन्यान्योन्याभावस्याल्पत्वात् । तेषामेव व्याप्यत्वमिति विपरीतमेव लाघवमिति । तन्न । विरोधाभावेन बहूनामल्पस्य च व्याप्यत्वात् स्नेहे शीतस्पर्शवत्त्वजलत्वयोः

प्रकाशः

नोपाधित्वं , तदा धूमवत्त्वोपाधेः साधनव्यापकत्वमिति [1]तुल्यमिति भावः ।

ननु गन्धादिषु मध्य इति व्यभिचारवारकपर्यवसन्नमेव । गन्धमात्रव्यञ्जकत्वं हि द्रव्यत्वविशेषितं [2]हेतूकर्तव्यम् , अन्यथा संनिकर्षे व्यभिचारः स्यात् । तस्य च [3]तेन व्यभिचारवारणं तदा, यदि व्यभिचारः स्यात् । स च व्यभिचारस्तदा, यदि [4]गन्धमात्रव्यञ्जकत्वं प्रसिद्धं स्यात् । तथा च गन्धादिषु मध्य इति [5]विशेषणप्रसिद्धिं संपाद्य [6]संनिकर्षे व्यभिचारवारणप्रयोजकमित्यरुचेराह—**अपि चेति** ।

यत्त्विति । शरीरजन्यघटाद्यपेक्षया जन्याः क्षित्यादयोऽ[7]पीति ते बहवः ।

तर्कचूडामणिः

धूमत्वा दिपरत्वे आलोकादौ साध्याव्यापकत्वात् ।

ननु शरीरजन्यानामानन्त्ये कथं तदभावाना[8]मल्पीयस्तेत्यत आह—**शरीरेति** । ननु विशेषणाद्यभावापेक्षया विशिष्टाभावस्य गुरुत्वेन तस्य साध्याव्याप्यतया यत्रेति ग्रन्थानुपपत्तिः ।

---

1 तु सम–क
2 हेतूकार्यम्–ख ग
3 'तेन' नास्ति–ख ग
4 गन्धत्वं–क
5 'विशेषण' नास्ति–ख ग
6 संनिकर्षपरंपरया व्यभि–ख
7 क्षित्यादयः–क ख
8 अल्पता–ग

गन्धाभावेऽपृथिवीत्वपृथिवीत्वाभावयोरिव । अन्यथा नीलधूमस्यैव व्याप्यत्वे धूममात्रस्याव्याप्यत्वप्रसङ्गः ।

किं च त्वन्नये वह्न्यन्योन्याभावापेक्षया जन्यत्वात्यन्ताभावस्यैव व्याप्यता स्यात् एकत्वात् । प्रमेयत्वाद्यनन्तधर्मविशिष्टस्य व्याप्तावपि प्रयोजनाभावान्नानुमाने तदुपन्यासः ।

अथ लाघवेन जन्यत्वस्य शीघ्रोपस्थितिकतया जन्यताभावत्वेन शीघ्रं व्याप्तिग्रहः न तु [1]शरीरजन्याभावत्वेन, विलम्बितप्रतीतिकत्वात् । यत्र विशेषणविशेष्यान्यतराभाववति साध्यं तत्र विशिष्टाभावस्यापि व्याप्तिरिति चेत्—

प्रकाशः

प्रतियोगिबाहुल्यकृतं चाभावबाहुल्यमिति भावः । अन्यथेति । तथा चावच्छेदकलाघवं प्रयोजकं न तु व्यक्तिलाघवमिति भावः ।

प्रयोजनेति । प्रकृते पक्षधर्मताया[2]मुपयोगः शरीरपदस्येति भावः ।

अथेति । न च यदि तत्र व्याप्तिरस्ति तदा न प्रथमं व्याप्तिग्रहो जातः, ततः किं, पश्चादपि [3]व्याप्तिग्रहेणानुमितिसंभवादिति वाच्यम् । प्रथमं यत्र व्याप्तिग्रहः तत्रैव व्याप्तिरित्यभिमानेनाभिधानादिति । यत्रेति । निर्धूमोऽयमार्द्रेन्धनप्रभववह्निरहितत्वादित्यत्र आर्द्रेन्धनरूपविशेषणाभाववति विशेष्यवति तप्तायःपिण्डे साध्य निर्धूमत्वम् , तथा वह्निरूप-

---

तर्कचूडामणिः

अखण्डाभावविवक्षायां [4]शरीराजन्यत्वेऽपि न वैयर्थ्यं स्यात् इत्याशङ्क्य व्याचष्टे— [5]निर्धूम इति ।

---

1 शरीरजन्यभावत्वेन
2 उपयोगात्
3 तद्ग्रहेण–ख ग
4 'शरीराजन्यत्वेऽपि' नास्ति–ग
5 नीलधूम इति–ग

न । एवं सति उत्पत्तिमत्त्वे सति सत्त्वादिकम् अनित्यत्वसकर्तृक-व्याप्यतया न गृह्येत्, शीघ्रोपस्थितिकतया घटत्वादेरेव तथात्वात् । यदि च सामान्यविशेषाभावात् विरोधाभावेन उभयस्यापि व्याप्यत्वम्, तदा शरीराजन्यत्वजन्यत्वाभावयोरपि तुल्यम् ।

किं च शरीरजन्यत्वं विशिष्टं तदभावमपि विशिनष्टि, न तु साक्षात् । तथा च शरीरजन्यत्वाभावोऽखण्ड एव हेतुः. अतो न व्यर्थ-

---

प्रकाशः

विशेष्याभाववति केवलार्द्रेन्धनवति [1]जलादौ साध्यं निधमत्वम् । एवं [2]च प्रत्येकस्य-धूमाप्रयोजकतया विशिष्टस्य तत्प्रयोजकतया तदभावे विशिष्टाभावो हेतुः । न चैवं प्रकृते सिद्धम् । जन्यत्वरूपविशेष्यवति शरीररूपविशेषण[3]व्यतिरेकेण अकर्तृकत्वरूपसाध्यसंबन्धा-निश्चयात् क्षित्यादावपि पक्षे संदिग्धत्वात् । तथा चात्र विशिष्टाभावो नहेतुरित्यर्थः ।

यत्तु न साध्यमिति पाठः । तथा च यत्र विशेषणविशेष्यान्यतराभाववति साध्या-भावः, विशेषणाद्यन्यतराभावः व्यभिचारीति यावत्, तत्र तु विशिष्टाभावो हेतुः । अत्र तु न तथेति न स हेतुरिति । तन्न । विशेषणाद्यन्यतराभावस्य [4]व्यभिचारित्वे [5]विशिष्टा-भावव्यभिचारस्य वज्रलेपत्वात् ।

अखण्ड एवेति । तथा च शरीरजन्यत्वभावे जन्यत्वप्रानितयोगिकत्वाभवात् ।

तर्कचूडामणिः

न तथेति । जन्यत्वाद्यभावो नाकर्तृकत्व[6]व्यभिचारीत्यर्थ ।

सः—शरीरजन्यत्वाभावः ।

ननु तदभावस्य एकत्वापरपर्यायाखण्डत्वेऽपि व्यभिचारारकशरीरपदवैयर्थ्य तादवस्थ्यमित्यत आह— तथेति । तन्निष्टेति न्यायादिति भावः ।

---

1 वनादौ–ग 2 एवं–क
3 विरहेण–ग 4 अव्यभि–ख
5 विशिष्टाभावस्यापि वज्र–ख विशिष्टाभावस्य व्यभिचारस्यापि—ग
6 व्यभिचार इत्यर्थः–ग

विशेषणता। न चात्र विशिष्टाभावो विशेष्याभाव एव, क्षित्यादावजन्यतापत्तेः। अत एव स्थापनायां शरीरजन्यत्वमुपाधिः, साध्याभावव्याप्याभावप्रसियोगित्वेन साध्याव्यापकत्वनियमात्। व्यर्थविशेषणेऽधिकं नीग्रहस्थानमिति चेत्-न। हेतुद्वयोपन्यासे ह्यधिकम्। अत्र तु विशिष्टमेकमेव हेतुरिति विरुद्धस्थल उक्तमिति।

उच्यते। नीलधूमादौ व्याप्तिरस्त्येव। अन्यथा विशेषणाम-व्याप्यत्वे निराश्रया व्याप्तिः स्यात्। नीलत्वमपि न व्याप्यतावच्छेदकम्, गौरवात्। किंतु धूमत्वमेव, दण्डत्वेन कारणत्वे रूपमिव। धूमत्वं च न नीलिम्नि, किंतु तदाश्रये धूम इति न नीलधूमस्य हेतुत्वम्।

प्रकाशः

तदवच्छेदेन तत्र व्याप्यग्रहे विशिष्टावच्छेदेनैव तद्ग्रह इति न वैयर्थ्यमिति भावः अधिकमिति। अनुपयुक्तनीलद्याशोपादानादिति भावः। हेत्विति। हेतूदाहरणाधिकमधिकमिति तल्लक्षणादिति भावः। तर्हि नीलधूमस्य कथं न हेतुत्वम्, अत आह[1]नीलत्वमपीति। विशेष्यातावच्छेदकस्य[2] संबन्धितावच्छेदकत्व एव विशेषणस्यापि [3]तदवच्छेदकत्वादित्यर्थः। अत्र दृष्टान्तमाह-दण्डत्वेनेति। ननु नैल्यं व्याप्यतावच्छेदकत्वेन हेतौ मा प्रविशतु व्याप्यत्वेनैव प्रविशतु, अत आह-धूमत्वं चेति। व्याप्यतावच्छेदकावच्छिन्नस्यैव व्याप्यत्वम्।

तर्कचूडामणिः

ननु शरीरपदस्याखण्डाभावनिष्ठव्याप्तिग्रहोपयोगात् अधिक्योक्तिरयुक्तेत्याशङ्क्य नीलधूमादिदृष्टान्तदूषणपरतामाह- अनुपयुक्तेति। हिशब्दसूचितहेतुमाह-हेत्विति। ननु नीलत्वस्य तदवच्छेदकत्वनिराकरणं प्रकृतासंगतमेव, नीलधूमत्व एव तन्निरासौचित्यत्। अतिप्रसक्तत्वादेव तस्यानवच्छेदकत्वे गौरवाभिधानवैयर्थ्याच्चेत्यत आह — तर्हीति। तथा च नीलत्वपदं नीलधूमत्वपरम्, अवच्छेदक पदं वा तच्छरीरप्रविष्टपरमिति भावः। नन्वेवं सामान्यवत्त्वादावपि विशेषणस्य तथात्वं स्यादित्यत आह—विशेष्येति। ननु व्याप्यतावच्छेदकप्रकरणे कारणतावच्छेदकनिदर्शनानुपपत्तिरित्यत आह—अत्रेति। विशेष्यतेत्यादिना उक्तेऽर्थे इत्यर्थः। नैल्ये धूमत्वभावप्रदर्शनस्य प्रकृतासंगतिं वारयितुमाह—नन्विति।

---

1 नीलधूमत्वमपीति-क 2 संबन्धितानवच्छेदकत्व-ख 3 तदवच्छेदकत्वाभावः-ख

नीलधूमे नीलस्य विशेषणत्वे तद्विशिष्टे न धूमत्वम् । उपलक्षणत्वे च धूमादेवानुमितिः ।

किं च व्याप्यतावच्छेदकस्यैव हेतुतावच्छेदकत्वमिति न नीलधूमत्वं तथा ।

प्रकाशः

प्रकृते च धूमत्वं नथा, [1]तदवच्छिन्नं च न नैल्यमिति व्याप्यतयापि[2]न तत्प्रवेशस्तत्रेति भावः ।

इदं च वस्तुगतिमनुरुध्योक्तम् । वस्तुतो धूमत्वस्य नैल्यवृत्तित्वेऽपि धूमवत् व्याक्तिस्थानीयं तदीति [3]धूम एव हेतुर्न नीधूलमः । नीलत्वस्यानवच्छेदकत्वात् । नीलत्वस्यापि धूमत्वावच्छिन्नत्वेनैव हेतुत्वादिति नैल्ये धूमत्वासत्त्ववर्णनमप्रकृतमेव । [4]प्रकृते तु [5]गौरवमिति ध्येयम् ।

नीलिम्नि धूमत्वस्यासत्त्वेऽपि नीलधूमे धूमत्वमस्त्येव, अतः तदवच्छिन्नत्वेन तस्य हेतुप्रवेशः स्यादित्यत आह—**नीलधूम इति** । तथा च नीलोपलक्षितधूममात्रस्यैव धूमत्वावच्छिन्नत्वान्न केनापि प्रकारेण हेतौ नैल्यप्रवेश इति भावः ।

तर्कचूडामणिः

नैल्य धूमत्वस्य असत्त्वान्न विशिष्टस्य तदवच्छिन्नत्वमित्याशयेनाह—**अत आहेति** । नन्वेवं धूमत्वे धूमत्वाभावेन धूमत्वविशिष्टस्यापि धूमत्वावच्छिन्नतया विशिष्टस्य वह्निव्याप्यता न स्यादिति चेत्—न । यत्र यदवच्छेदेन व्याप्तिः तद्विशिष्टस्य तस्य व्याप्यत्वम् , न तु यदवच्छिन्नं व्याप्यतावच्छेदकावच्छिन्नं तस्य तत्त्वम् । नीलधूमत्वावच्छेदेन तु न व्याप्तिः, गौरवादित्याशयात् । ननु हेतुताव्याप्यतयोरभेदेन तदवच्छेदकाभेदात् भेदाशङ्कानवकाशेन अभेदव्यवस्थरा-

---

1 तदवच्छिन्ननैल्य इति–क तदवच्छिन्नत्वं च न नै य इति–ग
2 तत्प्रवेश–ख
3 धूममात्रमेव हेतुः–ख–ग
4 प्रकृतं तु–क
5 गौरवमेवेति–ग

प्रकाशः

ननु व्याप्यतावच्छेदकमस्तु धूमत्वमात्रम्, किं तु नीलधूमस्यापि व्याप्यत्वात्तेनापि रूपेण तस्य हेत्ववयवनिर्देशः [1]क्रियतामित्यत आह–किं चेति। व्याप्यतानवच्छेदकेन हेतुनिर्देशेऽतिप्रसङ्गादिति भावः।

ननु [2]धूममात्रनिष्ठव्याप्तौ नीलधूमत्वं न्यूनवृत्तित्वादेव नावच्छेदकम्, न तु गौरवात्। नीलधूममात्रनिष्ठव्याप्तौ नीलधूमत्वमेवावच्छेदकम्, न तु धूमत्वम्, अतिप्रसक्तत्वादिति चेत्—न। न्यूनवृत्तेरपि व्याप्यतावच्छेदकत्वात्। अन्यथा आलोकाद्यवृत्तित्वेन [3]धूमत्वस्याप्यतत्त्वापत्तेः।

ननु गौरवेण नीलधूमत्वावच्छेदेन व्याप्त्यग्रहे अज्ञानरूपासिद्धिरस्तु, न तु हेत्वाभासीभूता सा अज्ञायमानप्रतिबन्धकत्वाभावात्। न च यतो गौरवान्नीलधूमत्वस्यानवच्छेदकत्वम्, तदेव [4]व्याप्यत्वासिद्धित्वेन विवक्षितम्, तस्य ज्ञायमानत्वेनैव प्रतिबन्धकत्वादिति वाच्यम्। परामर्शविषयाभावास्यैवासिद्धित्वेन ग्रन्थकृदभिमतत्वात्, गौरवस्यातथात्वात्। तथा च व्याप्यत्वासिद्धिर्व्यर्थविशेषणादावपीत्यसंगतमिति चेत्—

[5]अत्राहुः। यत्संबन्धितावच्छेदकरूपवत्त्वलक्षणा व्याप्तिर्लाघवादनुमितिहेतुः। सकलसाधनवति साध्यवत्त्वं दर्शयता उदाहरणेन सैव प्रदर्श्यत इति तदभावो व्याप्यत्वासिद्धिः

तर्कचूडामणिः

पनानुपपत्तिरित्यत आह—नन्विति। अतिप्रसङ्गात्–द्रव्यत्वादिरूपेणापि धूमादिनिर्देशापत्तेरित्यर्थः। अवच्छेदकत्वम् अनतिरिक्तवृत्तित्वमात्रम्, न त्वन्यूनवृत्तित्वसहितं, गौरवादित्याशयेन आह—नेति। ननु व्याप्यत्वासिद्धिपदेन सैव विवक्षितेत्यत आह—न चेति। गौरवज्ञानस्य ग्राह्याभावानवगाहितया न प्रतिबन्धकत्वम्। न चैवं दण्डादावपि नीरूपवद्दण्डत्वाद्यवच्छेदेन हेतुताग्रहापत्तिः। तत्र गौरवज्ञानाधीनानवच्छेदकत्वज्ञानस्यावच्छेदकताग्रहप्रतिबन्धकत्वात्। न चात्रावच्छेदकत्वं व्याप्तिशरीरप्रविष्टम् इति दोषे सत्येव दोषान्तरमाह—परामर्शेति।

1 स्यादित्यतः—ग 2 धूममात्रव्याप्तौ—क
3 धूमत्वस्याप्यव्याप्यतावच्छेदकत्वापत्तेः ख 4 व्याप्यत्वासिद्धत्वेन–क
5 अत्र केचित्–ख–ग

प्रकाशः

अवच्छेदकत्वाभावपर्यवसन्नो नीलधूमादौ धूमत्वरूपावच्छेदकान्तरसत्त्वेन नीलधूमत्वस्य तद्घटितशरीरस्यानवच्छेदकत्वात् । एवं च परामर्शविषयाभावत्वमपि [3]समर्थितमित्याहुः ।

अत्र वदन्ति । संबन्धितावच्छेद[1]कलक्षणायां व्याप्तौ अवच्छेदकत्वं यद्यनतिरिक्त-देशवृत्तित्वं[2] तदा तन्नीलधूमेऽप्यस्ति । अथ तादृशधर्मान्तराघटितत्वमपि तत्र विशेषणम्, तदा सर्वव्याप्तिलक्षणतो गौरवादनुमित्यहेतुरेवेति [3]तदभावज्ञानस्य क्व प्रतिबन्धकता । [4]तादृशधर्मान्तराघटितत्वादेः [4]उदाहरणादुपस्थितिशङ्कैव नास्तीति न किंचिदेतत् ।

[5]तस्मादिदमत्र तत्त्वम् । नीलधूमे धूमत्वावच्छिन्नव्याप्तिसत्त्वेऽपि, नीलधूमत्वावच्छिन्न-व्याप्तिविरहो व्याप्यत्वासिद्धिः । स च विशेषणावच्छिन्न[6]विशेष्यविरहो[6]वा संबन्धविरहो वेत्यन्यदेतत् । एवं च ज्ञानगर्भहेत्वाभासलक्षणं परामर्शविषयाभावत्वं च [7]संगच्छते । न च नीलधूमत्वावच्छिन्नव्याप्त्यप्रसिद्धेः कथमेवमिति वाच्यम् । [8]कस्तूरीदहनादिप्रतियोगिक-विशेषव्याप्तेरेव तादृश्याः प्रसिद्धेः । न च तादृशव्याप्तिर्नीलधूमेऽस्त्येवेति [9]वह्नित्वावच्छिन्न-प्रतियोगिकनीलधूमत्वावच्छिन्नव्याप्त्यभावस्य वाच्यत्वे पुनः सैवाप्रसिद्धिरिति वाच्यम् । नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगिकत्वलक्षणव्यापकत्वाभावस्य वह्नित्वावच्छिन्ने व्याप्यत्वासिद्धि-

तर्कचूडामणिः

तद्घटितेति । अनतिरिक्तवृत्तिधूमत्वघटितेत्यर्थः ।

जयदेवोक्तसमाधिद्वयमाह—तस्मादिति । ननु विशेष्यवति विशिष्टाभावस्य विशेषणाभावरूपतया [10]नीलधूमत्वावच्छिन्नत्वाभाव एव पर्यवस्येत् । स च न व्याप्तिविरह इत्यत आह-**स चेति ।** स चान्य एव शक्तौ तथा स्थापनात् । प्रतियोगिनि परं नवीनसांप्रदायिकयोर्विवाद इति भावः ।

---

1 कत्वल—क
2 स्वमभिमतम्—क
3 तादृशज्ञानस्य—ख ग
4 तादृशधर्माघटित—ख ग
4 उदाहरणशङ्कैव--ख
4 उदाहरणोपदशन--ग
5 तस्मादिदमेव तत्त्वम्—क
6 विरहो—ख ग
7 संगतम्—क
8 कस्तूरिका—ग
9 नीलधूमत्वावच्छिन्ने वह्नित्वावच्छिन्नव्याप्तिविरहस्य—ग
10 नीलधूमत्वावच्छिन्नाभाव—ग

प्रकाशः

[1]तदार्थत्वात् । तज्ज्ञानस्यापि प्रतिबन्धकत्वात्[1] । समानवित्तिवेद्यतया व्याप्यत्ववत् व्यापकत्वस्यापि परामर्शविषयत्वेन उक्तव्यापकत्वाभावे परामर्शविषयाभावत्वस्यापि सत्त्वाच्च ।

यद्वा धूमत्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्यभाव एव व्याप्यत्वासिद्धिः । [2]तस्यापि नीलधूमत्वावच्छिन्ने सत्त्वेनान्यधर्मावच्छिन्ने[3] विरहादिनि ।

वस्तुतो वह्निनिरूपितधूमनिष्ठव्याप्तौ [4]नीलधूमत्वं नावच्छेदकम्, किं तु धूमत्वमित्युभयवादिसिद्धम् । अवच्छेदकत्वं च स्वरूपसंबन्धविशेषो वा अन्यद्वेत्युभयवादिनिर्वक्तव्यम् । अन्यथाछगौरवेण नीलधूमत्वा[4]वच्छेदेन व्याप्यग्रहे अज्ञानरूपासिद्धिरित्यपि न स्यात् । गौरवज्ञानस्यावच्छेदकत्व[5]ग्रहेऽप्रतिबन्धकत्वात् ।

तर्कचूडामणिः

ननु साध्यतावच्छेदके यदि व्याप्तिप्रतियोगितारूपव्यापकतावच्छेदकत्वं ग्राह्यम्, [6]तदैतद्ज्ञानं ग्राह्याभावविषयं प्रतिबन्धकं स्यात् । न चैवम्, तादृशाभावप्रतियोगितावच्छेद[7]कत्वाभावस्यैव तत्र ग्राह्यतया उक्तस्य तत्राग्राह्यत्वात् । लाघवेनैतद्ज्ञानस्यैवानुमितिहेतुत्वात् । अत एव च न व्याप्यत्वासिद्धित्वमपि । किं चैवमपि रूपवद्धूमवत्त्वादौ व्याप्यत्वासिद्धिर्न स्यात्, रूपवद्धूमवत्त्वावच्छिन्नव्याप्तेरप्रसिद्धेरित्यपरितोषादाह— **यद्वेति** । यद्यप्यत्र द्वितीयदोषतादवस्थ्यम्, तथापि नीलधूमत्वावच्छिन्ने धूमत्वावच्छिन्नव्याप्यभाव इत्यर्थः । तथा च तत्र रूपवद्धूमत्वावच्छिन्ने तदभाव इति बोध्यम् ।

नन्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नसत्त्वस्याभावविरोधितया नीलधूमत्वावच्छिन्नधूमत्वावच्छिन्नव्याप्तिविरहः सविशेषणे हीतिन्यायेन नीलधूमत्वस्यावच्छेदकत्वाभावपर्यवसन्न एव । तज्ज्ञानं च न प्रतिबन्धकम्, अवच्छेदकत्वस्याग्राह्यत्वादित्यनुशयादाह— **वस्तुत इति** । **उभयेति** । मीमांसकनैयायिकेत्यर्थः । **अवच्छेदकावच्छिन्नेति** ।

---

1 पदार्थत्वात्—ख—ग
2 तस्याः—क
3 च्छिन्नविरहात्—क—ख
4 नीलधूमत्वा—ग
5 ज्ञान एव प्रतिबन्धकत्वात्—ग
6 तदैतज्ज्ञान—ग
7 दकाभावस्यैव—ग

प्रकाशः

एवं च [1]यत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नसामानाधिकरण्यावच्छे[2]दकावच्छिन्नत्वं व्याप्तिः। तथा च नीलधूमत्वे तादृशावच्छेदकत्वाभावः परामर्शविषयाभावतया [3]भवत्यसिद्धः। न च व्याप्तेस्तादृशावच्छेदकगर्भत्वे मानाभाव इति वाच्यम्। व्यर्थविशेषणे व्याप्तिग्रह[4]प्रतिबन्धस्यैव तत्र[5] मानत्वात्। गौरवज्ञानस्यावच्छेदकत्वातिरिक्तव्याप्तिघटकपदार्थग्रहाप्रतिबन्धकत्वात्।

तर्कचूडामणिः

अनवच्छेदकावच्छिन्नेत्यर्थः। स्वयूथ्यं प्रत्याह–तथा चेति।

नन्वेवं व्याप्तिशरीरनिविष्टावच्छेदकत्वग्रहप्रतिबन्धकज्ञानविषयतया गौरवस्याभासान्तरत्वं स्यात्। अपि च तादृशसामानाधिकरण्यावच्छेदकद्रव्यत्वावच्छिन्नतया व्यभिचारण्यतिव्याप्तिः। यदि चानतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं विवक्षितं तत्र नेति मतम्, तदा अव्यभिचारांशवैयर्थ्यम्। व्यभिचारिणि निरुक्तावच्छेदकत्वाभावादेवातिव्याप्त्यनवकाशात्। यदि च स्वरूपसंबन्धविशेषरूपं तत् तत्रापीति मतम्, तदा द्रव्यत्वेऽपि तदित्यतिव्याप्तितादवस्थ्यम्। न हि संभवति वह्नित्वे धूमसामानाधिकरण्यावच्छेदकत्वं स्वरूपसंबन्धविशेषरूपमस्ति, न तु [6]धूमनिष्ठद्रव्यत्वे वह्निसामानाधिकरण्यावच्छेदकत्वं तादृशमिति। अतिप्रसक्तेरुभयात्रविशेषात्।

किं च यथेदं वाच्यं मेयवत्त्वादिग्यादौ मेयादिलिङ्गे [7]वृत्तिमेयत्वमादाय व्याप्तिसत्त्वेऽपि तदवच्छेदकं मेयत्वं मेयत्वावच्छिन्नस्य च व्याप्यत्वम्, तथा नीलधूमे धूमत्वमादाय व्याप्तिसत्त्वेऽपि व्याप्यतावच्छेदकं नीलधूमत्वमिति न कुतस्तदवच्छिन्नस्य व्याप्यत्वम्। न च धूमत्वावच्छिन्नत्वं [8]न नीलधूमस्य, [9]नीलिम्नि धूमत्वाभावदिति वाच्यम्। एवं हि धूमत्वे धूमत्वा भावेन तदवच्छिन्नोऽपि न धूमत्वावच्छिन्न इति धूमोऽपि न व्याप्यः स्यात्। न स्याच्च

1 यत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकावच्छिन्नत्वम्—ख
2 वच्छेदकीभवद्भिन्नत्व–क
3 भवत्वसिद्धिः–ग
4 प्रतिबन्धकत्वस्यैव–क
5 तत्प्रमाणत्वात्–क
6 धमनिष्ठ–क
7 वृत्तिमन्मेयत्व–ग
8 न धूमस्य–ग
9 नीलधूमताभावात्–क

प्रकाशः

[1]यथा च व्यभिचरिते व्याप्तिग्रहप्रतिबन्ध एवाव्यभि[2]चरितत्वगर्भत्वे तस्या मानम् । न च तत्र व्याप्तिग्रहप्रतिबन्धो न भवत्येवेति वाच्यम्। एवं हि अज्ञानरूपाप्यसिद्धिर्न स्यात् । तथा च एकामसिद्धिं परिहरतो [3]द्वितीयापत्तिरिति सिद्धान्तोऽपि भज्येत । तस्मात् परिहर वा तत्राज्ञानरूपासिद्धिं स्वीकुरु वा व्याप्तेरवच्छेदकत्वगर्भत्वमिति दिक् ।

तर्कचूडामणि

[4]वृत्तिमन्मेयत्वावच्छिन्नं [5]न मेयत्वावच्छिन्नमिति मेयत्वावच्छिन्नस्य वाच्यत्वव्याप्यत्वम् । गौरवादेव नीलधूमत्वं न व्याप्यतावच्छेदकमिति वाच्यम् । एवं हि किं व्याप्तेरवच्छेदकत्वागर्भत्वेन । तदगर्भत्वेऽपि गौरवादेव [7]तस्य व्याप्यतानवच्छेदकत्वात् ।

यदि च गौरवज्ञानप्रतिबन्धकत्वाय [6]अवच्छेदकत्वस्य ग्राह्यव्याप्तिशरीरान्तर्भावकल्पनम् , तदा तज्ज्ञानस्य तादृशसामानाधिकरण्यावच्छेदकत्वग्रहविघटकत्वं भवेत् , न तु तादृशावच्छेदकत्वघटितव्याप्यातायां यदवच्छेदकत्वं तत्त्वग्रहप्रतिबन्धकत्वम् , व्याप्यतावच्छेदकत्वस्य [8]व्याप्तिशरीराप्रवेशात् । प्रवेशेऽपि वा तादृशधूमत्वमाहाय पुनरपि नीलधूमत्वावच्छिन्ने व्याप्त्यापादनात् । [9]अथ मतं नैल्यांशस्य [10]वह्न्यसामानाधिकरण्यात् न विशिष्टस्य व्याप्यत्वमिति, तदा धूमत्वस्यापि वह्न्यसमानाधिकरण्यान्न तदवच्छिन्नस्यापि व्याप्यत्वम्। यदि तदंशे परंपरासंबन्धः, तदा तुल्यम् ।

तस्मात् यद्यधिकरणतावच्छेदकावच्छिन्नेऽधिकरणे प्रतियोगिसत्त्वं विरोधि, तदा नीलधूमत्वावच्छिन्ने न वह्निव्याप्तिरिति ज्ञानं व्याप्त्यभावमेवावलम्बत इति तदास्य हेत्वाभासत्वम् । अधिकरणतावच्छेदकाभावज्ञानद्वारा चोक्ताभावज्ञने गौरवज्ञानं प्रतिबन्धकम् , न त्ववच्छेच्दकत्वं

1 तथा च-क
2 चारगर्भ-क
3 द्वितीयासिद्धि-क
4 वृत्तित्वमेयत्वा-क
5 न धूमेमेय-क
6 तस्याः-क
7 तदवच्छेदक-क
8 शरीरप्रवेशात्-क
9 कथमेवन्नैल्यांशस्य-क
10 वह्निसामाना-क

न चवं धूमत्वस्यावच्छेदकत्वेऽपि सामग्रीसत्त्वात् नीलधूमादनुमित्युत्पत्तौ हेत्वाभासत्वं न स्यात्, अनुमितिप्रतिबन्धकस्य तत्त्वादिति वाच्यम्। तदभावेऽपि नीलधूमप्रयुक्तसाध्यवत्प्रत्ययस्य भ्रमत्वेन तत्कारणत्वस्याभासत्वसंभवादिति दिक्।

प्रकाशः

भ्रमत्वेनेति। ननु ज्ञायमानतया [1]प्रतिबन्धकत्वाभावात् तथाप्यस्य कथं हेत्वाभासत्वम्। किं च तत्प्रयुक्तत्वं [2]तज्जन्यत्वं तज्ज्ञाप्यत्वं [3]वा न संभवति। नापि तद्विशिष्टत्वमर्थः, अनुमितौ लीङ्गाविषयत्वात्। न च लिङ्गोपहितभानपक्षेऽपि तद्भासंते। उपस्थापकाभावात्। तत्कथं तद्विषयत्वेनानुमितेर्भ्रमत्वमिति चेत्—

तर्कचूडामणिः

व्याप्तिशरीरनिविष्टम्। अत एव [4]कारणताशरीरस्यावच्छेदकागर्भत्वेऽपि न रूपवद्दण्डत्वेन दण्डस्य हेतुता, गौरवेण तस्यानवच्छेदकत्वादिति सिद्धान्तः। [5]न च तत्रापि तेन रूपेणान्यथासिद्धत्वादेव न हेतुरिति वाच्यम्। तथापि [6]द्रव्यत्वेन रूपेणान्यथासिद्धेरभावात्। फलमुरवगोरवव्यावृत्तप्रतिबन्धकतावच्छेदकाभावान्नाद्यदोष इति।

तस्मात् यथा क्वचित् पक्षे साध्याभावः, क्वचित् तदवच्छेदकावच्छिन्ने तदभावो बाधः, एवं व्यभिचारिणि व्याप्यभावः, नीलधूमादौ तत्त्वावच्छिन्ने तदभावश्च व्याप्यत्वासिद्धिरिति युक्तमुत्पश्यामः। तदेतदाह—**दिगिति।**

न संभवतीति। साध्यस्य तत्प्रत्ययस्य वा लिङ्गाजन्यत्वात् तदज्ञाप्यत्वाच्चेति भावः। [7]**विशिष्टत्वम्**—विषयत्वमित्यर्थः। अत एवाह—**लिङ्गाविषयत्वादिति।** **उपस्थापकेति।** यद्विषयत्वेन परामर्शस्यानुमितिहेतुत्वं तस्यैवानुमितौ भानमिति [8]नियमेन नीलांशस्यातथात्वादिति भावः। भावेऽपि वा तदंशेऽप्यनुमितेः सद्विषयत्वमेवेति बोध्यम्।

---

1 अनुमितिप्रति—क
2 तद्धेतुत्वम्—ख
3 न च—ख—ग
4 करणता—ग
5 न चात्रापि—क
6 तेनापि रूपेणानन्यथासिद्धेरपि भावात्—ग
7 विशिष्टविषयत्वमित्यर्थः—ग
8 नीलधूमेन नीलांशस्य तथात्वात्—ग

प्रकाशः

अत्राहुः । अनुमित्याभासताप्रयोजकत्वं हेत्वाभासत्वमिति [1]संप्रदायमतेनास्याभिधानम् [2] । तत्प्रयुक्तत्वं च तद्विशिष्टत्वम् । [2a]तथा च लिङ्गोपहितभानपक्षे व्याप्यत्वासिद्धौ नीलधूमः [3]व्याप्यत्वेनैवानुमितौ भासत इति तस्याः [4]भ्रमत्वम् इति ।

केचित्तु वह्निव्याप्यनीलधूमवान् वह्निमानित्यनुमितौ [5]ज्ञाप्यज्ञापकभावस्य संसर्गविधया भानात् [6]नीलधूमे च तत्त्वेन रूपेण तदभानात् तद्विषयत्वेन सस्याः भ्रमत्वमित्याहुः ।

[7]वस्तुतोऽनन्यथासिद्धधूमज्ञानादनुमितिसत्त्वेऽपि नीलधूमस्योद्देश्यानुमितिप्रतिबन्धकत्वेनैव हेत्वाभासत्वम् । शरीराजन्यत्वादौ च [8]विशेष्यस्यासिद्धतया विशिष्टस्य व्याप्यत्वासिद्धतया अनुमितिसामान्यप्रतिबन्धकत्वमेव । [9]तदेतत् सर्वमभिसन्धायाह — **दिगिति** ।

तर्कचूडामणिः

अत एव व्याप्यभाववति तज्ज्ञानत्वेन भ्रमत्वं सिद्धान्ते वक्ष्यते । यो यो धूमवान् वह्निमानितिवत् सामानाधिकरण्य मात्रं बोध्यते, न तूक्तसंबन्ध इत्यनुशयं सूचयति — **केचिदिति** ।

ननु [10]तर्हि व्यभिचारादेरपि अनुमित्याभासतायामतन्त्रत्वेनाव्याप्तिः । [11]क्वाचित्कतद्विवक्षायामुपाधावति व्याप्तिरिति प्राचां मतेऽपरितुष्यन्नाह—**वस्तुत इति** । **उद्देश्येति** । नीलधूमत्वावच्छिन्नव्याप्तिप्रयोज्येत्यर्थः । ननु तर्हि क्षितावपि विशेष्यभागमात्रादकर्तृकत्वसिद्धिः स्यादित्यत आह—**शरीरेति** । पूर्ववाक्योक्तभ्रमत्वनिमित्तकाभासत्वस्यदार्ष्टान्तिकेऽनुपपादनात्

---

1 संप्रदायेनास्य–क
2 धानमिति–क
2a तथापि-क
3 व्याप्यत्वेनानु–ख ग
4 भमत्वम्–ख ग
5 व्याप्यव्यापकभावस्य–क
6 नीलधूमत्वेन रूपेण तदभावात्–क
7 वस्तुतोऽन्यथा–क
8 विशेष्यासिद्धतया –क
9 एतदेव सर्व–क
10 ननु व्यभिचार–ख ग
11 क्वाचित्कत्वविव–क

एवं च शरीराजन्यत्वेऽपि न शरीरमवच्छेदकम्, गौरवात्। येन विशेषणेन विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यतावच्छेदकत्वनियमात्। अत एव गन्धस्यैव व्यञ्जकत्वादित्यत्र अप्रसिद्धत्वेन रूपादिषु मध्ये इति विशेषणं विना व्याप्तिर्ग्रहीतुं न शक्यत इत्यसिद्धिवारकमपि विशेषणं सार्थकमेव।

सुरभिधूमविशेषादौ च चन्दनप्रभवाग्न्यादेः कारणत्वात् कारणाभावस्य कार्याभावप्रयोजकतया व्याप्यत्वनिश्चयः।

प्रकाशः

प्रकृते योजयति — एवमिति। शरीराजन्यत्वेऽपीति। शरीरजन्यत्वाश्रय-[1]कार्यमात्रप्रतियोगिकयावदन्योन्याभावेऽपीत्यर्थः।

पूर्वोक्तदोषं निरस्यति—सुरभीति। ननु सुरभिधूमत्वं न कार्यतावच्छेदकम्, प्रत्येककार्यद्वयसामग्रीद्वयसमाजादर्थसमाजभहिम्नैव विशिष्टकार्यसिद्धेः नीलघटत्ववदिति चेत्—न। विशिष्टस्य कार्यतानवच्छेदकत्वेऽपि प्रत्येककारणताया एव तद्व्याप्यत्वनिश्चयमूलत्वसंभवात्।

तर्कचूडामणिः

एवंशब्दानुपपत्तिरित्यत आह—प्रकृत इति। [2]प्रकरणप्रतिपाद्यं गुरुणोऽनवच्छेदकत्वं तत्र नीलधूमत्वतौल्यं दर्शयतीत्यर्थः। शरीरजन्यत्वात्यन्ताभावे वैयर्थ्यशङ्कानवकाशादाह—शरीरेति। तादृश[3]पटभेदवति घटे व्यभिचारादाह—यावदिति। द्रव्यत्वावच्छिन्नान्योन्याभावस्य तादृशघटादिप्रतियोगिकस्य पक्षेऽभावादसिद्धिरित्यतो मात्रपदम्।

सुरभिधूमविशेषेत्यत्र विशेषपदं सौरभान्वितं, न तु धूमान्वितम्। सुरभि[4]पदवैयर्थ्यात्। न च धूमविशेषमेवोपदर्शयितुं तत्। चन्दनेतरप्रभूतधूमेऽपि सौरभसामान्यसत्त्वेन वह्निविशेषस्य तद्धेतुत्वानुपपत्तेरिति सूचयितुमाह—पूर्वेति। ननु व्यापकसामान्यानुवादेन व्यर्थविशेषणत्वाभावोक्तौ

---

1 आश्रयमात्र-ख-ग
2 प्रतिपाद्य-क
3 घट-ग
4 सुरभिवैय-क

व्यापके च न व्यर्थविशेषणता, विशिष्टस्य कारणत्वेन व्यापकत्वात्। [1]विशेषव्यतिरेकिस्थले विपक्षबाधकेनानन्यगतिकतया विशिष्टस्य व्यापकत्वात् विशिष्टाभावस्य हेत्वभावव्याप्यत्वम्। यत्र च विपक्षबाधकं नास्ति तत्र विशिष्टस्य व्यापकतापि न। यथा कार्यस्य द्विकर्तृकत्वेनापि शरीरजन्यत्वाभावोऽखण्डो हेतुः।

प्रकाशः

स्थापनानुमाने पूर्वोक्तव्यापके व्यर्थविशेषणत्वमुद्धरति—व्यापके चेति। विशिष्टस्येति। यद्यप्यदृष्टप्रागभावे[2]त्यादिना कृतित्वादिना प्रत्येकमेव कारणत्वम्, न तु तादृशकृत्यादिविशिष्टात्मत्वेन। कृत्यादीनां सह[3]कारितया परस्परं दण्डचक्रवदवच्छेदकत्वाभावात्। तथापि वस्तुगतिमनुरुध्यैतदुक्तम्. न तु तत्त्वेन जनकत्वं विवक्षितम्। न चैवं न विशिष्टस्य व्यापकत्वमिति वाच्यम्। प्रत्येककारणताया एव मूलत्वसंभवात्।

वस्तुतस्तु प्रत्येकमेव तद्व्यापकत्वमपि, आर्थसमाजनहिम्ना विशिष्टसिद्धिः। अत एव ग्रन्थकृतापि तथैव विभावितम्। धूमं प्रत्यार्द्रेन्धनप्रभववह्नित्वेनैव कारणत्वात् विशिष्टस्य व्यापकत्वम्। न च वह्निसंयोग आर्द्रेन्धनसहकारीति वाच्यम्। तत्संयोगे सत्यपि तत्प्रभववह्न्युत्पादं विना ततो धूमानुत्पत्तेरिति वदन्ति।

अखण्ड इति। तथा च प्रतियोगिविशेषणत्वान्न वैयर्थ्य[4]मिति भावः।

तर्कचूडामणिः

'कारणत्वहेतोर्भागासिद्धिः, व्यापकमात्रस्य व्याप्याहेतुत्वादित्यत आह-स्थापनेति।

अन्यकारणतायाः अन्यगत अन्यगतव्यापकत्वोपपादकत्वेऽतिप्रसङ्ग इत्यनुशयादाह—वस्तुत इति।

---

1 परिशेषव्यतिरेकिणीति पाठान्तरम्
2 त्यादिस्थले प्रत्येकमेव—क
3 कारितया दण्ड—क
4 करत्व—ग

उच्यते । यत्र प्रमाणे लघुगुरुविषयता संभवति तत्र लाघवसहकारिता । कारणताकार्यताव्याप्यतादिग्राहके प्रत्यक्षे , प्रवृत्तिनिमित्ताग्रहकेऽपमाने , शब्दशक्तिग्राहकेऽनुमाने , तथाविधप्रमाणमात्रे चमकलनान्त्रिकः सहकारित्व-कल्पनात् । एवंलाघवमेव गौरवमितिज्ञानानन्तरं बाधक विना लघूनामेव कारणत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात् । तत्रापि

प्रकाशः

यत्र प्रमाण इति । नन्वेवं संभवल्लघुविषयताकानुमितित्वं लाघवज्ञानकार्यतावच्छेदकमिति पर्यवसन्नम् । तथा च यत्र [1]लाघवप्रकारकं ज्ञानं न [2]जातम् , वस्तुतो लघोरेवानुमिति तत्र व्यभिचारः । न च लाघवज्ञानजन्यानुमितित्वमेव तथा. अन्योन्याश्रयादिति चेत्—न । लाघवगौरवोपस्थितिकालीनलघुविषयताकानुमितित्वस्य कार्यतावच्छेदकत्वात् ।

ननु तथापि लाघवज्ञानोपनीतमेकत्वं [3]प्रकारीभूय अनुमितौ कथं भासताम् । [4]व्याप्त्याद्युपनीतादन्यस्यानुमितौ भाने मानाभावादिति पूर्वोक्तविरोधात् । न च वस्तुगत्य एकः सिध्यति न त्वेकत्वमपीति वाच्यम् । एकत्वानेकत्वसंशयतादवस्थ्यात् ।

अत्राहुः । व्याप्त्याद्यनुपनीतमपि लाघवज्ञानोपनीतमनुमितौ भासते नान्यत् , अतिप्रसङ्गात् । लाघवज्ञानस्य प्रमाणमात्रसहकारित्वकल्पनात् । तदिदमुक्तम्—**तथाविधप्रमाणमात्र इति ।** अत्र [5]लाघवज्ञानोपनीतत्वस्यैव नियामकत्वान्नातिप्रसङ्गः । व्याप्त्यादीत्यादिग्रन्थस्तु लाघवानुपनीतविषयकः ।

तर्कचूडामणिः

व्याप्त्यादीति । तथा च लाघवोपनीतत्वमपि नियामकान्तरं कल्प्यते । न च लाघवात् उपनीतत्वमेव तथास्त्विति लिङ्गादेरपि विषयता स्यादिति वाच्यम् । उपनयमात्रस्य [6]मानमात्रसहकारि[6]त्वाकल्पनात् । न चेदमपि न माननात्रसहकारि । अपदार्थस्य-

---

1 तज्ज्ञानं—ग
2 वृत्तम्—ख
3 अनुमितौ—ख
4 व्याप्युप—क
5 लाघवोपस्थितत्वस्यैव—क
6 सहकार—ग

लाघवानादरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्। सोऽयं विचारमारभते, लाघवं श तदङ्गं नाङ्गीकुरुत इति महासाहसम्।

नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्तृसिद्धिः स्यात्। न चेष्टापत्तिः, अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेत्—न। तत्रापि लाघवेन कर्त्रैक्यमेव सिध्यति। तत्संदेहस्तु ज्ञानप्रामाण्यसंशयादिति पश्चान्नानाकर्तृकत्वसाधकप्रमाणादेव एककर्तृकतानुमानं तत्र बाध्यते। न चैवं क्षित्यादिकर्तर्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयो दुरुच्छेदः। एकत्वे बाधकस्याभावेन प्रामाण्यनिश्चयात्। न चैकत्वसाधकाभाव एव बाधकः। अनुमितेरेव लाघवसहकारेणैकत्वसाधकत्वात्।

प्रकाशः

नन्वेकविषयत्वेऽप्यनेकविषयत्वसंभवात् संशयतादवस्थ्यमिति चेत्— न।

तर्कचञ्चुर्मणिः

शाब्दज्ञानाविषयत्वात् इति वाच्यम्। श्रुतपदस्य लाघवसहकारेण लघुपरत्वकल्पनेन लघोः पदार्थत्वसंभवात्। अत एव कपिञ्जलाद्यधिकरणे बहुवचनादेस्त्रित्वादिमात्रपरत्वकल्पनम्। न चैवमपि लाघवेऽप्यनुगतरूपाभावात् न [1]सहकारित्वमिति वाच्यम्। [2]संभवद्भिन्नाभिन्नभावाभावनित्यानित्यजात्युपाधिसामान्यविशेषादिविषयकमानत्वावच्छेदेन भावजातिसामान्याभिन्नत्वज्ञानादीनां विशेषरूपेणानन्यगत्या सहकारित्वाकल्पनादिति भावः। एकशब्दस्य संख्यापरत्वाशयेनाह—नन्विति। अभिन्नत्वं तदर्थ इत्याशयेन परिहरति—नेति।

---

1 सहकारित्वादिति-क 2 संभवात्-क

उच्यते । यत्र प्रमाणे लघुगुरुविषयता संभवति तत्र लाघवसहकारिता । कारणताकार्यताव्याप्यतादिग्राहके प्रत्यक्षे, प्रवृत्तिनिमित्ताग्रहकेऽउपमाने, शब्दशक्तिग्राहकेऽनुमाने, तथाविधप्रमाणमात्रे चसकलतार्किकैः सहकारित्व-कल्पनात्। एवंलाघवमेव गौरवमितिज्ञानानन्तरं बाधक विना लघूनामेव कार-णत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात् । तत्रापि

प्रकाशः

यत्र प्रमाण इति । नन्वेवं संभवल्लघुविषयताकानुमितित्वं लाघवज्ञानकार्यतावच्छेदक-मिति पर्यवसन्नम् । तथा च यत्र [1]लाघवप्रकारकं ज्ञानं न [2]जातम्, वस्तुतो लघोरेवानुमिति तत्र व्यभिचारः । न च लाघवज्ञानजन्यानुमितित्वमेव तथा, अन्योन्याश्रयादिति चेत्—न । लाघवगौरवोपस्थितिकालीनलघुविषयताकानुमितित्वस्य कार्यतावच्छेदकत्वात् ।

ननु तथापि लाघवज्ञानोपनीतमेकत्वं [3]प्रकारीभूय अनुमेतौ कथं भासताम् । [4]व्याप्त्याद्युपनीतादन्यस्यानुमितौ भाने मानाभावादिति पूर्वोक्तविरोधात् । न च वस्तुगत्या एकः सिध्यति न त्वेकत्वमपीति वाच्यम् । एकत्वानेकत्वसंशयतादवस्थ्यात् ।

अत्राहुः । व्याप्त्याद्यनुपनीतमपि लाघवज्ञानोपनीतमनुमितौ भासते नान्यत्, अतिप्रसङ्गात् । लाघवज्ञानस्य प्रमाणमात्रसहकारित्वकल्पनात् । तदिदमुक्तम्—**तथा-विधप्रमाणमात्र इति ।** अत्र [5]लाघवज्ञानोपनीतत्वस्यैव नियामकत्वान्नातिप्रसङ्गः । व्याप्त्या-दीत्यादिग्रन्थस्तु लाघवानुपनीतविषयकः ।

तर्कचूडामणिः

व्याप्त्यादीति । तथा च लाघवोपनीतत्वमपि नियामकान्तरं कल्प्यते । न च लाघवात् उपनीतत्वमेव तथास्त्विति लिङ्गादेरपि विषयता स्यादिति वाच्यम् । उपनयमात्रस्य [6]मानमात्रसहकारित्वाकल्पनात् । न चेदमपि न मानमात्रसहकारि । अपदार्थस्य-

---

1 तज्ज्ञानं—ग
2 वृत्तम्—ख
3 अनुमितौ—ख
4 व्याप्युप—क
5 लाघवोपस्थितत्वस्यैव—क
6 सहकार—ग

लाघवानादरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्। सोऽयं विचारमारभते, लाघवं श तदङ्गं नाङ्गीकुरुत इति महासाहसम्।

नन्वेवं वस्तुगत्या नानाकर्तृकेषु घटेषु घटत्वेन कुलालकर्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्तृसिद्धिः स्यात्। न चेष्टापत्तिः, अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेत्—न। तत्रापि लाघवेन कर्त्रैक्यमेव सिध्यति। तत्संदेहस्तु ज्ञानप्रामाण्यसंशयादिति पश्चान्नानाकर्तृकत्वसाधकप्रमाणादेव एककर्तृकतानुमानं तत्र बाध्यते। न चैवं क्षित्यादिकर्तर्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयो दुरुच्छेदः। एकत्वे बाधकस्याभावेन प्रामाण्यनिश्चयात्। न चैकत्वसाधकाभाव एव बाधकः। अनुमितेरेव लाघवसहकारेणैकत्वसाधकत्वात्।

प्रकाशः

नन्वेकविषयत्वेऽप्यनेकविषयत्वसंभवात् संशयतादवस्थ्यमिति चेत्— न।

तर्कचक्रभ्रमणिः

शाब्दज्ञानाविषयत्वात् इति वाच्यम्। श्रुतपदस्य लाघवसहकारेण लघुपरत्वकल्पनेन लघोः पदार्थत्वसंभवात्। अत एव कपिञ्जलाद्यधिकरणे बहुवचनादेस्त्रित्वादिमात्रपरत्वकल्पनम्। न चैवमपि लाघवेऽनुगतरूपाभावात् न [1]सहकारित्वमिति वाच्यम्। [2]संभवद्भिन्नाभिन्नभावाभावनित्यानित्यजात्युपाधिसामान्यविशेषादिविषयकमानत्वावच्छेदेन भावजातिसामान्याभिन्नत्वज्ञानादीनां विशेषरूपेणानन्यगत्या सहकारित्वाकल्पनादिति भावः। एकशब्दस्य संख्यापरत्वाशयेनाह—नन्विति। अभिन्नत्वं तदर्थ इत्याशयेन परिहरति—नेति।

---

1 सहकारित्वादिति-क 2 संभवात्-क

अन्ये तु–क्षितिकर्ता अङ्कुरकर्त्रभिन्नः अशरीरकर्तृत्वात् अङ्कुरकर्तृवत् इत्यभेदानुमानात् एककर्तृसिद्धिः । न च क्षितिकर्ता अङ्कुरकर्तृभिन्नः अङ्कुराकर्तृत्वात् कुलालवत् इति सत्प्रतिपक्षः । अनित्यज्ञानानामाश्रयस्योपाधित्वादित्याहुः ।

अत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरवलाघवे एव शरणम् । तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः । पक्षधर्मताबलादिति चेत्—व्यापकतयावगतस्य पक्षसंबन्धमात्रं पक्षधर्माद्धेतोः सिध्यति । तथा च पक्षे तदुपादान-

---

प्रकाशः

एकमात्रकर्तृकत्व एव लाघवावतारात् [1]तस्यैवानुमितिविषयत्वात् । अत एव नानाकर्तृकघटेषु [2]पश्चादेककर्तृकताज्ञानं बाध्यते इत्यग्रे [3]वक्ष्यति । अन्यथा नानाकर्तृकेष्वप्येककर्तृकताज्ञानस्य प्रमात्वेन बाधासंभवादिति ।

अन्ये वित्यत्रास्वरसबीजमुद्घाटयति[4]–अत्रापीति । किं चोक्तानुमानेन [5]क्षित्यङ्कुरकर्त्रोरभेदानुमितावपि सागरादिकर्तुरेतद्भिन्नत्वसंशयात् ईश्वरे नानात्वसंशयतादवस्थ्यमिति भावः ।

तर्कचूडामणिः

ननु कर्तृमात्रस्य एकत्वाश्रयतया एकेतरत्वाभावेन नानाकर्तृकेऽपि एकमात्रकर्तृकत्वापत्त्या अभिन्नकर्तृकत्वमेव वाच्यम् । तदपि न संभवति । अभेदो हि भेदाभावः न हि घटादिभेदवति ईश्वरे तत्संभवः । नापि कर्तृभेदाभावो विषयः, अस्मदादिभेदसत्त्वात् । नाप्यङ्कुरकर्तृभेदाभावः, तथानुमितिपूर्वमङ्कुरकर्त्रनुपस्थित्या तद्भेदतदभावानुपस्थितेरिति चेत्–न । विशेष्ये विशेषणमिति न्यायेनाङ्कुरकर्तृभेदाभावस्यानुमितिविषयत्वसंभवात् । वस्तुतस्तर्काद्विशिष्टोपस्थितिः संभवतीति बोध्यम् ।

नन्वेवमपि स नानुमितिविषयः, भेदाभावात् । भेदस्यैव लघीयस्त्वेनानुमितिविषयत्वात् इत्यत आह–तस्यैवेति । न ह्यनुमितिविषयशरीरकृतं लाघवं गौरवं वा प्रस्तुतम् ।

---

1 तस्य सर्वानुमिति–क
2 पश्चात् कर्त्रेकता–क
3 वक्ष्यते–क
4 इत्यत्रास्वरसोद्घाटनमुद्घाटयति–क
5 क्षितिकर्त्रोरङ्कुरकर्त्रभेदा–ग

गोचरज्ञानमात्रं सिध्येत् , न तु नित्यसर्वविषयज्ञानम्, तेन रूपेण व्यापकत्वाग्रहात् । न च येन विनानुपपत्तिः सोऽपि विषयः, व्यतिरेकिविलयापत्तेः ।

अत्र प्राञ्चः । यमर्थमनालम्बमानानुमितिः पक्षे साध्यसंबन्धं न विषयीकरोति स पक्षधर्मताबलात् सिध्यतीत्यनुपपत्तिमूलकोऽन्वयी, [1]प्रतीत्यनुपपत्त्या च व्यतिरेकी । तदिहानादिद्व्यणुकादिकार्यप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विना नोपादानगोचरज्ञानजन्यत्वमनादिकार्यप्रवाहस्यानुमितिरालम्बते । अनादितैव च नित्यता । सर्वमुक्तावपि तत्सत्त्वम् , अनादिभावत्वात् । पक्षतदुपादानविषयतैव च सर्वविषयता । लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिध्यति, न तु नित्यानित्यज्ञानानीति ।

नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यन् नित्यमेव सिध्यति, अनित्ये बाधात् ।

प्रकाशः

अनादिभावत्वादिति । यद्यप्यनुमितौ नानादित्वं विषयः, तथाप्यनादिकार्यप्रवाहविषयत्वेन [2]तत्सिद्धिरिति भावः ।

नव्यास्त्वित्यस्वरसोद्भावनम् । तद्बीजं तु उपनीतभानानङ्गीरात् नित्यज्ञानजन्यत्वं पक्षधर्मताबलादपि न सिध्यतीति ।

तर्कचूडामणिः

किं तु कल्पनालाघवं तद्गौरवं च । यदि भिन्नकर्तृकता तदा कर्तृव्यक्त्यन्तरं तयोर्भेदश्चेति गौरवम् । यद्यभिन्नकर्तृकत्वं, तदा न व्यक्त्यन्तरं नापि भेद इति कल्पनालाघवमिति तात्पर्यम् ।

अनादीति । यद्यप्यप्रमेयत्वादि [यद्यपि प्रमेयत्वादि] प्रत्यासत्तिजन्यज्ञाने व्यभिचारः; तथाप्यनादिद्व्यणुकादिप्रवाहस्यागन्तुकज्ञानेनोत्पादायोगादनादित्वसिद्धिरिति भावः ।

---

1 प्रतीतानुपपत्त्या 2 तत्सिद्धेरिति–क

वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः । नियतविषयता च ज्ञानस्य कारणाधीना । कारणं च नित्यज्ञानान्निवर्तमानं नियतविषयतामादाय निवर्तत इति सर्वविषयत्वसिद्धिरिति ।

षट्पदार्थप्रतिपादकवेदकर्तृत्वेनेश्वरस्य षट्पदार्थगोचरसाक्षात्कारत्वेन वा सार्वज्ञ्यम् । घटाकाशसंयोगं प्रति ईश्वरस्य कर्तृत्वात् घटादिगोचरमपि ज्ञान सिद्धमिति केचित् ।

ननु घटादीनां कथमीश्वरकर्तृकत्वं भवति । घट ईश्वरकर्तृकः कार्यत्वात् क्षितिवदिति चेत्—न । घटस्य द्विकर्तृकतया तद्दृष्टान्तेन क्षित्यादेरपि द्विकर्तृकतापत्तेः । तथा च घटवत् क्षितिः क्षितिवत् घट इतीश्वरानन्त्यम् । कार्ये कर्तृत्वेन कारणता न तु द्विकर्तृकत्वेनेति चेत्—तर्हि नेश्वरकर्तृकत्वेन कारणता, किं तु कर्तृत्वेनेति ।

मैवम् । ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वमपीति कथ न तेषां घटादिकारणत्वम् , कुलालादिज्ञानतुल्यत्वात् । तदाहुराचार्याः—

प्रकाशः

ननु तथापि कथं सर्वविषयत्वमित्यत आह—नियतेति । एवं च पक्षे तदुपादानाद्यतिरिक्तविषयत्वमपि सिध्यति । एतेन प्रथमकल्पेऽन्वयोऽपि [1]सूचितः । पक्षादिविषयत्वे [2]तत्र सर्वविषयत्वासिद्धेरिति ।

नन्विति । तथा च कथं जगन्निर्मातृत्वमिति भावः ।

तर्कचूडामणिः

मा भूदीश्वरस्य घटादिकर्तृत्वसिद्धिरित्यत आह—तथा चेति ।

---

1 दर्शितः—क 2 तत्सर्व—क

"परमाण्वदृष्टाधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन
सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् ,
न तु तदधिष्ठानार्थमेवेश्वरसिद्धिः" इति ।
"अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते"
इत्यागमाच्च अयमर्थोऽध्यवसेयः ।

अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तः स्यात् । भ्रमस्येव तस्यापि भ्रमविषयविषयकत्वादिति चेत्—न । रजतत्वप्रकारक-ज्ञानवानयमिति ज्ञानं न भ्रमः, अभ्रान्तस्य तथात्वात् । इदं रजतमिति ज्ञाने रजतत्वं प्रकारः. तेन स भ्रमः । ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति स न भ्रमः । अत एवास्मदादिरपि भ्रान्तिज्ञो न भ्रान्त इति ।

स्यादेतत् । प्रयोजनं विना कथमीश्वरः प्रवर्तते ? सुखस्याभावात्, अधर्माभावेन निर्दुःखत्वात् । करुणया प्रवर्तत इति चेत्—तर्हि परसुख दुःखग्रहाणे प्रयोजने । तथा च [1]स्वर्गिणमेव सृजेन्न नारकिणम् । धर्मा-धर्मपरतन्त्रत्वात् तदनुरूपं फलं प्रापयतीति चेत्—तर्हि अवश्यकत्वात् कर्मनिमित्तमेव जगद्वैचित्र्यमस्तु किम् इश्वरेणानपेक्षितकीटादिज्ञानवता । कर्मनिरपेक्षत्वे च एकदैव सदा च सर्गप्रलयौ स्याताम् , ज्ञानादीनां नित्यत्वात् । किं च तत्प्रयत्नस्य करुणाजन्यत्वेन शरीरादिजन्यतापत्तौ संसारितापत्तिरिति ।

प्रकाशः

न भ्रान्त इति । न ह्यसद्विषयत्वेन भ्रमत्वम्, किं तु व्यधिकरणप्रकारकत्वेनेति भावः ।

तर्कचूडामणिः

ननु भ्रमविषयासद्वैशिष्ट्यागोचरत्वे कथमीश्वरज्ञानस्य भ्रमनिष्ठवैशिष्ट्यविषयकत्वविषय-कता । तदविषयकत्वे च कथं सर्वगोचरतेत्याशङ्क्याह—न हीति ।

---

1 सुखिनमेव

न। ईश्वरानभ्युपगमे विचारस्याश्रयासिद्धत्वात्। तमभ्युपगम्य पृच्छसि चेत्-आकर्णय। जगत एव तदिच्छाविषयत्वेन स्वेष्टसाधनता-ज्ञानमत्त्वात्।

वस्तुतस्तु क्षित्यादितत्तदसाधारणक्रमिकादृष्टादिसामग्रीसमवहिता ईश्वरज्ञानादयः यदा भवन्ति, तदा क्षित्यादिकं करोतीति व्यवहारः। सर्गप्रलयासाधारणक्रमिकादृष्टादिसामग्रीसमवहितत्वमेव तदिच्छा-याश्चिकीर्षाजिहीर्षात्वे। न चैवं किं तज्ज्ञानादिनेति वाच्यम्। क्षित्यादीनां कार्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वात्, सुखादिशब्दयोरात्माकाशादिवत्।

नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसंप्रदायः। उच्यते।

प्रकाशः

स्वेष्टसाधनत्वेति। तथा च प्रयत्नत्वस्य प्रयोजनज्ञानव्याप्यत्वमव्याहतम् प्रयोजनज्ञानजन्यत्वनियमश्च जन्यत्वोपाधिदूषित इति भावः।

प्रयत्नोत्पत्तौ प्रयोजनज्ञानापेक्षा न तु तत्स्थितावपीत्याह[1]—वस्तुत इति। करोतीति। ईश्वर इति शेषः। ननु तदिच्छायाः सिसृक्षारूपत्वेऽपवर्गो न स्यात्, जिहीर्षारूपत्वे च सर्गो न स्यात् इत्यत आह—सर्गेति। सुखादीति। भावकार्यस्यत समवायिकारणजन्यत्वनियमात् यथा आत्मादिजन्यत्वमिति भावः।

तत्त्वचूडामणिः

नन्वेवमपि फलज्ञानजन्यत्वे शरीरादिजन्यत्वापत्तिरप्रसिद्धान्तश्चेत्यत आह—तथेति। ननु कृत्यनादित्वबाधक[2]सार्वकालिककरोतिव्यवहारापत्तिनिरसनं 'वस्तुतस्तु' इत्यनेन क्रियमाणंप्रकृत शङ्कापरिहारानात्मकत्वादयुक्तमाशङ्क्याह-प्रयत्नेति। तथा च प्रयोजन[3]ज्ञानाभावदशायामपि प्रयत्नस्थितौ सर्वदा करोतिव्यवहारापत्तिं निरसितुमयं ग्रन्थ इत्यर्थः। ज्ञानादीनां बहुत्वा-देकवचनानुपपत्तिरित्यत आह—ईश्वर इति।

---

1 इत्यत आह-क 2 सार्वकालिकव्यवहारापत्ति-ग
3 ज्ञा दशायामपि-ग

सर्गादावदृष्टोपगृहीतभूतभेदात् मीनशरीरोत्पत्तौ अदृष्टवदात्मसंयोगात् अदृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासंहितात् मीनकलेवरकण्ठताल्वादिक्रियातज्जन्यसंयोगाद्वेदोत्पत्तिः ।

एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात् तद्बुद्धीच्छा[1]सहितचेष्टोत्पत्तौ सकलघटानुकूलव्यापारात् घटोत्पत्तिः । एवं [2]प्रयोज्यप्रयोजकज्ञानाय व्यापन्नाभिमतशरीरावच्छेदेनापि अदृष्टसहकृतेश्वर-ज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः । ततः तत्सदृशो [तद्दर्शी] बालो व्युत्पद्यते । सोऽयं भूतावेशन्यायः ।

यत्तु—यथा लिप्यादिना [3]मौनिश्लोकोऽनुमाय पठ्यते, तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेश्वराभि-प्रायस्थवेदः साक्षात्कृत्य अनूद्यते । ततोऽग्रिमसंप्रदायः । स एव च कायव्यूहं कृत्वा वाग्व्यवहारं करोतीति मतम् ।

तन्न । प्रतिसर्गादि अनन्तसर्वज्ञकल्पनायां गौरवात् । तेषामेव क्षित्यादिकर्तृत्वसंभवेन ईश्वराननुमानाच्च ।

एतेन सर्गादौ सर्गान्तरसिद्धयोगिन एव क्षितिकर्तारः सन्त्विति

प्रकाशः

मीनशरीरेति । तच्च शरीरं नेश्वरस्य, तदृष्टोपगृहीतत्वाभावात् । किं तु संसारिण एवेति ध्येयम् । अत एवाह—सोऽयं भूतावेशन्याय इति ।

तर्कचूडामणिः

ज्ञानजन्यत्वसाध्यकानुमानेनाकाशादेरसिद्ध्या दृष्टान्तायोगमाशङ्क्याह—भावेति । अशरीरत्व-सिद्धान्तविरोधं परिहरति—तच्चेति ।

---

1 सहितात् प्रयत्नोत्पत्तौ

2 प्रयोज्यवृद्धप्रयोजकवृद्धभावादिमच्छरीररूपावच्छेदेनादृष्ट—

3 मौनिश्लोकनुमाय पठ्यते

निरस्तम्। सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृग्राहकाद्वा। नाद्यः, [1]तदभावात्। नान्त्यः, अनादिद्व्यणुकादिकार्यप्रवाहस्य सकर्तृकत्वानुमानात् लाघवसहकृतात् एकस्यैव सर्वज्ञस्य सिद्धेः।

अथेश्वरज्ञानमूलकशब्दशक्तिग्रहे प्रयोज्यव्यापारानुमितघटज्ञाने घटशब्दस्य कारणताग्रहो भ्रमः स्यात्, तदीयज्ञानस्य नित्यत्वात्। तथा च तज्जन्यघटशब्दशक्तिग्रहस्य भ्रमत्वे [2]सकलशाब्दज्ञान भ्रमः स्यात्, भ्रमपरम्परामूलकत्वात्। अनित्यसर्वज्ञमूलकशाब्दग्रहे च भाय दोषः इति चेत्—न। व्यापारानुमितमिदं घटज्ञानं घटपदजन्यमिति ज्ञानस्य शब्दशक्तिग्रहकारणस्य भ्रम देऽपि घटपदं घटशक्तमिति ज्ञानस्य यथार्थत्वात्, विषयाबाधात्। न च भ्रममूलत्वेन तस्य भ्रमत्वमनुमेयम्; तदंशे व्यभिकरणप्रकाराभावेन बाधात्। बाधितविषयत्वस्योपाधित्वाच्च।

अत एव घटमानयेति शब्दानन्तरं सूत्रसञ्चाराधिष्ठितदारुपुत्रकस्य घटानयनव्यवहारदर्शनात् बालो घटपदे व्युत्पद्यते। तन्मूलकशाब्दज्ञानमपि न भ्रमः, तस्यापि भ्रमत्वे प्रयोज्यव्यवहारादिदानीं व्युत्पत्तिर्न स्यात्। किमयं प्रयोज्यः चेतनव्यवहारात् व्युत्पन्नोऽचेतनव्यवहाराद्वेति संशयस्य वज्रलेपायमानत्वात्।

प्रकाशः

न चैवं संसार्यात्मा न सिध्येत् तद्व्यापाराणां भूतावेशन्यायेन परमेश्वरादेव सिद्धेरिति वाच्यम। तथा सत्यदृष्टाभावेन शरीरासिद्धौ 'भूतावेशन्यायस्याप्यभावात् भगवति अदृष्टस्याप्यभावात् ईश्वराननुमानाच्चेति। यद्यपि मन्वादिशरीरारम्भकद्व्यणुकादिकर्तृत्वेनेश्वरानुमानं स्यादेव, तथापीश्वर[5]स्यावश्यकत्वात् किं मन्वादिनेति भावः।

तर्कचूडामणिः

यद्यपीदं पुत्रादिशरीरातिव्याप्तम्, तथापि स्वदृष्टोपार्जितत्वं स्वशरीरत्वव्यापकमिति भावः।

---

1 तदसंभवात्
2 सकलशब्द
3 शब्दस्यग्रहे
4 भूतावेशस्य-क
5 स्यावाच्छेदकत्वात्-क

"विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैः
द्यावाभूमी जनयन् देव एकः ॥"

इत्यादिश्रुतयः,

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥"

इत्यादयः स्मृतयश्च बह्व्यो मानत्वेनानुसन्धेया इति ॥

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
अनुमानखण्डे ईश्वरवादः

प्रकाशः

विश्वतश्चक्षुः—विश्वविषयकसाक्षात्कारवान् । **विश्वतोमुखः**—विश्वविषयकवचनवान् । **विश्वतोबाहुः**—विश्वविषयकप्रयत्नवान् । **विश्वतस्पात्**—विश्वव्यापी । **बाहुभ्याम्** धर्माधर्माभ्याम् । **पतत्रैः**—परमाणुभिः । **संधमति**—संयोजयति । किमर्थमित्यत आह—**द्यावाभूमी संजनयन्** । द्यावेत्यूर्ध्वलोकसप्तकम् , भूमीत्यधोलोकसप्तकमुपलक्षितम् । संपदद्वयं 'व्यवहिताश्च' (पा. सू. १-४ ८३) इति सूत्रेण धमनजननाभ्यामन्वीयते । [1]स्मृतिविरोधेन श्रुतेरन्य[2]परत्वमाशङ्क्य [3]तदविरोधदर्शनेन निरस्यति–उत्तम इति ॥

इति श्रीरुचिदत्तविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे ईश्वरवादः

तर्क[4]चूडामणिः

स्मृतीति । इदमापाततः । [5]मानत्वेमवार्थमेव [6]तदिति । अन्यथा श्रुतिस्मृतिविरोधे स्मृतिबाधस्य विरोधाधिकरणसिद्धत्वेन असंगत्यापत्तेः अत एवोक्तम्–बह्व्य इति ॥

इति श्रीमद्धर्मराजाध्वरीन्द्रविरचिते तर्कचूडामणौ
अनुमानखण्डे ईश्वरवादः

---

1 स्मृतिनुरोधेन–क
2 परत्वशङ्का–क
3 तद्विरोधमेव दर्शयति–ग
4 मनन–ग
5 तदिति मन्तव्यम्–ग

अथ शक्तिवादः

स्यादेतत्—ईश्वरवत् कार्येणैव शक्तिरप्यनुमीयते । तथाहि यादृशादेव करतलानलसंयोगात् दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते । अतो यदभावात् कार्याभावः तत् वह्न्यादावभ्युपेयम्, तेन विना तदभावायत्तदाहाभावानुपपत्तेः व्यतिरेकमुखेन शक्तिसिद्धिः । न चादृष्टवैगुण्यम् । दृष्टसाद्गुण्ये तदभावात्, तस्य तदर्थत्वात् । अन्यथा दृढदण्डनुन्नमपि चक्रं न भ्राम्येत् ।

प्रकाशः

प्रसङ्गादाह—स्यादेतदिति । [1]कार्येणैवेति ।। यथा क्षित्यादिलक्षण कार्यानुपपत्तिरीश्वरे मानं तथा दाहादिलक्षण[2]कार्यानुपपत्तिः शक्तौ मानमित्यर्थः । अनुमीयइति । नैयायिक[4]दिशा । उपदर्शितार्थापत्तेः स्वयं पृथक्त्वेन स्वीकारादिति ध्येयम् । ननवेवं न कार्येण तदुन्नयनम्, किं तु कार्याभावेनेत्यत आह—व्यतिरेकेति । व्यतिरेकनिरूपकतया [5]तत्प्रयोजकत्वमिति भावः । तस्य—अदृष्टस्य । तदर्थत्वात्—[6]दृष्टसाद्गुण्यार्थत्वात् । तथा च दृष्टसाद्गुण्यमेवादृष्टसाद्गुण्ये मानमित्यर्थः ।

तर्कचूडामणिः

नन्वीश्वरे कार्यं लिङ्गम्, न शक्तौ, तदनुपपत्तेरेव तत्र मानत्वादित्यत आह—यथेति । अनुमित्युक्तिविरोधं निरस्यति—नैयायिकेति । दृष्टान्तेऽपि तन्मतेऽनुमानं विवक्षितमिति बोध्यम् । मुखशब्दस्य जन्यत्ववटितद्वारत्वपरत्वे बाधादाह—निरूपकतयेति । तच्छब्दस्य दृष्टसाद्गुण्यपरत्वं वारयति—अदृष्टस्येति ।

---

1 कार्येणेति–क
2 कार्यानुपपत्तिः–ख
3 कार्यानुपपत्तिः–ख
4 दशा–क
5 तत्प्रयोजनत्व–ख
6 दृष्टमात्रसा–ख

अथादृष्टविलम्बादपि विलम्बः, यथा वन्ध्यास्त्रीप्रसंयोगे, परमाणुकर्मणि, अध्ययनतुल्यत्वेऽप्येकत्र फलाभावे चेति चेत्—न। अदृष्टविलम्बो हि न तत्रानुत्पादो, मण्यपसारणानुपदं दाहाभावप्रसङ्गात्।

किं च नियमतो मणिसद्भावे कार्याभावस्तदभावे कार्यमिति दृष्टत्वात् मण्याद्यभाव एव कारणम्। अन्यथा कदाचित् मण्याद्यभावेऽपि तदभावान्न कार्यं स्यात्। वन्ध्यासंप्रयोगे तु दृष्टव्यभिचारात् अदृष्टविलम्बादेव विलम्बः। अदृष्टं च क्वचित् साक्षाज्जनकम्। अन्यथा

प्रकाशः

परमाणिति। खण्डप्रलये परमाणुकर्मणि सत्यपि यथा न द्व्यणुकारम्भकः संयोग इत्यर्थः। पूर्वादृष्टस्य [1]नाशात् अग्रिमस्योत्पादाभावात् दाहो न [2]स्यादित्यत आह—[3]मण्यपसारणेति। न च [4]मण्यपसारणेनैव तदादृष्टमुत्पाद्यत इति वाच्यम्। तस्य विहितनिषिद्धेतरत्वेन तदजनकत्वादिति भावः।

मण्याद्यभाव एवेति। इदं चादृष्टकारणतानिरासमात्राभिप्रायेणापाततः। वस्तुतोऽस्यापि न कारणत्वमित्रग्रे [5]वक्ष्यते। तदभावादिति। अदृष्टाभावादित्यर्थः। बन्ध्येत्युपलक्षणम्, [6]परमाणुकर्मणीत्यपि द्रष्टव्यम्। नन्वदृष्टं [7]दृष्टोपहारद्वारेणैव सर्वत्र जनकं न तु साक्षादित्यत आह-अदृष्टं चेति। अन्यथेति। द्वारेऽपि साक्षाज्जनकत्वं

तर्कचूडामणिः

ननु महाप्रलये असमवायिविरहादेव [8]कर्माभावः, न त्वदृष्टाभावात्। खण्डप्रलये च तदस्त्येव। अत एवोक्तं मणिकृता पूर्वक्रिययैव संयोगसंभवादित्यत आह—खण्डेति। उत्पादकाभावासिद्धिं शङ्कते-न चेति। उपात्तयोर्मध्ये अन्यतरोपादानेन इतरपर्युदासापत्तिं वारयति-वन्ध्येति। न त्विति। तथा चोक्तस्थलेऽदृष्टविलम्बो वाच्य इति भावः।

---

1 अभावात्-क
2 स्यादित्याह-क
3 मण्यपसरणेति-क
4 मण्यपसरणेन-क
5 वक्ष्यति-क
6 कर्मणी-क
7 दृष्टोपहारेणैव-क
8 कार्याभावः-क

परम्परया हेतुरपि न स्यात्। न च समप्रज्ञयोः समं च [1]निरपवाद-मभ्यस्यतोरेकः प्रगल्भो नापर इति दृश्यते। न च सर्वोभ्पत्तिमतामदृष्टं निमित्तकारणम्। अगस्या [म्या] गमनसाध्ये सुखे तदभावात्। तद्धि नाधर्मात् सुखवात्। नापि धर्मात्। तेन हि अगम्यागमनमुत्पाद्य सुखमुत्पादनीयम्। तथा चागम्यागमनकारगत्वेन न स धर्मः। श्येना-पूर्ववन्निषिद्धफलकत्वेनानर्थकत्वात। दाहप्रतिकूलादृपादेव दाहाभाव इति चेत्—न। तस्योत्तेजकाभावसहितमण्यजन्यत्वे तत्रादाहार्थिनोऽप्रवृत्ति-प्रसङ्गात्। तज्जन्यत्वेऽपि तदुत्पादकादेव दाहाभाव इति किमदृष्टेन, प्रथमोपस्थितत्वादुपजीव्यत्वाच्च। प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमात्।

प्रकाशः

तस्य स्वीकार्यमेव। तस्यापि [2]द्वारापेक्षायामनवस्थानादिति भावः। न चेति। तथ च दाहेऽपि तदेव जनकमिति भावः। [3]श्येनेति। 'चोदनालक्षणोऽर्थो धर्मः' इत्यत्रार्थ-पदेन श्रेयस्करार्थकेन श्येनापूर्वमनर्थरूपं व्यावृत्तम्। तस्य निषिद्धशत्रुवधजनकत्वेना-श्रेयस्करत्वात् 'तद्वदयमपि न धर्म इत्यर्थः। दाहप्रतिकूलेति। नियताग्निसाध्यदाह-प्रतिकूलमेवादृष्टमुत्पाद्यत इति नारन्यन्तरजन्यदाह[5]प्रतिबन्ध इति भावः।

तर्कवडामणिः

अदृष्टस्य कार्यमात्रहेतुताशङ्कायाः प्रकृतोपयोगमाह—तथा चेति। ननु तस्याप्यभीष्ट-शत्रुवधसाधनतया कथमनर्थतेत्यत आह—चोदनेति। श्रेयस्करेति। बलवदनिष्टाननु-बन्धीष्टसाधनेत्यर्थः। अयमिति। निषिद्धसुखहेतुरित्यर्थः। यद्यप्येवं श्येनापूर्वस्य धर्माधर्मबहिर्भावापत्तिः। इष्टापत्तावपसिद्धान्तः।

---

1 निरन्तर
2 द्वारान्तरा—ख
3 एतेनेति—क
4 तदुभयमपि—क
5 प्रतिबन्धकः—क

अदृष्टोत्पत्तौ शौचाचमनादेः साधारणस्यात्राप्यन्वयः स्यात्। अशुचेरेव तदुत्पत्तौ शौचे सति तदभावापत्तेः। प्रतिपक्षसंनिधापकादृष्टस्यैव प्रतिबन्धकत्वे सति मण्यप्रयोगेऽपि दाहानापत्तिः, अग्रिमकाल एव संनिधिदर्शनेन तदसिद्ध्यभावात्।

अस्तु तर्हि उत्तेजकाभावसहकृतप्रतिबन्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम्। एवं केवलोत्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टाभावोऽनुगतो हेतुः। तच्च मण्याद्यभावत्वेन, न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः।

अत एव प्रतिबन्धकत्वाभिमतमण्यादीनामभावकूट एव कारणम्। तेन मणिसद्भावे मन्त्राद्यभावे च न कार्यम्। अनतिरिक्ताभाववादिमते च व्यवहारार्थं तत्स्थानाभिषिक्तस्य हेतुत्वम्। न चाभावो न कारणम्, भाववत्तद्ग्राहकतौल्यात्।

प्रकाशः

दोषान्तरमाह-अदृष्टेति। अशुचेरिति। [1]वामागमनादौ तथा दर्शनादिति भावः।

उभयसत्त्वे—उत्तेजकप्रतिबन्धकसत्त्वे। तच्चेति। कारणत्वमित्यर्थः।

मणिसद्भावे—उत्तेजकाभावविशिष्टमणिसद्भावे।

तर्कचूडामणिः

न चार्थपदवैयर्थ्यम्, धर्मविशेषजिज्ञासाया एव प्रतिज्ञाततया तदुपपत्तेः। श्येनादिविचारस्यानुष्ठानाननुष्ठानयोरनुपयोगो जिज्ञास्यत्वात्। तथाप्यापातत इदम्। अत एव दूषणमिदमलीकमिति सिद्धान्ते नेद्धरिष्यतीति ध्येयम्। निरुतेति। तत्तदग्निसंबन्धमण्यादिना तत्तद्वह्निकार्यप्रतिबन्धकादृष्टोत्पत्तिरित्यर्थः। चकाराभावेन पूर्ववाक्यशेषताभ्रमं वारयति—दोषेति। वामेति। तत्र नग्नत्वादेरधिकारिविशेषणत्वादिति भावः। विशेषणविशेष्यपरत्वं वारयति—उत्तेजकेति। प्रतियोगित्वपरत्वं वारयति—कारणत्वमिति। ननु मणिसद्भावेऽपि उत्तेजककालेऽस्त्येव कार्यमित्यत आह-उत्तेजकेति।

---

1 अगम्या-ख

दृष्टं कुड्यसंयोगाभावस्य गतौ, अनुपलम्भस्याभावविज्ञाने, विहिताकरणस्य प्रत्यवाये, निर्दोषत्वस्य वेदप्रामाण्ये जनकत्वमिति ग्राह्यः ।

मैवम् । विशिष्टं हि नार्थान्तरम्, येन तदभावोऽनुगतः स्यात् । किं तु विशेषणविशेष्यसंबन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचित् विशेषण[विशेष्य]मण्यभावः क्वचिदुत्तेजकाभावरूपविशेषणाभावः क्वचिदुभय कारणमिति व्यभिचारान्नैकमपि हेतुः स्यात् ।

स्यादेतत्-प्रतियोगिभेदादिवत् प्रतियोगितावच्छेदकविशेषणभेदेऽप्यभावो भिद्यते । अन्यथा पृथिव्यादित्रयपत्यक्रूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात् । एवं च यथा केवलदण्डसद्भावे दण्डपुरुषसद्भावे द्वयाभावे च विशेषणविशेष्योभयाभावप्रयुक्तः केवलपुरुषाभावोऽबाधितानुगत व्यवहारबलात् प्रतीतिसिद्धः, तथा विशेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्य उत्तेजकाभावस्याभावे द्वयाभावे च केवलप्रतिबन्धकाभावः विशेष्यविशेषणौभयाभावव्यापकोऽनुगत एव दाहकारणमतु । अथ विशेषणाद्यभावादेव केवलपुरुषाभावव्यवहारः एकशक्तिमत्त्वादिति चेत्—

प्रकाशः

प्रतियोगीति । यद्यपि प्रतियोगिभेदस्थले प्रतियोगितावच्छेदकभेदस्यावश्यकत्वात् तद्भेदादेव भेदः । तथापि प्रतियोगिभेदो यथा अभावभेदव्याप्यः तथा प्रतियोगितावच्छेदकभेदोऽपीत्यर्थः । **एवं चेति** । केवलदण्डसद्भावे उभयाभावात् दण्डपुरुषसद्भावे विशेषणाभावात् दण्डपुरुषोभयाभावे च विशेष्याभावात् दण्डाभावविशिष्टपुरुषाभाव इत्यर्थः । **प्रयुक्त इति** । विशेषणादिविरहान्यतमव्याप्त इत्यर्थः ।

तर्कचूडामणिः

व्याप्य इति । तावन्मात्रस्य प्रकृतोपयोगितया व्यापकत्वस्याविवक्षितत्वादिति भावः । पुरुषमात्रस्य गुणादिधर्मकतया कैवल्याप्रसिद्धिमाशङ्क्याह-**दण्डाभावेति** । जन्यत्वादेरसंभवादाह-**विशेषणेति** ।

न। अनुगतव्यवहारस्यानुगतज्ञानसाध्यत्वात्। शक्तेश्चातीन्द्रियत्वात्।

अथोत्तेजकप्रयोगकाले मणेः कोऽभावः? न तावत् प्राक्प्रध्वंसाभावौ, तयोः प्रतियोग्यसमानकालत्वात्। न च श्यामोऽयमासीदित्यत्र यथा श्यामध्वंसप्रयुक्तः श्यामघटत्वेन पक्वघटस्य ध्वंस एव तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजकाभाववत्त्वेन मणिध्वंस एवेति वाच्यम्। ध्वंसस्यानन्तत्वेन उत्तेजकापनयेऽपि दाहप्रसङ्गात्। नाप्यत्यन्ताभावः, तस्य कादाचित्कत्वाभावादिति चेत्—न। यथा दण्डोपनयापनयदशायां केवलपुरुषाभाव उत्पादविनाशवान्, अन्यथा अबाधितकेवलपुरुषाभावतदभावव्यवहारयोरुपपादयितुमशक्यत्वात्। तथोत्तेजकोपनयापनयशृङ्खलायां प्रतिबन्धकाभावोऽपि तथैव स्वीकरणीयः, तुल्यन्यायत्वात्।

यदि च संसर्गाभावत्रयवैधर्म्यात्तत्र नान्तर्भवति, तदा तुरीय एव संसर्गाभावोऽस्तु। न हि कृत्स्नविशेषबाधे सामान्यबाधः, विशेषान्तरमादायापि तस्य संभवात्। अन्यथा कलसानादिसंसर्गाभाववैधर्म्येण

प्रकाशः

अनुगतेति। यद्यपि शब्दप्रयोगरूपे व्यभिचारः, नानार्थकशब्दानुगतेऽपि विषयाननुगमात्। तथापि व्यवहारशब्देन ज्ञानमेव विवक्षितम्। [1]न चैवमननुगमः। ज्ञानेन विषयिणा विषयस्योपलक्षणात्। तथा चानुगतज्ञानस्यानुगतविषयसाध्यत्वादित्यर्थो द्रष्टव्यः। ननु शक्तिरेवानुगता तद्विषयोऽस्तु, इत्यत आह—शक्तेश्चेति। श्यामध्वंसप्रयुक्तः तन्नियतो न तु तज्जन्यः समसमयत्वादिति ध्येयम्। न तु घटत्वेन, घट आसीदिति प्रत्ययाभावात् इति भावः।

तर्कचूडामणिः

[2]विषयेति। अत एव तज्ज्ञानाननुगम इति भावः। ज्ञानस्येति। लौकिकप्रत्यक्षस्येत्यर्थः। समेति। विशिष्टध्वंसानुभवादिति भावः। ननु स्वगोत्रकलहेनापि

---

1 न चैवमन्वयः—क 2 विषमेति—क

ध्वंसोऽपि न सिध्येत्। व्यवहारावृपपत्तिश्च तुल्यैव। सोऽयमस्माकं सगोत्रकलहः, न तु शक्तिवादः।

अस्तु वा ध्वंस एवासौ, संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात्। न चैवं विनाशवत्त्वेन प्रागभाव एव सः। परिभाषाया अपर्यनुयोज्यत्वात्। यद्वा अत्यन्ताभाव एवासौ। तस्य नित्यत्वेऽपि

प्रकाशः

सोऽयमिति। उत्पादविनाशवान् तुरीयः संसर्गाभावोऽस्तु, ध्वंस एव वास्तु नोभयथापि शक्तिसिद्धिरिति भावः।

ननु तुरीयसंसर्गाभावस्वीकारे विभागव्याघात इत्यपरितुष्यन्नाह—अस्तु तिवे। ननु विनाशिनि ध्वंसपदपरिभाषैव संदिग्धेत्यरुचेराह—यद्वेति।

यदि हीति। यद्यपि विशेष्यतावच्छेदकघटत्वाद्यवच्छिन्नघटादिप्रतियोगिकः प्रतिक्षणध्वंसो नेष्यते। [1]तादृशक्षणभङ्गापात एव दोषावहः, तथापि विशेष्यस्य प्रत्यभिज्ञायमानत्वात् समवाय्यसमवायिविनाशाभावाच्च न घटादेर्विनाशः, किं तु विशेषणस्यैव। न च विशेषणनाशसामग्र्येव विशेष्यनाशिका। [2]एवं हि नित्यमात्रापलापापत्तेरिति, भावः।

तर्कचूडामणिः

अभावहेतुत्वबाधे शक्तिसिद्धेरित्यत आह—उत्पादेति। परैः परिभव इति न्यायादिति भावः।

तथापीति। ननु प्रत्यभिज्ञायाः घटत्वावच्छिन्नतद्भेदाभावावगाहितया विशेषणावच्छिन्नतद्भेदो न विरुध्यत इति चेत्—न। प्रत्यभिज्ञा हि तत्प्रतियोगिकभेदसामान्याभावमवगाहते, न तु तद्विशेषाभावम्। तथा सति प्रतिक्षणं नाशेऽपि घटत्वावच्छिन्नप्रतियोगिकभेदाभावविषयत्वेन प्रत्यभिज्ञोपपत्तौ अनभिमतक्षणभङ्गस्याप्यापत्तेः। एतदस्वरसादाह—समवायीति। नित्यति। न च सा विशिष्टनाशिका, नित्येष्वपि

---

1 तादृशक्षणभङ्गो न वा दोषावहः—क तादृशस्य क्षणभङ्गपात एव दोषावहः—ख
2 नित्य-ख

कादाचित्काप्रतीतिकायानुदर्यौ प्रत्यासत्तिकादाचित्कत्वात् । प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभावश्च , तदैव विशिष्टात्यन्ताभावसत्त्वादिति ।

तन्न । यदि ह्यतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेष्यस्य ध्वंसः स्यात तदा क्षणरूपातीतविशेषणावच्छिन्नत्वेन प्रतिक्षणं घटस्य विनाशः स्यादिति क्षणभङ्गापत्तिः ।

किं च विद्यमानस्य विनष्टत्वेनाप्रतीतेः शिखा विनष्टा पुरुषो न विनष्ट इति विपरीताबाधितप्रत्ययाच्च न विशेषणाभावेऽपि विशेष्यध्वंसः । श्यामोऽयमासीत् , केवलोऽयमासीत् पुरुष इत्यादौ 'सविशेषणे हि' इति न्यायेन विशेष्यवति श्यामकैवल्यादिध्वंस एव प्रतीयते । ध्वंसस्य ध्वंसानुपपत्तेश्च न विद्यमानस्य ध्वंसः ॥

एतेन उत्तेजकसद्भावे सति उत्तेजकाभावविशिष्टमणेरुत्पन्नध्वंसस्य उत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च ध्वंसः कारणमिति न विफल उत्तेजकापनय इत्यपास्तम् । विद्यमानध्वंसस्य च ध्वंसाभावात् ।

प्रकाशः

श्यामेति । अत एव श्यामोऽयमासीदिति प्रत्ययो [1]न त्वयमासीदिति प्रत्यय इति भावः । ध्वंसस्येति । तथा चोत्तेजकापनयेऽपि दाहापत्तिः, उत्तेजककालोत्पन्नस्य प्रतिबन्धकध्वंसस्य तदाप्यविनाशादिति भावः । ध्वंस्तस्येति क्वचित् पाठः । स च सुगम एव ।

तर्कचूडामणिः

विशिष्टरूपेण नाश इष्ट इति वाच्यम् । द्रव्यनाशमात्रे समवाय्यादिनाशस्य हेतुत्वादिति भावात् ।

विद्यमानस्य न ध्वंसः, ध्वंसस्य ध्वंसायोगादिति व्यधिकरणमित्यत आह- तथा चेति । उत्तेजककाले विद्यमानमणिनाशो न संभवति, उत्तजकापगमेऽपि दाहापत्तिरिति हेतुः

---

1 नित्य—ख 2 इति भावः क

न च ध्वंसान्यः संसर्गाभावो विशिष्टाभाव इति वाच्यम् । उत्पन्नाभावस्य विनष्टप्रत्ययहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वप्रत्ययापत्तेः । नापि विशिष्टाभावोऽत्यन्ताभावः । तथा हि स एव क्वचित् विशेषणाभाव-सहितः क्वचिद्विशेष्याभावसहितो दाहकारणमिति अननुगमस्तदवस्थ एव । विशेषणविशेष्याभावयोः प्रत्यासत्तित्वावच्छेदकानुगतधर्माभावात् ।

अथ विशिष्टविरोधित्वं विशेषणविशेष्याभावयोरनुगतं तदवच्छेदक-मस्ति, तयोश्च सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्—तर्हि विशिष्ट-विरोधित्वेनानुगतेन तयोरेव हि विशिष्टाभावत्वेन दाहव्यवहारादौ

प्रकाशः

उत्पादविनाशशीलस्तुरीयः संसर्गाभाव एव विशिष्टाभाव इति निरस्यति—**न चेति** । अत्यन्ताभाव एवासाविति पक्षं परिहरति—**नापीति** । अत्यन्ताभावस्य नित्यत्वात् । सदैव दाहापत्तिरिति प्रत्यासत्तिसहितस्य तस्य हेतुत्वं वाच्यम् । प्रत्यासत्तिश्च विशेषणा-भावादिरित्यननुगम इत्याह-**स एवेति** ।

अथेति । उत्तेजककाले विद्यमानो योऽत्यन्ताभावस्तदनुवृत्तावपीत्यर्थः ।

तर्कचूडामणिः

चशब्दसूचितो योज्यः । ननु तदपगमकाले ध्वंसस्य नष्टत्वात् न तथापत्तिरित्याशङ्कानिरासाय मूले हेतूक्तिरिति भावः । विद्यमानस्योत्तेजककाले विनाशः, तदपनयेऽपि दाहापत्तेः । न च तदपनये ध्वस्तस्य मणेः पुनर्ध्वंसान्न दाह इति वाच्यम् । ध्वस्तस्य पुनर्ध्वंसासंभवात् इति पाठान्तरे योजनमाह--**ध्वस्तस्येति** ।

मतान्तरभ्रमं पुनरुक्तिं च वारयितुमनूद्य निराकरोतीत्याह--**उत्पादेति** । एवमुत्तर-त्रापि पौनरुक्त्यवारकं बोध्यम् । नन्वतिरिक्तविशिष्टाभावाभ्युपगमादननुगमानुपपत्तिः । न च हेतुतावच्छेदकविशेषणाद्यभावाननुगमात्तदननुगमः, लाघवेन विशिष्टाभावत्वस्य तद-वच्छेदकत्वादित्यत आह--**अत्यन्तेति** ।

ननूत्तेजककाले कार्यस्यैवोदयादपिशब्दसूचितकार्याभावानुपपत्तिरित्यत आह-**उत्तेजकेति** ।

जनकत्वमस्तु, कृतं तदुपजीविनातिरिक्तविशिष्टाभावेन। अथोत्तेजककाले विद्यमानात्यन्ताभावानुवृत्तावप्युत्तेजकापनयने उत्तेजकाभावव्यक्तिर्या जाता तदवच्छिन्नमणेरभावो न तत्रेति तदा न कार्योदयः। तत्तदुत्तेजकाभावाना-मननुगतत्वेनानुगतविशिष्टाभावव्यवहारानुपपत्तेः। उत्तेजकाभावत्वेनानु-गमेऽतिप्रसङ्ग एव।

अथ विशेषणविशेष्याभावयोर्विशिष्टविरोधित्वमनुगतकारणतावच्छेदकं यत्र तदन्यतराभावस्तत्र न विशिष्टम्, यत्र विशिष्टं तत्र न तयोरभाव इति सहानवस्थाननियमस्य विरोधस्यानुभवसिद्धत्वादिति चेत्--न। सहानवस्थाननियमो न परस्परविरहरूपतया विशेषणविशेष्याभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः। तथा च विशेष्यविशेषणयोः प्रत्येकं विशिष्टत्वापत्तिः, तदभावस्य तत्त्वात्। न चोभयाभावाभाव उभयं विशिष्टम्। एवं ह्यभावद्वयं विशिष्टाभावो न तु प्रत्येकाभावरूप इति प्रत्येकाभावाद्विशिष्टाभावव्यवहारो न स्यात्। नापि

प्रकाशः

उत्तेजकाभावत्वेनेति। तर्ह्युत्तेजकाभावविशिष्टमण्यभावत्वेन हेतुत्वम्। तथा च पूर्वानुवर्तमान-तादृशाभावादुत्तेजकापनयकालेऽपि दाहापत्तिः। कारणतावच्छेदकावच्छिन्नयत्किंचित्सत्त्व एव कार्योत्पत्तेरित्यर्थः।

[1]तर्हीति। [2]पूर्वोक्तापत्तिमाशङ्कते--अथेति। विशेषणविशेष्याभावस्येति। अतिरिक्तविशिष्टाभावस्यानभ्युपगमादित्यर्थः।

तर्कचूडामणिः

नन्वतिरिक्तविशिष्टाभावहेतुत्वाभावप्रसङ्गे पूर्वोक्ते सति अथेत्याशङ्कानुपपत्तिरित्यत-आह-[3]तर्हीतीति।

---

1 पूर्वोक्ते—क
2 पूर्वोक्तदोषापत्तिम्—क
3 तर्हीति—ग

परस्परविरहव्याप्यत्वं तदाक्षेपकत्वं वा; विशेषणविशेष्याभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात् तदनाक्षेपकत्वाच्च, अभेदे तयोरभावात् ।

एतेनान्यदपि विशिष्टव्यवहारविरोधित्वादिनानुगतत्वमपास्तम् । केनाप्यनुगतेन रूपेण विशेषणविशेष्याभावस्य विशिष्टाभावत्वे प्रत्येकाभावाभावस्य विशेषणविशेष्यान्यतरमात्रस्य विशिष्टत्वापत्तेः । तदभावाभावस्य तत्त्वादित्युक्तत्वात् । तस्माद्विशेषणविशेष्याभावो विशेषणावच्छिन्नविशेष्याभावो न विशिष्टाभाव इति ।

अत्रोच्यते । विशेषणविशेष्ययोः संबन्धाद्विशिष्टव्यवहार इति तयोः संबन्धाभावाद्विशिष्टाभावव्यवहार इति, घटतदभावव्यवहाराविव घटसत्त्वासत्त्वाभ्याम् ।

न हि तयोरसंबन्धे विशिष्टव्यवहारः, न वा तदभावे सति न विशिष्टाभावव्यवहारः । यस्य च यत्र यः संबन्धः स एव तत्र तस्य वैशिष्ट्यम् । स च संबन्धाभावो विशेषणाभावात् विशेष्याभावात् उभयाभावात् सर्वत्राविशिष्ट एकस्तेषां व्यापकोऽनुगतविशिष्टाभावव्यवहारकारणम् । इह दण्डी पुरुषो नास्तीत्यत्र तथा दर्शनात् । अत एव दण्डमात्रसद्भावे दण्डपुरुषसद्भावे उभयाभावे च कैवल्यपुरुषयोः संबन्धाभावः सर्वत्रास्तीत्यनुगतः केवलपुरुषाभावव्यवहारः । एवं च प्रतिबन्ध-

---

प्रकाशः

संबन्धाभावादिति । ननु विशेषणविशेष्यसंबन्धस्य तदुभयमात्रवृत्तित्वात् भूतलादौ तत्संबन्धाभावात् दण्डिनि सत्यपि दण्डी नास्तीति व्यवहारापत्तिरिति चेत्--न । यादृशेन हि संबन्धेन [1]यद्विशिष्टव्यवहारस्तादृशसंबन्धाभावस्यैव [2]तदभावव्यवहार[2]हेतुत्वम् । दण्डपुरुषसंयोगस्तु [3]तद्व्यवहारहेतुः, तस्य भूतलावृत्तित्वेन तत्र दण्ड्यस्तीति व्यवहारानापत्तेः ।

---

1 यत्र विशिष्ट—क 2 व्यवहार--क

3 नातव्यवहार--ख

कोत्तेजकाभावयोः संबन्धाभावो दाहकारणम्। स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति। सर्वत्र प्रतिबन्धकोत्तेजकाभावयोः संबन्धो नास्तीति प्रतीतेः।

नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात् अधिकरणाभावयोरतिरिक्तसंबन्धाभावादिति चेत्--न। तदभावोऽपि स्वरूपसंबन्धस्याभावात् सर्वत्र स्वरूपसंबन्धादेवाधिकरणाभावयोर्वैशिष्ट्यप्रतीतेः। तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसंबन्धः। तयोरभावश्च प्रतिबन्धकाभाव उत्तेजकं च दाहकारणम्। तथा चोभयाभावे उत्तेजकासत्त्वे परं दाहः स्यात्। उत्तेजकवति च प्रतिबन्धके दाहो न स्यादिति चेत्--न। अधिकरणाभावावेव स्वरूपसंबन्धः, तयोर्घटवद्भूतलचत्वरीयतदभावयोरपि स्वरूपसत्त्वे घटवति घटाभावव्यवहारापत्तेः। किं तूपश्लिष्टस्वभावत्वम्। तच्च संबन्धान्तरं विना विशिष्टप्रत्ययजननयोग्यत्वम्। न च

प्रकाशः

किं तु परम्परासंबन्धविशेषः। तथा च तदभाव एव विशिष्टाभावव्यवहारहेतुरिति फलबलेन तथा कल्पनादिति[1]।

संबन्धान्तरं विनेति। संयोगादावतिव्याप्तेराह—संबन्धेति। असंभववारणाय अन्तरेति। ननु स्वात्मविषयकज्ञाने स्वात्मना समं विषयविषयि[2]भावः स्वरूपसंबन्ध एव वाच्यः। तत्र चेदमव्यापकम्, तत्र [3]समवायस्यैव संबन्धान्तरस्य सत्त्वादिति चेत्—न। उद्देश्यव्यवहारप्रयोजकसंबन्धान्तरं विना इत्यर्थात्। न च समवायो विषयत्वव्यवहारप्रयोजकः घटादिविषयकज्ञानस्यापि स्वात्मनि विषयताव्यवहारप्रयोजकत्वप्रसङ्गात्।

तर्कचूडामणिः

विशेष इति। स्वाश्रयसंयोगादिरित्यर्थः।

---

1 कल्पनादिति—क 2 भावसंबन्धः—क

3 समवाय—क

घटवद्भूतलचत्वरीयतदभावयोर्विशिष्टप्रत्ययजननयोग्यत्वमस्ति, घटवति कदापि घटाभावप्रत्ययानुदयात् । तदिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसंबन्धः । अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजकाभावविशिष्टप्रत्ययापत्तेः । तादृश स्वरूप संबन्धाभावश्च प्रतिबन्धकाभाव प्रतिबन्धकोत्तेजकसद्भाव उभयाभावे चाविशिष्ट एव ।

प्रकाशः

ननु घटाभावभ्रमानुपपत्तिः । योग्यतायाः फलबलकल्प्यतया तत्र विशिष्टज्ञानोत्पत्त्या योग्यतावश्यंभावात् । न च प्रत्ययपदं प्रमापरम् । संबन्धसत्त्वे तस्यापि प्रमात्वात् । अन्यथा संबन्धाभावे तस्याप्रमात्वम्, [1]तदप्रमात्वे[1] च तत्र संबन्धाभाव इति परस्पराश्रयात् । किं चातीन्द्रियाभावस्वरूपसंबन्धेऽव्याप्तिः । तत्र स्वरूपद्वयस्य विशिष्टप्रत्ययाजनकत्वात् । [2]तत्प्रत्ययस्यानुमित्यादिरूपत्वेन विषयाजन्यत्वादिति चेत् — न । विशिष्टप्रत्य जननयोग्यतावच्छेदकरूपावच्छिन्नस्वरूपस्य संबन्धत्वात । योग्यतावच्छेद[3]काभावे योग्यत्वस्याप्यभावात् । योग्यतावच्छेदकं चात्यन्ताभावे प्रतियोगिदेशान्यदेशत्वम्, प्रागभावादौ प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वम्, अन्योन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वम् । न चान्यत्वमन्योन्याभावत्वम्, तत्र च [4]मत्वर्थानुयोग इति वाच्यम् । [5]तत्राप्युक्तदेशान्यत्वस्य सत्त्वात् । न चैवमनवस्था;

तर्कचूडामणिः

अन्यथेति । प्रमात्वाभावेनासंबन्धाभ्युपगम इत्यर्थः ।

ननु घटाभावभ्रमस्थलेऽपि योग्यत्वसत्त्वे तदवच्छेदकमावश्यकमेवेत्यत आह— **योग्यतेति** । न चैवं तत्र तद्भ्रमोऽपि न स्यादिति वाच्यम् । तत्र विषयीभूताभावे जनकत्वाभावेऽपि तत्प्रत्यक्षस्यालौकिकस्योत्पत्तेरिति भावः । **योग्यतेति** । न चायोग्यवृत्तीदं कथं तदवच्छेदकमिति वाच्यम् । न हि दण्डत्वादितुल्यमवच्छेदकत्वमत्र विवक्षितम्,

---

1 अप्रमात्वे–क
2 तत्र प्रत्ययस्य–क
3 कावच्छिन्नत्वस्याभावे–ख
4 मत्वर्थायोगः–ग
5 तत्रापि तद्दशा–ख

प्रकाशः

वस्त्वनस्थायाः प्रामाणिकत्वेनादोषत्वात् । प्रत्ययानवस्थायाश्चासत्त्वात् । [1]उक्तावच्छेदकोपलक्षितस्वरूपस्यैव प्रत्ययोविषयत्वात्[2] तस्य तदविषयत्वात् । एवं चोक्तावच्छेदकावच्छिन्नस्वरूपाभावे [3]यत्राभावधीस्तत्र भ्रमः ।

एतेनातीन्द्रियस्वरूपसंबन्धाव्याप्तिरप्यपास्ता । न चौक्तावच्छेदकस्य प्रत्ययाविषयत्वे [4]विषयविशेषाभावात् कथं [5]भ्रमत्वप्रसात्वे इति वाच्यम् । एकत्रोक्तावच्छेदकावच्छिन्नस्य संबन्धत्वेन विद्यमानसंबन्धविषयत्वात् । अन्यत्र तदनवच्छिन्नत्वेन तस्य विद्यमानसंबन्धाविषयत्वात् ।

तर्कचूडामणिः

किं तु व्याप्तिशरीरनिविष्टावच्छेदकत्ववत् प्रकृतस्वरूपसंबन्धनिर्वचनमात्रोपयोगिव्याप्यवृत्त्यभावाभिप्रायेणाह—प्रतियोगीति । संयोगाद्यभावे तु प्रतियोगिदेशतानवच्छेदकावच्छिन्नदेशकत्वं द्रष्टव्यम् ।: अवृत्त्यभावेऽपि घटादिदेशमादायाप्रसिद्धिर्निरसनीया । यत्संबन्धावच्छिन्नप्रतियोगिको योऽभावः तस्य तत्संबन्धावच्छिन्नतद्देशान्यत्वं विवक्षितमिति न समवायावच्छिन्नवह्न्यभावाद्यव्याप्तिः ।

क्वयौ रूपप्रागभावादिबुद्धेः प्रमात्ववारणाय सत्यन्तम् । घटवति कपाले तत्प्रागभावबुद्धौ तद्वारणाय विशेष्यम् । एवं ध्वंसेऽपि दोषद्वयवारणायोभयं प्रवेश्यम् ।

ननूक्तावच्छेद[6]कस्य प्रत्ययविषयतया तद्घटकानामपि तद्विषयत्वावश्यम्भावात् सास्त्येवेत्यत आह—उक्तेति । उपलक्षणत्वं प्रत्यये, विषये तु [7]विशेषणमेव । अन्यथा भ्रमस्थलेऽपि [8]स्वरूपसंबन्धापत्तेरित्यपि बोध्यम् । अत एवाह—तस्य तदविषयत्वादिति । अत एव चाह—उक्तावच्छेदकावच्छिन्नेति ।

एतेनेति । उक्तावच्छेद[9]कसत्त्वेनेत्यर्थः । एकत्रेति । अभावस्य द्वैरूप्यं

---

1 अत्र चावच्छेदको–क
2 विषयत्वे–ख
3 यत्राभावयोस्तत्र–क
4 विशेषा–क
5 भ्रमत्वमिति–ख
6 कत्वस्य–ग
7 विशेषमेव–क
8 भ्रमस्वरूप–ग
कत्वसत्त्वेन–ग

विशेषणत्वं संबन्धत्वं च। तथा च केनचित् रूपेण सतोऽपि रूपान्तरेणासत्त्वाविरोधेन घटभ्रमस्थले तस्य संबन्धत्वेन रूपेणाभाव एवेति। यत्र यस्य संबन्धो नास्तीत्यप्रमालक्षणाद-प्रमात्वमन्यत्र प्रमात्वमिति भावः।

ननु भ्रमस्थलेऽपि घटाद्यभावे उक्तावच्छेद[1]कमस्त्येव। भ्रमविषयघटाभावस्यापि वस्तुतः प्रतियोगिदेशान्यदेशत्वात्। किं चान्योन्याभावस्य व्याप्यवृत्तितया घटापनयन-कालेऽपि तद्भूतलस्य तदन्यत्वाभावेन तत्र घटाभावप्रमाया[2]मव्याप्तिः। न च वस्तुतो यत् प्रतियोगिमत् तद्वृत्तित्वेनाज्ञायमानत्वं संबन्ध इति नोक्तदोष। मत्वर्थस्य वर्तमानस्य विवक्षितत्वान्नान्यदोष इति वाच्यम्। घटाभावप्रमायामव्याप्तेः। प्रमाविषयीभूताभा-वस्य क्वचित् भ्रमविषयतया उक्ताज्ञायमानत्वस्याभावात्। ज्ञायमानत्वाभावस्याभावविशिष्ट-प्रत्यक्षाविषयत्वाच्चेति।

अत्र ब्रूमः। घटाद्यभावस्य हि भूतलादिना अयमेव स्वरूपसंबन्धः यत् भूतलवृत्ति-प्रतियोगिकत्वाभावावच्छिन्नं स्वरूपम्। न च घटवति तादृशं रूपम्। तत्र घटभावस्य तद्भूतलवृत्तिघटप्रतियोगिकत्वेन तदभावाभावत्। प्रमायां च नाव्याप्तिः: तत्र तस्य प्रमाविषयीभूताधिकरणवृत्तिप्रतियोगिकत्वाभावात्। न च वायौ रूपाभावप्रमायामव्याप्तिः। वायुवृत्तिप्रतियोगिकत्वस्य वायुत्वाभावादौ प्रसिद्धस्य रूपाभावेऽभावसत्त्वात्। अव्याप्यवृत्त्य-भावे तु स्वाधिकरणतावच्छेदकावच्छिन्नवृत्तिप्रतियोगिकत्वाभावो विवक्षित इति न तत्राव्याप्तिः। न चैवमनुगतैकस्वरूपसंबन्धासिद्धिः। इष्टत्वात्। अत एवान्योन्याभावादौ अन्यादृशत-न्निर्वचनम्। अत एवाननुगतस्वरूपसंबन्धातिरिक्तसमवायसिद्धिः। अत एव चोक्तस्वरूप-संबन्धलक्षणमभावाद्यधिकरणे समवायादौ चाव्याप्तमिति परास्तम्। तत्रान्यादृशस्यैव तस्य वाच्यत्वात्। अन्योन्याभावे चाधिकरणवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वाभाववत्त्वम्, प्रागभावे प्रध्वंसे चाधिकरणवृत्तिस्वगोचरलौकिकप्रत्यक्षोत्पत्तिसमानकालीनपदार्थप्रतियोगिकत्व-भाववत्त्वं तत्त्वं बोध्यम्।

न च वायौ रूपप्रागभावबुद्धेः प्रमात्वापत्तिः, रूपस्य वाय्ववृतित्वेनोक्तरूपसत्त्वादिति वाच्यम्। रूपप्रागभावे रूपात्यन्ताभावस्यापि प्रतियोगित्वेन तादृशप्रतियोगिकत्वाभावा-भावात्।

---

1 कत्वम-ग 2 अतिव्याप्तिः-ग

प्रकाशः

ननु यत्किंचित्संबन्धाभावे न विशिष्टाभावोऽतिप्रसङ्गादिति विशेषणविशेष्योभयप्रतियोगिकसंबन्धाभावस्तथा वाच्यः। तदभावश्च [1]क्वचिद्विशेषणविशेष्योभयप्रतियोगित्वरूपविशेषणाभावात् क्वचि[2]द्विशेष्याभावादित्यननुगमस्तदवस्थ एव। इयानेव विशेषो यत् पुरुषादौ [3]विशेष्ये दण्डादिर्विशेषणम्, संबन्धे च विशेषणविशेष्योभयप्रतियोगित्वम्। [4]ननु दण्डपुरुषोभयप्रतियोगिकसंबन्धत्वमेकं प्रतियोगितावच्छेदकं तदवच्छिन्नाभाव एक एवेति नाननुगम इति चेत्—तर्हि दण्डावच्छिन्नपुरुषत्वमेकं प्रतियोगितावच्छेदकम्, तदवच्छिन्नाभावोऽप्यनुगत एवेति किं संबन्धाभावस्य विशिष्टाभावत्वोपवर्णनेन। न च विशेष्ये विद्यमाने न तदभाव इति वाच्यम्। विशेषणावच्छिन्नानामन्येषामेवाभावाभ्युपगमेन दोषाभावात्। अत एवानुपदमेव वक्ष्यति न हि दण्डिनि [5]सतीति।

किं चान्यत्र यथा तथास्तु। प्रकृते उत्तेजकाभावमणिसंबन्धस्य तदुभयस्वरूपतया तदभावोऽननुगत एव। न च तदुभयं न स्वरूपसंबन्धः, किं तु तादृशविशिष्टप्रत्ययजननयोग्यत्वस्यासंबन्धत्वात्। विशिष्टप्रत्ययघटितस्य च तस्य [6]विशिष्टबुद्ध्यविषयत्वात्। अत एव संबन्धस्य संबन्धिभिन्नत्वनियमेन स्वरूपसंबन्धः परैर्नाङ्गीक्रियते। अत एव समवायसिद्धिः। अन्यथा [7]तत्तत्स्वरूपाणामनन्यत्वेन स्वरूपसंबन्धेनार्थान्तराभावात्। अन्यथा तेनैवार्थान्तरं स्यात्। न च [8]संबन्धत्वस्य मिलितवृत्तित्वेन संबन्धत्वावच्छिन्नाभावस्यानुगतत्वमिति वाच्यम्। एवं विशेषणावच्छिन्नविशेष्याभावस्यापि विशिष्टाभावत्वे दोषाभावादित्युक्तम्।

---

1 "क्वचिद्विशेषणप्रतियोगिकः क्वचिद्विशेष्यप्रतियोगिकः क्वचिद्विशेषणविशेष्योभयप्रतियोगिक इति प्रतियोगितावच्छेदकभेदादभावभेष इत्यननुगमस्तदवस्थ एव। ननु" इति पाठः

2 विशेष्यसंबन्धाभावात्—ग

3 विशेषो दण्डादिविशेषणसंबन्धः, संबन्धे च—ख

4 न तु—ख

5 सतीत्यादि—क

6 विशिष्टबुद्धिविषयस्य संबन्धत्वात्-ख

7 तत्तत्स्वरूपानन्तत्वेन-क

8 संबन्धस्य-

यद्वा अदण्डपुरुषस्याभावे दण्डी पुरुषो न प्रतियोगी, तस्यादण्डत्वा-

प्रकाशः

अपि च यदि संबन्धाभावो विशिष्टाभावस्तदा इह दण्डी पुरुषो नास्तीत्यत्र नञर्थ-प्रतियोगित्वेन संबन्ध एव भासेत । न चैवम् । दण्डावच्छिन्नपुरुषस्यैव तत्त्वेनाप्रतीतेः । अन्यथा घटाभावोऽप्यतिरिक्तो न सिध्येत् । घटत्वतदधिकरणसंबन्धाभावादेव तद्व्यवहारसंभवात् ।

यदि च तत्र संबन्धस्य प्रतियोगित्वेनानुल्लेखात् तज्ज्ञानं विनापि घटत्वावच्छिन्नघटत्व-ज्ञानादेव तदभावज्ञानाच्च [1]न तदभावेनान्यथासिद्धिः, [2]तदा प्रकृतेऽपि तुल्यमित्यपरितोषं हृदि निधा याह-**यद्वेति** । अयं च विशेषणावच्छिन्नविशेष्यप्रतियोगिकोऽत्यन्ताभावो न तु ध्वंसो न वा विद्य मानप्रतियोगिक इति न क्षणिकत्वशङ्का । तस्य च नित्यत्वेन न प्रागपि कार्यापत्तिः । समयविशेषा वच्छेदेन [3]संसर्गित्वादिति ग्रन्थकृतैवाभिधानादिति । **दण्डी पुरुष इति** । तत्काले दण्डवानित्यर्थः ।

तर्कचूडामणिः

अत एव घटादौ रूपप्रागभावदशायां ध्वंसबुद्धौ रूपध्वंसदशायां प्रागभावबुद्धौ न प्रमात्वापत्तिः । तयोः परस्परं प्रतियोगित्वेन तत्र तादृशपदार्थप्रतियोगिकत्वात् । उक्ता-भाववत्त्वं च विषये, विशेषणज्ञाने तूपलक्षणमिति पूर्ववदूहनीयमित्यलमधिकेनेति ।

ननु दण्डिपुरुषाभावे तदुभयसंबन्धविशेषो विशेषणाद्यन्य एव प्रतियोगीति तद्भेदादेव भेदः, न त्ववच्छेदकभेदादित्यरुचेराह —**किं चेति** । **अन्यत्रेति** । यत्र संयोगादि विशेषणसंबन्धः तत्रेत्यर्थः ।

नन्वेवमपि संबन्धाभावस्य विशिष्टाभावत्वे बाधक[4]मनुपन्नस्तमित्यत आह-- **अपि चेति** ।

ननु '[5]न तदभाव इति दाहो[5] भवति' इत्यग्रिमग्रन्थबलात् कादाचित्काभावः प्रतीयत इति भ्रान्तिं वारयति—**अयमिति** । विशिष्टध्वंसाङ्गीकारेऽपि न क्षणिकत्वापत्तिरित्युक्तमेवेत्यत आह — **शङ्केति** । **समयेति** । तथा चाग्रिमग्रन्थोऽपि समयविशेषेऽभावस्या-

1 तदभावेना—क
2 तथा—क
3 संसर्गित्वेन ग्रन्थ—क
4 अनुपपन्न—ग
5 दाहो—ग

तत्सत्त्वे तदन्योन्याभावेऽपि न कार्यम् । अन्वयव्यतिरेकाभ्यां व्याप्तिकारणत्वयोर्ग्रहे संसर्गाभावस्य त्वयापि हेतुत्वाङ्गीकारात् । अन्यथा सामग्रीव्यापकयोः सत्त्वे तदन्योन्याभावे कार्यव्याप्याभावापत्तौ कार्यकारणव्याप्यव्यापकभावे व्याघातात् ।

किं च तवापि प्रतिबन्धकाभावे शक्तिरस्तीति तत्सत्त्वे तदन्योन्याभावमादाय शक्तिसत्त्वप्रसङ्गः । न च स दुर्वचः, न वा प्रागभावादित्वेनाननुगतव्यभिचारौ । प्रतियोग्यधिकरणयोः संसर्गमारोप्य यो निषेधः स संसर्गाभावः । भूतलं घटसंसर्गो नेत्यत्र भूतले घटसंसर्गस्य संसर्गो नारोप्यते, किं तु तादात्म्यम् ।

प्रकाशः

यत्रोत्तजकमस्ति तत्रोत्तंजकाभावावच्छिन्नात्यन्ताभावमात्रं हेतुः, अन्यत्र ध्वंसादिवाधारण. तत्संसर्गाभावमात्रम् , यथा विध्वंसंसर्गाभावः समाप्तावितिं ध्येयम । 'अन्वयेति-अन्यथानुपपत्त्या त्वयापि तस्याभ्युपेयत्वादिति भावः । तथा' चान्योन्याभावव्यावृत्तं संसर्गाभावत्वमावश्यकमिति भावः ।

यो निषेधः ज्ञायत इति शेषः ।

तर्कचूडामणिः

न तु विषय इति न तद्दृष्टान्तेन तस्य हेतुत्वसिद्धिरित्याशङ्क्य न हेतुत्वार्थं तदुपादानम । किं तु दुर्वचं संसर्गाभावत्वमिति शङ्कानिरासार्थमिति व्याचष्टे—तथेति ।

त्यक्तानुपपत्तिं परिहरति—ज्ञायत इति ।

ननु तादात्म्यं यदि घटत्वं न तस्य संबन्धत्वम् , अविशिष्टज्ञानाविषयस्यैव तत्वात् । अथार्थान्तरम् , नाव्याप्तिः । अन्योन्याभावस्थले प्रतियोगितावच्छेदकघटत्वा

तथा-ख ग

वयं तु ब्रूमः। प्रतियोगिनमधिकरणे समारोप्य निषेधावगमः स संसर्गाभावः। यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः। भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमात्। घटत्वमेव च घटतादात्म्यम्।

प्रकाशः

नन्वभेदारोपस्थले तादात्म्यमपि संसर्ग एवेत्यन्योन्याभावेऽतिव्याप्तिः। किं च संसर्गस्यारोप्यत्वे रजतत्वादेरिव तत्संसर्गोऽपि भासेत। नचैवम्, इत्यपरितुष्यन्नाह—**वयं त्विति**। **प्रतियोगिनमिति**। अधिकरणविषयकप्रतियोग्यारोपजन्यज्ञानविषयाभाव इत्यर्थः। **सः**—निषेधः। अन्योन्याभावेऽतिव्याप्त्यभावात् अन्योन्याभाव[1]भिन्नत्वं च लक्षणान्तरं दर्शयितुमन्योन्याभावलक्षणमप्याह—**यत्र चेति**। अधिकरणविषयकप्रतियोगितावच्छेदकारोपजन्यनिषेधधीविषय इत्यर्थः।

तर्कचूडामणिः

देरारोप्यत्वेन तदन्यस्यानारोपादित्यस्वरसादाह—**किं चेति**। **तत्संसर्ग इति**। एवं चारोपप्रकारत्वमारोप्यत्वमित्याश्रित्योक्तम्। तद्विषयत्वरूपं तु तदङ्गीकृतमिति ध्येयम्।

नन्वत्यन्ताभावात्मकनिषेधप्रवेशेऽन्योन्याश्रयः। ल्यपा पूर्वकालत्वमात्रबोधनेनान्योन्याभावेऽतिव्याप्तिः। सप्तम्यन्तस्य प्रतियोगिनान्वये अवृत्त्यत्यन्ताभावाव्याप्तिः। अधिकरणे तत्पक्षे तदारोपानुपपत्तिश्च। आरोपस्यात्यन्ताभावगर्भतया अन्योन्याश्रयश्च। न त्वभावभ्रमविषयात्यन्ताभावाव्याप्तिः। अधिकरणभेदेऽपि अभावाभेदेन प्रमास्थलमादाय लक्षणगमनात्। अवगमस्याभावानात्मकतया असंभवश्च। तादृशावगमविषयत्वस्य तथात्वेऽधिकरणादावतिव्याप्तिश्चेत्यत आह—**अधिकरणेति**। आरोपपदं ज्ञानपरम् आहार्यपरं वा। तत्पदस्यावगमपरत्वं वारयति—**स इति**। अन्योन्याभावत्वनिर्वचनस्य प्रकृतासंगतिं वारयितुमाह—**अन्योन्येति**। अतिव्याप्तिनिराकरणपरत्वे उक्तलक्षणाभाव एव प्रदर्शनीयः स्यात्, न तु लक्षणान्तरप्रदर्शनमित्यरुचेराह—**अन्योन्येति**। **अधिकरणेति**। अत्रापि पूर्ववन्मूलानुपपत्तिर्द्रष्टव्या। **निषेधपदमभावपरम्**। तदप्यविवक्षितम्।

---

1 भिन्नत्वं—क

प्रकाशः

नन्विदमुभयलक्षणमतीन्द्रिय[1]संसर्गान्योन्याभावयोरव्याप्तम् । तद्विषयकज्ञानस्यानुमित्यादिरूपतया आरोपाजन्यत्वात् । न च योग्यतापुरस्कारात्तथात्वम् । [2]तादृशारोपजननयोग्यतावच्छेदकं हि नाभावप्रतीतित्वमतिप्रसङ्गादिति संसर्गाभावविषयत्वादिकं तथ वाच्यम् । तथा चात्माश्रयः ।

न च प्रागभावादिविषयत्वमेव तथा । प्रागभावत्वादेरपि संसर्गाभावत्वघटितत्वात् ।

तर्कचूडामणिः

तादृशज्ञानविषयत्वमात्रस्यैव तथात्वात् । न चाधिकरणेऽति–व्याप्तिः । तादृशारोपजन्यतायां यद्विषयत्वमवच्छेदकं तत्त्वस्य विवक्षितत्वात् । नचाधिकरणविषयत्वं तथेत्याशयात् । अन्यथा अभावपदानेऽपि [3]पटभेदे घटो नास्तीति प्रत्यक्षविषयपटान्योन्याभावातिव्याप्तेः । योग्यतेति । तादृशारोपजन्यता योग्यप्र[4]तीतिविषयत्वमित्यर्थः ।

वाच्यमिति । [5]न चास्यापि तद्गोचरानुमितिवृत्तित्वेनातिप्रसक्ततयानवच्छेदकत्वमिति वाच्यम् । न ह्यनतिरिक्तवृत्तित्वमवच्छेदकत्वमत्र विवक्षितम् । किं तु तदवच्छेदकारोपजन्यावृत्तित्वे सति प्रतियोग्यारोपजन्यवृत्तित्वम् । एवं प्रतियोग्यारोपजन्यावृत्तित्वे सति तदवच्छेदकारोपजन्यवृत्तित्वमन्योन्याभावलक्षणे द्रष्टव्यम् संसर्गेति । न हि प्रतियोगिजनकाभावत्वम् , तज्जनकत्वस्य [6]प्रागभावगर्भत्वात् । नापि विनाश्यभावत्वम् , विनाशत्वस्य [6]प्रागभावत्वगर्भत्वात् । नापि गन्धाधारत्वादि घटितम् , [7]आधारत्वाभावस्य अत्यन्ताभावरूपतया अत्यन्ताभावत्वस्य त्रैकालिकसंसर्गाभावत्वरूपत्वेन दोषतादवस्थ्यात् ।

---

1 संसर्गाभावान्योन्याभावयो –ख
2 ईदृशयोग्यता–क
3 घटभेदे–ग
4 श्रमिति–ग
5 नन्वस्य पि क
6 प्रागभावत्वग–ग
7 असाधारणाभावत्वस्य–ग

प्रकाशः

एवं च जन्यत्वस्यापि प्रागभावगर्भतया तस्य च संसर्गाभावगर्भत्वादन्योन्याश्रयोऽपि । किं च योग्यताया अनिर्वचने अप्रत्यक्षे योग्यध्वंसेऽप्यव्याप्तिरिति ।

अत्र वदन्ति । प्रतियोग्यारोपपूर्वकनिषेधावगमविषयतावच्छेदकत्वं संसर्गाभावत्वम् । एवमग्रेऽपीत्येतदुभयं लक्षणम् । [1]स्वरूपं तु विषयतावच्छेदकं संसर्गाभावत्वादि । तच्च स्वाभावाभावत्वम् । तेन नोक्तसर्वदोषावकाशः । अस्ति च घटस्य योऽत्यन्ताभावदस्तभावो घटो, [2]घटान्योन्याभावस्याभावो घटत्वमिति । न च संसर्गाभावस्य योऽन्योन्याभावः तदभावो न संसर्गाभाव इति स्वसंसर्गाभावाभावो लक्षणर्थो वाच्यः इति पुनरन्योन्याश्रयत्वमिति वाच्यम् । स्वाभावाभावत्वमित्यत्र वस्तुतो यद्यपि संसर्गाभावाभाव एव [3]पर्यवस्यति, तथापि न संसर्गाभावत्वेन प्रवेशः किं तु तत्तत्प्रतियोगिकाभावत्वेनैव संसर्गाभाव उपस्थित इति न काचिदनुपपत्तिः । अन्योन्याभावे स्वप्रतियोगिकाभावमात्राभावत्वाभावादिति सर्वं सुस्थम् ।

अत्रेदं चिन्त्यम् । स्वाभावाभावत्वं न संसर्गाभावत्वम् , अन्योन्याभावेऽतिव्याप्तेः । तथा हि स्वं घटान्योन्याभावः तदभावो घटः तदभावश्च तदन्योन्याभावः । ननु घटान्योन्याभावाभावो न घटः, किं तु घटत्वमिति चेत्—न । घटो घटान्योन्याभावो नेति

तर्कचूडामणिः

तथा चैकदेशावच्छेदेन प्रतियोगिसमानदेशत्वे सति संसर्गाभावत्वं तत्त्वमिति भावः । यदि कश्चित् योग्यप्रतियोगिकाभावमात्रलक्षणमिदमिति ब्रूयात् तदा दोषान्तरमाह— **किं चेति** ।

नन्ववच्छेदकमपि संसर्गाभावत्वादिकमेवेत्यत आह— **स्वेति** । **तच्चेति** । स्वरूपमित्यर्थः । मात्रपदं कार्त्स्न्यपरम् । **तदभाव** इति । तदन्योन्यासाव इत्यर्थः । घटो घटान्योन्यासावो न भवतीति प्रतीतेरिति भावः । अभावपदमत्यन्ताभावपरं मत्वा देशयति—**नन्विति** ।

---

1 विषयतावच्छेदकस्वरूपं तु—क 2 घटान्योन्याभावो न घटः किं तु घटत्वमिति

3 पर्यवसितः, तथापि संसर्गाभावत्वं न प्रविष्टम् , अभावत्वेनैव संसर्गाभावप्रवेशः

आरोपस्य हेतुत्वे किं मानमिति चेत्—मा भूत्तावदन्यत्, नेदमिह नेदमिदमित्यबाधितविलक्षण[1]व्यवहारस्यैव तत्र मानत्वादिति। ननु प्रतिबन्धकात्यन्ताभावो न हेतुः, तस्मिन सत्यपि कार्याभावात्। न हि करादौ मण्यत्यन्ताभावः तत्संयोगात्यन्ताभावो वा। मणेः स्वावयव-वृत्तित्वात् संयोगस्य चाव्याप्यवृत्तित्वात्। अत एव न तत्प्रध्वंसप्राग-

---

प्रकाशः

प्रतीत्या घटे घटान्योन्याभावान्योन्याभावो विवक्षीक्रियते। स च घटस्वरूप एव। अभावप्रतियोगिकाभावस्याधिकरणानतिरेकात्। न च संसर्गाभावाभावत्वं तत्त्वमिति वाच्यम्। आत्माश्रयात्।

केचित्तु अखण्डयोः [2]संसर्गाभावत्वान्योन्याभावत्वयोरुभाभ्यां लक्षणाभ्यामुपलक्षणम्। न च तयोः पदार्थान्तरतापत्तिः, समान्यान्तर्भावात्। समान्यं हि द्विविधम् उपाधिर्जातिश्च। तत्रोपाधिर्द्विधा सखण्डोऽखण्डश्चेत्युपाधावन्तर्भावात्। तत्तेदन्ते इवेति। तथा च रत्नकोशे तरणिमिश्रैरुक्तम्-"एवमभावत्वध्वंसत्वादिकं बोध्यम्" इत्याहुः।

नेदमिदेति। ननु संसर्गाभावान्योन्याभावरूपविषयवैलक्षण्येन ज्ञानवैलक्षण्यम्। [3]तस्माच्च व्यवहारवैलक्षण्य[3]मित्यन्यथासिद्धं नारोपहेतुतां व्यवस्थापयतीति चेत्—मैवम्।

तर्कचूडामणिः

उपलक्षणमिति। यथा चाक्षुषत्वादिपदेन स्वव्यङ्ग्यजातिरुपलक्ष्यते तथेत्यर्थः। अखण्डोपाध्यभ्युपगमे जात्यपलापापत्तिरित्यस्वरसोऽत्र बोध्यः।

व्यवहारो [4]यद्यमिज्ञा तदाह—विषयेति। यद्यमिलापस्तदाह—तस्मादिति। न ह्युत्पन्नयोस्तयोर्वैलक्षण्यं मानत्वेनोपन्यस्तम्, किं तु अन्यतरोत्पत्तिकाले इतरोत्पत्तिप्रसङ्ग

---

1 व्यवहार एव तत्र मानमिति पाठान्तरम्।

2 संसर्गाभावान्योन्याभावयोः स्वरूपाभ्यां लक्षणाभ्या—ख

3 इत्यनाविसिद्धं कथमतारोपहेतुतां—ख

4 यद्यभिज्ञानं—ग

भावौ हेतू, तयोः करादावबृत्तेः गुणकर्मादेश्च प्रतिबध्यत्वानापत्तेश्च। तस्य जन्यधर्मानाश्रयत्वेन तत्र तयोरभावात्। न चान्यः संसर्गाभावोऽस्तीति चेत्—न। संसर्गावच्छिन्नप्रतियोगिकस्याभावविशेषस्य सति प्रतिबन्धकेऽभावात्। स च समयविशेषावच्छेदेन संसर्गितया अत्यन्ताभाव एव, तथैवान्वयव्यतिरेकावधारणात्।

प्रकाशः

यदि नारोपो हेतुस्तदा भूतले घटसंसर्गाभावान्योन्याभावसत्त्वे कदाचि[1]न्नेदमिह कदाचिन्नेदमिदमिति[1] व्यवहारवैलक्षण्यानुपपत्तेरित्यर्थात्। प्रतियोगिज्ञानानुपलब्ध्यादीनां कारणानां तौल्ये कार्यवैचित्र्यस्याकस्मिकतापत्त्या कारणवैचित्र्यस्य कल्पनीयत्वे पारिशेष्यादारोपहेतुतायामेव [2]विश्रमादित्याहुः। **गुणेति**। उक्तप्रतिबन्धकाभावस्य [3]तत्रासत्त्वे तत्र प्रतिबन्धकोऽपि न स्यात्। [4]यत्रैकदा प्रतिबन्धकाभावः तत्रैवान्यदा प्रतिबन्धकसत्वादिति भावः। प्रतिबन्धकत्वानापत्तेरिति पाठे अन्यस्येति शेषः। तथा च गुणादेः प्रतिबन्धकत्वमन्यस्य न स्यादिति गुणादेः प्रतिबध्यत्वं न स्यादित्येवार्थः पर्यवस्यतीति ध्येयम्। **संसर्गेति**। यद्यपि संसर्गस्याव्याप्यवृत्तित्वात् तदवच्छिन्नाभावोऽपि तथैव। तथा च सोऽपि तत्रास्त्येव। तथापि व्याप्यवृत्तितादृशाभावस्य हेतुत्वमिति भावः।

तर्कचूडामणिः

इत्याशयेनाह—**यदीति**। **व्यवहारेति**। प्रत्यक्षेत्यर्थः। **कार्येति**। किं चिदुत्पादस्य किंचिदनुत्पादस्य चेत्यर्थः। **कारणेति**। क्वचित्कार्ये कारणविलम्बस्येत्यर्थः। ननु जन्यधर्मानाश्रयतया गुणादौ प्रतिबन्धकध्वंसाभावेऽपि प्रतिबध्यत्वे को दोष इत्यत आह—**यत्रेति**। अन्यथा तस्य स्वरूपायोग्यतैव स्यादिति भावः। द्रव्ये गुणादिध्वंससंभवेन द्रव्यं प्रति गुणादेः प्रतिबन्धकत्वसंभवात् पाठान्तरानुपपत्तिरित्यत आह—**अन्यस्येति**। अन्यस्येत्यस्य कर्मपरत्वं वारयितुमाह—**गुणादेरिति**। संयोगाभितप्रायेणाशङ्कते—**यद्यपीति**। **तथापीति**।

---

1 न्नेदमिति—ख
2 विश्रामादिति भाव इत्याह—ख
3 तत्र सत्त्वे—क
4 यत्र चैकदा—ख

अथैवं प्रागभावप्रध्वंसस्थले समयविशेषावच्छिन्नात्यन्ताभावेनैवोपपत्तौ न तयोः सिद्धिः। अत्यन्ताभावो ह्यव्याप्यवृत्तिः। तस्य चैकत्र भावाभावे क्वचिद्देशोऽवच्छेदकः क्वचित् काल इति चेत्—न। तत्र विद्यमानताविरोधित्वेनैव कपाले न घट इति प्रतीतिवैलक्षण्यात्। न त्वेवं भूतले घटाभावप्रतीतिः।

अन्ये तु भविष्यति घटो घटो नष्ट इति विलक्षणप्रतीत्योः अत्यन्ताभावेनैकेन समर्थयितुमशक्यत्वात् अन्य एवायं संसर्गाभाव इत्यप्याहुः।

एतेन विशेषणाभावविशेष्याभावतदुभयाभावघटितं साभग्रीत्रयमेवास्तु हेतुः, दाहे च जातित्रयकल्पनमिति प्रत्युक्तम्। अनुगतहेतुसत्त्वात् दाहवैजात्यस्य योग्यानुपलब्धिबाधितत्वाच्च। व्यक्तिंयोग्यतयैव जातियोग्यत्वेन योग्येऽयोग्यजात्यभावात्।

प्रकाशः

एवम्—विद्यमानताविरोधित्वेनेत्यर्थः। अन्यत्र विद्यमानेऽपि घटे तथा प्रतीतिदर्शनादिति भावः।

योग्य इति। वस्तुतस्त्वस्यापि योग्यवृत्तेर्योग्यत्वमेव। पदविशेषवाच्यत्वज्ञानार्थं तत्रोपदेशापेक्षेति भावः।

तर्कचूडामणिः

इदं तु संयोगस्य प्रतियोगितावच्छेदकत्वाभिप्रायेण। विशेषणाभावे विशिष्टाभावावश्यंभावात्। यदा चारोप्यसंबन्धो भूत्वा सोऽभावभेदकः तदा प्रतियोगितावच्छेदकावच्छिन्नवति तदभावो नेति बोध्यम्। अन्यथा घटादेरपि अव्याप्यवृत्तित्वापतेः। यद्वा मणिसंबन्धस्य प्रतिबन्धकत्वमभिप्रेत्येदम्। कपालाधिकरणकत्वस्यैव मत्वर्थभ्रान्तिं वारयति—विद्यमानेति। विद्यमान इति तत्त्वेन ज्ञात इत्यर्थः। ननूपदेशगम्यरत्नत्वादिजातौ व्यभिचार इत्यत आह—रत्नत्वस्येति।

ननु प्रहरं मा दहेत्यादौ सावधिमन्त्रपाठे मन्त्रविनाशे दाहः स्यात्। न च संकल्पविषयकालविशेष एव तत्र प्रतिबन्धकः, संकल्पनाश-समयस्य स्वतोऽविशेषात्। न चोद्देश्यत्वमेव तत्र विशेषः, तस्य विनाशात्। न चोद्देश्यध्वंसोऽपि हेतुः, तस्य यामादूर्ध्वमपि सत्त्वात्।

न च मन्त्रपाठजनितमदृष्टमेव तत्र प्रतिबन्धकम्, तत्कालदाहाप्राप्ति-कपालनाश्यत्वेन नाग्रे दाहप्रतिबन्ध इति वाच्यम्। प्रतिबन्धकमन्त्रपाठस्या-निषिद्धत्वेन अविहितत्वेन चादृष्टाजनकत्वात्, तदाचारस्य विगीतत्वेन

प्रकाशः

मन्त्रविनाश इति। मन्त्रस्याशुविनाशितया प्रहरान्तरेऽपि दाहः स्यादित्यर्थः। संकल्पस्य विशेषणत्वमालस्ब्य[1] दूषयति—**संकल्पनाश इति।** तथा च संकल्पस्येच्छात्म-कत्वात् [2]तदभावे विशिष्टाभावोऽक्षत एवेति भावः।

विगीतत्वेनेति। यद्यपि विगीतत्वं निषिद्धत्वमेवेति अनिषिद्धत्वेनेति प्रागुक्तेन विरोधः; तथापि शिष्टप्रवृत्तिविषयत्वं तदभिप्रेत्यैतदुक्तम्। यद्यप्येवं सति श्रुत्यनुमा-पकस्यानिषिद्धत्वरूपाविगीतत्वस्य न क्षतिः। तथापि भोजनाद्याचारे व्यभिचारवारणाय अलौकिकत्वमपि तत्र विशेषणम्। इदं तु मणिमन्त्रौषधादिवत् लौकिकमेवेति भावः।

तर्कचूडामणिः

अत [3]एवोपदेशविरहिणामपीदं ततो विलक्षणमित्यनुभव इति भावः। प्रहरानन्तरं दाह इष्ट एवेत्यत आह—**प्रहरेति।** उपलक्षणतायाः सिद्धान्तत्वादाह—**संकल्पस्येति।** ननु विशेषणध्वंसेन विशिष्टध्वंसस्य निरस्तत्वान्मूलानुपपत्तिरित्यत आह—**तथेति।** **अभावः**—अत्यन्ताभावः। **शिष्टेति।** परलोकार्थीत्यर्थः। ननु वेदप्रामाण्यानभ्युपगमा-

---

1 आशङ्क्य–ख 2 तदभावोऽक्षतः–क
3 एवोद्देश–ग

श्रुत्याद्यननुमापकत्वादिति चेत्—मैवम् । उद्देश्यत्वज्ञानाहितसंस्कार विषयकालस्य प्रतिबन्धकत्वात् ।

प्रकाशः

यद्वा विशिष्टाचारत्वस्यैतदनुमानान्तर्गतस्यैवमपि क्षतिरिति भावः । उद्देश्यत्वेति । ज्ञानं न स्थिरमिति तद्विशिष्टाभावः प्रहराभ्यन्तरेऽपि स्यादिति संस्कारेत्युक्तम् । यत्किंचित्संस्कारविषयत्वं प्रहरोत्तरमपीत्यत उक्तम् उद्देश्यत्वज्ञानाहितेति । [1]तथा च ज्ञानविषयमात्र संस्कारविषय इति नोक्तदोषः ।

ननु रोगादिना संस्कारविनाशे विशिष्टाभावसंभवात् प्रहराभ्यन्तरेऽपि दाहः स्यात् । यत्र च न संस्कारोदयः तत्र [2]का गतिरिति चेत् न । तत्र दाहप्रतिबन्ध इत्यस्यैवासिद्धः । यत्र च दाहप्रतिबन्धः तत्रानन्यगतिककार्यदर्शनात् संस्कारोऽपि कल्प्यत एव । कार्योन्नेय-धर्माणां यथाकार्यमुन्नयनादिति सांप्रदायिकाः ।

वयं तु ब्रूमः—संकल्पविषयकाल एव प्रतिबन्धकः । संकल्पस्य च न विशेषणत्वम् , किं तु स्वविषयभूतकालोप[3]लक्षकत्वम् । यथा मङ्गलस्यासन्नसमयसमाप्तिफलकत्वे आसन्नसम-यस्य स्ववृत्तिसमाप्त्युपलक्षकत्वम् । इयानेव विशेषः यत्तस्याधाराधेयभावसंबन्धेन तथात्वम् , अस्य च विषयविषयिभावसंबन्धेनेति न कश्चिद्विशेष इति ।

तर्कचूडामणिः

संभाविताचारत्वस्य भोजनादावभावाल्लौकिकपदवैयर्थ्यमेवेत्यनुशयेनाह—यद्वेति । एवं-शिष्टाचारपदस्योक्तार्थपरत्व इत्यर्थः । ननु प्रहरानन्तरमपि दाहापत्तिः संस्कारसत्त्वात् इत्यत आह—तथेति । सत्यपि तस्मिन्नुत्तरकालस्य तद्विषयत्वाभावात् इति भावः ।

संकल्पविषयत्वज्ञानाहितसंस्कारात् संकल्पो लघीयानित्याशयेनाह—वयं त्विति । कालान्त रस्य स्वसंबन्धाभावात् नोपलक्ष्यत्वमित्याशयेनाह—स्वेति । ननु कालविशेषस्य प्रतिबन्धकत्वे

---

1 स च—क-ख 2 का वा गतिः—ख
3 लक्षितत्वम्—क

ननु प्रतिबन्धमकुर्वतामप्रतिबन्धकत्वेन शक्तिमनपकुर्वतां मन्त्रादीनां न प्रतिबन्धकत्वम्, अतः शक्तिसिद्धिः। न च कार्यानुत्पाद एव प्रतिबन्धः तज्जनकत्वमेव प्रतिबन्धकत्वमिति वाच्यम्। कार्यानुत्पादो हि तत्र न तत्प्रागभावो न वा तदुत्तरकालसंसर्गः, तस्य मन्त्राद्यजन्यत्वादिति चेत्—न। मन्त्रादीनामप्रतिबन्धकत्वात्। तत्प्रयोक्तारस्तु प्रतिबन्धकाः। ते च किंचित्करा एव। मन्त्रादौ च कार्ये कारणोपचारात् स्वार्थिककन्-प्रत्ययाद्वा तथा व्यपदेशः। प्रतिबन्धश्च सामग्रीविरहः। मन्त्राद्यभाव-घटितसामग्रीविरहश्च मन्त्रादिरेव। तदभावाभावस्य तत्त्वात्।

प्रकाशः

प्रतिबन्धकत्वान्यथानुपपत्त्या तत्सिद्धिं निराकर्तुमुत्थापयति—**नन्विति**। कर्तरि ण्वुलो विधानादिति भावः। **तस्येति**। यद्यपि योगक्षेमसाधारणं जन्यत्वमत्रापि सम्भवत्येव : तथापि सत्त्वघटितजन्यत्वाभिप्रायेणेदमिति ध्येयम्। **स्वार्थे क इति**। स्वार्थिकाः क्वचिल्लिङ्गवचनान्यतिवर्तन्तेऽपीति वचनात् औषधं प्रतिबन्धकमिति नपुंसक-लिङ्गत्वमिति भावः। ननु भवेदेवं यदि मन्त्रादीनां प्रतिबन्धकत्वमपि भवेदित्यत आह—**प्रतिबन्धश्चेति**। **सामग्रीविरहः**—सामग्रीघटककारणविरह इत्यर्थः।

तर्कचूडामणिः

मिहिते मन्त्राद्यप्रतिबन्धकत्वचोद्यमसंगतमित्याशङ्क्य नानन्तरग्रन्थेन तत्संगतिः। किं तु कक्ष्यान्तरपरता तस्येत्याशयं सूचयितुमाह—**प्रतीति**। मन्त्रपदमुक्तकालपरम्, मन्त्रा-

प्रतिबन्धकताया उक्तत्वात्। **अत्रेति**। दुःखप्रागभावादावित्यर्थः। ननु कारण-मेलनात्मकसामग्रीविरहात् तस्य मण्यादावभावात् प्रतिबन्धत्वमपि न स्यादित्यत आह—**सामग्रीति**।

नव्यास्तु प्रतिबन्धकाभावो न कारणम् , न वा शक्तिः । किं तु तत्तत्कालीनदाहविशेषं प्रति तत्तत्कालप्रतिबन्धेतरवह्नेः कारणत्वमिति प्रतिबन्धकाभावः कारणतावच्छेदको न तु कारणं दण्डत्ववत् । आकाशादौ त्वेकव्यक्तिके न यथा कारणत्वम् , क्वचित् प्रतिबन्धेऽप्यन्यत्र शब्दोत्पत्तेः । किं तु भेर्यादेस्तथा कारणत्वमिति तत्प्रतिबन्धे शब्दोत्पत्तिर्नेत्याहुः ।

प्रकाशः

मुरारिमिश्रमतमाह—नव्यास्त्विति । भेर्यादेरिति । इदं च समाधिसौकर्यादुक्तम् । वस्तुतस्तु तत्कालप्रतिबन्धेतरवह्नेरिव तत्तद्देशप्रतिबन्धेतराकाशस्य जनकत्वं संभवत्येव । अन्योन्याभावस्याव्याप्यवृत्तित्व[1]मतेनैवास्योक्तत्वात् प्रतिबन्धकाभावस्यैवावच्छेदकत्वस्वीकाराद्वा तस्याव्याप्यवृत्तित्वात् । अन्यथा वह्निभेर्यादेरपि कालान्तरे कार्यानुत्पत्त्यापत्तिः, [2]प्रतिबन्धेतरत्वाभावादिति भावः ।

तर्कचूडामणिः

नन्वभावहेतुतानिरासान्न नैयायिकः, शक्तिनिरासाच्च न मीमांसक इत्यत आह—मुरारीति । मुख्ये संभवति एकदेश्यवलम्बनानुपपत्तिरित्याह—प्रतीति । हेतुत्वाभिमताभावस्यैवावच्छेदकताया वाच्यत्वादिति भावः । अन्यथेति । न चातद्गुणसंविज्ञानबहुव्रीहिणा भेर्याकाशसंयोग एव मूलग्रन्थे विवक्षित इति वाच्यम् । तथापि प्रतिबन्धेतरवह्नेरित्यत्र वह्नौ [3]तादृशभेदाभ्युपगमस्यावश्यकतया तादृशबहुव्रीहेरनाश्रयणात् ।

ननु तत्तत्कालीनत्वं प्रतियोगिविशेषणं न स्वभावविशेषणम् । एवं चान्योन्यात्यन्ता-

---

1 स्ववादिमतेन–ख
2 प्रतिबद्धेतर–ख
3 तादृशाभेदा–ग

तन्न । वह्निप्रतिबन्धकाभावयोरन्वयव्यतिरेकतौल्येन उभयस्यापि कारणत्वात्, न त्वेकमवच्छेदकम्, विनिगमकाभावात् । किं च यस्मिन् सत्यपि यदभावात् कार्याभावस्तस्य कारणत्वमायाति न तु तदवच्छेदकत्वम् ।

प्रकाशः

यद्वा तत्तत्काल[1]प्रतिबद्धा अन्ये वह्न्यादयः प्रसिद्धाः [2]तदन्यवह्निर्वा तत्र जनकतावच्छेदक-प्रविष्टम्, आकाशे तु न तथेत्यनेनाभिप्रायेण तदकमिति । उभयस्यापीति ।

[3]नन्वेवमन्वयव्यतिरेकतौल्येन दण्डदृढत्वयोर्द्वयोरपि जनकत्वापत्तिः । न च दण्डस्य चक्रादिसमवधानं साक्षात्संबन्धेन दृढत्वस्य च परम्परासंबन्धेन तदिति विनिगमकमिति वाच्यम् । वह्निप्रतिबन्धकाभावयोरपि तुल्यत्वात् । किं चैवं [4]विनिगमनायां परम्परा-संबद्धस्यालोकरूपादेरपि प्रत्यक्षहेतुत्वं न स्यात्, किं तु अवच्छेदकत्वमेव स्यात् दृढत्ववत् । अपि च यस्मिन् [5]सत्यपीति नियमादपि दार्ढ्यस्य हेतुत्वमेव । दण्डे सत्यपि

तर्कचूडामणिः

भावयोरव्याप्यवृत्तित्वोपगमः, न वा गगनेऽपि तत्संभव इत्यपरितोषात् तथैव कल्पान्तरमाह—यद्वेति ।

न चैवमपि भेदस्य हेतुतावच्छेदकत्वमायाति, न त्वत्यन्ताभावस्य, तथा च दूषणग्रन्था-संगतिरिति वाच्यम् । प्रतिबन्धकभेदो हि प्रतिबन्धकत्ववद्भेदः । तथा चालभेदो जलत्वात्यन्ता भाव इति मतेनैतदभिधानात् । वह्नीति । वह्निद्वारा प्रतिबन्धक भवसंबन्ध इति भावः ।

ननु करतलादौ वह्नेः संयोगः, तत्रैव चाभावस्य स्वरूपसंबन्धः । लोऽपि साक्षात्संबन्ध एवेत्यरुचेराह—किं चेति । ननु रूपाद्युत्कर्षेण प्रत्यक्षोत्कर्षात् परम्परासंबद्धरूपादेरपि हेतु-त्वम् । अत एव च परम्परासंबन्धोपादानज्ञानादेर्घटादिहेतुत्वमित्यपरितोषादाह—अपिचेति ।

---

1 प्रतिबन्धा–क
2 तस्य तदितरत्वं–क
3 न चैवम्–क
4 विनिगमनया–ख
5 असत्यपि–क

प्रकाशः

दार्ढ्याभावेन कार्याभावात्। न चादृढेनाप्यनेकदण्डेन रज्जुबद्धेन घटोत्पत्तिदर्शनात् विवक्षितविवेकेन भ्रमिजनकत्वमेव दार्ढ्यम्। तस्य न घटजनकत्वम्, जनकत्वस्या जनकत्वादिति वाच्यम्। भ्रमिजनकत्वस्य घटजनकत्वे विरोधाभावादिति तज्जनकत्वस्य-तज्जनकत्वे विरोध आत्माश्रयात्।

किं च भ्रमिजनकतायामेव दण्डस्य किमवच्छेदकम्। न तावद्दण्डत्वमेव, अदृढादपि भ्रम्युत्पत्त्यापत्तेः। न च दृढदण्डत्वं तथा, अवच्छेद्यभ्रमिजनकतातिरिक्तस्य दृढत्वस्या-भावात्। भावे वा तदेव घटजनकतावच्छेदकमस्तु।

तर्कचूडामणिः

ननु यस्मिन्नित्यत्र कार्यजनक इति शेषः। तेन फलोपधानवति यस्मिन् सति यस्याभावात् कार्याभावः तदनवच्छेदकम् [1]प्रतिबन्धकाभावस्तु तथा, कदाचिद्दण्डौ प्रतिबन्धक-सत्त्वासत्त्वयोः संभवात्। न चैवं फलोपहितदण्डे दार्ढ्यसत्त्वासत्त्वे तत्र दार्ढ्यस्यैव सत्त्वात्। न च पश्चाद्दार्ढ्यविनाशसंभव इति वाच्यम्। तदा अवयवनाशस्यावश्यकत्वेन द्रव्यान्तरत्वेन तस्य फलानुपहितत्वादित्यरुचेराह—किं चेति।

ननु भ्रमिजनकतावच्छेदकननुगतमेव। भ्रमिक्रियायां वैजात्यकल्पनात् न व्यभिचारः। अतएव दण्डं विनापि हस्तादिना कर्म्युत्पादे घटोत्पत्तिः। न चैवं दण्डोऽपि न हेतुः स्यात् तत्रैव व्यभिचारादिति वाच्यम्। भ्रमिहेतुत्वेन दण्डत्वेनाहेतुत्वस्येष्टत्वात्। तेन रूपेण हेतुताव्यपदेशो भ्रमिजनकत्वविषय एव। यथा कुलालस्य तत्त्वेन हेतुत्वव्यपदेश उपादानाद्य भिन्नात्मत्वविषयः। यथाश्रुते तादृशज्ञानशून्यतज्जातीयस्यापि हेतुत्वापत्तेः। तदभिज्ञातज्जा-तीयात् घटानुत्पादापत्तेश्च। अत एव कुलालमात्रादावतिव्याप्तिं वक्ष्यति। जातेरवच्छेदकत्वे तस्या अपि योग्यतया तदुक्त्यसंगत्यापत्तेः। तथा च घटजनकतावच्छेदकं भ्रमिजनकतावच्छेद कादन्यदेव भ्रमिजनकत्वरूपम्, अनुगते संभवति त्यागायोगात्। न च तदेव घट-जनकमस्त्विति वाच्यम्। शक्तौ शक्त्यन्तरवत् जनकताया जनकतान्तरानङ्गीकारात्। न च तस्याः स्वध्वंससाक्षात्कारयोरपि न जनकता स्यादिति वाच्यम्। उपाधित्वेन नित्यतया ध्वंसाहेतुत्वस्यातीन्द्रियानन्यथासिद्ध्यादिघटितत्वेनातीन्द्रियतया साक्षात्कारा-

न हि कार्यायोगव्यवच्छेदः कारणत्वम् . किं तु नियतपूर्वसत्त्वम् । तच्च सहकारिविरहप्रयुक्तकार्याभावेऽप्यक्षतम् । अन्यथा चक्रसहितदण्डत्वेन कारणत्वे सहकार्युच्छेदः । यस्य यद्धर्मावगम्यैव नियतपूर्ववर्तित्वमवगम्यते तस्य तदवच्छेदकं दण्डत्वमिव । सहकारी तु न तथा ।

प्रकाशः

अपि चान्यं प्रतीति न्यायेन दण्डस्यान्यथासिद्धत्वापत्तिः, कुम्भकारपितृवत् । न चान्यमुदासीनं प्रतीति विवक्षितम् , भ्रमिस्तु जनिकैवेति वाच्यम् । एवं कुम्भकारपितुरपि जनकत्वं स्यात् कुम्भकारस्यापि जनकत्वेनोदासीनत्वाभावात् । तस्मादत्र समाधानं चिन्त्यम् ।

[1]विपक्षबाधकमाह—**न हीति**[1] । तस्य प्रवृत्तिपूर्वमनिश्चये कारणे कार्यार्थिनोऽप्रवृत्त्यापातादिति भावः । **अन्यथेति** । कार्यायोगव्यवच्छेदस्यैव कारणत्व इत्यर्थः । [2]ननु तथापि[2] प्रतिबन्धकसमानकालीनकार्यं [3]प्रति उत्तेजकरूपविशेषसामग्रीकल्पनेनैव सामञ्जस्ये तद्धेतुत्वग्राहकान्वयादेरन्यथासिद्धिरिति चेत्—यत्र प्रतिबन्धकं नोत्तेजकं तत्र प्रतिबन्धकाभावस्य कारणत्वकल्पनात् अन्यत्रापि तस्य हेतुत्वेन तत्र अवच्छेदकान्तरकल्पनौचित्यात् । [4]न तु विशेषसामग्र्यन्तरं कल्प्यते, गौरवात् ।

तर्कचूडामणिः

हेतुत्वस्य चेष्टत्वात् । प्रत्यक्षस्य तद्ग्राहकत्ववर्णनं तच्छरीरप्रविष्टकिंचिदर्थग्राहकतामात्रेणोपनीताभिप्रायेण वेति मन्तव्यमिति पूर्वास्वरसादाह—**अपि चेति** । जयदेवसमाधिं निराकरोति—**न चेति** । **अत्रेति** । अन्त्यदूषण इत्यर्थः ।

ननु नेदं बाधकम् , सहकार्युच्छेदस्येष्टत्वात् । चक्रादिप्रवृत्तेश्च हेतुतावच्छेदकसिद्ध्यर्थमुपपत्तेरित्यत आह—**विपक्ष इति** । बाधकं च 'न चेष्टापतिः' इत्यनेनोपपादयिष्यत इति भावः । वक्रेत्यादिसप्तम्यन्तस्यान्यथाशब्दार्थत्वं वारयति—**कार्येति** ।

---

1 न होति-क 2 ननु-क
3 प्रयुक्तिजनकरूप-क 4 न च-ख

प्रकाशः

किं चोत्तेजकमननुगतमिति न दाहादिहेतुः। तत्तदुत्तेजकयावदभावविशिष्टमण्याद्यभावश्चानुगत [1]इति स एव हेतुः। अत एव पक्षताया अनुमितिक्षेतुत्वम्।

अन्यथा सिद्ध्युत्तरनुमितित्वावच्छिन्ने सिषाधयिषारूपविशेषसामग्र्या एव हेतुत्वापत्त्या तस्या अहेतुत्वापातात्। नन्वेवं संशयोत्तरप्रत्यक्षत्वावच्छिन्ने विशेष[2]दर्शनरूप[2]सामग्र्यन्तरं न कल्प्येतेति चेत्—न। इष्टत्वात्, विशेषादर्शनसहकृतसंशयाभावस्यैव हेतुत्वादिति केचिदिति दिक्।

तर्कचूडामणिः

ननु केवलमणिस्थले मणित्वेन प्रतिबन्धकत्वं तदभावत्वेन च हेतुत्वं कल्पयति, न तु—विशिष्टाभावत्वेन, तदा उत्तेजकाद्यनुपस्थितेः।

तथा च विशेष्याभावाद्विशिष्टाभावस्यान्यतया तत्रैवावच्छेदकान्तरकल्पनमिति युक्तम्। यदि च तत्परित्यागेनाभावान्तरस्य हेतुत्वकल्पनं तदा लाघवात् उत्तेजकस्यैव तत्त्वं कल्प्यताम्, क्लृप्तहेतुत्यागस्योभयत्राविशेषादित्यस्वरसादाह—**किं चेति**। नन्वेवमपि न विशिष्टाभावो हेतुः, उत्तेजकाभावविशिष्टमणौ दाह्यासंयोगस्यैव लाघवेन हेतुत्वसंभवात्। किं च विशेषदर्शनस्याहेतुत्वे तस्य गुणत्वोपवर्णनं [3]प्रामाण्यं विरुध्येत। अनुमितिलक्षणे तस्य हेतुत्वाभिधानं स्वकीयं च विरुध्येतेति चेत्—न। मणिनिष्ठस्य तादृशसंयोगाभावस्य व्यधिकरणत्वेनाहेतुत्वात्। नान्त्यः, विशेषदर्शनस्यानुगमेन हेतुत्वेऽपि उत्तेजकस्यातथात्वेन नुपपत्तेः। [4]व्यञ्जकाभावाप्रयुक्तसंशयोत्तरप्रत्यक्षत्वावच्छेदेन संशयविरोधिदर्शनत्व मनुगतमेवेति दिक्।

अन्यथेति। यथाश्रुताभ्युपगमे परमाणुव्यावर्तकत्वमस्य वाच्यम्। तदनुपपन्नम्। वह्निपदेनैव तद्वारणात्। कार्यगतवैजात्यस्यादृष्टायत्तत्वेन वह्न्यारम्भोपपत्तौ तत्र तत्कल्पने

1 स एव—क 2 प्रामाण्ये—ग
3 व्यञ्जकाभावप्रयुक्ते—ग

ननु मा भूदर्थापत्तिः शक्तौ मानम्, अनुमानं तु स्यात्। तथा हि—स्थिरोऽवयवी जनकदशाविशिष्टो वह्निः अजनकदशाव्यावृत्तभावभूतधर्मवान् जनकत्वात् कुण्ठकुठारात्तीक्ष्णकुठारवत् दाह्यासंयुक्तवह्नेर्दाह्यसंयुक्तवह्निवच्च प्रतिबन्धकसत्त्वे संयोगादेरजनकदशावर्तित्वेन तदतिरिक्तातीन्द्रियभावभूतधर्मसिद्धिः। यद्यपि शक्तेर्भावहेतुजन्यत्वेन नाजनकदशाव्यावृत्तत्वम्, [1]तथाप्युक्तविशिष्टायास्तथात्वम्।

यद्वा धर्मेऽतीन्द्रियत्वं विशेषणम्। न च दृष्टान्तासिद्धिः, तुल्याधारत्वेऽपि लोहविशेषघटितकुठारे विलक्षणच्छिदाक्रियारूपकार्यबलादतीन्द्रियतीक्ष्णत्वसिद्धिः।

प्रकाशः

ननु शक्तिरूपसाध्याप्रसिद्धेरनुमानं न स्यादित्यत आह—**तथा हीति**। अवयवि[वी] प्रत्यक्ष इत्यर्थः। अन्यथा वह्नित्वस्य [2]परमाण्ववृत्तित्वेनाव्यावर्तकत्वापत्तिः। अत्र च प्रतिबन्धकसमवधानदशायां यादृशदाह्यसंयोगवान् वह्निः प्रतिबन्धकाभावकालेऽपि तादृशदाह्य-[3]संयोगवानेव वह्निः स्थिरपदेन विवक्षित इति दाह्यसंयोगादिना नार्थान्तरम्।

ननु यावदजनकदशाव्यावृत्तत्वं शक्तेर्नास्ति, यत्किंचिदजनकदशाव्यावृत्तत्वं दाह्यसंयोगादेरपीत्यर्थान्तरमित्यपरितोषादाह—**यद्वेति**। न चैवं [4]भावभूतपदं [4]व्यर्थम्, [5]अदृष्टाभावादेः।

तर्कवृत्तिः

मानाभावात्। अन्यथा बीजारम्भकपरमाणुषु बीजत्वाङ्कुरत्वयोः सत्त्वे सांकर्यापत्तेः। तथा च जाठरवह्निवारणाय तदुपात्तमिति भावः।

यद्यपि जाठरवह्नावपि प्रथमादिसाध्यमस्त्येव, तथापि दाहघटितसाध्ये तत्र बाधवारणाय तदुपादानम्। दाहविशेषानुकूलत्वस्य तत्र साध्ये विवक्षिततया दाहसामान्यसत्त्वेऽपि बाधसंभवात्। उत्पन्न[6]विनष्टवह्नावपि शक्तिसत्त्वेन स्थिरपदवैयर्थ्यमित्यत आह—**अत्रेति**।

एवमिति। अतीन्द्रियपदेनैव मण्याद्यभावेन अर्थान्तरस्य निरासादिति भावः। ननु

---

1 तथाप्युद्भवविशिष्टायाः
2 परमणुवृत्तेर्नाव्या—क
3 संयोगादिमानेव—क
4 तदं—ख
5 दुरदृष्टादेः—क

अथ वा तथाभूत एव वह्निः कार्यानुकूलातीन्द्रियाद्विष्ठधर्मसमवायी जनकत्वात् आत्मवत् । अतीन्द्रियत्वं च यद्यपि न साक्षात्काराविषयत्वम् , अनित्यसाक्षात्काराविषयत्वम्, योगजधर्माद्यजन्यसाक्षात्काराविषयत्वं वा परं स्वं वा प्रत्यसिद्धेः। संयोगादिकपञ्चकजन्यज्ञानाविषयत्वमैन्द्रियकाणामपि;

प्रकाशः

वारणाय तदुपगमात् । भट्टनये अनुपलब्धिगम्यतया अभावमात्रस्यैवातीन्द्रियत्वात् । वस्तु तस्तु संयोगाद्यन्यतमप्रत्यासत्तिजन्यसाक्षात्काराविषयत्वमतीन्द्रियत्वमभावमात्र एवेत्यनुपदमेव स्फुटम् ।

ननु लोहविशेषस्यैव सातिशयच्छिदाजनकत्वात्[1] अतीन्द्रियतैक्ष्ण्ये मानाभावः, अतिरिक्त-पदार्थापत्तिश्चेत्यपरितोषादाह–**अथवेति** । कार्यानुकूलत्वं च स्वकार्यानुकूलत्वम् , तदपि [2]स्वनिमित्तकारणककार्यानुकूलत्वं विवक्षितम् । तेन [3]कार्यानुकूलस्थितस्थापकेन नार्थान्तरम् । कर्मणि [4]च वह्निः समवायिकारणमिति नोक्तदोषः । वह्नौ स्थितस्थापकाभावपक्षे कार्यानुकूल-पदमुद्देश्यसिद्ध्यर्थम् । अदृष्टवदात्मसंयोगोष्णस्पर्शप्रतिबन्धकाभावादिनार्थान्तरवारणायाद्विष्ठादि-विशेषणम् । यद्यपि [5]गुरुमतेऽभावोऽधिको नास्त्येवेति समवायपदं व्यर्थम् । तथापि परस्यार्थान्तरं स्यादेवेति तद्वारणाय तदुपात्तम् । [6]**ऐन्द्रियकाणामपीति** । वस्तुतस्तु संयोगादिपञ्चकजन्यज्ञानस्याप्रसिद्धेः साध्याप्रसिद्धिः द्रष्टव्या ।

तर्कचूडामणिः

कार्यमात्रे तत्तदनुकूलादृष्टमेव हेतुः, लाघवात्, न तु दुरदृष्टाभावोऽपि । न चैवं यागाद्य-नन्तरमेव स्वर्गोत्पत्त्यापत्तिः । तस्य समयविशेषवर्तिफलजनकत्वस्वभावकल्पनादित्यरुचेराह—**भट्टेति** । नन्वेवमपि न्यायमते तद्वैयर्थ्यमेवेत्यपरितोषादाह–**वस्तुत इति** । स्वपदं पक्षे वह्निपरम् ।

ननु प्रत्यासत्तिपञ्चकजन्यज्ञानाप्रसिद्ध्या तद्घटितस्यापि तथात्वेनातिव्याप्त्यनुपपत्ति-रित्यत आह–**वस्तुत इति** ।

---

1 अतीन्द्रिये–क
2 निमित्तकारणतानुकूलत्वम्—क
3 कर्मानुकूल—ख
4 तु—ख
5 गुरुमते समवायोऽधिको—ख
6 ऐन्द्रियकारणमपीति–क

तथापि संयोगाद्यन्यतरप्रत्यासत्तिजन्यसाक्षात्काराविषयत्वमुभयवादिसिद्धम्। अन्यतरत्वं च तदन्यान्यत्वम्। न चाभावातीन्द्रियत्वम्, तस्यासिद्धेः। न च वह्नौ स्थितस्थापकेनार्थान्तरम्। तत्र तदभावात्। ि याया वेगेनादृष्टवदात्मसंयोगेन वोत्पत्तेः। न चात्मत्वं नित्यत्वं वोपाधिः। स्पर्शैकत्वादिमति द्व्यणुके साध्याव्यापकत्वात्।

यद्वा पिण्डीभूतो वह्निः दाहानुकूलाद्विष्ठातीन्द्रियभावभूतधर्मवान् दाह जनकत्वात् आत्मवत्।

प्रकाशः

तथापीति। यद्यपि [1]जन्यान्तं व्यर्थम्, तदजन्यसाक्षात्कारस्य व्यावर्त्यस्याप्रसिद्धेः। तद्रहितं च परमतेऽपि प्रसिद्धम्। तथापि विशिष्टाभावे न वैयर्थ्यमिति ध्येयम्। अत्र [2]संयोगादीत्यत्र विषयसंयोगादीत्यर्थः। तेन आत्ममनोयोगस्य योगिप्रत्यक्षादावपि जनकत्वान्न परं प्रत्यसिद्धिरिति मन्तव्यम्। **न चाभावेति**। उक्तातीन्द्रियत्वस्य तत्रापि भावादिति भावः। **तस्येति**। गुरुमते [3]तस्यातिरिक्तस्य तत्रासिद्धेरित्यर्थः। नैयायिकमते च पारिभाषिकस्य [4]निरुक्तातीन्द्रियत्वस्य अभावे वृत्तावपि न काचित् क्षतिः। [5]तदादायार्थान्तरशङ्काय समवायपदेनैव [6]वारणादिति भावः। परमाणौ साध्याव्याप्तेराह— **नित्यत्वं चेति**।

वह्नौ स्थितस्थापकस्वीकारे यादृशानुमाने नार्थान्तरत्वशङ्का तादृशं तदाह—**यद्वेति**।

तर्कचूडामणिः

विशिष्टाभाव इत्युपलक्षणम्, साध्य इत्यपि बोध्यम्। ननु प्रत्यक्षस्य मण्याद्यभावस्यातीन्द्रियत्वशङ्कानुपपत्तिरित्यत आह—**उक्तेति**। ननु भट्टादिभिरपि अतिरिक्तस्य गुरुणाप्यधिकरणात्मनः तस्याङ्गीकारादसिद्धिरित्यत आह—**गुर्विति - पारिभाषिकस्येति**। [7]प्रकृतसाध्यनिर्वचनमात्रोपयुक्तस्येत्यर्थः।

---

1 जन्येति व्यर्थम्–ख
2 सयोगादीत्यत्र नियतसयोगादीत्यर्थ'–ख
3 अतिरिक्तस्य तस्यासिद्धे–ख
4 निरुक्तत्वादति–ख
5 तमादाय–ख
6 निराकरणात्–ख
7 साध्य—ग

न चात्मत्वमुपाधेः, अदृष्टत्वस्य दाहानुकूलत्वेनादृष्टे साध्याव्यापकत्वात् ।

अथवा करवह्निसंयोगः कार्यानुकूलातीन्द्रियधर्मसमवायी जनकत्वात्

प्रकाशः

यद्वा कार्यस्य विशेषरूपेण सिद्ध्यर्थमाह--यद्वेति । अदृष्टत्वस्य धर्मत्वादेरित्यर्थः । अनुकूलत्वेनेति । कारणतावच्छेदकसाधारणस्य अग्रे निरुक्तत्वादिति भावः । यद्यपि तन्मते धर्मत्वादिकं न कारणतावच्छेदकं किं तु शक्तिरेव, तथापि न्यायमते धर्मत्वादिकमादाय तन्मते शक्तिमादाय साध्यमस्त्येव तत्रोपाधिश्च नेत्युभयसिद्धं साध्यव्यापकत्वमिति भावः ।

नन्वद्विष्ठपदानुपादानात् सध्ये लाघवम् । स्थितस्थापकेन च नार्थान्तरत्वशङ्कापीति मनसि कृत्याह--अथवेति । कार्यानुकूलत्वं स्वकार्यानुकूलत्वम् । तदप्युद्देश्यसिद्धये ।

तर्कचूडामणिः

केचित्तु-अभावातीन्द्रियत्वं न दोषाय । उक्तस्य [1]लक्षणत्वासिद्धेरित्यध्याहारेणाथ कल्पयन्ति ।

ननु नादृष्टत्वं जातिः, तथात्वे गुणविभागे धर्माधर्मरूपेण तदुद्देशानुपपत्तेः, गुणत्वपाशाद्व्याप्यजाति[2]भेदत्वस्यैव तत्र नियामकत्वात् । अन्यथा गन्धस्थाने सौरभासौरभरूपेण ज्ञानस्थाने स्मृत्यनुभवरूपेण परिगणनापत्तेः । नोपाधिः, धर्माधर्मान्य[3]तरत्वरूपत्वे तस्यानवच्छेदकत्वात् अन्यादृशस्य चाभावादित्यत आह--धर्मेति । न च धर्मत्वादेरद्विष्ठत्वान्न धर्मे साध्यमिति वाच्यम् । अद्विष्ठत्वस्याव्याप्यवृत्त्यर्थकत्वात् । नन्वेवमननुगमान्न कार्यमात्रेऽदृष्टं हेतुः स्यादिति चेत्--न । स्वेच्छाविषयकार्यावावच्छेदेन स्वधर्मत्वेन [4]स्वद्वेषविषयकार्यत्वेन च[3] हेतुतया सामान्यहेतुत्वाभावस्येष्टत्वं दिति दिक् ।

उद्देश्येति । स्वकार्यानुकूलत्वेन तत्सिद्धिरुद्देश्येति भावः ।

---

1 लक्षणासिद्धेः-ग
2 भेदस्यैव-ग
3 तररूपत्वे-ग
4 च-ग

आत्मवत् द्व्यणुकवच्च। न चात्मत्वं द्रव्यत्वं वोपाधिः, द्व्यणुकैकत्व स्पर्शादौ साध्याव्यापकत्वात्।

प्रकाशः

संयोगत्वेनार्थान्तर[1]वारणायातीन्द्रियेति। उक्तातीन्द्रियत्वस्य प्रतिबन्धकाभावेऽपि सत्त्वात् परमतेऽर्थान्तरं मा भूदित्यत उक्तं समवायीति। [2]जनकत्वादिति। न[2] चाभावे व्यभिचारः, [3]समवायगर्भसाध्यस्य तत्राभावादिति वाच्यम्। परैरभावानङ्गीकारात्। ननु तथापि समवाये व्यभिचारः। न च तत्रापि शक्तिसमवायोऽस्त्येवेति वाच्यम् - अनवस्थानादिति [4]चेत्—न[4]। निमित्तकारणतातिरिक्तकारणताश्रयत्वस्य हेत्वर्थत्वात्। तच्च यत्किंचित्कार्यं प्रत्येव विवक्षितम्। न तु दाहलक्षणकार्यं प्रतीति नासिद्धिरिति ध्येयम्।

अत्र साध्ये हेतौ च दाहपदप्रक्षेपेण वह्निपक्षकानुमानमिवानुमानान्तरमपि ग्रन्थकृदभिमतं. लेखकप्रमादाच्च न [5]प्रचरतीति प्रतिभाति। अत एव तदन्तर्भावेणैव वक्ष्यति "अग्रिम[6]चतुर्षु बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः" इति। अन्यथा तदसंगतत्वापातादिति वक्ष्यते। न च द्व्यणुकादौ साध्याव्याप्तिरिति वाच्यम्। दाहजनकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति भावः। शुद्धसाध्यव्यापकमाह— द्रव्यत्वमिति। द्व्यणुकेति। नन्वेकत्वत्वस्पर्शत्वजाती नातीन्द्रिये। द्व्यणुकैकत्वत्वद्व्यणुकस्पर्शत्वोपाधी न समवेतौ।

तर्कचडामणिः

करवह्निसंयोगो दाहानुकूलतादृशधर्मसमवायी दाहजनकत्वात्। इत्यनुमानान्तरमभिप्रेतमित्याह—अत्रेति।

---

1 वारणायाह–ग
2 न–क
3 समवायि–क
4 चेत्–क
5 प्रसरतीत्य.भाति–ख
6 चरुषु–क

यद्वा प्रतिबन्धकदशायां प्रत्यक्षसकलदाहहेतुसमवहितो दाहाजनको वह्निः जनकदशावृत्तिकार्यानुकूलभावभूतधर्मशून्यः अजनकत्वात् कुण्ठ-कुठारवत् ।

यद्वा तथाभूतो वह्निः दाहजनकदशावृत्तिदाहानुकूलभावभूतधर्मशून्यः दाहाजनकत्वात् दाह्यासंयुक्तवह्निवत् ।

अनुकूलत्वं च कार्याभावप्रयोजकाभावप्रतियोगित्वं कारणतदवच्छेदक-

---

प्रकाशः

तथा च तत्र साध्यासत्त्वान्न साध्याव्याप्तिरिति चेत्--अत्र केचित् । अतद्गुणसंविज्ञान-बहुव्रीहिणा गुरुत्वधर्मादिकमुक्तम् । [1]तत्र साध्याव्यापकत्वमस्त्येवेत्याहुः ।

अन्ये तु धर्माशस्याविवक्षितत्वेन तत्समवायित्वस्य तन्निरूप्यसमवायाश्रयत्वार्थकतया समवायिद्व्यणुकमादा[2]यैव तत्र साध्य[2]सत्त्वमिति वदन्ति ।

शक्तिवदुपाधिरपि समवैति । अन्यथा [3]उपाधिरसंबद्ध एव स्यात्, तन्मते विशेषणताया अनभ्युपगमादित्य.प्याहुः ।

नन्वनुकूलत्वं यदि जनकत्वं, तदा शक्तौ तथाभ्युपगमेऽपसिद्धान्तः । अथा-वच्छेदकत्वं तदा दृष्टान्तासिद्धिः । आत्मन्यदृष्टरूपतादृशधर्मस्य जनकत्वादित्युभयसाधारणम् । तदाह—अनुकूलत्वं चेति ।

तर्कचूडामणिः

मुख्यबहुव्रीहिसंभवे गौणस्य तस्यानाश्रयणमित्याशयेन जयदेवमतमाह—अन्ये त्विति । अविवक्षितत्वेनेति । प्रयोजनाभावेनेति भावः ।

भावत्वाद्युपाधेरपि समवायेन वृत्तौ समवायादौ तन्न स्यादित्यस्वरसं सूचयति—अपीति ।

असिद्धिरिति । यद्यपि [4]धर्मस्यादृष्टान्तत्वे न कोऽपि दोषः । पक्षसमत्वाच्च

---

1 अत्र-क
2 य साध्य-क
3 उपाधेरसबन्धः-क
4 धर्मस्य दृष्टान्तत्वे न ऽपि-ग

साधारणम् । दृढदण्डत्वेन कारणत्वे दृढत्वाभावादपि कार्याभाव-दर्शनादिति ।

उच्यते । साध्यं विनापि उभयसिद्धप्रतिबन्धकाभावादेव जनकत्वादि हेतुसंभवात् विपक्षबाधकाभावेनानुमानानामप्रयोजकत्वम् । यदि च सहचारदर्शनव्यभिचारादर्शनोपाध्यनुपलम्भमात्रादेव व्याप्तिग्रहस्तदा शक्ति-सिद्ध्यनन्तरं तेनैव हेतुना साध्ये शक्त्यतिरिक्तत्वप्रक्षेपेण शक्त्यतिरिक्त-दाहानुकूलातीन्द्रियधर्मसिद्धिः । एवं तत्तदतिरिक्तत्वस्य प्रक्षेपात्तेनैव हेतुनानन्ततादृशधर्मसिद्धिप्रसङ्गः । द्वितीयादितादृशधर्मं विनापि प्रथमानु-मितशक्त्यैव जनकत्वाद्युपपत्तेर्न तादृशानन्तधर्मसिद्धिरिति चेत्— हन्तैवं शक्तिं विनापि तदर्थसिद्धेः किं शक्त्या । यद्वीश्वरानन्त्यवन्न शक्त्यानन्त्य-मित्युक्तम् । तदबोधात् । कार्यमात्रे हि कर्तृत्वेन कारणत्वं न त्वीश्वरत्वेन द्विकर्तृकत्वादिना वा , गौरवात् । घटे त्वार्थः समाजः ।

प्रकाशः

उभयसिद्धेति । तथा च प्रतिबन्धकाभावस्यैव दाहादिप्रयोजकत्वं कल्प्यते । धर्मिकल्पनातो धर्मकल्पनाया लघुत्वादिति तात्पर्यार्थः । घटे त्वार्थः समाज इति ।

तर्कचूडामणिः

आमादौ न व्यभिचारः । अन्यथा घटपटसंयोगादौ व्यभिचारापत्तेः । तथापि कारण-तदवच्छेदकसाधारणमनुकूलत्वं लाघवाद्विवक्षितम् , न तु जनकतावच्छेदकत्वं, गौरवा-दित्याशयः ।

ननु भावाभावयोर्भावस्य लघुत्वेन शक्तेरेव [1]तदनुकलत्वं सिध्यति न त्वभावस्येति । अन्यथा विशिष्टज्ञानस्यापि न प्रवर्तकत्वं स्यादित्यत आह--तथा चेति । प्रवृत्तिस्थले विशिष्टज्ञानं क्लृप्तमिति [2]वैषम्यमिति भावः । ननु घटादौ कुलालजन्यतावच्छेदकसत्त्वेऽपि

---

1 तत्कूलत्वं–क 2 वैशिष्ट्य–ग

एवम् अजनकदशाव्यावृत्तत्वेनैव प्रयोजकत्वम् , न तु भावभूतत्वेनेति, गौरवात्। अपि च भावकार्यमात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात् शक्त्यनुकूला शक्तिरपरा समवायिकारणे मन्तव्या। एवं सापि समवायिकारणजन्येति तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था। किं च प्रथमानुमानेऽजनकत्वं न स्वरूपायोग्यत्वम्। वह्नौ कुठारे च तदभावात्। किं तु कार्यानुपधानम्।

प्रकाशः

'श्वरकर्तृकत्वस्य न्यायप्राप्तत्वात् कुलालकर्तृकत्वस्य घटत्वावच्छेदेनान्वयव्यतिरेकसिद्धवादिति भावः।

समवायिकारण इति। यद्यपि निमित्तकारणेऽपि शक्तिरस्त्येवेति तद्द्वारा-प्यनवस्था भवत्येव, तथाप्येकाधिकरणकानन्तशक्तिरूपानिष्टप्रसञ्जनाय समवायिकारणेत्युक्तम्। यद्यपि भावकार्यमात्रस्य समवायिकारणजन्यत्वं परो न मन्यते। तन्मते भावकार्यस्यापि समवायस्य [1]तथाभावाभावात् , तथापि [2]समवेतकार्ये तथात्वं स्वीकार्यमेवेति भावः। न चेयमनवस्था प्रामाणिकी, प्रमाणाभावात्। न च कार्यान्यथानुपपत्तिरेव [3]प्रमाणम्। तस्योभयप्रतिबन्धकाभावेनोपपत्तेः। न चाभावो न कारणम्। भाववत् ग्राहकतौल्यात्।

तकचूडामणिः

नेश्वरजन्यतावच्छेदकम , [5]ईश्वरत्वेन क्वचिदपि जनकत्वाभावात्। तथा च कथमार्थ-समाजोक्तिः अत आह —ईश्वरेति। न्यायेति। घटाद्युपादानगोचरज्ञानादिमत्त्वेन तस्य घटादिकर्तृताया अवर्जनीयत्वादित्यर्थः। उक्तागमाच्चायमर्थोऽनुसन्धेयः।

प्रमाणाभावादित्युपलक्षणम्। पूर्वपूर्वशक्तिं विना उत्तरोत्तरशक्त्यनुत्पादेनोत्पत्ति-

---

1 तथाभावात्–ख
2 समवेतकार्यं प्रति–ख
3 तत्र प्रमाणं–ख
4 नेश्वरताव–क
5 ईश्वरजन्यत्वेन–ग

प्रकाशः

एवं च गुणादिनिष्ठशक्तौ गुणादीनां समवायिकारणत्वापत्तौ द्रव्यत्वापत्तिरित्यपि दूषणं द्रष्टव्यम्। न च नित्यैव शक्तिर्न कार्येति वाच्यम्। अनित्ये भावहेतुजेति तत्सिद्धान्तात्।

किं चैवं [1]प्रतिबद्धवह्नेरपि दाहापत्तिः। न चोद्भूता शक्तिस्तदा[2] नास्तीति वाच्यम्। उद्भूतत्वमपि यदि नित्यं तदा स एव दोषः। अथानित्यं तदा तज्जननानुकूला शक्तिः शक्तावपि स्वीकार्या। एवं तत्राप्युद्भूत[3]त्वजननानुकूलं शक्त्यन्तरमित्यनवस्थापातः। उद्भूतत्वस्यैव शक्तिस्थानाभिषेचनीयतया नित्यशक्तौ मानाभावश्चेति भावः। **प्रथमानुमान** इत्युपलक्षणम्। [4]अजनकत्वगर्भे द्वितीयानुमानेऽपीति [5]ध्येयम्।

[6]ननूद्भूतत्वविशिष्टा शक्तिरजनकदशा[7]व्यावृत्तैवेति पूर्वपक्ष एवोक्तमिति न बाध इति चेत्—न। नित्यानित्यविकल्पेन पूर्वोक्तेन उद्भूतत्वे मानाभाव [8]इत्यवष्टम्भेनैवास्योक्तत्वात्।

तर्कचूडामणिः

प्रतिबन्धकत्वादित्यपि बोध्यम्। अनित्य इति। दण्डादावनित्ये भावस्य दण्डादेर्यो हेतुः [1]तेन शक्तिर्जायते। अत एव सहजत्वं [2]नित्ये गगनादौ नित्यैव सेत्यर्थः।

यदि च गौणोऽयं व्यपदेश एकदेशिसिद्धान्तो वा अनादित्वमेव मुख्यसिद्धान्त इति ब्रूयात् तदाह—**किं चेति**। **उपलक्षणमिति**। अन्ये तु जनकत्वगर्भतदगर्भत्वाभ्यामनुमानजातं राशिद्वयं कृत्वा प्रथमराशौ दूषणमाहेति वदन्ति। द्वितीयानुमाने दृष्टान्तासिद्धिदोषस्योद्भटतया इदं दूषणं नोक्तमित्यप्याहुः।

---

1 प्रतिबन्ध–क
2 तदानीं नास्त्येवेति–ख
3 त्वानुकूल–ख
4 जनकत्व–ख
5 द्रष्टव्यम्–ख
6 ननु चोद्भत–ख
7 व्यावृत्तेति–ख
8 इत्येतदव–ख
9 अनित्ये–ग

तथा च तदुपधानदशायामपि वह्नौ शक्तिः कुठारे तैक्ष्ण्यमिति बाधो दृष्टान्तासिद्धिश्च। लोहविशेषाणामेव सातिशयच्छिदाजनकत्वम्, अतो नातीन्द्रियतैक्ष्ण्यसिद्धिः। अग्रिमचतुर्षु बहिरिन्द्रियाप्रत्यक्षत्वमुपाधिः। तुल्ययोगक्षेमत्वेऽपि सन्दिग्धोपाधित्वेन दूषकत्वात्।

प्रकाशः

वस्तुतस्तु प्रतिबन्धककाल [1]एव परं शक्तौ[1] नोद्भूतत्वम्। तथा च सहकार्यन्तरावरहप्रयुक्तं [2]यदा वह्नौ[2] कार्यानुपधानं तदा उद्भूतत्वविशिष्टायास्तस्याः [3]सत्त्वात् बाध एवेति भावः।

अतीन्द्रियगर्भे साध्ये प्रागुक्तं दृष्टान्तासिद्ध्युद्धारं दूषयति—**लोहेति। अग्रिमेति।** "यद्वा धर्मेऽतीन्द्रियत्वं विशेषणम्" [4]इत्यादिष्वित्यर्थ इति केचित्। तन्न। कुठारे [5]साध्याव्यापकत्वापत्तेः। तदनुमाने कुठारस्यैव दृष्टान्तत्वेन [6]तत्र साध्य[6]सत्त्वात्। न च लोहविशेषाणा[7]मपीत्यनेन तत्र साध्याभावव्यवस्थितेर्नैवमिति वाच्यम्। एवं हि साध्यव्यापकताग्रहस्थलाभावादेव नोपाधिः स्यात्। न चात्मैव [8]तथेति वाच्यम्। अदृष्टादेरजनकदशावृत्तित्वेन तत्र साध्यासत्त्वात्। न च जनकदशामात्रवृत्तिपरमाण्वादिसंयोगमादाय तत्रापि साध्यसत्त्वमिति वाच्यम्। एवं हि तादृशसंयोगमादाय घटादावपि साध्यसत्त्वेनोपाधेः साध्याव्यापकत्वात्। [9]न च गुरुत्वाभावरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वमिति वाच्यम्। सौरालोकादावपि तादृशपरमाणुसंयोगादिसत्त्वेन साध्याव्यापकत्वात्। तस्मात् पूर्वोक्तसंयोगपक्षकदाहघटितसाध्यकानुमानेन [10]सह चतुष्क[10]मभिमतमिति।

तर्कचूडामणिः

नन्वतीन्द्रियतैक्ष्ण्याभावेऽपि आद्यानुमाने न दोषः। द्वितीयेऽप्यतीन्द्रियधर्मादियोगिन आत्मनो दृष्टन्तत्वसंभव इत्यत आह—**अतीन्द्रियेति।**

---

1 एव-ख
2 यदा—क
3 सभवात्-ख
4 इत्यग्रिम इति—क
5 साध्यव्यापक—ख
6 साध्य—क
7 पामित्यनेन—ख
8 तदर्थ इति—ख
9 न च घटादौ—ख
10 चतुष्क—क

अपि च जनकत्वस्य केवलान्वयित्वेन व्यतिरेकाप्रसिद्ध्या नान्वय-व्यतिरेकी। न च जनकत्वाभावस्य शक्तावेव प्रसिद्धिः। अन्योन्या-श्रयात्। न च गुरुवचनपरम्परात एव वाक्यार्थतया तत्सिद्धिः। त्वन्नये सिद्धार्थस्याप्रमाणत्वात्। न च परार्धसंख्यायां साध्यजनकत्व-व्यतिरेकयोः प्रसिद्धिः। अप्रत्यक्षायाः शब्दैकवेद्यायास्तस्याः प्रत्यक्षेण साध्यहेतुव्यतिरेकयोर्ग्रहीतुमशक्यत्वात्।

प्रकाशः

न चात्रापि स्थितस्थापकवति वृक्षादौ साध्याव्याप्तिरिति वाच्यम्। कार्यानु-कूलेत्यस्य [1]स्वनिमित्तकारणानुकूलेति विवक्षया स्थितस्थापकस्य चातथात्वेन वृक्षादौ [2]साध्यासत्त्वात्। कार्यपदस्य [3]वह्निकार्यपरत्वाद्वा। तथा च तादृशसाध्यमात्मन्येव। तत्र चोपाधिरस्त्येवेति न साध्याव्याप्तिरिति भावः। अपरे तु चतुर्षु मध्ये [4]कार्यानुकूलेत्यादि घटितानुमानत्रयेऽयमुपाधिरित्यर्थ इत्याहुः।

अपि चेति। [5]त्वन्नये अन्वयव्यतिरेक्येव [6]गमकमिति भावः। तत्सिद्धिरिति। शक्तिसिद्धिरित्यर्थः। तथा च नैतदनुमानेनैव शक्तिसिद्धिर्येनान्योन्याश्रय इति भावः। परार्ध-संख्यायामित्युपलक्षणम्। परममहत्त्वपरमाणुपरिमाणादावपीति द्रष्टव्यम्। अप्रत्यक्षाया इति।

तर्कचूडामणिः

कार्यानुकूलत्वगर्भानुमानाभिप्रायेण देशयति—न चात्रेति। बाध्ये [साध्ये?] निमित्तपदप्रक्षेपे स्वसमवायिकारणककार्यानुकूलत्वेन तदसिद्ध्यापत्तिरित्यनुशयेनाह—कार्येति। अनुमानान्तरकल्पनाद्वरं वाक्यैकदेशाध्याहार इति मनसिकृत्य मतान्तरमाह—अपरे त्विति।

अस्तु तर्ह्यन्वयिता, अत आह—अन्वयेति। तत्पदस्य जनकत्वाभावपरत्वेऽधिकरणा-प्रसिद्ध्यैव व्यतिरेकव्याप्त्यग्रहे शङ्कानुपपत्तिरित्यत आह—शक्तीति। शक्तिरस्तीत्यादिकमपि

---

1 स्वनिमित्तानु—क
2 तथासत्त्वात्
3 तत्क्रियारूपपरवकार्यपरत्वाद्वा—क
4 कार्यानुकूलघटितानुमाने—क
5 त्वन्मते—ख
6 गमक इति—ख

प्रकाशः

ननु न प्रत्यक्षमेव व्याप्तिग्राहकम्, अतीन्द्रियानुमानस्थले तदभावात्। तथा च मानान्तरेण साध्यहेतुव्यतिरेकग्रहोऽस्त्विति [1]चेत्--न। अत्र प्रत्यक्षाभिप्रायेणेदमुक्तम्। वस्तुतस्तु अन्यथोपपन्नतया सर्वमेवानुमानमप्रयोजकमिति भावः।

अत्र केचिदाहुः— वस्तुतो न मानान्तरं शब्दः, सिद्धार्थत्वात्। नाप्यनुमानम्। [2]कार्यानुकूलातीन्द्रियधर्माभावानुमानं हि जनकत्वाभावेन लिङ्गेन वाच्यम्। जनकत्वसत्त्वे तादृशधर्मस्यावश्यकत्वात्। जनकत्वाभावानुमानं च तादृशधर्माभावेन। तादृशधर्मस्य जनक[3]तावच्छेदक[4]रूपस्य सत्त्वे जनकत्वस्याप्यावश्यकत्वात्। एवं च हेत्वभावेन साध्याभावः, साध्याभावेन हेत्वभावोऽनुमेय इति व्यक्तोऽन्योन्याश्रय इति [4]भावः।

यद्वा तदनुमानमपि साध्यसाधनाभावव्याप्तिग्रहमन्तरेण न स्यात्। तद्ग्रहणं च न

तर्कचूडामणिः

संगतिग्रहाभावान्न बोधकम् इति शङ्कां निरसितुं मूले वाक्यार्थेत्युक्तम्। तथा च वह्नि[5]स्तादृशधर्म[6]समवायीति वाक्यं संसर्गरूपतद्बोधकमिति भावः।

नन्वेवमनुमानवैयर्थ्यमित्यत आह—तथा चेति। उभयं प्रमाणमिति भावः। आदिपदेन परमाणुत्वग्रहः। नन्वेवमपि मानान्तरेण तद्ग्रहशङ्का न निराकृतेत्यत आह—वस्तुत इति।

नन्वनुमानपदं यदि शक्तिसाधकानुमानपरं तदा प्रकृतासंगतिः, प्रागेव [6]तदप्रयोजकत्वाभिधानात्। नापि परार्धसंख्यादौ साध्याभावानुमानम्। जनकतावच्छेदकसत्त्वे जनकतापत्तेरेव बाधकत्वादित्यरुचेराह—वस्तुत इति। ननु जनकत्वाभावे संख्याविशेषत्वं लिङ्गं भविष्यतीति नान्योन्याश्रय इत्यत आह—यद्वेति। न स्यादिति। तन्मतेऽन्वयिनोऽनु-

1 चेत्-ख
2 जनक-क
3 रूपसत्त्वे-क
4 भावः-क (अनुर्वतते)
5 तादृश-ग
6 तदर्थप्रयोजक-ग

एतेन पण्डापूर्वेऽपि तत्प्रसिद्धिरपास्ता ।

स्यादेतत्—तृणारणिमणीनां वह्नौ कारणत्वादेकशक्तिमत्त्वमुपेयम्, एकजातीयकार्ये एकजातीयकारणत्वनियमात् । वह्न्यवान्तरजातीये तेषां प्रत्येकं कारणत्वमिति चेत्—न । वह्निजातीयस्याकस्मिकतापत्तेः । कारणगतैकरूपमपहाय कार्यगतबहुतररूपकल्पने गौरवात् । तृणारणिमणि

प्रकाशः

तदुभयव्यतिरेकप्रसिद्धिं विना । तदुभयव्यतिरेकश्च साध्यसाधने एवेति साध्यसाधन-व्याप्तिग्रहे तदुभयाभावव्याप्तिधीः, तस्यां च सत्यां तदुभयव्याप्तिधीरित्यन्योन्याश्रय इति भावः । न चान्वयव्याप्तिधीर्न व्यतिरेकव्याप्तिधीहेतुरिति नान्योन्यश्रय इति वाच्यम् । तथाप्यन्वय[1]व्याप्त्यग्रहादेव [2]तदनुपपत्तेरिति भावः[4] ।

एतेनेति । न च पण्डापूर्वादौ ध्वंससाक्षात्कारजनकत्वेन जनकत्वाभाव एव नेति वाच्यम् । अतीन्द्रियत्वेन योगिज्ञानस्य विषयाजन्यतया साक्षात्काराजनकत्वात् । तन्मते ध्वंसस्याधिकरणादिरूपतया तदसाध्यत्वाच्चेति भावः । [3]**तृणारणीति** । तथा च वह्नित्वप्रयोजकतया तृणादीनामेकानुगतशक्तिसिद्धौ अन्यत्रापि तदनुमानमिति भावः । ननु वह्निनिष्ठा जातिः प्रमाणसिद्धा । तथा च धर्मिकल्पनात इति न्यायेन तस्या एवावच्छेदकत्वं कल्प्यते न शक्तिरित्यत आह—**तृणारणीति** ।

तर्कचूडामणिः

मानत्वादिति भावः । एतदभिप्रायेणाह—**तदनुपपत्तेरिति** । अनुमानानुपपत्तेरित्यर्थः ।

लौकिकज्ञानाजनकत्वे हेतुमाह—**अतीन्द्रियत्वेनेति** । **योगीति** । अलौकिकेत्यर्थः । ननु तृणादिषु शक्तिसत्त्वेऽपि किमायातं वह्निनिष्ठशक्तावित्यसंगतिरित्यत आह-**तथा चेति** । नन वह्न्यादौ तदनमाने प्रार्धसंख्यादावपि तत् स्यादित्यत आह—

---

1 व्याप्तिग्रहादेव—क 2 तदुपः—क

3 तृणादेरपीति—ख

प्रभववह्निष्ववान्तरजातेरनुपलब्धिबाधितत्वाच्च । यत्र च तत्तदिन्धन प्रयोज्यं प्रदीपदारुदहनादौ वैजात्यमनुभूयते तत्र कारणेष्वेकशक्तिमत्त्वमपि नास्ति ।

किं च गोमयवृश्चिकप्रभववृश्चिकादिषु वैजात्यकल्पने तत्प्रभववृश्चिकेष्वपि वैजात्यं कल्प्यम । एवं तत्प्रभवतत्प्रभवेष्वपीति वैजात्यानन्त्यं, विजातीयकारणानां विजातीयकार्यजनकत्वनियमात् । न च तयोर्नैको वृश्चिकः । बुद्धिव्यपदेशयोरविशेषात् । यदि विजातीयेष्वेककार्यशक्तिसमवायात् न कार्यविशेषात् कारणविशेषः तदभावात्तदभावः क्वाप्यनुमीयेत तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसंभादिति चेत्—वह्निवृश्चिकादावेवमेतत् निरूपितनियतवह्न्यादिकारणकधूमादौ कुतो न तदनुमानम् । अन्यथा कार्यवैजात्येऽपि तृणस्य वह्निविशेष इव वह्नित्वेन धूमविशेष एव कारणत्वं न तु धूममात्रे । तृणादिप्रभवत्वग्रहानन्तरं

प्रकाशः

तथा च जातित्रयमपि कल्प्यमेवेतितदपेक्षया एकशक्तिकल्पनमेव लघ्विति भावः । यत्र चेति । [1]तत्रोक्तन्यायानवतारादिति भावः ।

शङ्कते—यदीति । वैजात्ये—वैजात्यपक्षे । इत्यप्याशङ्क्येतेत्यन्वयः ।

तर्कचूडामणिः

ऐकार्थ्यादिति । कारणतावच्छेदकरूपोऽर्थः प्रयोजनं यस्य तत् तथा तत्त्वादित्यर्थः । तथा च वह्निनिष्ठकारणता तादृशदाहकारणता वा शक्त्यवच्छेद्या कारणतात्वादित्यनुमानात् नान्यत्रापि तत्सिद्धिरिति भावः । बाधितत्वहेतोरसिद्धिमाशङ्क्य तत्सन्देहेऽपि मदिष्टसिद्धिरित्याशयेनाह—तथा चेति । उक्तेति । धर्मिकल्पनात इति न्यायेनेत्यर्थः । वह्नित्वेन धूमविशेष एव हेतुत्वमित्यनेन वैजात्येऽपीत्यस्यान्वये स्वयं नैयायिकेन च तथानङ्गीकारात् बाध इत्यत आह—वैजात्य इति ।

---

1 यत्रोक्त—क

वह्न्यवान्तरजातिग्रहवत् वह्नितदजन्यजन्यत्वज्ञानानन्तरं धूमावान्तरजातिग्रहो भविष्यतीत्यप्याशङ्क्येत । बाधकं विना धूमत्वेन वह्निकार्यतेति चेत्-- तर्हि बाधकं विना धूमं प्रति वह्नित्वेन कारणतेत्यपि तुल्यम् ।

यत्तु तृणत्वेन कारणत्वग्रहस्यापजीव्यत्वात् तद्रक्षार्थं वह्नौ जातिविशेष एव कल्प्यत इति । तन्न । वह्नित्वेन कार्यत्वग्रहात् तद्रक्षार्थं तृणादौ शक्तिकल्पनौचित्यात् । यथा चान्वयव्यतिरेकाभ्यां तृणफूत्कारयोः परस्परसहकारित्वं तथैव तच्छक्त्योरपि परस्परसहकारित्वेन वह्न्यनुकूलत्वम्,

---

प्रकाशः

नन्वेवं तृणनिर्मन्थनाभ्यामपि अग्न्युत्पत्त्यापत्तिः, कारणतावच्छेदकावच्छिन्नघटित सामग्रीसत्त्वादित्यत आह--यथा चेति । तथैव तच्छक्त्योरपीति । नन्वेवं कार्यवैजात्यमावश्यकम्, एकजातीयकार्ये सहकारिनियमानुपपत्तेः । स हि फलविरोधेन परं स्यात् । स च कार्यतावच्छेदकभेदेन । स च प्रकृते न कार्यवैजात्यं विना । एवं च नैकशक्तिमत्त्वेन जनकत्वमिति चेत्—अत्राहुः । तृणादीनां वह्नित्वावच्छिन्नं प्रति एकशक्तिमत्त्वेन फूत्कारादीनां च तृणजन्यवह्नित्वाद्यवच्छिन्नं प्रति जनकत्वेनैव शक्तिसिद्धिः, सहकारिनियमयोरप्युपपत्तिरिति ।

केचित्तु यथा प्रागभावत्वेन कार्यमात्रं प्रति कारणत्वेऽपि घटप्रागभावो [1]नाघटं प्रति

तर्कचूडामणिः

विरोधो भेदः । तन्तुगतरूपरसादिसहकार्यपेक्षपटजन्यरूपरसादीनां न विरोध इति दूषणमलग्नकं भवति । कार्यतेति । कार्यव्यक्तिभेदमात्रे सहकारिवैचित्र्यादर्शनादिति भावः ।

जनकतावच्छेदकसत्त्वे स्वरूपायोग्यत्वमयुक्तम् । [2]तत्प्रागभावत्वेन प्रागभावस्य कार्यजनकत्वम्, तद्विशिष्टज्ञाने तद्विशेषणज्ञानत्वेन च हेतुत्वमिति दृष्टान्तासिद्धिः । अन्यथा दण्डादेरपि द्रव्यत्वेनैव घटादिहेतुतापत्तिरित्यपरितोषं सूचयति—केचिदिति ।

---

1 पटं प्रतिख- ग 2 तत्प्रागभावेन-क

तथैव कार्यदर्शनात्। एवं तृणारणिमणिफूत्कारनिर्मन्थनतरणिकिरणानां बह्व्यनुकूलशक्तिमत्त्वेन कारणत्वेऽपि फूत्कारेण तृणादेव, निर्मन्थनेनारणेरेव प्रतिफलिततरणिकिरणैर्मणेरेवाग्न्युत्पत्तिः; न तु मणिफूत्कारादिभ्योः, मणिफूत्कारशक्त्योः परस्परसहकारित्वविरहात्।

यत्तु तृणफूत्कारादिस्तोमत्रये विशिष्टे शक्तिरिति। तन्न। तृणत्वेन गृहीतकारणताभङ्गप्रसङ्गादिति।

प्रकाशः

स्वरूपयोग्यः। यथा वा जन्यविशिष्टज्ञाने विशेषणज्ञानत्वेन कारणत्वेऽपि घटत्वज्ञानं पटत्वविशिष्टज्ञानं प्रति न स्वरूपयोग्यम्। तथा फूत्कारादीनामेकशक्तिमत्त्वेऽपि तृण मन्थनादिभ्यो न [1]वह्न्युत्पत्त्यापत्तिरित्याहुः।

तृणफूत्कारसंबन्धतरणिकिरणमणिसंबन्धादिषु एकजातीयशक्तिमत्त्वं कारणतावच्छेदकम्। तथा च तदन्यतमसंबन्धाभावे तृणनिर्मन्थन[2]समवधानेऽपि नाग्न्युत्पत्तिरित्यप्याहुः।

[3]एकदेशिमतं दूषयति--यत्त्विति। तृणत्वेनेति। यद्यपि परमते तृणत्वेन न कारणता, किं तु एकशक्तिमत्त्वेन। अन्यथा तद्रक्षार्थं कार्यवैजात्यकल्पनापत्तेः। तथापि तृणादिनिष्ठशक्तेर्न व्यासज्यवृत्तित्वम्, लाघवात्। एवं च कारणतापदेन चात्र शक्तिरेव

तर्कचूडामणिः

तृणत्वावच्छेदेन गृहीतशक्तिभङ्गप्रसङ्गमनुशयं द्योतयति—अपीति।

एकदेशीति। स्वैकदेशीत्यर्थः। तथा चेति। दण्डत्वादावपि हेतुतावच्छेदक-शक्त्यवच्छेदकत्वमत इति द्रष्टव्यम्। ननु तृणादिषु नैका शक्तिः, अनित्ये भावहेतुजेति

---

1 वह्न्युत्पत्तिः—ख, ग 2 संबन्धभावेऽपि—क
3 स्वैक—ख

उच्यते । तृणारणिमणिफूत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुजनितानन्तशक्तिस्वीकारे गौरवम् । तावदनन्तव्यक्तिजन्यानन्तवह्निव्यक्तिषु जातित्रयकल्पने लाघवमिति तदेव कल्प्यते । न च जातौ योग्यानुपलब्धिबाधः । गोमयवृश्चिकप्रभववृश्चिकयोरीषन्नीलत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात् ।

प्रकाशः

विवक्षिता । तथा च तृणत्वावच्छेदेन गृहीतशक्तिभङ्गप्रसङ्गादित्यर्थः । तृणादिशक्तेश्चैकजातीयत्वेनानुगमः । एकजातिप्रयोजकं च तत्र [1]अदृष्टादिकम् । न च गौरवम्, प्रामाणिकत्वादिति भावः ।

प्रतिव्यक्तीति । एतच्च 'अनित्ये भावहेतुजा' इति सिद्धान्तात्, नित्यशक्त्यभ्युपगमे च पूर्वोक्त एव दोषो द्रष्टव्यः । **जातीति** । न च मण्यादौ कारण एवैका जातिः कल्प्यताम्, लाघवादिति वाच्यम् । प्रस्तरत्वादिना संकरापत्तेरिति भावः । **प्रत्यक्षसिद्धत्वादिति** । तथा च धर्मिकल्पनात इति न्यायेन तस्या एव जातेरवच्छेदकत्वमात्रं कल्प्यते । [2]न तु शक्तिं कल्पयित्वा तदवच्छेदकत्वं [3]कल्प्यत इति[3] भावः ।

तर्कवाग्मणिः

सिद्धान्तात् । तथा च तत्राप्यननुगम इत्यत आह—**तृणादीति** । [4]नन्वनुगतकारणाभावे तादृशजातिरसिद्धेत्यत आह—**एकेति** ।

प्रस्तरत्वेति । पाषाणत्वेत्यर्थः ।

ननु जातेः प्रत्यक्षत्वेऽपि तस्यावच्छेदकत्वं [5]लूक्षमेवेति तौल्यमित्यत आह—**तथा चेति** । ननु यदि जातेः लूक्षत्वबलात् अवच्छेदकत्वकल्पनं कल्प्यत्वाच्छक्तेरतथात्वं तदा तृणादिजन्यवह्निनिष्ठजातेरपि कल्प्यतया उक्तलाघवाभावात् तत्रोदाहरणे सिद्धान्तासिद्धिः

---

1 दृष्टादृष्टादिकं–क–ख
2 न च–क
3 इति–क
4 नन्वनुगम–क
5 अक्लृप्त–ग

तृणजन्यनानावह्निव्यक्तिषु तृणजन्यत्वज्ञानानन्तरं मणिजन्यव्यावृत्तानुगतबुद्धिरस्ति जातिविषया । तृणजन्यत्वेनोपाधिनासाविति चेत्— न । बाधकं विनानुगतबुद्धेस्तद्व्यङ्ग्यजातिविषयत्वनियमात् । न च गोमयवृश्चिकप्रभववृश्चिकपरम्परायामननुगतजात्यापत्तिः । गोमयजन्य-

---

प्रकाशः

एतदपि जातेः प्रामाणिकतया तदवच्छेदकत्वस्यैव लाघवादौचित्यमित्यभिप्रेत्योक्तम् । वस्तुत कार्यतावच्छेदकाननुगमस्यादोषत्वात् जात्यभावेऽपि तत्तद्वह्नित्वस्यैवावच्छेदकत्वसंभवात् न शक्तिसिद्धिरिति ध्येयम् । तन्मते जातेः संस्थानमात्रव्यङ्ग्यतया शक्तौ जात्यभावे कथमनुगम इत्यपि [1]दूषणं बोध्यम् [1]।

वह्निवृत्तिजातौ योग्यानुपलब्धिं निराकरोति—**तृणजन्येति** । अन्यथा विशुद्धमातापितृजन्यत्वेनैव ब्राह्मणानुगतबुद्धेस्तत्रापि [2]जात्यभावः स्यादिति भावः । वैजात्यानन्त्यमुद्धरति—**गोमयेति** । [3]यद्यपि गोमयवृश्चिकप्रभवयोर्वृश्चिकयोर्वैजात्यमस्ति[4], तथापि वृश्चिकत्वमनुगतमप्यस्ति । तदेव चाग्रिमाग्रिमवृ[5]श्चिकजनक[5]तावच्छेदकमिति सर्वत्र वृश्चिकप्रभवत्वप्रयोज्य[6]जातिमत्त्वमिति नानन्त्यमिति भावः । वह्निजातीयस्याकस्मिकता

तर्कचूडामणिः

स्यादित्यत आह—**एतदपीति** । **बोध्यमिति** । व्यङ्ग्यकहीनजात्युपगमे तत्प्रयोजकानुगतहेतोश्चाभावे तस्या आकस्मिकत्वापत्तिः । अदृष्टविशेषस्य प्रयोजकत्वे वह्निप्रयोजकत्वेनैव तत् कल्प्यतामित्यपि बोध्यम् ।

अप्रयोजकत्वमाशङ्क्याह—**अन्यथेति** । ननु तथापि कारणवैजात्यात् त जात्यं स्यादेवेत्यत आह—**यद्यपीति** ।

---

1 बोध्यम् क
2 जात्यसिद्धिः–ख
3 गोमय–क
4 वैजात्यद्वयमस्ति–ख
5 जनक–क
6 नीलजातित्वमिति–ख

वृश्चिकप्रभववृश्चिकेषु वृश्चिकप्रभवत्वजातेः सत्त्वात् । वह्निमात्रे च दाहस्पर्शवानवयवः तत्संयोगः पवनादिश्च कारणानि । न च तृणादिकं विनापि तदुत्पत्तिप्रसङ्गः । विशेषसामग्रीमादायैव सामान्यसामग्र्या जनकत्वात् ।

ननु तृणारणिमणीनां वह्नौ कारणत्वग्रहे शक्तिवैजात्ययोरन्यतर-कल्पनम् । तद्ग्रहश्च नान्वयव्यतिरेकाभ्याम्, व्यभिचारात् । अथारणि-मण्यभाववति स्तोमविशेषे तृणं विना वह्निव्यतिरेकः तृणान्वये वह्निरित्यन्वय-व्यतिरेकाभ्यां तत्रैव स्तोमे तदितरहेतुसकलसमवधाने तृणान्वयेऽवश्यं

प्रकाशः

प्रसङ्गं प्रागुक्तमुद्धरति—वह्निमात्र इति । [1]यद्यप्यौदर्यवह्नेरनुद्भूतस्पर्श इति लीलावत्यादौ व्यवस्थापनात् तत्र कथं वह्नित्वम्, [2]प्रयोजकाभावात्, तथापि भौमवह्निमात्र एव तत्प्रयोजकत्वमिति भावः । केचित्तु लीलावतीग्रन्थस्त्वापाततः । वस्तुतस्तु [3]तत्रोद्भूत एव स्पर्श इत्याहुः । पवनेति । तदुत्कर्षेण वह्न्युत्कर्षदर्शनादिति भावः ।

तटस्थः प्रत्यवतिष्ठते—नान्विति । ननु तृणजन्यत्वं तृणरूपादौ प्रसिद्धम् । तदभावश्च मणिजन्यवह्नौ सुग्रह इति तदवच्छेदेन मणिजन्यत्वं [4]सुग्राह्यमित्यत आह—

तर्कचडामणिः

भौमेति । अनुदर्यत्यर्थः । आपातत इति । भक्षितान्नादिदाहानु-पपत्तेरिति भावः ।

ननु निवातप्रदेशेऽपि वह्न्युत्पत्तेः कथं वायोस्तद्धेतुत्वमित्यत आह—तदिति । तथा च तत्रापि मन्दवायुकल्पनम्, अन्यथा तत्र शब्दस्याप्रत्यक्षप्रसङ्गादिति भावः ।

---

1 यद्यप्युदरे वह्नेः—क
2 प्रयोजकद्वयाभावात्—ख
3 अत्रोद्भूतस्पर्शः—क
4 ग्राह्य—क

वह्निरिति नियतान्वयेन रासभादिव्यावर्त्तेन तृणादिकारणत्वग्रह इति चेत्—न। तृणं विनापि वह्निरिति ज्ञाने सति वह्निनियतपूर्ववर्तित्वस्य कारणत्वस्य ग्रहीतुमशक्यत्वात्। तृणाजन्ये वह्नौ मणेः कारणत्वग्रह इति चेत्—न। व्यभिचारेण वह्नौ तृणजन्यत्वाग्रहे तदजन्यत्वस्याप्यग्रहात्, वह्निमात्रस्यैव तदजन्यत्वाच्च। न च मण्यजन्यत्वेन तृणजन्यत्वग्रहः, अन्योन्याश्रयात्। यत्तु यत्र कारणताग्राहकं नास्ति, तत्र व्यभिचारस्तद्ग्रह परिपन्थीति। तन्न। अबाधितनियतपूर्ववर्तित्वाभावग्रहे तद्ग्रहस्यासंभवात्, अभावप्रमायां भावज्ञानानुदयादिति।

उच्यते। उक्तग्राहकैर्वह्निनिष्ठकार्यतानिरूपितकारणतावच्छेदकरूपवत्त्वं तृणस्य, तृणनिष्ठकारणतानिरूपितकार्यतावच्छेदकरूपवत्त्वं वह्नेर्वा अकार्याकारण-

---

प्रकाशः

वह्निमात्रस्येति। व्यभिचारेण तृणस्याजनकत्वात् वह्निमात्रस्यैव [1]तदजन्यत्वादित्यर्थः। [2]तथा च पुनः स एव[2] व्यभिचार इति भावः।

उक्तग्राहकैरिति। अन्वयव्यतिरेकाभ्यां नियतेनान्वयेन [3]वेति बहुवचनोपपत्तिः। अकार्यकारणेति। ननु कारणत्वसंशये कथं तदवच्छेदकरूपवत्त्वनिश्चयः, [4]तयोरेक निश्चायकनिश्चयत्वात्। किं च वह्निनिष्ठकार्यतायास्तृणनिष्ठकारणतायाश्चग्रहे कथं [5]तदव

तर्कचूडामणिः

संशय इत्युपलक्षणम्, व्यतिरेकनिश्चय इत्यपि द्रष्टव्यम्। ननु तृणं विनापि वह्निरिति ज्ञानं तृणनिष्ठजनकत्ववह्निनिष्ठतृणजन्यत्वयोर्ग्रहे प्रतिबन्धकं न तु जन्यजनकत्वज्ञानमात्रे। तथा च [6]जन्यत्वजनकत्वज्ञानमात्रेण तदवच्छेदकवत्त्वज्ञानं संभवत्येवेति

---

1 तज्जन्य—क
2 स एव—क
3 च त्रित्वात् बहु—ख
4 तद्व्यतिरेकनिश्चयसत्त्वात्—क
5 तदवच्छेदकत्वेन—ख
6 जन्यत्वजनकमात्रण—क

व्यावृत्तं रूपं परिच्छिद्यते। न तु तृणत्वेन कारणत्वं वह्नित्वेन कार्यत्वं वा। तच्चोभयथापि संभवति। वह्नित्वेन कार्यतया तदनुकूलशक्तिमत्त्वेन च तृणादीनां कारणतया वह्नित्वावान्तरजातिविशेषेण कार्यतया वा। तत्र च विनिगमकमुक्तमेव।

राजस्थान संस्कृत संस्थान ग्रन्थालय 23692 जयपुर

प्रकाशः

च्छेदकवत्त्वेन ज्ञानम्। विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य। अपि च कार्यतावच्छेदकत्वं कार्यताद्याश्रयमात्रवृत्तित्वम्। तद्ग्रहे च कार्यताद्याश्रयत्वमवश्यं विषयः। न च कार्यताद्यपि गृह्यत एवेति वाच्यम्। व्यभिचारेण [1]तद्ग्रहस्याशक्यत्वादिति चेत्—

अत्र वदन्ति। कार्यतादिकमपि गृहीतमेव। तेन नोक्त[2]सर्वदोषावकाशः। न चोक्तव्यभिचारनिश्चये कथमव्यभिचाररूपनियमगर्भहेतुत्वग्रह इति वाच्यम्। समान-प्रकारकविरोधिज्ञानस्यैव प्रतिबन्धकतया तृणत्वावच्छिन्नस्य वह्नित्वावच्छिन्ने व्यभिचारग्रहे तदवच्छिन्नस्य तदवच्छिन्नहेतुत्वाग्रहेऽपि तदाश्रययोर्हेतुहेतुमद्भावग्रहस्याविरोधित्वात्। अत एव यागं विनापि दानात् स्वर्ग इति ज्ञानेऽपि स्वर्गजनको याग इति धीः स्वर्गत्वसामानाधि-करण्येन यागजन्यत्वं विषयीकरोति। तदिदमाह—**न तु तृणत्वेन हेतुत्वं वह्नित्वेन कार्यत्वं वेति**। यदि च कार्यकारणभाव एव न गृह्यते तदा न तु हेतुत्वं कार्यत्वं वेत्येव ब्रूयात्। न चैवं वह्नित्वावच्छेदेन व्यभिचारग्रहेऽपि वह्निसामानाधिकरण्येन रासभजन्यत्वं गृह्यतामिति वाच्यम्। ग्राहकाभावात्। [3]अत्र वह्न्यभाववतीत्यादिना ग्राहकस्योक्तत्वात्। न चैवं तृणनिष्ठकारणताप्रतियोगिककार्यताश्रयत्वं गृह्यत इत्येवास्तु। किं तदवच्छेदकरूपवत्त्व-पर्यन्तेनेति वाच्यम्। अग्रिमविनिगमक[4]गवेषणस्य सामान्यतोऽवच्छेदकग्रहं विनाप्युनुपपत्तेः। सामान्यतोदृष्टावतारं विना परिशेषानुदयाविति।

तर्कचूडामणिः

नोक्तदोषद्वयमित्यरुचेराह—**अपि चेति**। **विषय इति**। वमौ तृणादिषु चेति शेषः। न त्विति विशेषनिषेधात् सामान्यमनुज्ञातं गम्यत इति भावः। **अग्रिमेति**। जन्यतायां

1 भावग्रहस्या—ख 2 दोष—ख
3 अत्र चारणिमण्यभाव—ख 4 विशेषस्य—क

अथ तृणारणिमणीनामभावत्रये न कार्यम्, अभावत्रयाभावे कार्यमित्यन्वयव्यतिरेकाभ्याम् अभावत्रयाभावत्वेन तृणादीनां कारणत्वमिति न व्यभिचारः। अभावाभावस्य भावपर्यवसन्नत्वादिति चेत्—अभावत्रयाणामभावः किं तृणादिप्रत्येकव्यापकोऽन्य एव उत तृणादि प्रत्येकमेव। आद्येऽभावस्य कारणत्वमिति किमायातं तृणादिकारणत्वे। द्वितीये तृणस्य नारणिमण्यभावाभावत्वं [1]तदुभयत्वापत्तेः।

प्रकाशः

यत्तु ससम्बन्धिकप्रत्यक्षज्ञाने सम्बन्धितावच्छेदकरूपवत्त्वज्ञानमावश्यकमिति तद्विना न कार्यकारणभावग्रहः प्रत्यक्षेण। अत एव न शाब्दस्वर्गजनकत्वज्ञानप्रतिबन्दीति। तन्न। इयं वह्निव्यक्तिस्तृणजन्येति प्रत्यक्षेण तद्व्यक्तित्वादेरवश्यं भानात्। न च तस्यानवच्छेदकतया तदवच्छेदेन कार्यताबुद्धेर्भ्रमत्वापत्तिरिति वाच्यम्। कार्यताबुद्धावनवच्छेदकस्याप्यभानात्। भाने वा तदंशे भ्रमत्वेऽपि कार्यतांशे प्रमात्वादिति।

अन्य एवेति। अभावत्रयप्रतियोगिको व्यासज्यवृत्ति[2]प्रतियोगिताक इत्यर्थः। **अभावस्येति**। तथा च तृणोत्कर्षेण वह्न्युत्कर्षो न स्यादिति भावः।

तर्कचूडामणिः

किं वह्नित्वं तद्व्याप्यजातिर्वा, जनकतायां किं तृणत्वम् एकशक्तिमत्त्वं वावच्छेदकमित्यत्रेति विनिगमकगवेषणस्येत्यर्थः।

अवच्छेदकत्वमनतिरिक्तवृत्तित्वं स्वरूपसंबन्धविशेषो वा, आद्ये—**इयामिति**। द्वितीयमनूद्य प्रत्याह—**न चेति**। अभ्युपगमवादेनाह—**भाने वेति**।

ननु तृणवति अरणिप्रतियोगिकाभावद्वयसत्त्वेन तदभावाभावात् न व्यापकतेत्यत आह—**व्यासज्येति**। ननु मा भूत्तृणादिकारणतेत्यत आह—**तथा चेति**।

---

1 तदुभयापत्तेः 2 प्रतियोगिकः ख

एतेनाभावत्रये न कार्यं तदभावे कार्यमित्यन्वयव्यतिरेकाभ्यां तृणादि-प्रत्येकस्य कारणत्वग्रह इति परास्तम् ॥

[इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
अनुमानखण्डे सहजशक्तिवादः]

प्रकाशः

एतेनेति । तृणस्य तदुभयत्वापत्त्येत्यर्थः । पूर्वं मिलितानां तृणादीनामभावत्रयाभावत्वेन हेतुत्वमाशङ्किनम् , इदानीं तु प्रत्येकस्येति न पौनरुक्त्य[1]मित्यप्याहुः ॥

[इति श्रीरुचिदत्तविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे सहजशक्तिवादः]

तर्कचूडामणिः

आद्यकल्पदूषणस्यातिदेशायोगं मत्वा द्वितीयकल्पदूषणमेतच्छब्दार्थ इत्याह— एतेनेतीति ॥

इति श्रीधर्मराजाध्वरीन्द्रविरचिते तर्कचूडामणौ
सहजशक्तिवादः समाप्तः

---

1 इत्याहुः क इति भावः ख

आधेयशक्तिवादः

स्यादेतत्—मा भूत् सहजशक्तिः, आधेयशक्तिस्तु स्यादेव। तथा हि व्रीहीन् प्रोक्षतीत्यत्र कालान्तरकार्यानुकूलोऽतीन्द्रियोऽतिशयः प्रोक्षणजन्योऽस्तीत्युभयवादिसिद्धम्। स व्रीहिसमवेतो न वेति संशये व्रीहिनिष्ठ एव वाच्यः। कथमन्यथा प्रोक्षितानामेव तेषां कालान्तरेऽवघातादौ विनियोगः न च मन्त्रादिसहकृतत्वमेव व्रीहिषु विशेषः। तेषां चिरध्वस्तत्वात्।

ननु कथं प्रोक्षितस्यैवावघातादावन्वयः, 'व्रीहीनवहन्ति' इति श्रुतेस्तन्मात्रान्वयेऽप्युपपत्तेः। अथ 'व्रीहिभिर्यजेत' 'व्रीहीन् प्रोक्षति' 'व्रीहीनवहन्ति' 'पुरोडाशैर्यजेत' इत्यत्र यथा पुरोडाशे प्रकृत्यपेक्षायामवहत व्रीहीणामवयवानुवृत्तिद्वारान्वयः। प्रोक्षणे च यागार्थमुपात्तव्रीहीणां,

---

प्रकाशः

उभयसिद्धत्वमेव स्थापयति—कथमिति। तटस्थ आह—नन्विति। अवघातेन व्रीहेर्नष्टत्वात् तदन्वयः पुरोडाशे न भवतीत्यत आह—अवयवेति।

तर्कचूडामणिः

ननु कथमित्यनेनातीन्द्रियातिशयस्य व्रीहिसमवेतत्वानङ्गीकारे बाधकाभिधानं न संगच्छते। आत्मसमवेतातिशयेन परम्परासंबन्धेन व्रीहीणामुपयोगोपपत्तेः। अतीन्द्रियातिशयानभ्युपगमनिबन्धनाया न च मन्त्रादीत्यग्रिमशङ्काया अयोगाच्च। अनेन वाक्येन व्रीहिनिष्ठत्वे सिद्धे स चातिशय इत्यादिना व्रीहिनिष्ठत्वप्रसाधनानुपपत्तेश्च। न च तर्ह्यतीन्द्रियातिशयानङ्गीकारे एव बाधकमुच्यत इति वाच्यम्। तस्योभयसिद्धत्वोक्त्या तत्र तर्कोक्त्यनुपपत्तेरित्यत आह—उभयेति। नैयायिकैरपि प्रोक्षणस्यावघातोपयोगानङ्गीकारात् सिद्धसाधनमित्यत आह—तटस्थेति। 'व्रीहीन् प्रोक्षति' इति वाक्यं व्रीह्युद्देशेनावघातं विदधाति

तथावघाते व्रीहाकाङ्क्षायां प्रोक्षितानामेवान्वयः। बाधकं विना शब्दानां संनिहितविशेषपरत्वनियमात्। "व्यक्तिवचनानां संनिहितविशेषपरत्वम्" इति नियमात्। अन्यथा प्रकरणादिसंनिधेहेतुत्यागे तदन्यसंनिधेकल्पने गौरवमिति चेत्—

न तर्हि एकस्य द्वयं यत्र प्रोक्षणं तत्रावघातो न तु प्रोक्षणविशिष्टे। यत्र रूपं तत्र रस इतिवत्। तथा च प्रोक्षणस्य शब्देन कालान्तरकार्यजनकत्वाबोधनात्। कथं तन्निर्वाहार्थमतिशयकल्पनम्। 'प्रोक्षिता व्रीहयोऽवघाताय कल्पन्ते' इति वाक्यशेषात् प्रोक्षणविशिष्टस्यावघाते कारणावबोध इति चेत्—अस्तु तावदेवम्। तथापि प्रोक्षिता इत्यत्र भूते क्तानुशासनात् अतीतप्रोक्षणे व्रीहावघातान्वयः। तथा चावघाते प्रोक्षणध्वंसः कारणं न तु प्रोक्षणमिति चेत्—

मैवम्। प्रोक्षणमवघातजनकं प्रमाणतस्तदर्थमुपादीयमानत्वात्,

प्रकाशः

न त्विति। तथा च न तद्व्यापारत्वेनातिशयः कल्प्यत इति भावः।

तटस्थशङ्कां परिहरति—मैवमिति। भ्रमेणोपादीयमानेऽवघाताजनके व्यभिचारादाह—प्रमाणत इति। [1]नन्वकारणे कारणकारणे व्यभिचारः। न च [2]कारणकारणसाधारणमनुकूलत्वमात्रं साध्यम्। तदपि [3]मध्यवर्तिघटितमित्यतिशयसिद्धिरिति वाच्यम्। एवं हि जनकीभूतध्वंसजनकत्वेनापि साध्यस्य [4]चरितार्थत्वे प्रतियोगिनोऽहेतुत्वापत्ते[5]रिति वक्ष्यमाणविरोधादिति चेत्—न। वेदमूलकावघातोद्देश्यकापादानविषयत्वादिति[5] विशेषव्याप्त्यैव साधनात्। वस्तुतो व्यक्तिवचनन्यायेनावघाते प्रोक्षितवीहेरन्वयः प्रोक्षणस्य बाधकं

तर्कचूडामणिः

न तु अवघातोद्देशेनेति हेत्वसिद्धिरित्यपरितोषादाह—वस्तुत इति। न चैवमपि प्रोक्षण-

---

1 ननु कारणकारणे-ख
2 कारणाकारण-ख
3 तत्पूर्ववृत्तित्वघटितमित्यन्वयसिद्धि-ख
4 चरितार्थत्वे-क
5 रिति-ख

अवघाते व्रीहिवत् । न चासिद्धिः, अप्रोक्षितेऽवघाताभावात् । अवश्यमवघातार्थं प्रोक्षणोपादानात् । [1]न च व्यापारं विना तथा संभवति । न च[1] प्रोक्षणध्वंस एव व्यापारः । प्रतियोगिनोऽहेतुत्वापातात् । अन्यथा यागादेरपि तथा स्यात् । फलस्य च नियतसमयोत्पत्तिकत्वमपूर्ववत् स्वभावादेव भविष्यति । न च प्रोक्षिता व्रीहयस्तथा । निरन्वयध्वस्तत्वेनोपलक्षणस्याहेतुत्वात् । कुरूणां क्षेत्रमित्यत्र तु कुरुज्ञानस्यैतरव्यावृत्तक्षेत्रज्ञव्यवहारजनकत्वं न तु कुरोः । अन्यथा यागोपलक्षितो यज्जैव स्वर्गं फलिष्यति, किमपूर्वेण । न च देवदत्ताद्यशरीरं देवदत्तविशेषगुणजन्यं जन्यत्वे सति तद्भोगसाधनत्वात् तन्निमि[र्मित]त्तस्तद्वदिति

प्रकाशः

निना विशेषणत्वं नोपलक्षणत्वमिति । प्रतियोगिन इति । [2]अभावतत्प्रतियोगिनोरेकत्र अहेतुत्वादिति । जनकत्वादित्यर्थः । व्यापारं विनैव प्रोक्षणस्य हेतुत्वमस्त्विति शङ्कते-- न चेति । प्रोक्षणस्य च हेतुत्वं साधितमिति भावः । नन्वेवं यद्युपलक्षणमिति तदजनकं तदा ततो व्यावृत्तबुद्ध्यादिकं न स्यादित्यत आह--[3]कुरूणामिति । तन्निर्मितेत्युपलक्षणम् ,

---

तर्कचूडामणिः

विशिष्टव्रीहेरुद्देश्यत्वमात्रं स्यात् न तु जनकत्वमिति वाच्यम् । कर्मणः कारकविशेषणतया जनकत्वावश्यंभावात् । वह्निमनुमिनोतीत्यादावगत्या द्वितीयायाः प्रयोगमात्रसाधुत्वादित्याशयात् । प्रतियोगिनोऽपि कार्यान्तरजनकत्वसंभवेन प्रतियोगिन इति मूलानुपपत्तिरित्यत आह--प्रतियोगीति । एकत्रेति । एकावच्छेदकावच्छिन्न इत्यर्थः ।

ननु प्रोक्षणस्य हेतुताव्यवस्थापनात् कार्यानन्वयित्वरूपोपलक्षणत्वस्यानुपपत्तिरित्याशङ्क्य व्यापारशून्यत्वमेवोपलक्षणपदेन विवक्षितमित्याशयं दर्शयति--व्यापारमिति । प्रसङ्गपञ्चम्यन्तस्य अहेतुत्वादित्यस्य ईष्टापादनादयोगमाशङ्क्याह--प्रोक्षणस्येति । व्यापारहीनस्य

---

1 न च-क 2 प्रतियोग्यनुयोगिनोरेकत्र-ख
3 करणेति-क

तत्सिद्धिः । जन्मान्तरीयैरदृष्टजनकत्वाभिमतैर्ज्ञानेच्छाप्रयत्नैः सिद्ध-साधनात् ।

तस्मात् प्रोक्षणादयो भावभूतमतिशयं जनयन्त एव कालान्तरभावि-कार्यजनकाः प्रमाणतस्तदर्थमुपादीयमानत्वात् रोगचिकित्सावत् । स चातिशयः लाघवात् फलसमानाधिकरण इति व्रीहिनिष्ठ एव । तेन तत्समवहितत्वं व्रीहेः साक्षात्संबन्धात् पुरुषनिष्ठत्वेन च व्रीहीणां साक्षा-त्संबन्धाभावात् परम्परासंबन्धे गौरवात् न साक्षात् व्रीहिसमवहितत्वं स्यात् ।

प्रकाशः

तद्भोगसाधनेत्यपि द्रष्टव्यम् । अन्यथा साधनवैकल्यापत्तेरित्यवधेयम् । जन्मान्तरीयैरिति । अतीतोपलक्षणस्यापि जनकत्वाभ्युपगमादिति भावः ।

एतावता ध्वंसातिरिक्तं व्यापारं सिद्धमुपसंहरति—[1]तस्मादिति । प्रमाणत इति[1] । कार्यापेक्षया चिरध्वस्तत्वे सतीति विशेषणम् । तेन साक्षाज्जनके न व्यभिचारः । अतिशयस्य [2]भावत्वं च पक्षधर्मताबललभ्यम् , न तु साध्यतावच्छेदक[3]प्रविष्टम् । तेन विघ्नध्वंसद्वारा समाप्तिसाधने मङ्गले मिथ्याज्ञानध्वंसद्वारा मुक्तिसाधने तत्त्वज्ञाने वा न व्यभिचारः । [4]नन्वस्त्वातिशयः, स च पुरुषसमवेत एव । तथा च नाधेयशक्ति-सिद्धिरित्यत आह—स चेति ।

तकचूडामणिः

कथं जनकतेत्यत आह—अतीतेति । ननु न्यायमतेऽप्यात्मसमवेतातिशयाभ्युपगमात् सिद्धसाधनमित्याशङ्क्य तटस्थं प्रत्येतदित्याशयमाह—एतावतेति । मङ्गलस्य विघ्न-ध्वंसमात्रहेतुत्वं न समाप्तिहेतुत्वमिति मते उदाहरणान्तरमाह—मिथ्येति ।

---

1 प्रमाणत इति-ख
2 अभावत्वं च-क
3 बलप्रविष्टम्-ख
4 नन्वस्त्वातिशयः-ख

किं च यो यद्गतफलार्थितया क्रियते स बाधकं विना तद्गतमेव तदनुकूलमतिशयं जनयति रोगचिकित्सावत् । अथ प्रोक्षणं पुरुषसमवेतातिशयजनकं कालान्तरभाविकार्यजनकत्वे सति विहितत्वात् यागवत्, अन्यथा विधिविरोधादिति चेत्—न । कृषिचिकित्सादिना व्यभिचारात्, अप्रयोजकत्वाच्च । तेन विनापि विधिसंभवात् । स च प्रतिव्रीहि नानैव । न चैवमेकव्रीहिनाशे फलानुदयः, तावत्संस्काराणामभावादिति वाच्यम् । संस्कारत्वेन प्रयोजकत्वे किंचित्समवधानेऽपि दण्डादिवत् कार्यसंभवात् ।

अस्तु वा सकलव्रीहिनिष्ठ एक एव । न चैकव्रीहिनाशे तन्नाशापत्तिः । किंचिदाश्रयनाशस्य वृक्षादाविव कार्यानाशकत्वादिति ।

प्रकाशः

संस्कारत्वेनेति । न चैवमनेकव्रीह्युपादानं न स्यादिति वाच्यम् । होमादिनिर्वाहार्थं तदुपयोगात् ।

ननु यत्र [1]किंचिदवयवनाशात् सकलव्रीहि[2]नाशेन खण्डव्रीहीणामुत्पत्तिस्तत्र का गतिरित्यस्वरसादाह—अस्तु वेति । किंचिदिति । [3]यावत्प्रत्यभिज्ञं वस्तुस्थितिरिति स्वमतावष्टम्भेनेदम् । यद्यप्यतिशयस्यैकत्वेनैव पुरुषनिष्ठत्वं सिध्यति । अन्यथा

तर्कचूडामणिः

[6]होमादीति । अश्वशफमात्रपुरोडाशस्य किंचिद्व्रीहिणा असंभवादिति भावः । ननु न्यायमते परिमाणभेदेन द्रव्यभेदोपगमात् दृष्टान्तासंगतिरित्यत आह—यावदिति । अन्यथेति । व्रीहिसमवेतत्व इत्यर्थः । ननु निषिद्धेऽपि दुरितापूर्वसत्त्वेन व्यभिचारापसङ्गात् विहितत्व—

---

1 किंचित्तदवयव—ख
2 नाशे—ख
3 यावत्प्रत्यभिज्ञानं—क
6 होमादिति—क

उच्यते । अतिशयग्राहकमानाल्लाघवग्रहकृतात् स एक एव सिध्यति, न नाना, पुरुषनिष्ठश्च । तथा हि प्रोक्षणमपूर्वजनकं दृष्टद्वारा-भावे सति कालान्तरभाविफलजनकतया विहितत्वात् यागतदङ्गवत् । कृष्यादौ दृष्टद्वारसंभवात् न व्यभिचारो न वा अप्रयोजकत्वम् । याग-

---

प्रकाशः

लाघवेनाश्रयनाशस्यैव[1] कार्यनाशप्रयोजकत्वेन अवयवनाशात् तन्नाशात् वीह्यन्तराणामुपयोगो[3] न स्यात् । तथापि 'प्रकारान्तरमाह--तथा हीति । दृष्टद्वारेति । अत्र धर्मजनकत्वं साध्यम् । तथा च निषिद्धकर्मणि व्यभिचारवारणाय विहितत्वा-दित्युक्तम् । प्रायश्चित्ते व्यभिचारवारणाय—कालान्तरेत्यादि ।

ननु दृष्टद्वाराभावे सतीत्यस्य अदृष्टान्यद्वाराभावे सतीत्यर्थः । तथा चासिद्धिः । परमते शक्तेरेव द्वारत्वात् । न च प्रत्यक्षद्वाराभावे सतीति तदर्थः । औषधपानादौ व्यभिचारात् । न च तत्र विहितत्वाभावादेव न व्यभिचार इति वाच्यम् । अयुर्वेदेन तस्यापि विहितत्वादिति चेत्-न । शब्दतदुपजीविप्रमाणमात्रप्रयोज्यधीविषयद्वारेतरद्वारस्य दृष्टद्वारपदेन विवक्षितत्वात् । न चौषधादौ व्यभिचारः । तदीयधातु[5]साम्यादिरूपातीन्द्रिय द्वाराविशेषे शब्दानुपजीवि[6]प्रमाणासंभवादिति वाच्यम् । अन्वयव्यतिरेकादिमूलकप्रमाण-स्यापि कदाचित्तत्र प्रसरादिति भावः । कृष्यादाविति । न च विहितत्वाभावादेव न तत्र व्यभिचार इति वाच्यम् । प्रत्येकवर्णोभयविभागविधिना वैश्यस्य कृषिविधानादिति भावः ।

तर्कचूडामणिः

विशेषणवैयर्थ्यमित्यत आह-अत्रेति । प्रायश्चित्त इति । यद्यपि साङ्गप्रायश्चित्तस्य पापनाशकतया उत्तराङ्गानन्तरमेव दुरितध्वंस इति प्रधानस्य तदा असत्त्वेन अपूर्वद्वारत्वमावश्यकम् , तथापि तदुत्तराङ्गे तद्वारणायेत्यर्थो बोध्यः ।

असिद्धिः—अन्यतरासिद्धिः । प्रत्येकेति । अपूर्वविध्यभावेऽपि नियमविधि-सत्त्वादित्यर्थः ।

---

1 नाशमात्रस्यैव-ख-ग
2 एकव्रीहिनाशे-क
3 अनुपयोग-क
4 प्रकारार्थमाह-क
5 साम्यरूप-क
6 प्रमाणाभावात्-ख

दानहोमादितदङ्गानामपूर्वजनकत्वे दृष्टद्वाराभावे सति कालान्तरभाविकार्य-जनकतया विहितत्वस्यैव प्रयोजकत्वात् अन्यस्याननुगमात्। न च यो यद्धृतफलार्थितया क्रियते स बाधकं विना तद्धृतमेव तदनुकूलं फलं जनयतीति नियमः; शत्रुवधमुद्दिश्य प्रवर्तिते श्येनयागादौ व्यभिचारात्, विपक्षे बाधकाभावाच्च। न च यदुद्देशेन यत् क्रियते न तत्तत्र भाविकार्यानुकूलातिशयजनकमिति [1]व्याप्तिः। हविस्त्यागादिभिर्व्यभिचारात्।

प्रकाशः

शत्रुवधमिति। एतच्च परमते। अस्मन्मते श्येनापूर्वस्य शत्रुनिष्ठत्वमेव फलोपपादकमपूर्वं फलाश्रये कल्प्यत इति वक्ष्यमाणयुक्त्या तथा व्यमस्थितेः। अत एव गयाश्राद्धादृष्टस्य[1] पितृनिष्ठत्वम्, [2]पञ्चम टीकायां तथा विभागवचनाच्च। स्वमतेन दोषमाह—विपक्ष इति। न च फल-सामानाधिकरण्ये [3]लाघवमेव विपक्षे बाधकमिति वाच्यम्। नानात्वगौरवेण [4]तल्लाघवानादरा-दिति भावः। हविस्त्यागेति। वह्न्युद्देशेन हविस्त्यज्यते, न च तेन तत्रातिशयो

तर्कचूडामणिः

ननु त्वन्मतेऽप्यतिशयस्य व्रीह्यादौ परम्परासंबन्धः, मम तु साक्षादिति लाघवात् व्रीहिनिष्ठत्वमेव तस्योचितम्। न च नानात्वकल्पने गौरवं तवापीति वाच्यम्। किंचिदाश्रय नाशस्य मया आश्रितनाशहेतुत्वानङ्गीकारेण तावद्व्रीहिसमवेतैकातिशयाभ्युपगमात्। नानात्वेऽपि तवैव लाघवम्। मम फलसामानाधिकरण्ये लाघवमिति विनिगमकाभावाच्च। यदि चातिशयग्राहकमानेन लाघवसहकृतेनैकत्वसिद्धौ फलवैयधिकरण्यकल्पनागौरवं न दोषायेति मतम्, तदा तेनैव लाघवसहकृतेन फलसमानाधिकरणे तस्मिन् सिद्धे तन्नानात्व-

---

1 नियमः—ख
2 अपूर्वस्यापि—ख
3 परमटीकायां तथा विभागवचनाच्च—ख
पञ्चमटीकायां—ग
4 कल्पनलाघव—ख
5 तल्लाघवानादरः—क

ननु प्रोक्षितव्रीहिणा अदृष्टस्य जनितत्वात् बर्हिष [1]इव न तस्य[1] पुनरुपयोगान्तरं स्यात्, विनियुक्तविनियोगविरोधात्। उपयोगे वा तज्जातीयान्तरमुपादीयेत अविशेषात्-व। 'व्रीहीनवहन्ति' इत्यत्रोक्तन्यायेन प्रोक्षितस्यैव व्रीहेरन्वयात्। विधेर्दुर्लङ्घ्यत्वात् यथा 'बर्हिस्तृणाति' 'बर्हिषि हविरासादयति' इत्यत्र।

प्रकाशः

जन्यत इत्यर्थः। न च वह्नौ तदनुकूलः संयोगो [2]जन्यत इति वाच्यम्। एवं हि प्रोक्षणेनापि व्रीहौ [3]जलसंयोगजननात् सिद्धसाधनादिति भावः। [4]पुरुषसमवेतातिशयस्य परम्परासम्बन्धेन स्वरूपसंबन्धेन साक्षादेव वा व्रीहिनिष्ठत्वस्याप्युपपत्तेः नातिरिक्तपदार्थकल्पनमिति तत्त्वम्।

अथोत्पन्नतत्त्वज्ञानवत्पुरुषकृतप्रोक्षणेन दोषाभावात् अदृष्टानुत्पादे शक्तिसिद्धिरिति चेत्-न। तत्र फलानुत्पादात्, लोकसंग्रहार्थं तदाचरणादिति भावः। बर्हिष इति। बर्हिर्यागस्येत्यर्थः। यथा तस्य जनितादृष्टस्य न पुनरुपयोगान्तरम्, तथा व्रीहेरप्य-दृष्टजननोपगमे तन्न स्यादित्यर्थः। यद्वा व्यतिरेकदृष्टान्तोऽयम्। यथा बर्हिस्तृणातीति विधिबालात् तस्य पुनरुपयोगः तथात्र न स्यादित्यर्थः। उक्तन्यायनेति। व्यक्तिवचन-

---

तर्कचूडामणिः

कल्पनागौरवमपि न दोष इति तुल्यमित्यपरितोषात् वक्ष्यमाणं स्मारयति—पुरुषेति। उक्तास्वरसादेवाह—स्वरूपेति। पदार्थन्तरकल्पनागौरवं दोषान्तरं सूचयति-नातिरिक्तेति।

ननु विनियुक्तस्यापि बर्हिषो विनियोगात् तस्य दृष्टान्तत्वानुपपत्तिरित्यत आह-बर्हिरिति।

---

1 इव-क
2 जन्यत एवेति-ख-ग
3 जलसंयोगस्य-क
4 पुरुषसमवेतातिरिक्तपदार्थकल्पनमिति तत्त्वम्-क

यद्वा विचित्राः संस्काराः। केचिदुद्देश्यसहकारिण एव अग्रिम-कार्यकारिणः। यथा अभिचारसंस्कारो यं देहमुद्दिश्य प्रवृत्तस्तदपेक्ष एव तत्संबद्धरूपं दुःखं जनयति, तथा प्रोक्षणसंस्कारा अपि उद्देश्यव्रीहिसहकृता एवाग्रिमकार्यकर्तारः। यथा च कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जल-मुचामदृष्टसमवधानं तथा प्रोक्षणजन्यादृष्टवदात्मसंयोगात् व्रीहीणामुत्तर-क्रियाविशेषाः। कर्मकर्तृसाधनवैगुण्यात् फलाभावस्तुल्य एव। आगामि-कत्वात् चाण्डालादिस्पर्शस्याहवनीयादिसंस्कारनाशकत्वश्रुतेर्व्यधिकरणस्याप्य पूर्वनाशकत्वम्। धर्मनाशे कर्मनाशापारगमनवत् निषिद्धकीर्तनवच्च।

किं च प्रोक्षणजन्यातिशयो व्रीहिनिष्ठो न नाना। आत्मवृत्त-रेकस्मादप्युक्तन्यायेन कार्योपपत्तेः। नाप्येकः, एकद्वित्राश्रयनाशानां प्रत्येकमननुगमेन कार्यनाशे आश्रयमात्रनाशस्य जनकत्वादेव व्रीहिनाशेन तन्नाशात् अपरप्रोक्षितव्रीहीणामनन्वयापत्तेः। अथ 'व्रीहीन् प्रोक्षति' इतीप्सिततमद्वितीयाश्रुतेः क्रियाजन्येष्टफलभागित्वं व्रीहेरेवावगम्यते। न चापूर्वस्य व्रीहिवृत्तित्वम्. साक्षात्संबन्धस्यैवौत्सर्गिकत्वादिति चेत्—न।

प्रकाशः

न्यायेनावघाते प्रोक्षितस्यैवान्वये सर्वमिदमविरुद्धमिति[1] भावः। ननु पुरुषे पातित्यादि-दोषेणादृष्टं नोत्पद्यत [2]इत्यगत्या व्रीहिनिष्ठातिशयः स्वीकार्य इत्यत आह—कर्तृकर्मेति। एवं हि व्रीहिनिष्ठोऽपि [3]स न[3] स्यादित्यर्थः।

पुरुषनिष्ठत्वे साधकमुक्त्वा व्रीहिनिष्ठत्वे बाधकमाह—किं चेति। कार्येति। भाविकार्येत्यर्थः। आश्रयेति। स्वसमवायिकारणेत्यर्थः। एवं च किंचिदाश्रयनाशेन[4]

तर्कचूडामणिः

पुनरुक्तिशङ्कां वारयति—पुरुषेति। घटनाशेऽपि तदाश्रितपटाविनाशादाह—स्वेति।

---

1 विरुद्धमिति—ख
2 इत्यनन्यगत्या—ख
3 न—क
4 नाशे—क

धात्वर्थतावच्छेदकसंयोगेन व्रीहिकर्मतोपपत्तेः । न च संयोगावच्छिन्न एव व्यापारविशेषः प्रोक्षणार्थः । तथा च कथं प्रोक्षणैकदेशस्य प्रोक्षण-साध्यतयान्वय इति वाच्यम् । संयोगस्योपलक्षणत्वेनापदार्थत्वात् । अन्यथा ग्रामं गच्छतीत्यादौ का गतिः ? का वा स नू प्रोक्षतीत्यादौ ।

प्रकाश[8]

वृक्षादिनाशे प्रत्यभिज्ञानस्य तज्जातीयत्वं विषय इति भावः । संयोगस्येति । ननु फलस्योपलक्षणत्वे तत्तद्व्यापारस्यैव [1]धात्वर्थत्वे त्यजतिगच्छत्योः पर्यायतापत्तिः । अवच्छेदकी-भूतयोः फलयोर्विभागसंयोगयोर्धात्वर्थाप्रवेशे[2] स्पन्दमात्रस्यैवोभयधात्वर्थत्वात् कर्ममात्रस्यैवोभय-जनकत्वेन पतनादिवदवान्तरजातिमादायापि [3]अर्थभेदस्य [4]दुरुपपादत्वादिति ।

अत्र वदन्ति । व्यापारे उपलक्षणीभूतस्यापि फलस्य [5]प्रतीतौ विशेषणत्वमेव । इष्टसाधनताविधिपक्षे क्रियोपलक्षणस्यापीष्टस्य ज्ञानविशेषणतावत् । [6]तदत्र फलविशिष्टो व्यापारो यदि वाच्यः तदा शब्दात् फलविशिष्टव्यापारधीः अपरथा फलोपलक्षितव्यापारधीरित्यु-भयथापि [7]फलांशेऽपि शक्तेः क्व प्रतीत्यविशेषः येन पर्यायता । विशेषणत्वे प्रकृते कर्मत्वानुपपत्तिरिति[8] ।

तर्कचूडामणि[8]

पतनादिवदिति । पतनादाविवेत्यर्थः ।

ननु व्यापारेऽपि फलस्य विशेषणत्वमस्त्वित्यत आह— विशेषणत्व इति ।

एवं चेति । धात्वर्थावच्छेदकसंयोगाश्रयत्वमात्रेण कर्मत्वे ग्रामादिवदाप्यत्वापत्तौ 'यैस्तु द्रव्यं चिकीर्ष्यते' इति सूत्रोक्तं संस्कार्यत्वमनुपपन्नं स्यादित्यर्थः ।

---

1 धात्वर्थे—क
2 धात्वर्थानुप्रवेशे—क
3 अभेदस्य—क
4 दुरुपपाद्यत्वात्—क
5 प्रतीतिविशेषणत्व—ख
6 अत्र—क
7 फलांशे—क
8 कर्मत्वानुपपत्तरिति—क

किं च घटं साक्षात्करोतीत्यादौ क्रियाजन्यसंस्कारादीनां घटवृत्तित्वात् संस्कारस्य स्वरूपसंबन्धेन घटवृत्तित्वम् । वह्निमनुमिनोमीत्यादिवत् प्रयोगसाधुरेव वा द्वितीयेति यदि, तदा प्रकृतेऽपि तथास्तु ।

अथ प्रतिमादौ प्रतिष्ठाजन्यं न यजमानादृष्टं पूज्यत्वप्रयोजकम् । भोगादिना तन्नाशेऽपि पूज्यत्वात्, तत्सत्त्वेऽपि चाण्डालादिस्पर्शेना-पूज्यत्वात्, अन्यधर्मं प्रत्यन्यधर्मस्यानुपयोगाच्च । न च प्रतिष्ठा-ध्वंसस्तथा । तत एवोपजीव्यप्रतिष्ठाप्रयोजकत्वभङ्गापत्तेः । तस्मात् प्रतिष्ठाजन्या अस्पृश्यस्पर्शादिनाश्या प्रतिमादिनिष्ठा शक्तिरभ्युपेयेति चेत्– प्रतिष्ठाविधिना प्रतिमादौ देवतासंनिधिरहंकारममकाररूपः क्रियते,

---

प्रकाशः

अस्तु वा प्रोक्षणजन्यापूर्वस्य साक्षात् स्वरूपसंबन्धेनैव वीहिकर्मत्वम्, [5]साक्षात्कार-जन्यसंस्कारविषयतया घटादीनामिव । एवं च आप्यसंस्कार्यकर्मणोर्भेदोऽप्युपपद्यत इत्यभि-प्रत्याह—**किं चेति** । **वह्निमिति** । न ह्यत्र कर्मणि द्वितीया, अनुमितौ [1]वह्नेरकारकत्वात्, कर्मणश्च कारकविशेषत्वात् । किं तु साधुविभक्तिस्तथात्रापीत्यर्थः ।

न चेति । 'प्रतिष्ठितं पूजयेत्' इति निष्ठास्वरसादिति भावः । [2]**तत एवेति** । तत्सत्त्वेऽपि चण्डालस्पर्शेनापूज्यत्वादेवेत्यर्थः । देवताचैतन्यपक्षमालम्ब्य परिहरति **प्रतिष्ठाविधिनेति** । **अहंकारेति** । अहमियं प्रतिमममेयं प्रतिमा ममेदं[3] शरीरमित्यादिज्ञानरूप इत्यर्थः । नन्विदं ज्ञानं विषयबाधात् भ्रान्तं स्यात् ।

तर्कचूडामणिः

पूर्वोक्तदोषत्रयमध्ये आद्यन्तयोः अतिदेशायोग्यतया मध्यमदोष एव ततःशब्देन परामृश्यत इत्याशयमाह—**तासत्त्वेऽपीति** । अहंकारशब्दस्य गर्वपरत्वं वारयति—**अहमिति** । ममेदं द्रव्यमित्यादिबुद्धेरप्रतिष्ठितपदार्थेऽपि सत्त्वादाह—**ममेति** । नन्वयं

---

1 साक्षात्कारजस्य स-क साक्षाद्धीजन्यस-ग
2 वह्नेरकारणत्वात्-क 3 अत एव-क
4 ममेदं-ख-ग

स्वसादृश्यदर्शिनश्चित्रादाविव ज्ञानस्य नाशेऽपि संस्कारसत्त्वात् । अस्पृश्य-स्पर्शादिना तु तन्नाशः । अचेतनदेवतापक्षे च यथार्थप्रतिष्ठितप्रत्यभिज्ञानस्य अस्पृश्यस्पर्शादिविरहसहकृतस्य तथात्वं 'प्रतिष्ठितं पजयेत्' इति विधिबलात् तत्तत्प्रतिसन्धानस्यावश्यकत्वादिति प्राञ्चः ।

नव्यास्तु प्रतिष्ठाविधिनैव तवाधेयशक्तिवदपूर्वान्तरं जन्यते, तद्दृष्टवदात्मसंयोगाश्रयस्य पूज्यत्वम् अस्पृश्यस्पर्शेन तन्नाशे चापूज्यत्व-मित्याहुः ।

प्रकाशः

न च तत्संभवति, विशेषदर्शनादित्यत आह—**स्वसादृश्येति** । तथा च विशेषदर्शने [1]सत्यप्याहार्यभ्रमोऽयमित्यर्थः ।

ननु देवतायाः सर्वज्ञत्वाभावेन व्यासङ्गदशायां व्यवहितनानादेशे[2] तत्र प्रतिष्ठायां कथमहंकारममकारौ । संस्कारनाशे वा कथं पूज्यत्वम् ? कथं वा ज्ञानसंस्कारयो-[3]रननुगतयोः पूजाप्रयोजकत्वमिति प्रथमकल्पानुपपत्तिः । यत्र व्यासङ्ग[4]वशान्न प्रत्यभिज्ञानम् ।

तर्कचूडामणिः

दोषो दृष्टान्तेऽपि तुल्य इत्यत आह—**तथा चेति** ।

ननु देवताया असंकुचितसर्वज्ञत्वाभावेऽपि स्वोचितसर्वविषयज्ञानमस्त्येव, तत्तद्देवत्व-प्रापकादृष्टस्यैव तत्र तन्निर्वाहकत्वात् । अन्यथेन्द्रादीनामाह्वायककोटिभिरेकदा आह्वाने कृते तावद्भिराहूतोऽहमिति ज्ञानाभावे हविस्स्वीकाराभावे तच्छङ्कया यागाद्यनुष्ठानं निःशङ्कं न स्यादित्यरुचेराह—**संस्कारेति** । ननु फलबलेन तत्र तस्य स्वामित्वं कल्प्यते । न च तस्य स्मृतिविनाश्यतया स्मृतिजनने तन्नाश आवश्यक इति वाच्यम् । धर्मादिवदेव तस्य यावत्फलाविनाश्यत्वाभ्युपगमादित्यरुचेराह—**कथमिति** । ननु शास्त्रसिद्धपूज्यताप्रयोजकानवगमे

---

1 सत्याहार्य—ख
2 नानादेशे प्रतिष्ठा कथमहंकारममकारात्मिका—ख 3 अनुगतयोः—ख
4 दशायां न—क

वयं तु ब्रूमः। 'प्रतिष्ठितं पजयेत्' इति विधिवाक्येन प्रतिष्ठायाः कारणत्वं न बोध्यते। किं तु भूतार्थे क्तानुशासनात् अतीतप्रतिष्ठे

प्रकाशः

[1]तत्र प्रतिष्ठित[1]प्रतिमापूजापि निष्फला स्यात्। प्रतिष्ठितं पूजयेदित्यादिना च प्रतिष्ठायाः [2]तद्ध्वंसस्य वा हेतुत्वं बोध्यते, [3]न तु प्रत्यभिज्ञानस्यापीति द्वितीयकल्पानुपपत्तिः। दृष्टेनैवोपपत्तावदृष्टकल्पनानुपपत्तेरिति तृतीयकल्पानुपपत्तिरित्यस्वरसादाह—वयं त्विति।

ननु यत्र प्रतिमायां प्रतिष्ठा जाता दैवात् किंचिदवयवनाशात् अन्या प्रतिमा जाता, तत्र प्रतिष्ठारूपप्रतियोगिनोऽवृत्तेः तद्ध्वंसस्यापि न वृत्तिः, प्रतियोग्यधिकरण एव ध्वंसस्य वृत्तेः। तथा च तत्पूजा निष्फला स्यात्। न चेष्टापत्तिः, आचारविरोधात्। अन्यथा एतच्छङ्कया कस्यापि प्रवृत्तिर्न स्यात्। न च [4]तत्प्रतिमावृत्तित्वेन ध्वंसस्य न प्रयोजकत्वम्, किं तु स्वरूपेण, [5]तच्च तत्रास्त्येवेति वाच्यम्। एवं हि ध्वंसस्य [6]प्रतिमान्तरपूज्यताप्रयोजकतापि स्यात् अविशेषादिति चेत्—

अत्राहुः। इयं प्रतिष्ठितेति [7]बुद्धेः खण्डप्रतिमायामपि प्रतिमात्वव्यवहारात् तद्ध्वंसस्य तत्रापि वृत्तिरेव। प्रतिमान्तरे च तदभावात्तदभावः। अत एव प्रोक्षितव्रीहीणां [8]यत्किंचिद

तर्कचूडामणिः

पूजैव न संभवतीत्यत आह—प्रतिष्ठितमिति। नन्ववच्छेदकलाघवे व्यक्तिगौरवं न दोषः। अन्यथा वनस्थेतरदण्डत्वेन हेतुतापत्तेरित्यरुचेराह—अन्यथेति। तदपीति। अपिना यावत्त्वमपि तद्विशेषणमित्युक्तं द्रष्टव्यम्। न चैवमपि प्रतिष्ठाकालीनास्पृश्यस्पर्शमादाय दोषः। साङ्गप्रतिष्ठाध्वंसस्यैवात्र विवक्षितत्वेन तत्र तादृशप्रतिष्ठाध्वंसस्यैवाभावात्।

ननु संयोगदशायां शुद्धिर्न स्यादित्याशङ्क्येष्टापत्त्याशयेनाह—अत एवेति।

---

1 तत्र—ग
2 स्वध्वंसस्य वा हेतुत्वमबोध्यम्—क
3 तेन—क
4 प्रतिमा—क
5 तच्चा स्त्येव—क
6 प्रतिमान्तरस्य क
7 बुद्धेः प्रतिमा क
8 यत्किंचित्तदवयव क

प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शादिप्रतियोगिकानादिकालसंसर्गाभावसहितः पूज्यत्वप्रयोजकः । स च प्रागभावोऽत्यन्ताभावश्च क्वचित् ।

प्रकाशः

वयवनाशान्नाशेऽपि खण्डव्रीहीणामुपयोगः । संस्कृता [1]ह्येते व्रीहय इति प्रतीत्या तत्रापि पुरुषसमवेतसंस्कारसंबन्धसिद्धेः । अन्यथा सर्वमिदं तत्रापि तुल्यमिति । प्रतिष्ठाकालीनेति । अत्र स्वसमानाधिकरणेत्यपि विशेषणम् । तेन तत्प्रतिष्ठाकालीनप्रतिमान्तरास्पृश्यस्पर्श-[2]प्रागभावाभावेन यावदर्थाभावान्नापूज्यतापत्तिः । ननु [3]प्रतिष्ठानन्तरमपि पूज्यता न स्यात् । प्रतिष्ठापूर्वकालीनास्पृश्य[4]स्पर्शानां जाततया तत्प्रागभावाभावादित्यत आह— प्रतिष्ठाकालीनेति । अभावविशेषणम् । नन्वेकस्पर्शानन्तर[5]मग्रिमस्पर्शप्रागभावसत्त्वात् पूज्यता [6]स्यात् इत्यत आह--यावदिति । आदिपदमवयवविभागादिपरम् । [7]स्फुटितप्रतिमाया अपूज्यत्वात् ।

नन्वनादिसंसर्गपदमत्राकिंचित्करमिति चेत्–अत्राहुः । तावदभावसहितप्रतिष्ठाध्वंसस्य हेतुत्वे [8]तावदभावा अपि हेतव इति ध्रुवम् । तथा चानादित्वानन्तर्भावे [9]साद्याभावानामपि जनकत्वमिति बहूनां जनकत्वे गौरवमित्यल्पजनकत्वे लाघवेन सादिव्यावर्तनार्थमनादिपदो-पादानम् । एवमन्योन्याभावव्यावर्तनार्थं संसर्गपदम् ।

अन्ये तु प्रतिष्ठाकालीनत्वेन प्रतिष्ठोत्तरकालीनत्वं विवक्षितम् । तदपि स्पर्शादि-विशेषणम् , [10]न त्वभावविशेषणम् । एवं प्रतिमायामस्पृश्यस्पर्शे[11] जातेऽपि तद्ध्वंसान्योन्या-भावावादाय पूज्यतापत्तिः । [12]प्रतिष्ठानन्तरकालीनानां यावदस्पृश्यस्पर्शानामभावस्य तत्रा सत्त्वात् । अनादि[13]पदसंसर्गपदोपादाने तु नोक्तदोषः । तन्निष्ठास्पृश्यस्पर्शव्यक्तेरेवानादि-संसर्गाभावस्य तत्रासत्त्वात् । अत्यन्ताभावस्य प्रतियोग्यसमानाधिकरणत्वात् । प्रागभावस्य प्रतियोगित[14]द्ध्वंसासमानकालीनत्वादित्याहुः ।

---

1 एव व्रीहयः–ख
2 प्रागभावेन–क
3 प्रतिष्ठोत्तरमपि-ख, ग
4 स्पर्शमादाय तत्प्रा–क
5 अन्यस्पर्श–क
6 न स्यात्–क
7 स्फटिक–क
8 तावन्तोऽपि–ख
9 साध्याभावानामपि-क
10 न हेत्वभाव–ख
11 स्पर्शने–ख
12 प्रतिष्ठोत्तर–ख ,ग

कामिनीचरणाभिघातदोहदादिभिरशोकपुष्पोत्कर्षदर्शनादपि नाधेयशक्तिसिद्धिः । समयविशेषावच्छिन्नचरणदोहदादिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताद्याकृष्टभागान्तरजनितवृक्षादेव वा तदुपपत्तेः । कालान्तरे पुष्पाद्युत्कर्षात् वृक्षावयवोपचयावश्यंभावेन वृक्षभेदावश्यकत्वात् । नापि ताम्रकांस्यादावस्तु भस्मसंयोगादिजन्यशुद्धिरूपा आधेयशक्तिः । तत्संयोगध्वंसस्य संयोगसमानकालीनास्पृश्यस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात् ।

भस्मादिसंयोगजनितः कांस्याद्युपभोक्तृनिष्ठः संस्कार एव शुद्धिरित्यन्ये ।

अभिमन्त्रितपयःषल्लवादावपि समयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्यथाद्यपनायकः तत्तन्मन्त्रदेवतासंनिधिरेव वा । कलमबीजादीनामा-

---

प्रकाशः

समयविशेषेति । स च विशेषः [1]कार्यैकोन्नेयः यदनन्तरं पुष्पमित्यर्थः । नन्वेवं चरणसंयोगस्य कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वापत्तिः । न चेष्टापत्तिः । चिरसमयव्यापिसंयोगे सति पुष्पानुत्पत्त्यापत्तेरित्यपरितोषादाह—चरणेति । तत्संयोगेति । अत एव मलादिसंयोगो जलक्षालनेनापनीयत इत्यर्थः । संस्कार एवेति । धर्मविशेष इत्यर्थः । अन्ये त्वित्यस्वरसोद्भावनम् । तद्बीजं तु [2]दृष्टद्वारेणैवोपपत्तावदृष्टकल्पनानवकाश इति ।

समयविशेषेति । न चैवं यागेऽप्यपूर्वं न कल्प्यमिति वाच्यम् । तत्र विधिन

तर्कचूडामणिः

भावनाख्यसंस्कारस्य संयोगजन्यत्वाभावादयुक्तिमाशङ्क्याह—धर्मेति ।

ननु तादृशरूपादेरुभयसिद्धत्वेऽपि किमायातं कलमाङ्कुरादिकार्यविशेषस्य तज्जत्व

कार्योन्नेयः—क 2 दृष्टद्वारैव—क

परमाण्वन्तरभङ्गे तत्र चावान्तरजात्यभावे नियतकलमजातीयादिसिद्धिरपि परमाणुपाकजविशेषादेव । कार्यवृत्तिरूपादिसजातीयस्य पूर्वरूपादि-विजातीयस्य परमाणौ पाकजरूपादेरुभयसिद्धत्वात् । यथा हि कलमबीजं यवादेर्जात्या व्यावर्तते तथा तत्परमाणवोऽपि पाकजैरेव । एवं माषकर्षण-जनितात् परमाणुपाकपरम्पराविशेषादेव हैमन्तिकसस्योत्पत्तिः ।

एतेन लाक्षारसावसेकादयो व्यख्याताः । निमित्तविशेषजनितपाक-जात्तत्तत्फलविशेषः, यथा हारीतमांसं हरीद्रानलसाधितमुपयोगात् व्यापादयति नान्यथा साधितमित्यादि । यत्र च तोयतेजोवायुषु न पाकजो विशेषः तत्रोद्भवानुद्भवकठिनत्वादयो विशेषास्तत्तदुपनायकादृष्टविशेषादेव ।

तुलादौ चाधिवासपूर्वकतुलारोहणसामग्री तुल्यस्य सत्यासत्यप्रतिज्ञत्व-

---

प्रकाशः

कार्यकारणभावबोधनात । अत्र तु न तथेति भावः । पाकजविशेषे प्रमाणमाह—कार्येति ।

ननु बीजपूरादौ लाक्षाद्यवसेकात् [1]कुसुमारुण्यं दृश्यते । तत्र [2]लाक्षादिरसस्य गलितत्वान्न कालान्तरीणकुसुमारुणिमहेतुत्वं, न वा स्वल्पात्तरमात् तादृशोत्कर्षः । तथा च तत्प्रयोजकत्वेन आधेयशक्तिः स्वीकार्येत्यत आह—एतेनेति । 'दशरात्रोषितं कांस्ये [3]सर्पिश्चापि विषायते' इत्येवमादयः आदिपदग्राह्याः । कठिनत्वं च तोये प्रतिबद्धद्रवत्वमित्यर्थः ।

तुलादौ तु तुलाविधिजन्या माधेयशक्ति जयादिप्रयोजिकामाशङ्क्य 'निराकरोति—तुलादाविति । तुल्यस्य--तुलनीयस्येत्यर्थः ।

तर्कचूडामणिः

इत्याशङ्क्य नेदं पाकजविशेषजन्यत्वे प्रमाणप्रदर्शकम् , किं तु पाकजविशेष एव परमाणुषु वेति व दन्तं प्रति तत्र प्रमाणप्रदर्शनपरमिति व्याचष्टे—पाकेति । कठिनत्वस्य जलादावभावादाह--प्रतिबद्धेति ।

ननु कस्यचित् पापित्वेन कस्यचित्तदभावेन कथं तुल्यतेत्यत आह-तुलनीयस्येति ।

---

1 कुसुमादावारुण्यं—क
2 लाक्षारसस्य नाशाच्च—क
3 धृतं चापि-क
4 परिहरति-ख

सहिता प्राचीनधर्माधर्मफले तज्जयभङ्गौ जनयति । यद्वा अहं निष्पापः पापवान् वेति तुलाधिरूढाभिशस्तज्ञानविशेषसहिता सा तथा । तदाहुः—

तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपरुषः—इति ।

अथवा प्रतिज्ञाशुद्ध्यशुद्धी अपेक्ष्य तया धर्माधर्मौ जन्येते, ताभ्यां च जयपराजयौ । सत्यासत्यप्रतिज्ञाभिशस्ततुलारोहणस्येष्टानिष्टफलत्वेनार्थतो विधिनिषेधात् । 'अभिशस्तः सत्यप्रतिज्ञो विजयकामस्तुलामारोहेत् असत्यप्रतिज्ञो न तुलामारोहेत्' इति श्रुतेरुन्नयनात् । यद्वा तया देवता-संनिधिः क्रियते । ताश्च कर्मानुरूपं लिङ्गमभिव्यञ्जयन्ति ॥

[इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
अनुमानखण्डे आधेयशक्तिवादः]

प्रकाशः

ननु तुलादिसामग्र्यः क्षणिकतया कालान्तरभाविजयादिजनकत्वानुपपत्तिः । पापिनोऽपि सभाक्षोभादिना [1]पापवत्त्वज्ञानाभावे निष्पापत्वभ्रमे वा भङ्गानुपपत्तिश्चेत्यरुचेराह—अथवेति । तयेति । [2]तुलाधिरोहणसामग्र्येत्यर्थः । ननु दृष्ट[3]द्वारैवोपपत्तावदृष्ट-कल्पनानुपपत्तिः । लौकिकक्रियाया अपीष्टानिष्ट[4]फलजनकत्वेन तादृशतुलारोहणेन श्रुत्युन्नयनासंभवश्चेत्यपरितोषादाह-यद्वेति । अयं पापी निष्पापो वा तुलारूढ इति ज्ञानमेव तज्जन्यसंस्कारो वात्र संनिधिरित्यर्थः । ताश्चेति । देवता इत्यर्थः । लिङ्गमिति । नमनोन्नमनादिकमित्यर्थः ॥

[इति श्रीरुचिदत्तविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे आधेयशक्तिवादः]

तर्कचूडामणिः

तुलेति । तुलारोहणघटितसामग्र्या इत्यर्थः । ज्ञानस्य क्षणिकत्वादाह-तदिति ॥

इति श्रीधर्मराजाध्वरीन्द्रविरचिते तर्कचूडामणौ
आधेयशक्तिवादः समाप्तः

---

1 पापत्व—क
2 तुलारोहण—क
3 द्वारेणैव-ख
4 फलकत्वेन—ख ग

कारणतावादः

कस्तर्हि शक्तिपदस्यार्थः। कारणत्वम्। तच्च स्वस्वव्याप्येतर-सकलसम्पत्तौ कार्याभावव्यापकाभावप्रतियोगित्वम्।

प्रकाशः

स्वस्वेति। अत्र यत्र कार्यस्य घटादेरभावः तत्र दण्डादेरभाव इति दैशिकी व्यापकता। कालिक्यां तु सामग्रीकाले व्यभिचारात्। एवं च दण्डसद्भावेऽपि चक्राद्य-भावेन कार्याभावे व्यभिचार इति तद्वारणाय कार्याभावं विशिनष्टि-**सम्पत्तावित्यन्तेन**। स्वेतरसकलसम्पत्ताविति कृतेऽप्रसिद्धिः, दण्डेतरसकलमध्यपतितानां चक्रभ्रम्यादीनां [1]सम्पत्तौ घटाभावाप्रसिद्धेरित्यत उक्तं **स्वव्याप्येति**। चक्रभ्रम्यादीनां च[1] दण्डसमवधाननियतत्वेन दण्डव्याप्यतया तदितरसम्पत्तिकालीनकार्याभावप्रसिद्धेर्नोक्तदोषः। एतेन [2]यत्र स्वं स्वव्याप्य-मप्यस्ति तत्रापि तत्सम्पत्तिरस्तीति तत्र कार्याभावाप्रसिद्धिरेवेत्यपास्तम्। [3]क्वाचित्कतादृशा-भावप्रसिद्ध्यैव व्यापकत्वनिर्वाहात्।

ननु तदितरसकलपदं तदितरकारणपरं तदितरमात्रपरं वा। आद्ये आत्माश्रयः। अन्त्ये त्वसंभवः। घटाद्युत्पत्तौ [4]वेमादिसकलसमवधानाभावादिति चेत्-न। कार्य-प्रागभावव्याप्यप्रागभावप्रतियोगिसकलस्य विवक्षितत्वात्, कार्यनियतपूर्ववृत्तिसकलस्य वा विवक्षितत्वात्। कार्यत्वं च प्रागभावप्रतियोगित्वम्। [5]न चान्यथासिद्धे दण्डरूपादावति-

---

तर्कचूडामणिः

सकारणकत्वं कार्यत्वमित्यात्माश्रय इत्यत आह- **कार्यत्वमिति**।

---

1 च-क
2 तत्र स्वयमप्यस्ति-क
3 कालिके तादृशाभावप्रसिद्धौ च--ख
4 मेयादि-ख
5 चान्यथ सिद्धे स्वरूपादौ क
, दण्डत्वादौ

प्रकाशः

व्याप्तिः । तत्र स्वस्वव्याप्येतरदण्डादिसकलसंपत्तौ कार्याभावाभावेनोक्तरूपाभावात् । वस्तुतोऽ[1]नन्यथासिद्धत्वमत्रापि देयम् । अतो नोक्तदोषः । अन्यथा कुलालपित्रादावतिप्रसङ्गतादवस्थ्यात् । [2]चक्रभ्रम्यादीनां [3]चक्रव्याप्यत्ववत् कुलालादीनां [4]तद्व्याप्यत्वात् ।

यत्तु इदं कारणसामान्यलक्षणम् । तथा च कुलाल[5]पितृत्वेनान्यथासिद्धत्वेऽपि [6]कुलालत्वेन तस्यापि घटजनकतया [7]अतिव्याप्त्यभावात् । न च कुलालपितृत्वेन जनकत्वापत्तिः । यस्य तादृशकार्याभावव्यापकाभावप्रतियोगित्वं तस्य हेतुत्वमित्येव लक्षणार्थत्वादिति तन्न । दण्डचक्रादिजनके तथाप्यतिव्याप्त्यपरिहारात् । न हि तज्जनके दण्डावयवादौ [8]दण्डत्वादिसंभवः । कुलालमात्रादावतिप्रसङ्गतादवस्थ्याच्च[9] ।

ननु स्वस्वव्याप्येतरसकलसंपत्तौ स्वसंपत्तौ च स्वव्याप्याभावप्रयुक्तकार्याभावव्यापकत्वाभावात स्वाभावस्यायुक्तमिदमिति चेत्—न । तत्संपत्तिकालीनकार्याभावव्यापकाभाव-प्रतियोगिस्वस्वव्याप्यान्यतरत्वस्य विवक्षितत्वात् ।

यत्तु स्वासमवधानकालीनत्वमपि कार्याभावविशेषणम् , [10]अतो नोक्तदोषः इति । तन्न । [11]आत्मादिहेतावव्याप्तेः । नन्वेवमप्यात्मादिहेतावव्याप्तिरेव, कार्याभाववति देशे काले वा तदभावाभावादिति चेत्—न [12]तत्समवधानसत्त्वेऽपि तदभावस्य केवलान्वयित्वेन

तर्कचूडामणिः

कुलालत्वेनेति । घटोपादानगोचरज्ञानादिमत्त्वेनेत्यर्थः । कुलालत्वं तु न जनकतावच्छेदकमित्युक्तमेव । अत एव कुलालमातर्यतिव्याप्तिं वक्ष्यति-**कुलालमात्रादाविति** । तादृशज्ञानादिरहित इत्यर्थः । तदुपादानगोचरज्ञानादिसत्त्वे पितृवदेव मातुरपि जनकत्वमिष्टमेवेति ध्येयम् ।

---

1 अन्यथासिद्धत्व-क
2 चक्रभ्रमादीनां
3 चक्रव्याप्तत्ववत्-क
4 तद्व्याप्तत्वात्-क
5 पितुरन्यथा-क
6 कुलालत्वस्यापि-क
7 अतिव्याप्त्यभावः-ख
8 दण्डत्वसंभवः-क
9 तादवस्थ्यात्-ख
10 इति-क
11 आत्मादिहेतावव्याप्तिरूपकारणे
12 तत्समवधानासत्त्वेऽपि-ख

प्रकाशः

तत्रापि [1]तत्सत्त्वात् । तद्व्याप्यस्याभावप्रतियोगित्वेनान्यतरगर्भलक्षणस्य तत्रापि सत्त्वात् । न चैवमाकाशस्य [2]घटादिहेतुत्वापत्तिः । अनन्यथासिद्धत्वेनैव वारणात् । तद्व्याप्येतर-सकलसंपत्तौ घटाभावाप्रसिद्धेश्च ।

आत्मादौ च [3]स्वव्याप्यहेत्वन्तरप्रत्यासत्त्यादिव्यतिरेकप्रयुक्त[4]कार्याभावप्रसिद्धिसंभवात् । अत एवात्मनः कपालगोचर[5]प्रत्यक्षादिसंबन्धेन घटकारणत्वम् ।

यत्तु यदवच्छिन्नाभावव्यापकाभावप्रतियोगितावच्छेदकावच्छि[6]न्नत्वस्य हेतुत्व-स्वरूपत्वम् । अस्ति चात्मत्वावच्छिन्नाभावस्य [7]ज्ञानाभावाव्यापकत्वेऽपि गुणत्वावच्छिन्नाभावं प्रति [8]समवायित्वावच्छिन्नाभावस्य व्यापकत्वम् । अस्ति च दिक्कालयोस्त[9]त्त्वावच्छिन्ना-भावस्य अव्यापकत्वेऽप्याधाराभावत्वेन [10]तदभावस्यापि कार्याभावव्यापकत्वमिति ।

तच्चिन्त्यम् । एकघटसत्त्वे घटत्वावच्छिन्नाभावाभाववत् आत्मरूपसमवायिसत्त्वे समवायित्वावच्छिन्नाभावासंभवात् । यदि च केवलान्वयितया तदभावः [11]तदा आत्मत्वावच्छिन्नाभावोऽपि सुलभ एव ।

केचित्तु जन्यगुणमात्रं प्रति समवायितया कारणत्वेन तत्रापि तज्जातीयतयोक्त-

तर्कचूडामणिः

नन्वेवमपि मेयत्वादिहेतावव्याप्तिरित्यरुचेराह—**तद्व्याप्यस्येति** । स्वव्याप्यहेत्वन्तर-स्यावश्यतां दर्शयति—**अत एवेति** ।

उक्ताभावप्रतियोगितावच्छेदकधर्मेण तज्जातीयत्वं विवक्षितम् ? येन केनापि वा ?

1 तदसत्त्वात् ख
2 घटेऽपि हेतु ख
3 व्याव्य-क
4 कार्यभावादिप्रसिद्धत्वस—क
5 प्रत्यक्षसबन्धेन घटे—ख
6 अभ्य हेतुत्व—ख—ग
7 ज्ञानाभावव्यावकत्वेन—क
8 समवायत्वा—क
9 तत्कालत्वाव—क
10 आधाराधेयभाववत्त्वेन—ग
11 आत्मत्व—क

प्रकाशः

लक्षणसत्त्वादित्याहुः । तदपि चिन्त्यम् । उक्तरीत्या समवायित्वस्य कार्याभावव्यापकाभावप्रतियोगि[1]तावच्छेदकतया समवायित्वेन हेतुत्वमित्येव न स्यात् । अन्यथा प्रमेयत्वेनैव हेतुत्वापत्तेः तज्जातीयतया गुणादावतिव्याप्त्यापत्तेः ।

अत एव प्रमेयत्वादौ [2]सामान्यप्रत्यासत्तिरूपकारणेऽव्याप्तिः, व्यतिरेकाप्रसिद्धेरित्यपास्तम् । तत्रापि स्वव्याप्यव्यतिरेकप्रयुक्तकार्याभावप्रसिद्धिसंभवेना[3]न्यतरगर्भलक्षण[4]संभवात् । अन्यथा स्वव्याप्याप्रसिद्ध्यैव लक्षणासिद्धिः । स्यात् ।

यत्तु जन्यसाक्षात्कारं प्रति प्रत्यासत्तितया कारणत्वे इन्द्रियप्रत्यासत्तिव्याप्येतरसकलसमवधाने इन्द्रियप्रत्यासत्तिव्यतिरेके [5]सति घटादिसाक्षात्कारासत्त्वात् [6]तज्जातीयतया तत्सत्त्वान्नाव्याप्तिः । अत एवेश्वरज्ञानादौ नाव्याप्तिरिति ।

तन्न । पूर्वोक्तरीत्या प्रत्यासत्तित्वस्य कार्याभावव्यापकाभावप्रतियोगितानवच्छेदकतया तेन रूपेण [7]हेतुत्वस्यैवासिद्धिप्रसङ्गात् । तावतेन्द्रियसंयोगत्वस्य जन्यद्रव्यसाक्षात्काराभावव्यापकाभावप्रतियोगितावच्छेदकतया तेन रूपेण हेतुत्वापत्तेश्च । न हि येन केनापि रूपेण तज्जातीयत्वं वाच्यम् । अतिप्रसङ्गात् । किं त्वन्वय[8]व्यतिरेकितावच्छेदकेनैव । न च प्रत्यासत्तित्वं तथा, तदवच्छिन्नस्य व्यतिरेकाप्रसिद्धेरिति ।

यद्यपि प्रागभावेऽव्याप्तिः, तदितरसकलसंपत्तौ कार्याभावाप्रसिद्धेः । [9]उत्पत्ते

तर्कचूडामणिः

आद्ये–उक्तेति । अन्त्ये–अन्यथेति । अतश्शब्दार्थमाह–तत्रापीति । ननु स्वव्याप्यमेव न तत्रेत्यत आह––अन्यथेति । तथा सत्यप्रसिद्धिरेव वाच्या स्यादिति भावः । न च सापि, प्रमेयत्वसमवधाननियतस्य रूपादेः सत्त्वादिति भावः ।

1 तानव–ख
2 सामान्यप्रत्यासत्तिकरणे–ग
3 अन्यतरावगर्भ–ग
4 सत्त्वात्–ग
5 सति सकलसाक्षा–ग
6 तज्जातीयत्वेन–ग
7 हेतुत्वप्राप्तश्च–ग
8 व्यतिरेकप्रतियोगिताया–ग
9 उत्पत्तौ पुनरुत्पादेऽपि–ग

प्रकाशः

पुनरनुत्पादादपि कार्यस्य सत्त्वात् । तथाप्युत्पत्तिविशिष्टकार्याभावो विवक्षितः सर्वत्राप्यस्ति । न चैवं गन्धं प्रति स्वप्रागभाववत् रूपादिप्रागभावानामपि हेतुत्वापत्तिरिति वाच्यम् । अन्यथासिद्धत्वेनैव वारणात् । न च सव्येतरविषाणयोः परस्परं कार्यकारणभावापत्तिः । तदितरसकलसंपत्तिकालस्य तत्सामग्रीकालत्वपर्यवसाने तत्कालीनपरस्पराभावव्यापकत्वात् परस्पराभावस्येति वाच्यम् । अग्रिमक्षण इति विशेषणात् तत्संपत्त्यग्रिमक्षणे च कार्याभावाभावात् ।

यत्तु कार्यपदं तदीयकार्यपरम् , अतो नोक्तप्रसङ्ग इति । तन्न । आत्माश्रयात् , सम्पत्तावित्यन्तवैयर्थ्यापत्तेश्च ।

न च दण्डावयवे घटाभावात् व्यभिचारेण न तद्व्यापकत्वमिति वाच्यम् । तत्र [1]तदितरसंपत्त्यवच्छिन्न[2]कार्याभावाभावादित्येके । कार्याभाववति [3]यत्संसर्गावच्छिन्नयदभावः [4]तत्संसर्गावच्छिन्नस्य हेतुत्वरूपत्वम् । अस्ति च घटाभावव्यापको यो [5]दण्डसमभिव्याहाराभावः स दण्डावयवेऽपीत्यन्ये ।

केचित्तु कार्याभावव्यापकाभावप्रतियोगित्वमित्यत्र बहुव्रीहिसमासेन[6] कार्याभाव[7]व्याप्याभावप्रतियोगित्वमर्थः । कारणस्य कार्यव्यापकत्वेन तदभावस्य कार्याभाव[8]व्याप्यतौचित्यात् ।

तर्कचूडामणिः

एवमिति । उत्पत्तिविशिष्टकार्याभावविवक्षायामित्यर्थः । **न चेति** । तत्रानन्यथासिद्धत्वस्यापि सत्त्वादिति भावः ।

ननु दण्डावयवादावपि तदितरसकलसम्पत्तिः परम्परासम्बन्धविशेषणं विद्यत एव, भूतलादावप्यदृष्टादिघटितकारणकलापस्य साक्षात्संबन्धेनासत्त्वादित्यरुचेराह—**कार्येति** । **दण्डसमभिव्याहारेति** । संयोगसंबन्धावच्छिन्नदण्डाभाव इत्यर्थः ।

---

1 तत्रैतर—ग
2 कार्याभावादित्येके—ग
3 यत्संपत्त्यवच्छिन्न—ग
4 तत्संपत्त्यवच्छिन्नत्वस्य—ग
5 दण्डसंसर्गाभावः—ग
6 समासे—क
7 व्यापकाभाव—ग
8 व्याप्यत्वौ—ख

प्रकाशः

[1]एवं च चन्द्रोदयसमुद्रवृद्ध्योः परस्परं [2]हेतुहेतुमद्भावापत्तिः, [3]अतस्तद्वारणाय [4]सम्पत्तावित्यन्तम्। न चैवमपि दोषतादवस्थ्यम्। अग्रिमक्षण इत्यस्य विवक्षितत्वात्। [5]न हि तत्र तादृशाग्रिमक्षणे समुद्रवृद्धिव्यतिरेकश्चन्द्रोदयव्यतिरेको [6]वास्ति। आत्मादिहेतौ प्रमेयत्वप्रत्यासत्त्यादौ च तज्जातीयत्वमादायैव लक्षणगमनम्। अन्यच्च [7]पूर्ववद्ग्रह्य-मित्याहुः।

नन्विदं कारणत्वमतीन्द्रियघटितसकलसंपत्ति[8]घटिततया दुर्ग्रहम्। प्रत्यक्षस्याप्रवृत्त्या, साध्याप्रसिद्ध्या मानान्तरस्याप्यप्रवृत्तेः। किं चानान्यथासिद्धत्वकार्यनियतपूर्ववृत्तित्वादेः प्रवेशे अवश्यके तावन्मात्रमेव लक्षणमस्तु, लाघवात् अधिकांशस्य गुरुत्वात्। अत एवाग्रे

तर्कचूडामणिः

दण्डरूपादावतिव्याप्तिनिरासः पूर्ववदित्याह—अन्यच्चेति। अन्वयव्यतिरेकि-तावच्छेदकधर्मेण साजात्यविवक्षायामुक्तदोष एव। यथाकथंचित्तद्विवक्षायामतिप्रसङ्ग इत्यस्वरसोऽत्र बोध्यः।

ननु कारणत्वघटकपदार्थानां विशकलितानां मानान्तरादुपस्थितौ विशिष्टवैशिष्ट्यज्ञानं मनसा चक्षुरादिना वा स्यादित्यरुचेराह—किं चेति। गुरुत्वादिति। यद्यपि यथोक्तविशेषणवैयर्थ्याभावात् तेनापीतरभेदसाधनं संभवत्येवः, तथापि तन्न कारणपदप्रवृति-निमित्तमिति तात्पर्यम्। कस्तर्हीति प्रवृत्तिनिमित्तस्यैव निरूपणीयतोपक्रमादिति भावः।

---

1 एवं चन्द्रो-क
2 कार्यकारणभावापत्तिः—ख, ग
3 तद्वारणाय-क
4 संपत्तावियुपात्तम्—क
5 तर्हि तत्र—क
6 अप्यस्ति—क रेकव्यास¹—ग
7 दुरुह्यम् क
8 गर्भतया ग

अथवा यत्र कार्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणम्। बीजेऽङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते, इतरसमवधाने सति बीजादङ्कुरसंभवात्। किं त्वितराभावेनावच्छिद्यते, इतराभावे बीजस्याङ्कुराभावनियमात्। [1]शिलाशकले त्वङ्कुराभावव्याप्यताशिलात्वेनैवावच्छिद्यते।

प्रकाशः

तथैव लक्षणमित्यरुचेराह—अथवेति। यत्र कार्याभावव्याप्यता इतराभाव[2]सहकारावच्छिन्ना तदवच्छिन्नं कारणम्, तदवच्छिन्नत्वं कारणत्वमिति यावत्। तेन यत्र दण्डाभावत्वं तत्र घटाभाव इति दण्डाभावत्वनिष्ठव्याप्तौ दण्डाभावस्यैवावच्छेदकतया अजने दण्डाभावत्वादौ [3]नातिव्याप्तिः। दण्डत्वे कार्याभावव्याप्ये जनकत्वाभावादसंभवश्च न भवति। तत्र दण्डाभावसहकृतत्वस्यानवच्छेदकत्वात्[3], [4]दण्डत्वावच्छिन्नस्य जनकत्वात्। [5]अत एवाग्रे बीजवीजत्वपदे बीजत्वबीजत्वत्वपरे। **इतराभावेनेति**। इतराभावसहकृतत्वेनेत्यर्थः।

शिलायां त्विति। शिलात्वे इत्यर्थः। शिलात्वेन—शिलात्वत्वेनेत्यर्थः। ननु कार्याभावस्तज्जन्याभावो वा तदभावमात्रं वा। आद्ये आत्माश्रयः। अन्त्ये शिलायामप्यङ्कुरस्य संयोगवृत्त्या सत्त्वेन तत्रापीतराभावसहकृतशिलात्वस्य कार्याभावव्याप्यत्वात्। किं च घटकारणे ज्ञानादौ कार्याभावव्याप्यत्वं ज्ञानत्व वादिनैवावच्छिद्यते। दण्डाभावसाहित्यस्य तत्र नीलधूम इव व्यर्थत्वादिति।

अत्र वदन्ति। उत्पत्तिकालीनसंबन्धावच्छिन्नकार्याभावव्याप्यत्वं विवक्षितम्। संयोगसंबन्धयोरुत्पत्त्यनन्तरकालीनतया तदवच्छिन्नाभावमादाय न शिलादौ प्रसङ्गः। उत्पत्ति

तर्कचूडामणिः

अतिव्याप्त्यसंभवयोरभावे क्रमेण हेतुद्वयमाह—तत्रेति। यदि नियतपूर्ववृत्तिमपि

---

1 'शिलायां तु' इति प्रकाशसमतः पाठः। 2 सहचारावच्छिन्ना-क
3 नातिव्याप्तिः—ख
4 न वा बीजत्वस्य कार्याभावव्याप्यस्य जनकत्वासंभवादसंभव.—ग
5 बीजावाद्यवच्छिन्नस्य जनकत्वा 6 एवं चाग्रे—ख
7 तज्जन्याभावा›-ख तज्जन्यकार्याभाव.—ग

प्रकाशः

[1]कालीनसंबन्धो द्वययेव कारणता समवायश्च । तदवच्छिन्नाङ्कुराभावश्च इतरावच्छिन्ने स्वसम[2]वायिनि बीजादौ च । [3]द्वयं च कारणमेव । न चैवं कारणतागर्भत्वेनात्माश्रयः [4]संबन्धत्वेन तज्ज्ञानादिति ।

[5]तच्चिन्त्यम् । विषयविषयिभावसंबन्धस्याप्युत्पत्तिकालीनतया [6]तदवच्छिन्नकार्याभावव्याप्यत्वस्येतराभावावच्छेद्यतया वह्न्यादेरनुमिति[7]जनकत्वापत्तिः, चरमकारणे कार्यत्वाभावादव्याप्तिश्चेति ।

वस्तुतस्तु बीजादङ्कुर इति प्रतीतिबलादवध्यवधि[8] मद्भावलक्षणस्वरूपसंबन्धविशेष एव विलक्षणकार्यकारणयोः । तत्संबन्धावच्छिन्नकार्याभावश्च कारणे इतराभावावच्छेदेन । स्वरूपा[9]योग्ये तु तादृशसंबधा[10]भावात् तदवच्छिन्नकार्याभावः[10] स्वासाधारणशिलात्वादिधर्मावच्छेद्यः । एवं च तादृशसंबन्धावच्छिन्नकार्याभावव्याप्यत्वं यत्र [11]स्वासाधारणधर्मेतरावच्छिन्नं तदवच्छिन्नं कारणमित्यत्र तात्पर्यम् । [12]चरमकारणे तु यद्यपीतराभावो नावच्छेदकः, तथाप्युत्पादकाल एव तथा, उत्पादानन्तरमेव कार्योत्पादेन तदा कार्याभावात् ।

तर्कचूडामणिः

विवक्षितमिति नातिव्याप्तिरिति ब्रूयात् तदा दोषान्तरमाह—**चरमेति** ।

नन्वेवमपि चरमकारणाव्याप्तितादवस्थ्यमित्यत आह—**एवं चेति** । **चरमकारण इति** । तादृशपरामर्शादिनिष्ठकार्याभाव[12]व्याप्तावित्यर्थः ।

ननु परामर्शत्वादिनिष्ठकार्याभावव्याप्तौ स्वाश्रयोत्पादकालो नावच्छेदकः, तादृशयावदुत्पादकालस्यावच्छेदकत्वाप्रसिद्धेः । यत्किंचिदुत्पादकालस्य स्थितिक्षणवृत्ति-

---

1 कालीनः संबन्धो-ख
2 स्वसम-क
3 द्वयं-ख
4 संबन्धेन - क
5 अत्रेदं चिन्त्यम्-ख, ग
6 तदवच्छिन्नाभावस्य-क
7 जनकतापत्तेः-क
8 मत्तालक्षण-क
9 योग्ये-क
10 भावात्-क
11 साधारण-क
12 च-ख

यद्वा अन्यासमवधानावच्छिन्नकार्यानुत्पत्तिव्याप्यत्वं कारणत्वम् ।

प्रकाशः

यद्वा चरमकारणे परामर्शादावपि [1]प्रतिबन्धकाभावविलम्बेन कार्योत्पत्तिविलम्बात् इतराभावावच्छिन्नत्वमेव । [2]यदि च क्वचिन्न तथात्वम् , [3]तदा तत्सजातीयत्वं लक्षणं बोध्यम् । [4]न चारण्यस्यदण्डे तद्दण्डत्वादिनैव तदवच्छेदात् अव्याप्तिरिति वाच्यम् । दण्डत्वमादाय लक्षणसत्त्वात् । एवं च घटकारणज्ञानादावपि [5]तत्संबन्धावच्छिन्न-कार्याभावव्याप्यत्वं दण्डाद्यभावावच्छेद्यमेवेति न तत्राव्याप्तिरिति ध्येयम् ।

ननु दण्डरूपापावतिप्रसङ्ग इति चेत्—न । दण्डात् घट इतिवत् दण्डरूपात् घट इति प्रतीत्यभावेन तादृश[5]संबन्धावच्छिन्न[6]कार्याभावसंबन्धस्य दण्डरूपत्वेनैवावच्छेदात् । अत एव व्योमादावपि न घटकारणत्वप्रसङ्गः । अत्र च स्वभाव एव शरणम् । एवं चानन्यथासिद्धत्वेन विशेषणीयम् , अतो नोक्तदोष[6] इति कस्यचित् व्याख्यानमनादेयम् । उक्तेनैवोपपत्तेरिति ।

अन्यासमवधानावच्छिन्नेति । अन्यासमवधानावच्छिन्नं कार्यानुत्पत्तिव्याप्यत्वं

तर्कचूडामणिः

परामर्शेऽपि सत्त्वेन तन्निष्ठपरामर्शत्वे स्वाश्रयोत्पत्तिकालीने कार्याभावव्याप्यताविरहादित्य-रुचेराह—**यद्वेति** । **क्वचिदिति** । स्वतस्सिद्धप्रतिबन्धकाभावस्थल इत्यर्थः । **तदिति** । तस्यापि तादृशकार्याभावव्याप्यपरामर्शत्वावच्छिन्नत्वादिति भावः । **दण्ड इति** । तत्त्व इत्यर्थः । **तदिति** । तद्दण्डत्वत्वेति....दण्डात् घट इत्यादिप्रतीतेर्हेतु हेतुमद्भावविषयत्वेनातिरिक्तसंबन्धे मानाभावः । भावे वा तादृशसंबन्धवत्त्वं लक्षणमस्तु, कृतं तद्घटिताभावगर्भतल्लक्षणेनेति दूषणमत्र द्रष्टव्यम् ।

---

1 प्रतिबन्धकाभावरूपविलम्बेन-ख
2 यत्रच-क
3 तत्र-क
4 नारण्यकदण्डे-ख
5 तादृश-ख
6 दोषप्रसङ्गः-ख

रासभादेः स्वत एव कार्याभावव्याप्यता, अन्यासमवधानस्य वैयर्थ्येनानवच्छेदकत्वात्। अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं वा तत्त्वम्।

प्रकाशः

यस्य तदवच्छिन्नत्वं [1]कारणत्वमित्यर्थः[1] । उत्पत्तिगर्भतया पूर्वस्माद्भेदः । अत्रापि पूर्वोक्तसंबन्धविशेषमादाय उत्पत्त्यभावव्याप्यत्वं बोध्यम् । उत्पत्तिश्च स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसंबन्धः । ध्वंसत्वं च प्रागभावप्रतियोग्यभावत्वम् । प्रागभावत्वं च न प्रतियोगिजनकाभावत्वम्, येनान्योन्याश्रयः स्यात् । किं तु गन्धानाधारसमयानाधाराभावत्वम् । शेषं पूर्ववत् । **अनन्यथासिद्धेति** । घटजातीयं प्रतिरासभजातीयमनन्यथासिद्धमिति तत्रातिव्याप्तिवारणाय नियतपदम् ।

ननु नियतत्वं कालमपेक्ष्य देशमपेक्ष्य वा । नाद्यः, रासभेऽपि गतत्वात् । [2]घटपटादिपूर्वकाले रासभजातीयस्य नियमेन सत्त्वात् । नान्त्यः, साक्षात्संबन्धेन [3]अदृष्टादेः घटादि[3] [4]देशमपेक्ष्यानियमात् । साक्षात्परम्परासाधारणसंबन्धमात्रविवक्षायां रासभेऽपि घटादिदेशनियतत्वेनातिप्रसङ्गादिति । मैवम् । साक्षात्परम्परासाधारणैकजातीयसंबन्धेन देशनियतत्वस्य विवक्षितत्वात् । रासभादेरेकजातीयसंबन्धेन [5]घटादिदेशनियतत्वाभावात् । घटादावेकजातीयसंबन्धेनादृष्टादेर्नियतत्वादिति वदन्ति ।

तर्कचूडामणिः

यथाश्रुते पूर्वोक्तदोषादाह- **अन्येति** । ननु कारणाधीनसमयसंबन्धस्योत्पत्तितया आत्माश्रय इत्यत आह—**उत्पत्तिश्चेति** । स्वसमानकालीनत्वं स्वाधिकरणकालवृत्तित्वम् । द्वितीयादिक्षणश्च तादृशशब्दादिध्वंसाधिकरणमेवेति नातिव्याप्तिरिति भावः । ननु ध्वंसत्वमुत्पत्तिमदभावत्वमित्युत्पत्तिलक्षणे तत्प्रवेशे आत्माश्रय इत्यत आह—**ध्वंसत्वमिति** । तादृशसमयानाधारत्वं घटादावपीत्यत आह—**अभावत्वमिति** । यदि च घटादेरपि ध्वंसप्रागभावत्वे(?)लक्ष्यत्वम्, तदा वक्ष्यमाणं प्रयोजनं द्रष्टव्यम् ।

---

1 इत्यर्थः—ख
2 घटादि—क
3 अदृष्टादिघटादि—क
4 देशापेक्षयानियमात् ग
5 घटादिनियत क

प्रकाशः

[1]अत्रेदं चिन्त्यम्—[2]कियत्सु घटेषु रासभस्याप्येकजातीयसंबन्धेन [3]देशनियत[3]त्वादति-प्रसङ्गः । कार्यतावच्छेदकावच्छेदेनादृष्टस्याप्यतथात्वम् , द्रव्यगुणाद्यनेकार्थे एकजातीय तत्संबन्धाभावादिति ।

[4]भक्षितबीजसंग्रहाय जातीयेति । जातिपदं च [5]कार्यपूर्व[5]वर्तितावच्छेदकधर्मपरम् । अतो [6]नाकाशाद्येकव्यक्तिकारणेऽव्याप्तिः । पूर्ववर्तित्वं च प्रागभावावच्छिन्नसमयवृत्तित्वम् । प्रागभावश्च न विशेषणं, येन प्रागभावेऽव्याप्तिः किं तु तदुपलक्षितकालविशेषवृत्तित्वम् । [7]तच्च तत्राप्यस्ति । कालस्य च स्थूलस्यैवाधिकरणतया हेतुत्वम् । [8]तस्य च पूर्वक्षण-वृत्तित्वमस्त्येव, न त्वधिकरणक्षणस्येति न तदव्याप्तिर्दोषः । प्रागभावत्वं च न प्रतियोगि-जनकाभावत्वम् , अन्योन्याश्रयात् । नापि विनाश्यभावत्वम् । विनाशस्य प्रागभावगर्भ-तया अन्योन्याश्रयात् । उत्पतिगर्भतया तन्निर्वचने च उत्पतेः स्वसमानकालीनपदार्थ-प्रतियोगिकध्वंसानाधारसमयसंबन्धरूपत्वेऽन्योन्याश्रयात् । किं तु गन्धानाधारसमयानाधारा भावत्वम् ।

ननु ध्वंसप्रागभावानात्मनि घटादावव्याप्तिः । न चात्र तदलक्ष्यमेवेति वाच्यम् ।

तर्कचूडामणिः

कार्यतेति । रासभे तद्घटत्वावच्छिन्नहेतुत्वापत्तिरित्यपि द्रष्टव्यम् ।

अत इति । हेतुवृत्तियर्त्किंचिद्धर्ममादाय नातिव्याप्तिरित्यपि बोध्यम् । कालस्य चेति । इदं तु वस्तुगतिमभिप्रेत्य । वस्तुतः क्षणस्यापि क्षणवृत्तित्वमेव । इदानीमयं क्षण इति प्रतीत्या प्रमेयत्ववत् स्ववृत्तित्वाभ्युपगमात् । अन्यच्च प्रलयानुमाने व्यक्तम् । विनाशस्य—तत्त्वंस्येत्यर्थः । न चोत्पत्तिमदभावत्वं तदित्याह—उत्पत्तीति ।

---

1 चिन्त्यमेतत्–क
2 कियत्स्वेव–क
3 नियत–क
4 तत्संग्रहाय–क
5 पूर्व–क
6 नाकाशाद्येकवृत्तिकारणत्वे–ग
7 तत्तत्राप्यस्ति–क
8 तस्य चाभावत्वम् –क

प्रकाशः

न हि प्रागभावलक्षणमिह प्रकृतम्। किं तु [1]कारणत्वलक्षणम्। तच्च सामान्यत एव लक्ष्यम्, तथैवोपक्रमात्। तथा च ध्वंसप्रागभावस्यालक्ष्यत्वे ध्वंसकारणसाधारणं तत् क्षणं न स्यादिति चेत्—न। अभावपदस्य भावाभावसाधारण[2]विरोधिपरत्वात्। यद्यप्येवं तद्वैयर्थ्यं, व्यावर्त्याभावात्। तथापि तत्प्रतियोगिकाभावलाभार्थमभावपदम्। न हि प्रागभावसामान्यगर्भं कारणत्वम्। किं तु तत्प्रतियोगिकप्रागभावत्वाच्छिन्नसमय[3]वृत्तित्वं ताकारणत्वम्। तथा च तादृशकालावृत्तिस्तदभावः तत्प्रागभाव इति पर्यवस्यति। न च तादृशसमयाप्रसिद्धिः, [4]गन्धत्वं स्वाधिकरणानधिकरणसमयवृत्ति कादाचित्कमात्रवृत्ति-जातित्वात् चैत्रत्ववदित्यनुमानात्तत्सिद्धेः।

ननु सिध्यतु गन्धानाधारसमयः, तथापि प्रागभावस्य कथं तदनधिकरणत्वं ग्राह्यम्। न हि तत्र प्रत्यक्षमागमो वा संभवति। अनुमानं तु [5]संभवेत्। तच्च प्रसिद्ध्युत्तरम्। तथा चानुमानप्रवृत्तौ प्रागभावत्वेन धीः तस्यां चानुमानप्रवृत्तिरि[6]त्यन्योन्याश्राय इति चेत्—न। गन्धानाधारसमयो नास्तीति निर्णयवतो मीमांसकस्य भविष्यतीति बुद्धेर्निरुक्तातिरिक्त[7]रूपेण प्रागभावस्यावश्यं तदबुद्धिविषयत्वात् तेन रूपेण[7] तदबुद्धिविषयत्वेन [8]वा उपस्थितस्य

तर्कचूडामणिः

तदभाव इति। तद्विरोधीत्यर्थः।

गन्धत्वमिति। समयपदं स्वरूपनिर्वचनपरम्, न तु तादृशदिशार्थान्तरवारणाय। तत्तादृशसमयासिद्धौ दिशस्तादृक्त्वासिद्धेः। द्रव्यत्वध्वंसत्वयोर्व्यभिचारवारणाय मात्र-जातिपदे।

अनुमानं त्विति। प्रागभावत्वं महाप्रलयानाधाराधेयम् प्रागभावमात्रवृत्तित्वात्

1 कारणलक्षणम्-क 2 विरोधित्वपरत्वात् क
3 वर्तित्वम् क 4 गन्धधर्मताधिकरणा क,-ख
5 संभवति। तच्च सिद्ध्युत्तरम्-ख 6 इत्यन्योन्याश्रयात् इति चेत् तादृशनिर्णयवतोऽपि-क
7 रूपेण-क 8 च

प्रकाश.

प्रागभावस्य लिङ्गाभासादिनापि तदृशसमयानाराधत्वानुमितिसंभवात् गन्धस्यैव दृष्टान्तत्वाच्च ।

यद्वा कादाचित्काभावत्वेनैवोपस्थितस्य तस्य तदनुमानम् । [1]ध्वंसे तु बाधादेवाननुमानम्[2] । तदनवतारे तदंशे भ्रमत्वेऽपि क्षत्यभावाच्च[3] ।

ननु गन्धानाधारसमयो नास्तीति निर्णयवतो मीमांसकस्य इष्टसाधनतालिङ्गककार्यताज्ञानेन प्रवृत्तिदर्शनात् । [4]नैतत्प्रागभावत्वगर्भं कारणत्वम् । किं च कारणत्वबोधक[5]शब्दादिरेवैवं महाप्रलयकाले प्रमाणं स्यात् तस्य [6]तद्घटितत्वात् । तथा च तदनभ्युपगमोऽपि तस्य व्याहन्येतेति चेत् - न । गन्धानाधारेत्यादिना भविष्यतीतिप्रतीति[7]निर्वाहप्रयोजकस्य [8]प्रागभाववस्योपलक्षणत्वात् । अत एव मीमांसकं प्रति जनकत्वघटितस्य लिङ्गस्य नैयायिकेनोक्तावपि नान्यतरासिद्ध्यादिदोष इति वदन्ति । तच्चिन्त्यम् । तस्यैवानुगतस्य निर्वक्तुमशक्यत्वात् । न चाखण्डमेव प्रागभावत्वं तेनोपलक्षितमिति वाच्यम् । उपाधेरखण्डत्वे जात्यपलापापतेः । जातेश्चाभावेऽनभ्युपगमात् ।

तर्कचूडामणिः

अतीतप्रागभावत्ववदित्यर्थः । **लिङ्गेति** । तादृशाभावो महाप्रलयानाधारः कादाचित्कत्वादित्यनुमानेनेत्यर्थः । ननु ध्वंसे व्यभिचारस्फुरणवेलायामपि प्रागभावत्वबुद्धेर्नायं प्रकार इत्यत आह—**गन्धस्येति** । तथा च ध्वंसप्रतियोगित्वं लिङ्गमिति भावः । ननु प्रागभावस्योक्तरूपादन्यद्रूपं दुर्वचम् । सुवचत्वे तदेव प्रकृते कारणतालक्षणे प्रवेश्यताम्, किं तद्ग्रहाधीनग्रहेणोक्तरूपेण । यदपि च तदवुदिविषयदेनेयादि तदपि न । भविष्यतीति बुद्धिविषयस्तादृश समयावतिरियनुमाने सति तादृशबुद्धिविषयभाविसमयस्यापि पक्षतत्र बाधापतेरियपरितोषादाह—**यद्वेति** । **ध्वंसेति** । अंशतो बाधस्य तदंशमात्रानुमितिप्रतिबन्धकवादिति भावः ।

---

1 ध्वंसांशे—ख, ग
2 अननुमानात्—ख ग
3 भावात्—ख
4 न तत्—ख
5 शब्दादिरेव महाप्रलये—ख
6 तद्भावात्—ग
7 निर्वाहादिप्र—क
8 गन्धप्रागभावस्योपलक्षणात्—क

प्रकाशः

वस्तुतस्तु नेदं कारणत्वं प्रवृत्त्यनुकूलम्। तथा च [1]स्वमते लक्ष्यतावच्छेदकतया कारणपदप्रवृत्तिनिमित्ततया वा निरुक्तं [2]यस्मिन् सतीत्यादिना निरुक्तं क्षेमसाधारणतत्साध्यकत्व. ज्ञानमेव प्रवर्तकम्। तदेव विध्यर्थः। अन्यथा प्रागभावस्य [3]प्रागभावाभावे तत्पूर्ववर्तित्वाभावेन तद्घटितजनकत्वाभावात् दुःखप्रागभावार्थितया प्रायश्चित्तादौ प्रवृत्त्यभावापत्तेरित्यादि विधौ वक्ष्यते। तथा च नोक्तदोषः।

एतेन गन्धानाधारगर्भवन्नीलानाधार[4]गर्भतयापि तन्निर्वचनात् तद्गर्भं कारणत्वमपि भिद्येत। तथा च विनिगमकाभावादुभय[5]गर्भेष्टसाधनताज्ञानस्य [6]प्रवर्तकतायां प्रवृत्त्यननुगम इत्यपास्तम्। निरुक्तस्य [7]प्रवर्तकतानभ्युपगमात्।

यत्तु आकाशपदात् कदाचित् शब्दाश्रयत्वेन कदाचिदष्टद्रव्याति[8]रिक्तद्रव्यत्वेनेतिवत् कदाचिन्नीलाद्यनाधारत्वेनापि समयविशेषोपलक्षणान्न काचित् क्षतिः। तत्समय[9]विशेषावृत्त्यभावावच्छिन्नसमयसत्त्वस्यैव हेतुत्वरूपतया च न प्रवृत्त्यननुगम इति निरुक्तमेव प्रवृत्त्यनुकूलमिति।

तर्कचूडामणिः

लक्ष्यतेति। प्रागुक्तं तु लक्षणमिति भावः। कस्तर्हीत्युपक्रमानुरोधादाच— कारणेति। नन्वेवमपि प्रवर्तकज्ञानविषयसाधनत्वानिर्वचने प्रवृत्त्यनुपपत्तिरियत आह— यस्मिन्निति। अन्यथेति। इष्टसाधनताज्ञानस्य प्रवर्तकत्व इत्यर्थः।

---

1 स्वमतेन–क
2 लक्षणं तु यस्मिन्–ख
3 प्रागभावाभावेन–ख
4 गर्भतया चैतन्नि–ख
5 गर्भस्य साधन–क
6 प्रवर्तकतया–क
7 प्रवर्तकतयान–क
8 रिक्तत्वेनेति–क
9 विशेषप्रवृ–क

प्रकाशः

तच्चिन्त्यम् । [1]तत्समयानभ्युपगन्तुरेतज्ज्ञानं विनैवान्यज्ञानादेव प्रवृत्तिरित्यननुगमस्यैवमप्यपरिहारात् [2]प्रायश्चित्ते प्रवृत्त्यनुपपत्तेश्च[3] । अत एव [4]तत्समयाघटितस्यानुगतस्य प्रागभावत्वस्य निर्वक्तुं शक्यत्वेऽपि न प्रवृत्त्यनुकूलत्वमिति ध्येयम् ।

यत्तु गन्धानाधारसमयस्य महाप्रलयत्वे मानाभावः । युगपन्नाशे मानाभावात् । तथा च यावद्गन्धनाशानन्तरमपि वस्त्वन्तरसत्त्वसंभावनया तत्प्रागभावस्य गन्धानाधारसमयानाधारत्वसंशयेन [5]तत्कारणे तद्धर्मकारणलक्षणाव्याप्तिसंदेहः । एवं च व्यर्थविशेषणातासंदेहात् तद्वारणाय विशेषणमप्यदेयमिति[6] ।

तन्न । यावद्गन्धनाशे [7]ह्यदृष्टाभावात् । अन्यथा संयोगविभागयोरन्योन्यनाश्यतया अन्यतरावस्थितौ [8]सर्वमुक्त्यनुपपत्तेः । तथा च सर्वादृष्टाभावात् कार्याभावो [9]वाच्य इति युगपदेव सर्वनाश इत्याहुः । न चाकाशादेरवृत्तितया [10]पूर्वकालवृत्तित्वाभावादव्याप्तिरिति वाच्यम् । [11]वृत्तिपदेन समवधान[11]स्योक्तत्वात् ।

वस्तुतः कालस्य [12]जगदाधारतया तत्रापि तद्वृत्तिः । ननु द्रव्यत्वेन रूपेण दण्डरासभादेर्नियतपूर्ववर्तित्वसत्त्वात् कारणत्वं स्यादिति चेत्—न । तेन रूपेण तस्यान्यथा—

तर्कचूडामणिः

अत एवेति । प्रायश्चित्तप्रवृत्त्यनुपपत्तेरित्यर्थः ।

यथाश्रुतेनैव निर्वाहे समवधानपदवैयर्थ्यमेवेत्याशयेनाह—**वस्तुत इति** । नन्वावश्यकदण्डादिनैव कार्यसंभवे तत्सहभावनियतसामग्री अन्यथासिद्धेति तत्र लक्षणस्याव्याप्तिमाशङ्क्य किं सामग्रीपदेन सकलकारणाधिकरणो विवक्षितः, कारणमेलनं वा । आद्यस्याहेतुत्वमिष्टमित्याह—

1 तत्समाधानाभ्युप–क
2 प्रायश्चित्तप्रवृ–ग
3 पपत्ते–क
4 तत्समयघटित–क
5 तत्तत्कारणेऽपि–क
6 अप्यनुपादेयमेवेति—क
7 ऽप्यदृष्टा–ख
8 सर्वव्यक्त्यभावानुपपत्तेः–ख
9 प्यार्थ–क
10 पूर्वक्षण–ख
11 समवधान–क
12 सर्वाधारतया–क

यद्वा अन्यासमवधानावच्छिन्नकार्यानुत्पत्तिव्याप्यत्वं कारणत्वम् ; रासभादेः स्वत एव कार्याभावव्याप्यतया अन्यासमवधानस्य वैयर्थ्येनानवच्छेदकत्वात् । अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं वा तत्त्वम् ।

प्रकाशः

सिद्धेर्वाच्यत्वात् । सामग्री च न कारणम्, [1]क्षणविशेषत्वात् । कालोपाधेश्चाधिकरणत्वेनैव हेतुत्वात् । न च कारणमेलकरूपायां तस्यामतिप्रसङ्गः । दण्डादीनां कारणत्वस्येष्टत्वात् । मेलकस्यातिरिक्तस्यानभ्युपगमात् । अभ्युपगमे वा दण्डरूपवदन्यथासिद्धत्वात् । परस्पर[2]प्रत्यासत्तिरूपस्येष्टत्वात् ।

केचित्तु स्वरूपसंबन्धविशेषः कारणता प्रतियोगित्वादिवत्, तत्परिचायक एवायं धर्मविशेष उक्त इत्याहुः ।

ननु कारणत्वादन्येन रूपेण सिद्ध्यभावो नानन्यथासिद्धत्वम्, अन्योन्याश्रयात् । सिद्धिपदस्योत्पत्तिपरतायां नित्यमात्रेऽतिव्याप्तिः[3] । ज्ञप्तिपरत्वेऽप्यसंभवः, [4]हेतोरपि प्रमेयत्वा-

---

तर्कचूडामणिः

सामग्रीति । हेतुत्वादिति । सकलहेत्वधिकरणक्षणश्च न कार्याधिकरणमिति भावः । द्वितीयेऽपि किं [5]तन्मेलकस्वरूपम्, अन्यद्वा । आद्ये—दण्डादीनामिति । ननु तस्य पदार्थान्तरत्वानभ्युपगमेऽपि एककार्यजनकत्वरूपं दर्शपूर्णमासयोरिवानुभवसिद्धमपह्नवानर्हमित्यत आह—**अभ्युपगम इति ।** यदि च कारणानामन्योन्यसंबन्धः सामग्रीत्वेन विवक्षितः, तदा तत्रोक्तलक्षणसत्त्वान्नाव्याप्तिरित्याह—**परस्परेति ।**

---

1 लक्षणविशेषत्वात्—क
2 प्रत्यासत्तित्वस्य—ख
3 व्याप्तिः—ख
4 हेतावपि—ख
5 तन्मेलन—क

अन्यथासिद्धत्वं च त्रिधा। येन सहैव यस्य यं प्रति पूर्ववर्तित्व-मवगम्यते, यथा घटं प्रति दण्डरूपस्य।

प्रकाशः

दिना ज्ञप्तेरिति योगार्थमपहाय रूढमन्यथा[1]सिद्धपदार्थमाह—**अन्यथेति**। यद्यपि कुसुमाञ्जलिप्रकाशे [2]पञ्चवान्यथासिद्धिरुक्ता, तथाप्यवच्छेदकजनकजनकयो[3]रत्रैवान्तर्भावान्न-तत्संग्रहाय प्रकारद्वयमुक्तम्। अत एव कुसुमाञ्जलिमकरन्दे तथैव विभावितमस्माभिरिति। **येन सहैवेति**। तेन तदन्यथासिद्धमिति शेषः।

ननु शब्दादीनां दण्डपूर्ववर्तित्वग्रहं विनापि तद्रूपपूर्ववर्तित्वग्रहसंभवात् नियमोऽसिद्धः। न च प्रत्यक्षेणेति विशेषणीयम्, अतीन्द्रियेऽन्यथासिद्धेऽव्याप्तेः। [4]नियमाविवक्षायां दण्डरूपेणैव दण्डस्यान्यथा[5]सिद्ध्यापत्तेरिति चेत्--न। रूपत्वमात्रस्यातिप्रसक्ततया दण्ड-रूपत्वेनैव दण्डपूर्ववर्तित्वग्रहो वाच्यः। [6]तत्र च साहित्यनियमात्। न चैवं द्रव्यत्वादेरति-प्रसक्ततया दण्डत्वेनैव दण्डस्य पूर्ववर्तित्वग्रहात् दण्डत्वेनैव दण्डस्यान्यथासिद्धिरस्त्विति वाच्यम्। येन पृथगन्वयव्यतिरेकवता सहेत्यर्थात्।

[7]अत्रापृथगन्वयादिमत इत्यपि यस्येति विशेषणं देयम्। तेन दण्डेन दण्डसंयोगस्य नान्यथासिद्धिः। एतद्विशेषणमहिम्नैव यत्रोभयोरुभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानं तत्रैकेनापर[8]स्यान्यथासिद्धिः यथोद्भूतरूपतेजसोरित्येके। यत्रोभयविशेषणावच्छेदेनैवान्वयाद्यनु-विधानं तद्भिन्नत्वेन विशेषणान्न तादृशस्थलेऽतिप्रसङ्ग इत्यन्ये।

तर्कचूडामणिः

रूढमिति। पारिभाषिकमित्यर्थः। **शेष इति**। अन्यथासिद्धपदमनुषज्यते। तत् तेनेति पदद्वयापेक्षया शेष इत्युक्तम्।

---

1 सिद्धि—ख
2 पञ्चान्यथा—क
3 अत्रैव प्रवेशात्तत्संग्रहाय न पृथक्प्रकार—ख
4 नियमविवक्षायां—ख
5 सिद्धत्वापत्तेरिति—ख
6 अत्र तत्साहित्य—क
7 अत्र पृथगन्वयादिरहितस्येत्यपि—क
तत्र साहित्य—ग
8 स्य नान्यथासिद्धिः—ग

प्रकाशः

कुम्भकार[1]पिताप्यत्रवान्तर्भवति । कुम्भकारत्वेन तदनन्यथासिद्धत्वैष्येष्टत्वात् कुम्भकार-पितृवेनत्वे तदन्यथासिद्धत्वं वाच्यम् । तत्र तत्साहित्यनियमात् ।

नन्वेवयुद्भूतरूपतेजसोरिव [2]दृढत्वदण्डयोरपि नैकेनापरस्यान्यथासिद्धिः स्यात् । उभयोरुभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानात् । न च दृढत्वस्य चक्रभ्रमिजनकत्वस्यान्वया-द्यनुनिधानमेव[3] नेति वाच्यम् । तथा सति दण्डत्वेनैव हेतुतापत्तौ दृढत्वस्यावच्छेदकतापि न स्यात् । किं च दण्डत्वेन दण्डस्य [4]दण्डत्वत्वेन दण्डत्वस्यान्वयाद्यनुविधानमिति उभयोरुभयविशेषणावच्छेदेनैवानुविधानमिति नैकेनापरस्यान्यथासिद्धिः स्यात् ।

अपि च कुम्भकारपितृत्वेनान्यथासिद्धस्यापि कुम्भकारत्वेनेव दण्डरूपत्वेनान्यथा-सिद्धस्यापि [5]रूपत्वेनानन्यथासिद्धत्वमस्तु । ननु तदतिप्रसक्तमिति चेत् किमतिप्रसक्तत्व-मप्यपरान्यथासिद्धिः । तथा चानन्यथासिद्धत्वनियतपूर्ववर्तित्वयोरप्रतिक्षेपे किं तेन । किं च फलानुपहितवृत्तित्वस्यातिप्रसक्तत्वस्य दण्डादिसाधारणत्वात् अतादृशस्य [6]चाभावात् । न च [7]फलानुपहितनित्यवृत्तित्वेन तथात्वम् । रूपत्वेन नित्यरूपस्यापि घटजनकत्वाविरोधात् उक्तरूपयोरप्रतिक्षेपात् । जन्यरूपत्वेन वा हेतुत्वमस्तु । न च तेन रूपेणान्यत्र क्लृप्तेत्यत्रान्तर्भवतीति वाच्यम् । तर्हि दण्डरूपत्वेनापि तथास्तु, किं [8]निरुक्तान्यथा-सिद्ध्येति चित्त्यम् ।

तर्कचूडामणिः

अतादृशस्येति । स्वरूपायोग्यवृत्तित्वस्येत्यर्थः ।

---

1 पिता त्वत्रैव–क
2 दण्डदृढत्वयोः–क
3 एवेति वाच्यम्–ख
4 दण्डेन–ग
5 रूपत्वेनान्यथा–ग
6 भावात्–क
7 फलानुविहित–क
8 उक्तान्यथा–ख, ग

अन्यं प्रति पूर्ववर्तित्वे ज्ञात एव यं प्रति यस्य पूर्ववर्तित्वमवगम्यते, यथा शब्दं प्रति पूर्ववर्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य,

---

प्रकाशः

अन्यं प्रतीति । ननु शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति गुणत्वादित्यनेनाकाशसिद्धौ शब्दपूर्ववर्तितामज्ञात्वापि ज्ञानादिकं प्रति पूर्ववर्तित्वं तस्य ज्ञायत एवेति चेत् — न [1]तेनापि विपक्षबाधकतया शब्दकारणतामुपजीव्यैवाकाश[2]सिद्धेरित्याहुः । न चैवं संयोगादिकमपि प्रत्याकाशस्यान्यथासिद्धत्वप्रसङ्गः आकाशत्वेनेष्टत्वात् । द्रव्यत्वेन शब्दपूर्ववर्तितामज्ञात्वापि तत्पूर्ववर्तिताग्रहात् ।

नन्वेवं यागादेरपूर्वे अन्यथासिद्ध्यापत्तिः, स्वर्गं प्रति पूर्ववर्तित्वे ज्ञात एव [3]तस्य तं प्रति पूर्ववर्तित्वग्रहादिति चेत्—न । साक्षादिति पूर्ववर्तित्वविशेषणादित्याहुः । तत्पूर्ववर्तित्वानुपपादकं यस्य पूर्ववर्तित्वं गृह्यत इत्यर्थादित्यन्ये[4] । न च [5]परत्वादिपूर्ववृत्तित्व-ग्रहानन्तरमन्यकार्ये दि[6]कालयोस्तद्ग्रह इत्यन्यथासिद्ध्यापत्तिः[6], तद्ग्रहं विनाप्यधिकरणत्वेन कार्यमात्रपूर्ववृत्तित्वग्रहात् । कुम्भकारपितुरप्यत्रान्तर्भावः । ननु कुम्भकारपितृत्वेन तथात्वेऽपि चैत्रत्वादिना तस्यानन्यथा[7]सिद्धत्वमस्त्विति चेत् — तेनापि रूपेण कुम्भकारजनकत्वं ज्ञात्वैव घटं प्रत्यन्वयादिग्रहात् तदानीं तद्देशे तस्यासत्त्वनियमेन कुम्भकारद्वारैव घटनियतपूर्ववर्तित्वग्रहादिति ।

नन्वन्यं प्रति पूर्ववर्तित्वे ज्ञात एवेत्यत्र किं येन केनचित् सर्वेण वा । नाद्यः, दण्डादा-

---

तर्कचूडामणिः

दण्डादाविति । स्वगतरूपपूर्ववर्तित्वग्रहानन्तरं कस्यचित् घटपूर्ववर्तित्वग्रह संभवादिति भावः ।

---

1 तथापि–क
2 सिद्धि–क
3 तस्यान्यं प्रति–ख
4 इत्येके–ख
5 पटादि–ख
6 सिद्धिः–ख
7 सिद्धिरस्तु–

प्रकाशः

वर्तिप्रसङ्गात् । नान्त्यः, शब्दनित्यत्वानित्यत्वसंदेहेऽपि शब्दकारणताभनुपजीव्य शब्दाश्रयत्वेनाकाश[1]सिद्धौ ज्ञानादिपूर्ववर्तित्वग्रहसंभवात् निरुपाधित्वादेरपि विपक्षबाधकत्व-संभवात् ।

वस्तुतः शब्दनित्यत्वनिर्णयवतो मिमांसकस्य एतत्पूर्ववर्तित्वमज्ञात्वैव ज्ञानादि-पूर्व[2]वर्तित्वग्रह इति नियमासिद्धिः । किं च द्रव्यत्वेनैवाकाशस्य संयोग इव ज्ञानत्वेनैव ज्ञानादौ हेतुत्वमस्तु । न च ग्राहकाभावेन तेन रूपेण नियतपूर्ववर्तित्वाग्रह इति वाच्यम् । ग्राह्यसत्त्वे ग्राहकाभावासंभवात् । न च तेन रूपेणान्यत्रेत्यत्रैवान्तर्भवतीति वाच्यम् । तथा सत्याकाशत्वेनापि तथात्वापत्तेः । अपि चैवं [3]शब्दसाक्षात्कारं प्रत्यपि तस्यान्यथासिद्ध्यापत्तिः । न च शब्दपूर्ववर्तित्वमज्ञात्वापि[4] इन्द्रियत्वेन तत्पूर्ववर्तित्वग्रह इति वाच्यम् । श्रोत्रत्वेन तस्याप्यन्यथासिद्ध्यापत्तेः । तस्याकाशघटितत्वात् [5]आकाशस्य च शब्दपूर्ववर्तित्वग्रहं विना [6]सिद्धेरनभ्युपगमात् । अन्यथा ज्ञानेऽपि तस्यान्यथासिद्धत्वं न स्यात् । एवं च पाञ्चभौतिकं शरीरं प्रत्यपि तदन्यथासिद्धं[7] स्यात् ।

किं चेश्वरज्ञानादेः क्षितिपूर्ववर्तित्वे ज्ञात एव घटपूर्ववर्तित्वग्रहात्[8] तत्राप्यन्यथा-सिद्ध्यापत्तिः । न च कार्यमात्रे कर्तृमात्रस्यैकदैव पौर्वापर्यग्रहान्नैवमिति वाच्यम् ।

तर्कचूडामणिः

नन्वप्रयोजकतासंदेहे उपाधेरपि संदेहान्न निरुपाधिसहचारभङ्गप्रसङ्गस्तर्क इत्यत आह— वस्तुत इति । **पाञ्चभौतिकमिति** परमतेन । अन्यथा पृथिवीत्वादेस्तत्र संकरापत्तेः ।

अत्रापीति । [तत्रापीति] । ईश्वरानुमान इत्यर्थः ।

---

1 प्रसिद्धौ–क
2 वर्तित्वाग्रहः–ख
3 शब्दादिसा–ख
4 मज्ञात्वा–क
5 आकाशस्य शब्द–क
6 असिद्धेः–क
7 सिद्धत्वं–क
8 वर्तित्वाग्रहात्—क

अन्यत्र कल्पनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतत्वम् । यथा गन्धवति गन्धानुत्पादात् गन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्तित्व-कल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावादीनामप्यन्यथा-सिद्धत्वम् । एतत्त्रितयव्यतिरेके नियतपूर्ववर्तित्वं कारणत्वम् ।

प्रकाशः

प्रकृतेऽपि[1] कार्यमात्रे [2]विभुमात्रस्यैकदेव पौर्वापर्यग्रहस्य शब्दादिना संभवात् अन्यथासिद्ध्य भावापत्तेः । विभु[2]त्वेन पूर्ववर्तित्वमात्रं गृह्यते न तु जनकत्वमिति चेत्[3]—ततः किम् । न हि जनकत्वगर्भा[4] प्रकृतान्यथासिद्धिः, आत्माश्रयापत्तेः ।

यत्तु अन्यमित्यस्य यमित्यर्थः । तेन यं प्रति पूर्ववर्तित्वे गृहीत एवेत्यर्थः । न च क्षित्यादि तथा । अन्यतमपूर्ववर्तित्व[5]ग्रहणेऽपि तत्संभवात् नियमाभावात् । अत एव [6]परत्वादिनापि न दिक्कालयोरन्यथासिद्धिरिति । तन्न । प्रकृतेऽप्यन्यथा-सिद्ध्यभावापत्तेः । शब्दस्यापि वर्णध्वनिभेदेन नानात्वादन्यतरपूर्ववर्तित्वग्रहेणापि संभवेन नियमाभावात् । तत्र शब्दत्ववदत्राप्यनुगतपक्षतावच्छेदकस्यान्यतमत्वादेः[7] संभवादिति ।

अन्यत्रेति । एतच्च प्रायिकम् । [8]अवश्यं कल्प्यं यत् लघुनियतपूर्ववर्ति तत्समवधाननियतत्वं तत्त्वमित्यत्र तात्पर्यम् । तेन गुणेन दोषाभावस्य महत्त्वेनानेकद्रव्यत्वस्य [9]अन्येषां च गुरूणां पदार्थानामन्यथासिद्धिर्भवति । [10]अत एव पञ्चम्या हेतुत्वाभिधाने[11]

तर्कचूडामणिः

उक्तपक्षे कस्यचिदनन्तर्भावेऽपीति पूर्वोक्तं स्मारयन्नाह—**अन्यतमेति** ।

---

1 प्रकृते—क
2 विभु—ग
3 चेन्न—क
4 गर्भप्रकृतान्यथासिद्धः—क
5 ग्रहेणापि सभवेन—ख
6 परत्वादिना दिक्काल—क
7 त्वादेर्वा विशेषणस्य संभवादिति चिन्त्यम्—ख-ग
8 अवश्यक प्यं—ख
9 एवं गुरूणां—क
10 तत एव—क
11 भिधानत्वे—क

प्रकाशः

आत्माश्रय इत्यपास्तम् । पूर्ववर्तिन इत्यत्रावधौ पञ्चमीत्यन्ये । अत एव रासभादेरपि यथाश्रुतान्यथासिद्ध्यन्तर्भावे अनन्यथासिद्धपदेनैव तद्वारणे नियतपदं व्यर्थमित्यपास्तम् । निरुक्तस्य रासभेऽसत्त्वात् ।

नन्वेवमपि दण्डरूपाकाशादेरप्यत्रैवान्तर्भावे तत्संग्राहकान्यथासिद्धेरानर्थक्यम् । किं [1]चावश्यकल्प्यत्वं नियतपूर्ववर्तित्वमात्रेण कारणतया वा । नाद्यः, गन्धं प्रति रूपविशेष-प्रागभावस्यापि तथात्वेन तेन गन्धप्रागभावान्यथासिद्ध्यापत्तेः । [2]नान्त्यः, आत्मा-श्रयात् । अपि च सहकारिणां परस्परस्य परस्परेण अन्यथासिद्ध्यापत्तिः । द्वयोरप्यवश्य-[3]कल्प्यलघुनियतपूर्ववर्तित्वेन तत्समवधाननियतत्वात् । न च पृथगन्वयाद्यननुविधायित्वे सतीत्यपि [4]विशेषणीयम् । तद्धि पृथगन्वयादिग्रहाविषयत्वं [5]समनियतत्वं वा । नाद्यः, रूपप्रागभावस्यापि शब्दादिना तादृशग्रहाविषयत्वेनातथात्वापत्तेः । नान्त्यः, आलोकतद्रूपादेः ईश्वरज्ञानादेश्चैवमपि परस्परमन्यथासिद्ध्यापत्तेः[6] । एतेन अवश्यकल्प्यपूर्ववर्तिन एव कार्यसंभवे तन्नियतसहभूतत्वमित्यर्थः । पञ्चमी [7]चावधौ न च हेतुतायामित्यपास्तम् इति चिन्त्यम् ।

तर्क चूडामणिः

कारणेषु हेतुत्वादन्यदवधित्वं नास्तीत्यनुशयादाह — **अन्य इति** । **असत्त्वादिति** । तत्समवधाननियतत्वस्य तत्राभावादिति भावः ।

तथात्वेनेति । पूर्ववर्तित्वेनावश्यकत्वादित्यर्थः । [7]**अतथात्वापत्तेः** — अन्यथा सिद्ध्यभावापत्तेः । गुरुमतानुसारेण शङ्कते — **नन्विति** । स्वमतेन परिहरति--

1 चात्र कल्प्यत्वं — क
2 न द्वितीयः — ख
3 कल्प्यनियत — क
4 विशेषणम् — ख ग
5 तत्सम — क
6 सिद्ध्यापत्तिः — ख
7 चावधित्वे ननु — ख, ग

यागापूर्वयोस्तु यागापूर्ववर्तित्वेऽवगते, न त्ववगम्यमाने । यत्र जन्यस्य पूर्ववर्तित्वेऽवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः ।

यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगतिः तत्र तद्द्वारा तस्य जनकत्वमेव । दण्डसंयोगभ्रमणयोस्तु युगपदेव पूर्वभावित्वग्रहः । स्वस्वानन्तरोत्पत्तिकसमवधाने सत्यपि यस्याभावात् कार्यं न जायये, सति च जायते, तज्जातीयं प्रति तदनन्यथासिद्धम् ।

प्रकाशः

ननु येन सहैवेत्यन्यथासिद्धिर्यागेऽप्यस्तीत्यत आह—यागेति । अपूर्वानुपस्थितावपि विधिना यागकरणत्वबोधनात् न तु तेन सहेत्यर्थः । तदेवाह—[1]न त्ववगम्यमान इति । नन्वेवमपूर्वेण यागवत् [2]कुलालपिताप्यन्यथासिद्धो न स्यादित्यत आह—यत्रेति । कुलालं प्रति पूर्ववर्तित्वे ज्ञाते एव घटं [3]प्रत्यपि कुलालपितृत्वेन पूर्ववर्तित्वग्रहात् [4]तेन सोऽन्यथासिद्ध इत्यर्थः ।

नन्वेवं कुलालपितृवत् यागोऽप्यन्यथासिद्धः स्यादित्यत आह—यत्र चेति । पूर्वोक्तरीत्या [5]तत्रोक्तान्यथासिद्धेरभावादिति भावः । नन्वेवं चक्रभ्रमणेन दण्डसंयोगस्यापि कुलालपितृवदन्यथासिद्धिः स्यात्, [6]अत आह—दण्डेति । तत्र [7]द्वयोरपि समवधान-

---

तर्कचूडामणिः

अपूर्वेति ।

नन्वन्यथासिद्धौ चोदितायां जनकत्वसाधनमयुक्तमेवेत्यत आह—पूर्वेति ।

---

1 न चाव--ख
2 कुलालपितान्यथा-ख
कुलालेन पितान्यथा-ग
3 प्रति-ख
नान्यथा-क
5 तत्रान्यथा-क
6 इत्यतः-ख
7 द्वयोरपि संभवेन-क

अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वमित्यन्ये । तन्न। ईश्वर-तद्बुद्ध्यादीनामसंग्रहात् । तद्व्यतिरेकस्य तत्समवधानव्यतिरेकस्य वा अभावात् । कार्यस्यान्यथानुपपद्यमानताव्यवस्थाप्यत्वं वा अनन्यथा-सिद्धत्वम् ।

नन्वेवमतिरिक्तशक्तौ साधकबाधकप्रमाणाभावात् नित्यं संशयः । न च साधकाभावस्य बाधकत्वम् , बाधकाभावस्य साधकत्वादिति चेत्-न। साधकाभावेन वह्नावन्यत्र सिद्धार्तान्द्रियधर्माभावसाधने लाघवम् , बाधका-

---

प्रकाशः

संभवेन स्वातन्त्र्येणापि नियतपूर्ववर्तिताग्रहसंभवेन[1] अन्यं प्रति पूर्ववर्तित्वे ज्ञात एवेत्यवधारणा-भावादिति भावः ।

स्वस्वेति । स्वं कारणत्वेनाभिमतं दण्डादि, तदनन्तरोत्पत्तिकं [2]तत्संयोगादि, तदितरसकलसमवधाने सतीत्यर्थः । [3]यत्र च स्वस्वानन्तरोत्पत्तिकसकलसमवधाने सतीति-पाठः, तत्र स्वपदमन्यपरम् ।

ईश्वरेति । [4]एतच्चोपलक्षणम् । यस्याभावादिति पञ्चम्या [5]हेतुत्वार्थकत्वादात्मा-श्रयः । यदभावनियतः कार्याभाव इति विवक्षायां च [6]स्वसत्त्वे स्वानन्तरोत्पत्तिकव्यतिरेकेण यत्र कार्याभावस्तत्र व्यभिचारः । द्वितीयपाठे दण्डानन्तरोत्पत्तिकचरमकारणसमवधाने चक्राद्यभावात् कार्याभावाप्रसिद्धस्तत्राव्याप्तिः । उक्तानन्यथासिद्धत्वस्यैव [7]कारणतारूपत्व-संभवे शेषवैयर्थ्यमुभयत्रेत्यपि द्रष्टव्यम् ।

तर्कचूडामणिः

ननु कदाचित् क्रमेणापि तद्ग्रहसंभवात् युगपदेवेत्ययुक्तमित्याशङ्क्य एवकारस्या-ध्याहृतं भवति विशेषणत्वं सूचयन्नाह—**तत्रेति** । **अन्यपरमिति** । अन्यथा

---

1 संभवेऽपि नान्यं-क
2 संयोगादि-क
3 क्वचित् स्व-ख ग
4 तच्च – क
5 हेत्वर्थस्य त् —ख
6 स्वसत्त्वेन—ख
7 कारणत्वरूपतया शेष – क

भावेनातीन्द्रियधर्मसाधने च गौरवमिति साधकाभावात्तदभाव एव सिध्यतीति ॥

[इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
अनुमानखण्डे शक्तिवादः]

प्रकाशः

[1]साधकाभावेनेति । यद्यप्येकत्र गुरुलघुविषयतासंभवे लाघवं सहकारि, अन्यथ मानान्तरेण लाघवावतारसंभवे गुरुमात्रस्यासिद्धिप्रसङ्गात् । तथापि [2]यत्रैवैकसिद्धिरपरसिद्धि विरोधिनी तत्रैव लाघवावतारस्य गुरुसिद्धिप्रतिबन्धकत्वमित्याहुः

[इति श्रीरुचिदत्तविरचिते तत्त्वचिन्तामणिप्रकाशे
अनुमानखण्डे शक्तिवादः]

तर्कचूडामणिः

अप्रसिद्धिरिति भावः । वैयर्थ्यमिति । रासभादाव[न]तिप्रसङ्गादिति भावः ॥

इति श्रीधर्मराजाध्वरीन्द्रविरचिते
तर्कचूडामणौ कारणताशक्तिवादः

---

1 बाधकाभावेनेति–क 2 यत्रैक–क

मुक्तिवादः

परमप्रयोजनं त्वनुमानस्यापवर्गः। "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः [साक्षात्कर्तव्यः]" इति श्रुतेः।

प्रकाशः

[1]ननु निःश्रेयसा[1]नुकूलतया प्रमाण[2]तत्त्वविवेचनमत्र प्रतिज्ञातम्। न चानुमानस्य तद्धेतुत्वे मानमित्यत आह—**परमेति**। वह्न्यर्थिप्रवृत्त्यादिकमपि तत्प्रयोजनम्, [3]अत आह—**परमेति**। यद्यपि श्रुतिर्न साक्षादपवर्गहेतुतामाह, तथापि "दुःखेनात्यन्तं विमुक्तश्चरति" इत्यर्थवादसमभिव्याहृता तथात्वेन बोध्या। यद्यपि मन्तव्य इत्येव प्रकृतोपयोगि, तथापि पक्षज्ञानाभावे मननासंभव इति श्रोतव्य इत्युक्तम्। तस्य चाशुविनाशिनो द्वाराकाङ्क्षायां निदिध्यासितव्य 'इत्युक्तम्। यद्यपि 'द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इत्याद्याकारिका श्रुतिः, तथापि 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इतिवत् [5]अदृष्टद्वारकता' कल्पनागौरवात् शाब्दक्रमलङ्घनेनार्थक्रमोपादाने पर्यवसितार्थपरतया साक्षात्कर्तव्य इति व्यत्ययेन व्युत्क्रमेण च [6]निर्दिष्टमिति बोध्यम्। ननु 'दुःखेनात्यन्तं विमुक्तः' इत्यादिन

तर्कचूडामणिः

बोध्येति। रात्रिसत्राधिकरणे आर्थवादिकफलान्वयस्य अश्रुतफलविधिवाक्ये साधितत्वादिति भावः। **अग्निहोत्रमिति**। समिदादिवाक्येषु पाठक्रमादर्थक्रमदर्शनात् अग्निहोत्रं येन केनापि कृत्वा यवागूपाक आरादुपकारकत्वेन कर्तव्य इति पूर्वपक्षे, यथा पाठक्रमाङ्गीकारे अग्निहोत्रस्य द्रव्यान्तरकल्पनायां यवागूपाकस्य अदृष्टार्थकत्वकल्पनायां च गौरवापत्त्या अर्थक्रम एव युक्त इति पञ्चमे स्थितम्। एवमत्रापि व्युत्क्रमः। पदव्यत्यये हेतुमाह—**पर्यवसितेति**। चाक्षुषज्ञानवाचकदृशेरत्रात्मन्यनन्वयेन पर्यवसितं विवक्षितमर्थं

---

1 निःश्रेयसा–क
2 तत्त्वमत्र–क
3 अत परमेत्युक्तम्–ख
4 इत्याद्युक्तम्–क
5 दृष्टद्वारकत्व—क
6 निर्देष्टव्य एवेति—क

स च समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसः ।

प्रकाशः

दुःखात्यन्ताभावोऽपवर्गत्वेन श्रूयते । तस्य चासाध्यत्वान्नानुमान[1]प्रयोजनत्वमित्यत आह—**स चेति** । तथा च तदसहवृत्तित्वमेव श्रुतावात्यन्तिकत्वमिति भावः । इदानींतनदुःखध्वंसातिव्याप्तिवारणाय दुःखप्रागभावासहवृत्तित्वं ध्वंसविशेषणम् । दुःखप्रागभवासमानकालीनेत्यर्थः । संसारिदुःखप्रागभावसमानकालीनतया शुक्रादि-[2]मुक्तावव्याप्तेराह—**समानाधिकरणेति** । प्रागभावविशेषणम् । स्वसमानाधिकरणेत्यर्थः । संयोगादिप्रागभावसमानकालतया दोषतादवस्थ्यादाह—आद्यं दुःखपदम् । एतच्च [3]एकविंशतिप्रभेददुःखपरम् । अतश्चरमभोगरूपदुःखप्रागभावसमानदेशकालतया उपान्त्यदुःख-ध्वंसे नातिव्याप्तिः । अत एव प्रागभावपदमप्यर्थवत् । चरमदुःख[4]ध्वंसोऽस्य वर्तमानोऽप्यचिरमनुभूयत इति सिद्धान्तेन भोगरूपदुःखसमानदेशकालतया असंभववारकत्वात् ।

तर्कचूडामणिः

वक्तुं साक्षात्कारोक्तिरित्यर्थः । **तथा चेति** । दुःखसमवायिनि तदत्यन्ताभावासंभवादिति भावः । कालभेदेन तत्सहवृत्तित्वादाह—**दुःखेति** । अतिव्याप्त्यभावे हेतुः—**चरमभोगेति** । ननूपान्त्यदुःखानन्तरं तदनुभवः । तस्य च सविकल्पकतया तन्निर्विकल्पकमपि ततश्चरमदुःखहेतुविषयज्ञानम् , ततश्चरमदुःखमिति चरमदुःखात् प्रागेवोपान्त्यदुःखविनाशात् मुख्यदुःखपरत्वेऽपि न तत्रातिव्याप्तिरिति वाच्यम् । पूर्वोत्पन्न-विशेषणज्ञानेनोपान्त्यदुःखगोचरानुभवो यत्र चरमदुःखहेतुविषयज्ञानात्मा तत्र चरमदुःखसमान कालतयोपान्त्यध्वंसस्य तत्प्रागभावसमानकालत्वात् । अतःशब्दार्थमाह—**चरमेति** । वर्तमाना-दुःखनिवृत्तिरुचिरं(?) क्षणमात्रमनुभूयत इत्यर्थः । मुख्यदुःखपरत्वे असंभवाप्रसङ्गेन तद्वैयर्थ्यं स्यादिति भावः । न च दुःखध्वंसानन्तरं तदनुभव इति तदनुभवप्रागभावसमानकालतया

---

1 प्रयोजनम्-क
2 मुक्त्यव्याप्तेरत-क
3 एकदेशिप्रभेद-क
4 ध्वंसेऽस्य वर्तमाना-क
ध्वंसस्तु-ग

प्रकाशः

केचित्तु दुःख[1]प्रागभावासहवृत्तित्वं दुःखविशेषणम् । अतो नोपान्त्यदुःख ध्वंसेऽतिव्याप्तिरित्याहुः ।

रूपध्वंसादावतिव्याप्तेराह—चरमदुःखपदं मुख्यदुःखपरम् । न च समानाधिकरणदुःखप्रागभावाप्रसिद्धेर्न प्रसङ्गः । विषयत्वेन रूपादेरपि दुःखत्वात् ।

ननु [2]सुखान्तमुक्तावव्याप्तिः, 'ते नराः सुखमृत्यवः' इति श्रुतेः मरणस्य दुःखाव्याप्तत्वसंभवात् । न च तत्सुखपूर्वकालीनदुःखध्वंस एव मुक्तिः तत्राप्युक्तलक्षणाव्याप्तेः । तत्सुखज्ञानस्यापि दुःखतया तत्प्रागभावसमान[3]देशत्वात् । मुक्तस्य सुखोत्पत्त्यसंभवाच्चेति चेत्—न । 'ते नराः' इत्यादि श्रुतेरन्यापेक्षया मरणे 'अल्पदुःखभाज इत्यत्र तात्पर्यात् । न चानुपपत्तिं विना न मुख्यार्थत्याग इति वाच्यम् । दुःखविशेष[5]हेतुरोगादिसत्त्वे दुःखोत्पादस्यावश्यकत्वात् ।

तर्कचूडामणिः

तद्ध्वंसस्य पुनरसंभव इति वाच्यम् । चरमदुःखानुभवस्यैव भाविध्वंसविषयत्वाभ्युपगमेन दुःखध्वंसानन्तरं तदनुभवोत्पत्त्यनभ्युपगमेन दोषाभावात् ।

जयदेवमतमाह—केचित्त्विति । अत इति । उपान्त्यदुःखस्य चरमदुःखप्रागभावसमानकालत्वादिति भावः । अत्राद्यदुःखपदमपि मुख्यपरमेव बोध्यम् दुःखत्वादिति । आद्यदुःखपदस्य मुख्यगौणसाधारणत्वादिति भावः । नन्वाद्यदुःखपदं मुख्यपरमेव । तादृशसमानकालीनत्वस्य दुःखविशेषणत्वाच्च नान्यदोष इत्यनुशयादाह—मुक्तस्येति । तथा सति दुःखस्याप्यापत्तेरिति भावः । रोगादीति । रोगाद्यभावे मरणानुपपत्तेरिति भावः ।

---

1 प्रागभावसह-ख
प्रागभावासमान-ग
2 सुखान्त्य-क
3 देशकालत्वात्-ख
4 दुःखाभावः-ग
5 हेत्वन्यवपाटनादि-क,ख

प्रकाशः

ननु मरणदुःखं [1]मा भूदिति कामनया प्रयागे [2]स्नातो यत्र मृतस्तत्र का गतिरिति चेत्—न। [3]तत्र हि कामनैव बाधिता। [4][जातापि बाधितविषया] अन्यथा यत्र मुक्तौ सुखं भवत्विति [5]स्नातः तत्र का गतिः? यदि च कारणबाधात्तत्र सुखं बाधितमिति कामनाबाधः तदा दुःखसामग्रीसत्त्वे तदभावोऽपि बाधित इति तुल्यम्। न च योगिना यत्र सकलदुःखमुपभुज्य [6]सुखं भुक्तं तन्मुक्तावव्याप्तिः। तत्रापि शरीर[7]त्यागसमयेऽवश्यं दुःखोत्पत्तेः। न च भोजकादृष्टं विना कथं [8]दुःखोत्पाद इति वाच्यम्। अदृष्टान्तरस्य [9]भोगेन क्षीणत्वेऽपि अवश्योत्पत्स्यमानमरणदुःखभोजकादृष्टस्य सत्त्वात्। न चैवमीश्वरस्यापि शरीरत्यागकाले दुःखोत्पत्तिः स्यादिति वाच्यम्। अदृष्टादिकारण[10]बाधेन बाधादिति संक्षेपः।

तर्कचूडामणिः

बाधितेति। मरणं दुःखव्याप्तमिति विशेषदर्शनादिति भावः। **जातापि बाधितविषयेति**। न चैवं तस्य सकलकामहेतुत्वं न स्यादिति वाच्यम्। तस्य संभावितसकलविषयत्वात्। एतदेव सूचयितुं दृष्टान्तमाह—**अन्यथेति** **एवमिति**। शरीरत्यागत्वेन दुःखजनक इत्यर्थः। नन्वेवं योगिनोऽपीश्वरवददृष्टाभावादेव शरीरत्यागकालेन दुःखशरीरत्यागस्य दुःखाविनाभावाभावेन तद्बलेन तत्रादृष्टकल्पनानवकाशात्। एवं च तेन राग इत्यत्र श्रुतिर्मुख्यार्थैव। किं चोत्क्रान्तेरेव दुःखहेतुत्वम्। न च मुक्तस्य प्राणोत्क्रान्तिः, प्राप्यलोकाभावात्। 'न तस्य प्राणा उत्क्रामन्ति, अत्रैव समवलीयन्ते' इति श्रुतेश्च। तथा च सुखान्तमुक्तिरस्त्येवेति तत्राव्याप्तिरित्यत आह—**इति संक्षेप इति**।

---

1 मे मा-ख, ग
2 प्रयागे यत्र-क
3 तत्र काम--क
4 चूडामणिसंमतोऽयमधिकपाठः
5 तत्र स्नातस्तत्र-ख
6 सुखमभुक्तं-क
7 नाश-क
8 दुःखोत्पत्ति-ख
9 भोगिनः-ख
10 भानबाधात्-क

ननु नासौ पुरुषार्थः अतीतदुःखध्वंसस्य सिद्धत्वात्, अनाग-त दुःखस्य ध्वंसयितुमशक्यत्वात्, वर्तमानस्य पुरुषप्रयत्नं विनैव विरोधिगुणनाश्यत्वात्। अतीतदुःखवत् हेतूच्छेदे पुरुषव्यापारः प्रायश्चित्तवदिति चेत्—न। [1]तत् किं हेतूच्छेदस्य सुखदुःखाभावे-

---

प्रकाशः

असौ – दुःखध्वंसो [2]निरुक्तः, तस्यातीतादावसंभवेन विकल्पासंभवादिति ध्येयम्। हेतावप्यतीतादि[3]विकल्पे सत्येवाह—**तदिति**। मिथ्याज्ञानेऽप्यतीतादिविकल्पसंभवादाह—

तर्कचूडामणिः

वस्तुतस्तु शरीरप्राणसंयोगत्वं लाघवाद्दुःखजनकतावच्छेदकं क्लृप्तमिति योगिनोऽपि ततस्तदुत्पत्तिरावश्यकी। न चेश्वरेऽतिप्रसङ्गः। स्वादृष्टोपार्जितत्वस्य प्रतियोगिविशेषणत्वात्। अत एव शरीरत्वावच्छिन्नस्य दुःखादिहेतुत्वेऽपि नेश्वरे तदुपगम्यते। यदपि किं चेत्यादि, तदपि न। जीवदवस्थायामपि ऊर्ध्वगतिमात्रस्य सत्त्वेन शरीरसंयोगविनाशविशिष्टोर्ध्वगमनस्यैवोत्क्रान्तितया तदपेक्षया तादृशसंयोगविनाशस्यैव लघुत्वेन तस्यैव दुःखहेतुत्वात्। न च प्राणस्य सक्रियतया जीवदवस्थायामपि तत्संयोगविनाशोऽस्तीति वाच्यम्। अवच्छेदकान्तःकरणशरीरसंयोगनाशदशायामपि प्रदेशान्तरावच्छिन्नप्राणशरीरसंयोगस्य जीवद्दशायां सत्त्वेन समानाधिकरणशरीरप्राणसंयोगासमानकालीनशरीरप्राणसंयोगस्यैव मरणरूपतया तस्यैव दुःखहेतुत्वादिति।

ननु समानाधिकरणदुःखेत्यादिना निरुक्तस्य दुःखध्वंसविशेषव्यावृत्तावित्यनेन पारामर्शो[illegible] इत्यत आह—**निरुक्त इति**। **तस्येति**। निरुक्तस्य ध्वंसस्य अनागतमात्रप्रति[illegible] [illegible]त्वानकल्पा[illegible]पत्तेरित्यर्थे सत्येव दोषान्तरमिति शेषः। ननु मिथ्याज्ञानमतीतं प्रागेव नष्टम्, वर्तमानं तु विरोधिगुणेन स्वयमेव नश्यति, अनागतं नाशयितुमशक्यमित्याशयेनाह—**मिथ्याज्ञानेऽपीति**। ननु वासनाग्रहणमात्रेण कथमुक्त-

---

1 तत् किं–ख 2 न प्रकृतः–ग

3 विकल्पदोषे–ग

तरत्वेन स्वतोऽपुरुषार्थत्वात् अनागतानुत्पादमुद्दिश्य क्रियमाणत्वाच्च यथा तत्र दुःखानुत्पादः पुरुषार्थस्तथेहापि इति विवक्षितम्, अथानुत्पादस्य प्रागभावत्वेनासाध्यत्वात् फलान्तरस्याभावाच्चानन्यगतिकतया कण्टकनाशव-दुःखसाधननाश एव स्वतः पुरुषार्थस्तथेहापीति वा। उभयथापि दुःखध्वंसस्यापुरुषार्थत्वमेव। न च तयोरपि पुरुषार्थत्वमिति वक्ष्यते।

मैवम्। दुःखान्तरध्वंसस्यायत्नसाध्यत्वेऽपि तादृशदुःखध्वंसस्य मिथ्याज्ञानोच्छेदद्वारा पुरुषप्रयत्नाधीनतत्त्वज्ञानसाध्यत्वात्। तथा हि तत्त्वज्ञानात् सवासनमिथ्याज्ञानाभावे दोषानुत्पत्तौ प्रवृत्त्यभावेऽदृष्टानुत्पत्तौ जन्माभावे तादृशदुःखध्वंसो भवति।

प्रकाशः

सवासनेति। तथा चानागतस्याभावे वर्तमानस्यानिवर्त्यत्वे तद्वासनैव निवर्त्यत इति भावः।

ननु वासनापि मिथ्याज्ञानमुत्पाद्य प्रवृत्तिद्वारा मुक्तिविरोधिनी न स्वतः। तथा च

तर्कचूडामणिः

दोषपरिहार इत्यत आह—तथा चेति। वासनैवेति। न च सा स्मृतिनाश्यैवेति वाच्यम्। अन्वयव्यतिरेकाभ्यां विरोधिवासनाया अपि तन्निवर्तकत्वावधारणेन तत्त्वज्ञानस्य वासनाद्वारा तन्निवर्तकत्वसंभवादिति भावः।

ननु मिथ्याज्ञानवासना किं परम्परया मुक्तिविरोधिनी उत साक्षात्। आद्यमनुवदति—वासनापीति। द्वितीयं निरस्यति—न स्वत इति। स्वयं दुःखानात्मकतया स्वसत्तायाः निरुक्तदुःखध्वंसरूपमुक्त्यविरोधित्वादिति भावः। आद्यं दूषयति—तथा चेति।

अथ चरमदुःख उत्पन्ने तद्ध्वंसस्तज्ज्ञानादेव भविष्यति तदनुत्पादे तत्त्वज्ञानादपि न स्यादिति चेत्—न । प्रतियोगिवत्तत्त्वज्ञानस्यापि तद्धेतुत्वात् तुल्यवदुभयोरपि कारणत्वात् , तेन विना तदनुत्पत्तेः ।

अत एव शुकस्य तत्त्वज्ञानमुत्पन्नमिति तस्य तद्ध्वस उत्पन्नो नास्मदादीनाम् । तत्र दुःखं नोत्पन्नमस्ति, तेन स ध्वंसो नास्मदादीनामिति चेत् — अनादौ संसारे तत् कुतो नोत्पन्नम् । स्वकारणाभावादिति चेत्—न । अन्वयव्यतिरेकानुविधायिनस्तत्त्वज्ञानादन्यस्यान्विष्यमाणस्या-

---

प्रकाशः

मिथ्याज्ञानप्रागभावाभावे तदसंभवात् तत्सत्त्वेऽपि न क्षतिरिति तन्निवृत्त्यर्थं किं तत्त्वज्ञानेन । न च तत्सत्त्वे अशेषविशेषगुणोच्छेदलक्षणो न मोक्ष इति वाच्यम् । चरमसंस्कारवत्तस्यापि कालाद्विनाशसंभवादिति चेन्न । अन्वयव्यतिरेकाभ्यां [1]चरमदुःखं तद्ध्वंसं च प्रति तत्त्वज्ञानस्य हेतुत्वमित्यग्रे स्फुटत्वात् । तत्त्वज्ञानं विना कायव्यूहाभावेनानन्तकर्मक्षयानुपपत्तेश्च

तर्कचूडामणिः

तदा मिथ्याज्ञानप्रागभावोऽस्ति उत न । नाद्यः, प्रागभावेन प्रतियोगिजनने तत्त्वज्ञानतद्वासनावैयर्थ्यापत्तेः । द्वितीयं दूषयति —मिथ्याज्ञानेति । तदसंभवादिति । मिथ्याज्ञानोत्पत्त्यसंभवादिति भावः । तत्सत्त्वेऽपीति । मिथ्याज्ञानवासनासत्त्वेऽपीत्यर्थः । तत्सत्त्व इति । मिथ्याज्ञानवासनासत्त्व इत्यर्थः । चरमसंस्कारवदिति । चरमदुःखानुभवजन्यसंस्कारवदित्यर्थः । तस्यापीति । मिथ्याज्ञानसंस्कारस्यापीत्यर्थः । कालादिति । तथा च तत्त्वज्ञानतद्वासनयोर्वैयर्थ्यमिति भावः । अग्रे स्फुटत्वादिति । अन्वयव्यतिरेकानुविधायिन इत्याद्यव्यवहितग्रन्थ इत्यर्थः । ननु पुरुषान्तरसमवेतत्वज्ञानस्य । तद्वतमुक्तेश्च परं प्रत्ययोग्यतया नान्वयव्यतिरेकावकाश इत्यरुचेराह—तत्त्वज्ञानं विनेति ।

---

1 चरमदुःखध्वंसं प्रति–ख

भावात् । मुक्तौ स ध्वंसोऽस्त्येव, तस्मिन् सति मुक्तिरस्त्येवेति स [1]मुक्त्युत्पादकोत्पाद्य इति सर्ववाद्युपगतम् । मुक्तिः सा अन्या वा ?

ननु ध्वंसार्थं दुःखमुपादेयम् , तदनुत्पाद्यध्वंसानुत्पादादिति चेत्— सत्यम् । पुरुषार्थहेतुत्वेन लोके दुःखतत्साधनयोरप्युपादानदर्शनात् अनागतकुम्भनाशार्थं मुद्गरादौ प्रवृत्तिदर्शनात् अनागतदुःखध्वंसार्थमपि प्रवृत्तिः । चरमदुःखध्वंसो न दुःखध्वंसत्वेनोद्देश्यः अयत्नसिद्धदुःखान्तर-ध्वंसवदपुरुषार्थत्वादिति चेत्—न । समानाधिकरणदुःखप्रागभावासहवृत्ति-दुःखध्वंसत्वेनत् तस्योद्देश्यत्वात् दुःखासंभिन्नसुखव तस्य च पुरुषप्रयत्न-साध्यत्वमेवेत्युक्तम् ।

एतेन दुःखध्वंसत्वमेव मोक्षत्वम् , तत्तदात्मयावद्दुःख[1]समुन्मूलन-दशायां तु तथा व्यपदेशः । प्रतिपुरुषं दुःखध्वंसस्तोमस्य व्यक्तिस्थानी-

---

प्रकाशः

[2]तदावश्यकत्वे विरोधितया तेनैव तद्वासना [3]निवर्त्यत इत्याशयात् । तादृशदुःखध्वंसस्तत्त्व-ज्ञानोत्पाद्य इति सर्वसंमतमित्याह—**मुक्ताविति** ।

[4]**दुःखध्वंसत्वमेवेति** । लाघवादित्यभिमानः । **मिलितानामिति** । एकदा तावदुःखानुत्पादेन तद्ध्वंसस्य तत्त्वज्ञानासाध्यत्वादित्यर्थः । ननु तन्मेलकं साध्यं स्यादित्यत

तर्कचूडामणिः

तदावश्यकेति । तत्त्वज्ञानस्यावश्यकतयेत्यर्थः। तथापि कथं न मिथ्याज्ञानवासनानिवर्तकत्वमित्यत आह- **विरोधितयेति** । विरोधिगुणत्वेनेत्यर्थः । ननूक्तदुःखध्वंसस्य मुक्त्युत्पादकत्वेऽपि तत्त्वज्ञानोत्पाद्यत्वमनुपपादितमेव । स इत्यनेन दुःखध्वंसमात्रपरामर्शेति[ऽपि] तस्य मुक्त्युत्पादकोत्पाद्यत्वमसिद्धं चेत्यत आह—**तादृश्येति** । **सर्वसंमत इति** । दुःखध्वंसस्य मुक्तित्व मङ्गीकुर्वतामपि संमत इत्यर्थः । दुःखध्वंसत्वस्य मोक्षत्वरूपत्वे मूलकृता हेतुर्नोक्त इत्यत आह— **लाघवादिति** । निरुक्तदुःख[4]ध्वंसत्वापेक्षयेति शेषः । आकाङ्क्षां पूरयति—**तत्त्वज्ञानसाध्यत्वा दिति** । तत्र हेतुमाह **एकदा तावदिति** । यदि तावन्ति दुःखानि युगपदुत्पद्येरन् तदा तावद्-दुःखानां तावन्तो दुःखध्वंसाः तत्त्वज्ञानेन जायन्त इति भावः । एवं मेलकेन तत्त्वज्ञान साध्यत्वं निराकृत्य मेलकस्य तत्साध्यत्वं निराकर्तुमनुवदति—**नन्विति** । अतिप्रसङ्गं

---

1 मुक्त्युपपादकोत्पाद्यः—क
2 इति तदा—क
3 निवर्तते—ग
4 दुःखध्वंस एवेति—ख

यत्वात् तेजोऽभावे संवलितेऽन्धतमसपदप्रयोगवत् । यथा संवलित एव द्वाविति बुद्धिव्यपदेशौ । प्रवृत्तिरपि संवलनार्थमित्यपास्तम् । मिलितानामसाध्यत्वात् , मेलकस्यानतिरिक्तत्वेऽतिप्रसङ्गात् । अतिरिक्तत्वे जन्यस्य ध्वंसावृत्तेः अजन्यस्य पुरुषार्थत्वाभावात् साध्यतया संवलने भोगावश्यं भावात् । अन्धतमसादौ तथा संवलन एव प्रयोगात् ।

अत एव संस्काराजनकभोगविषयदुःखध्वंसः संस्काराजनकानुभवध्वंसो वा मुक्तिः । न चातिव्याप्तिः, जनकत्वस्याजनयत्यपि भावादिति निरस्तम् । अपुरुषार्थत्वात् ।

प्रकाशः

आह--मेलकस्येति । तस्य मेलक[1]दुःखध्वंसानतिरिक्तत्वे तावतामुक्तरीत्या असाध्यत्वे यत्किंचिद्दुःसध्वंसो मुक्तिरिति अस्मदादिरपि मुक्तः स्यादित्यर्थः । चरमदुःखध्वंसघटितस्तोमस्य मुक्तित्वे [2]लाघवात् स एव [3]मुक्तिरित्यपि बोध्यम् । संवलन एवेति । तत्र-मिलितानामसाध्यत्वेऽपि तत्पदवाच्यत्वे दोषाभावादिति भावः ।

जनकत्वस्य स्वरूपयोग्यत्वस्य । अपुरुषार्थत्वादिति । यद्यपि प्रथमपक्षे

तर्कचूडामणिः

विवृणोति--तस्येति । मुक्तिरिति । मुक्तित्वेन वक्तव्य इत्यर्थः । ननु चरमध्वंसघटितस्तावद्दुःसध्वंसस्तोमो मुक्तिः । चरमदुःखध्वंसस्य तत्त्वज्ञानसाध्यत्वान्न ज्ञानवैयर्थ्यम्, न वा अतिप्रसङ्ग इत्यत आह--चरम इति । मिलितानामिति । प्रौढप्रकाशकतेजस्संसर्गाभावानामित्यर्थः । तत्पदेति । तमःपदेत्यर्थः । न चेहापि संवलनस्य मुक्तिपदवाच्यत्वमस्त्विति वाच्यम् । संवलनान्तर्गतचरमध्वंसस्य लाघवेन तत्पदवाच्यत्वादिति भावः ।

नन्वजनयति वस्तुजनिजनकत्वं व्याहतमित्यत आह--जनकत्वस्येति । तथा

---

1 दुःखानति—क 2 लघुत्वात्—ख
3 मुक्तिरिति ध्येयम्—क

अन्ये तु दुःखप्रागभावासहवृत्तिदुःखसाधनध्वंसो मुक्तिः। लोकेऽहि कण्टकादिनाशस्य वैदिके प्रायश्चित्तादौ पापनाशस्यानन्यगतिकतया दुःखसाधनध्वंसत्वेन पुरुषार्थत्वात्।

अथाहिकण्टकादि पापं वा नाश्यताम्, तेन तज्जन्यं दुःखं न भवतीति दुःखानुत्पादमुद्दिश्य प्रवृत्तेर्दुःखानुत्पाद एव प्रयोजनम्, न तु दुःखसाधनाभावः, सुखदुःखाभावेतरत्वादिति चेत्—न। दुःखानुत्पादस्य प्रागभावत्वेनानादितया असाध्यत्वात्। न च तत्पालनं साध्यम्। पालनं हि न तत्स्वरूपम्, तस्यासाध्यत्वात्। नोत्तरसमयसंबन्धः, अभावे संबन्धिद्वयातिरिक्तस्य तस्याप्रामाणिकत्वादनभ्युदपमाच्च। नापि संबन्धिद्वयस्वरूपं साध्यम्। प्रागभावस्याप्यसाध्यत्वात्। समयतदुपाध्योश्च प्रयत्नं विनैव सिद्धेः।

अथ दुःखे द्वेषाद्यथा तदभावे इच्छा तथा दुःखसाधने द्वेषात्तदभावेऽपीच्छा, तया तत्साधने प्रवृत्तिरिति चेत्—न। यदिच्छया

प्रकाशः

नायं दोषः: तथापि तस्य संस्कारात् कालाद्वा विनाश इति वार्तिकदर्शनेनासंभवः स्वरूपयोग्यताविवक्षायां सुतरामिति [1]दूषणे तात्पर्यम्।

तर्कचूडामणिः

चाजनयतीत्येतत्पदं फलानुपहितपरमिति भावः। **प्रथमपक्ष इति**। तस्य दुःखध्वंसरूपतया स्वतः पुरुषार्थत्वादिति भावः। **तथापीति**।

संस्काराजनकत्वं किं फलानुपहितत्वम्, उत स्वरूपायोग्यत्वम्। नाद्यः। चरमदुःखानुभवस्यापि संस्कारजनकत्वात्। न च तत्संस्कारस्य नाशकाभावे मुक्त्यनुपपत्तिः। तत्त्वज्ञानवासनया तन्नाशसंभवादित्याह—**तस्येति**। ननु तत्त्वज्ञानवासनापि कालविनाश्यैवेति आवश्यकत्वात्काल एवैतन्नाशकोऽस्त्वित्याशयेनाह—**कालाद्वेति**। द्वितीयं दूषयति—**स्वरूपयोग्यतेति**। **सुतरामिति**। चरमदुःखानुभवस्यापि संस्कारजननस्वरूपयोग्यत्वदिति भावः।

---

1 दूषणतात्पर्यम्-क

यत्साधने यस्य प्रवृत्तिस्तस्यैव तत्प्रयोजनत्वमिति दुःखसाधनाभावस्यैव प्रयोजनत्वात् ।

अथ चिकीर्षायोनिप्रयत्ने प्रयोजनज्ञानापेक्षा । तेन विनोपाये चिकीर्षाविरहात् न तु द्वेषयोनिप्रयत्ने। अनिष्टसाधनताज्ञानादहिकण्टकादौ [1]द्वेषो, द्वेषाच्च [2]तत्त्यागानुकूलो यत्न उत्पद्यते । अयमेव हि द्वेषस्वभावो यत् प्रतिबन्धकं विना [3]स्वविनाश्य[3]विषयनाशानुकूलं यत्नमुत्पादयति, अन्यथा प्रयत्नद्वैविध्यानुपपत्तेः । अत एव फलं विनैवोत्कटक्रोधान्धानामात्मघाते प्रवृत्तिरिति चेत्—न । प्रयोजनमनुद्दिश्य द्वेषमात्रात् दुःखैकफलके प्रेक्षावतां प्रयत्नानुत्पादात् । क्रोधान्धानामपि तात्कालिकफलाभिमानोऽस्त्येव । उत्कटरागान्धानामिव परदारादाविव प्रवृत्तेरिति ।

प्रकाशः

प्रयोजनत्वादिति । मुख्यप्रयोजनत्वादित्यर्थः । तथा च दुःखसाधनध्वंसस्य स्वतःपुरुषार्थत्वाभावान्न मोक्षत्वमिति भावः ।

कृतौ सत्यामिति । एतच्च विपश्चितं प्रत्यक्षप्रकाशे । अग्रिमक्षण इति ।

तर्कचूडामणिः

गौणप्रयोजनसाधनत्वमिष्टमेवेत्यत आह — स्वत इति । दुःखानुत्पादस्यैव प्रयोजनत्वादिति मूलं व्याचष्टे—प्रयोजनत्वादिति । [प्रयोजनत्वादितीति] । तथापि दुःखसाधनध्वंसस्य मुक्तित्वे किमायातमित्यत आह—तथा चेति । नन्वन्यथासिद्धसाधारणमेतत्साध्यत्वम् , अत आह—एतच्चेति । मङ्गलवादे समस्तदोषनिरासेन क्षेमसाधारणसाध्यत्वं दर्शितमिति भावः ।

ननु दुःखाभावस्य पुरुषार्थत्ववत् तत्साधनध्वंसोऽपि स्वतःपुरुषार्थोऽस्त्वित्यत आह—

---

1 द्वेष्ये-ग 2 तन्नाशानु-ख
3 स्व-ख

तन्न। दुःखं मे मा भूदिति उद्दिश्य प्रायश्चित्तादौ प्रवृत्तेः दुःखानुत्पादस्यैव प्रयोजनत्वात्। न च प्रागभावस्यासाध्यत्वम्। दुःखकारणविघटनद्वारा तस्यापि कृतिसाध्यत्वात्। दुःखकारणसमवधान दशायां कृतौ सत्यां दुःखसाधननाशे सति अग्रिमसमये प्रागभावस्वरूप-मस्ति तेन विना नास्तीत्यन्वयव्यतिरेकयोस्तत्र सत्त्वात्। घटेऽपि कृतौ सत्यामग्रिमक्षणे तत्सत्वम्, तया विना नेत्येव कृतिसाध्यत्वम्। न तु प्रागसतोऽग्रिमक्षणे सत्त्वमुत्पत्तिः गौरवात्। कृतिं विना न यत्स्वरूपं तत् कृतिसाध्यम्, तत्प्रागभावस्वरूपं तु न तथेति चेत्-न। कृति-ध्वंसेऽपि घटसत्त्वेनाग्रिमक्षणे इत्यावश्यकत्वात्। अत एव योगवत् क्षेमस्याप्यनागतानिष्टानुत्पादजनकस्य परीक्षकप्रवृत्तिविषयत्वमिति वक्ष्यते निषेधापूर्वप्रस्तावे।

ननु प्रायश्चित्तनाश्यपापजन्यदुःखस्य प्रागभावो यद्यस्ति तदा दुःखमावश्यकम्, तस्य प्रतियोगिजनकत्वनियमात्। नास्ति चेत् तर्हि तदभावादेव दुःखानुत्पाद इत्युभयथापि प्रायश्चित्तमफलम्। तस्मात् दुःखसाधनध्वंसमुखेन प्रागभावस्यापि साध्यतेति तत्रैव कृतिसाध्यतापर्यव-सानात् दुःखसाधनध्वंस एव पुरुषार्थो न तु दुःखानुत्पादार्थितयेति तत्र प्रागभाव[1]सत्त्वासत्त्वविचारो वायसदशनविचारवत्।

प्रकाशः

तच्च प्रागभावेऽपीति भावः। न त्विति। तथा च स्वतःपुरुषार्थत्वकल्पनात् स एव मोक्ष इति भावः।

तर्कचूडामणिः

तथा चेति। क्वचिदपि तस्य स्वतः पुरुषार्थत्वाकल्पनात् कल्पनायां च मानाभावादिति भावः।

ननु दुःखप्रगभावासत्त्वेऽपि पापस्य दुःखजननयोग्यतया पापं न दुःखसाधनमिति

---

1 सत्त्वविचारः—क

अथ तदापि प्रागभावस्यासत्त्वे तदभावात् पापं न दुःखसाधनमिति [1]न तन्नाशार्थं[1] प्रवर्तते। तस्य सत्त्वे च पापमादायैव तस्य दुःखोत्पादकत्वनियमात् प्रायश्चित्तं सत्यपि गले पादिकया पापावस्थानमिति न ततः पापनाश इति चेत् न। प्रागभावस्यासत्त्वेऽपि दुःखसाधनजातीयनाशस्य पुरुषार्थत्वात् सत्त्वेऽपि पापान्तरमादायापि तस्य दुःखजनकत्वसंभवात् प्रायश्चित्तात् पापनाशः स्यादेवेति प्रागभावसत्त्वासत्त्वसंदेहेऽपि प्रायश्चित्तादौ प्रवृत्तिरप्रत्यूहैवेति।

उच्यते। तत्र दुःखप्रागभावोऽस्त्येव, तस्यैव दुःखानुत्पादरूपत्वेन पुरुषार्थत्वात्। स च पापनाशद्वारा प्रायश्चित्तसाध्य इति प्रागभावसत्त्वेऽपि न निष्फलं प्रायश्चित्तम्। तेन प्रागभावेन दुःखमवश्यं जननीयमिति चेत्—सत्यम्, किं तु पापान्तरमासाद्य।

प्रकाशः

फलोपहितसाधननाशः पुरुषार्थत्वेनोक्त इति मन्यमानो देशयति—अथेति। तथा च तत्सत्त्वासत्त्वविचारो युक्त एवेति भावः।

किं तु पापान्तरमिति। नन्वेवं काशीमृतस्य कृतप्राणान्तिकादिप्रायश्चित्तस्य कथं मुक्तिः। न च तत्रापि पापान्तरोत्पत्तिः। काशी[2]मरणेनोत्पन्नतत्त्वज्ञानस्य [3]दोषाभावेन

तर्कचूडामणिः

ग्रन्थासंगतिः, अत आह—फलोपहितेति। तत्सत्त्व इति। दुःखप्रागभावसत्त्व इत्यर्थः।

प्रायश्चित्तस्य दुःखप्रागभावजनकत्वमाक्षिपति—नन्विति। तत्र दुःखप्रागभावः किं काशीमरणपूर्वकालीनं पापमासाद्य प्रतियोगिनं जनयति उत तदुत्तरकालीनम्। नाद्यः, काशीमरणेन प्रायश्चित्तेन च तस्य नाशादित्याह—काशीमृतस्येति। द्वितीयं दूषयति—न चेति। ननु ज्ञानवतोऽपि निषिद्धानुष्ठानात् पापं भविष्यतीत्यत आह—दोषाभावेनेति।

---

1 तन्नाशार्थं—ख 2 मरणोत्पन्न—क

3 तस्य दोषासंभवेन—ख

प्रकाशः

तदुत्पत्तेरसंभवादिति चेत् — अत्र वदन्ति । [1]तत्र दुःखप्रागभावो नास्त्येव । फलसन्देह पर्यवसिततत्सन्देहाच्च प्रायश्चित्ते प्रवृत्त्युपपत्तौ [2]तत्र तस्यार्किंचित्करत्वेऽपि न कापि क्षतिः । न च निष्फलत्वेन तद्बोधकवेदाप्रामाण्यम् । सति दुःखप्रागभावे तस्य तथा जनकत्वमिति वेदतात्पर्यात् । सति दोषे निषिद्धकर्मणः पापजनकत्ववत् , सति विघ्ने मङ्गलस्य विघ्नध्वंस-जनकत्ववद्वेति[3] ।

[4]तच्चिन्त्यम् । पापादिजनने दोषादेः सहकारित्वमिति निषिद्धकर्मादेः [5]साङ्गत्वा-भावान्निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम् । इह तु साङ्गस्य प्रायश्चित्तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यं स्यादेव । न हि दुःखप्रागभावे फले दुःखप्रागभावस्यापि सहकारित्वम् , येन तदभावे प्रायश्चित्तस्य साङ्गत्वं न स्यादिति ।

वयं तु ब्रूमः । तत्र दुःखप्रागभावो नास्त्येव, काशीमरणस्यैव तत्र मानत्वात् । प्रवृत्तिश्च

तर्कचूडामणिः

फलानिश्चये प्रवृत्त्यनुपपत्तिरित्यत आह—**फलसन्देहेति** । प्रायश्चित्तवैफल्यमिष्टमेवेत्याह—**न कापीति** । दुःखप्रागभावोऽप्यधिकारिविशेषणमित्याशयेनाह—**सतीति** ।

फलस्य न साक्षात् अधिकारिविशेषणत्वम् , अनागतत्वात् , नाप्यङ्गत्वम् , अननुष्ठेयत्वात् , अनुपकारकत्वाच्चेत्याशयेनाह—**तच्चिन्त्यमिति** ।

वयं त्विति । काशीमरणस्थले यत्र प्राणान्तिकप्रायश्चित्ते कृतम् , तत्र दुःख-प्रागभावो नेत्यत्र प्रमाणमाह—**काशीमरणस्येति** । तस्य सकलपापक्षयहेतुत्वश्रुतेरिति भावः । कथं तर्हि फलाभावे प्रायश्चित्तप्रवृत्तिरित्यत्राह—**प्रवृत्तिश्चेति** । एककोटयु-

1 यत्र-क
2 पपत्तौ तस्या-क
3 वच्चेति-ख ग
4 तत्र-क
5 स्वाङ्ग-क

प्रकाशः

[1]तद्भ्रमात् तत्सन्देहाद्वा । न चैवं तद्बोधकवेदाप्रामाण्यम् । यत्कामकर्तव्यतया [2]हि वेदेन यत् बोध्यते साङ्गस्य तस्यावश्यं तत्फलजनकत्वमित्येव नियमः । [3]तदिह पापध्वंसकामकर्तव्यतया प्रायश्चित्तस्य वेदेन बोधनात् तदनुत्पादे परं तद्बोधकवेदाप्रामाण्यम् । न चात्र तदस्ति । तत्रापि प्रायश्चित्तेन पापस्य नाशितत्वात् ।

अत एव प्रायश्चित्ते पापध्वंसकामनैवाधिकारः, न तु तद्दुःखानुत्पादकामना, तस्यातत्फलत्वात् । न चैवं "दुःखानुत्पादस्यैव प्रयोजनत्वा"दित्यग्रिमग्रन्थविरोधः । दुःखसाधनध्वंस एव स्वतःपुरुषार्थतया मोक्ष इति पूर्वपक्षे तत्र दुःखानुत्पाद एव स्वतः पुरुषार्थः, तथा च [4]तदर्थितया पापध्वंसस्तत्र [5]गौणप्रयोजनम्, न तु मुख्यमिति [6]न स मोक्ष इति तदर्थः[6] । तदिदमुक्तम्—"तस्य दुःखानुत्पादरूपत्वेनापुरुषार्थत्वात्" इति । तथा च प्रायश्चित्तस्य पापध्वंसः फलम् । तत्फलं च स्वतः पुरुषार्थो [7]दुःखानुत्पादः ।

तत्त्वचूडामणिः

पस्थितौ विपर्ययमुक्त्वा उभयकोट्युपस्थितावाह—तत्सन्देहाद्वेति । तद्बोधकेति । दुःखप्रागभावस्य प्रायश्चित्तसाध्यत्वबोधकेत्यर्थः । प्रायश्चित्तशास्त्रेण पापध्वंसस्यैव प्रायश्चित्तसाध्यत्वं बोध्यते, न दुःखप्रागभावस्येति नोक्तदोष इत्याह— यत्कामेति ।

तर्हि पापध्वंसकाम एवाधिकारी स्यात् इत्यत्र इष्टापत्तिमाह—अत एवेति । एवकारव्यावर्त्यमाह—न त्विति । एवमिति । पापध्वंसस्य फलत्व इत्यर्थः । प्रयोजनशब्दस्य मुख्यप्रयोजनपरत्वं वक्तुं दर्शयति—दुःखसाधनेति । तथापीति । पापध्वंसस्य गौणफलत्वेऽपीत्यर्थः । कथं तर्हि [8]पापध्वंसे कामनेति शङ्कामिष्टसाधनतोपपादनेन निरस्यति—तत्फलं चेति । पापध्वंसस्य प्रायश्चित्तफलत्वे गङ्गेशसंमतिमाह—

1 तद्भ्रमात्तत्र सं-ख
2 अपि-क
3 इह-ख
4 तदर्थतया-क
5 कारणप्रयोजनम्-क
6 तदर्थः-क
7 न दुःखा-ख
8 पापध्वंसकामेन-क

प्रकाशः

तदिदं वक्ष्यति—"न च प्रायश्चित्तस्य दुरितोत्पत्तिनिमित्तकत्वम्, पापनाशफलश्रवणात्" इति। न च परम[1]पुरुषार्थानिष्पत्तौ वेदबोधितफलं जनयतो निष्फलत्वम्। [2]तथात्वे विघ्न[2]ध्वंसं समाप्तिं वा जनितवतोऽपि मङ्गलस्य तत्साध्यत्वतः पुरुषार्थसुखाद्यनुत्पत्तौ निष्फलत्वापत्तेः। तस्मात् [3]प्रागभावासत्त्वेऽपि न तन्निष्फलमिति न तद्बोधकवेदाप्रामाण्यमिति।

अस्तु वा तत्र प्रागभावः पूर्वजन्मोत्पन्नपापान्तरमासाद्य कायव्यूहदशायां तेन दुःखजनने मोक्षोपपत्तेः। न हि तज्जन्मकृतान्येव कर्माणि तदा भुज्यन्त इति नियमः। तस्माद्यदि तत्सत्त्वं तदा पापान्तरमावश्यकम्। अन्यथा तत्सत्त्वे मानाभाव एव। एवं प्रवृत्तिस्तु पूर्वरीत्यैवेति।

तर्कचूडामणिः

तदिदमिति। जातेष्ट्यादेः पुत्रोत्पत्तिनिमित्तकत्वेन नैमित्तिकत्ववत् प्रायश्चित्तस्य पापनिमित्तकत्वेन नैमित्तिककर्मान्तर्भावमाशङ्क्य 'तस्मादेनसः पूतो भवति' इत्यादिवचनेन पापध्वंसफलकत्वश्रवणादिति शब्दखण्डस्थवाक्यस्यार्थः।

ननु काशीमरणस्य तज्जन्यतत्त्वज्ञानस्य वा संचितकर्मनिवर्तकत्वेऽपि न प्रारब्धकर्मनिवर्तकत्वम्, तस्य भोगैकनाश्यत्वात्। तथा च तस्य पुण्यपापात्मकस्य फले सुखदुःखे इति दुःखप्रागभावः काशीमृतानामप्यस्त्येवेत्यरुचेराह—**अस्तु वेति। तत्सत्त्वमिति।** दुःखप्रागभावसत्त्वमित्यर्थः। **पापान्तरमिति।** संचितव्यतिरिक्तं कर्मान्तरमित्यर्थः। अन्यथेत्यापाततः। वस्तुतो दुःखप्रागभावसत्त्व एव तात्पर्यम्। तर्हि दुःखप्रागभावस्यैव फलत्वं स्यात् अव्यभिचारादित्यत आह—**एवं प्रवृत्तिरिति।** 'तस्मादेनसः' इत्यादिवाक्यात् पापध्वंस एव फलमिति भावः।

काशीमृतानां सद्य एव 'विदेहकैवल्यमङ्गीकृत्य दुःखप्रागभावसत्त्वं कैश्चिदङ्गीकृतम्।

---

1 पुरुषार्थानुत्पत्तौ—क 2 विघ-ख
3 प्रागभावार्थत्वेऽपि—क 4 वैदेह—क

प्रकाशः

यत्तु तत्रापि दुःखप्रागभावोऽस्त्येव । तथा च न तस्य निष्फलत्वम् । प्रागभावस्य चानन्यगत्या नियतदेशकत्वकल्पनात् आत्मान्तरे पापान्तरमासाद्य तेन दुःखोत्पादनम् । न चैवं दुःखप्रागभावसत्त्वे काशीमृतस्य कथं मुक्तिरिति वाच्यम् । स्वसमवेतदुःखजनक-प्रागभावस्यैव मुक्तिविरोधित्वात् तद्धर्मेव च मुक्तिलक्षणमिति ।

तन्न । प्रागभावस्य प्रतियोग्यसमानदेशत्वं [1]प्रायश्चित्ते प्रवृत्त्यन्यथानुपपत्त्या वा कल्प्यं मानान्तराद्वा । नाद्यः, उक्तरीत्या तदन्यथोपपत्तेः । नान्त्यः, तदसिद्धेरिति ।

[2]ऐतेन तत्र सन्नपि[2] दुःखप्रागभावः पापरूपसहकारिविरहान्न दुःखोत्पादकः । अत एव न मुक्तिविरोधीति कस्यचित् मतमपास्तम् । तादृशप्रागभावे मानाभावात् , [3]प्रतियोग्यनुपपत्तेश्चेति ।

तर्कचूडामणिः

तद्दूषयति—यत्त्विति । मुक्तात्मनि दुःखोत्पत्तिं वारयति—प्रागभावस्य चेति । ननु दुःखप्रागभावासमानकालीनत्वघटितलक्षणं [5]तत्राव्याप्तं स्यादित्यत आह—तद्धर्मेवेति । स्वसमवेतदुःखजनकप्रागभावासमानकालीनत्वं तदर्थ इत्यर्थः ।

उक्तरीत्येति । पापध्वंसफलजनकत्वेनेत्यर्थः

न मुक्तिविरोधीति । दुःखजनकदुःखप्रागभावस्यैव तद्विरोधित्वादिति भावः । प्रतियोग्यजनकप्रागभावे किं कार्योत्पत्तिर्मानम् उतान्यत् । नान्त्य इत्याह—तादृशेति । नाद्य इत्याह—प्रतियोगीति ।

---

1 प्रायश्चित्तप्रवृत्ति—क
2 एतेन सन्नपि—क
3 प्रतियोग्यनुत्पत्तेश्च—ख
4 तदेतद्दूषयति—ग
5 तत्र व्याप्तं—क

न चैवं प्रायश्चित्तमफलम् । दुःखानुत्पादेन तस्य सफलत्वात् । न च दुःखानुत्पादस्यापि दुःखानुत्पादान्तरमेव फलम् , तच्च तत्र नास्तीत्यफलत्वम् । स्वरूपसत एव तस्य पुरुषार्थत्वात् अनवस्थानाच्च । अतोऽनेन पापेन दुःखं मे मा भूदिति विद्यमानपापनाशार्थं प्रायश्चित्ते प्रवृत्तिः ।

एतेन चीर्णप्रायश्चित्ते दुःखप्रागभावो नास्त्येव । अन्यथा तस्य प्रतियोगिनाश्यत्वेनानिर्मोक्षप्रसङ्गात् । न च प्रायश्चित्तवैफल्यम् , न वा भगवतो दुःखमयकर्मोपदेशकत्वेनानाप्तत्वम् । तस्य पापध्वंसेनैव सफलत्वात् । प्रागभावानिश्चयेऽपि नरकसाधनपापनिश्चयात् तन्नाशार्थं प्रवृत्तिरित्यपास्तम् । दुःखसाधननाशस्य स्वतोऽपुरुषार्थत्वात् । पापान्तरेण तत्प्रतियोगिजनने तन्नाशात् ।

तस्मात् दुःखं मे मा भूदित्युद्दिश्य तत्साधनध्वंसार्थं प्रवृत्तिरिति दुःखानुत्पाद एव पुरुषार्थो न तु दुःखसाधनध्वंस इति स्थितम् । अपि च न तावत् दुःखमयसंसारबीजमिथ्याज्ञानस्य ध्वंसो मुक्तिः । तत्त्वज्ञानात्तन्नाशेऽपि शरीरधर्मादिसत्त्वदशायां मुक्तिप्रसङ्गात् । नापि शरीरेन्द्रियबुद्ध्यादितन्निदानधर्माधर्मध्वंसः । अचीर्णप्रायश्चित्तकर्मणां भोगैकनाश्यत्वेन तत्त्वज्ञानानाश्यत्वात् , भोगद्वारा तन्नाशस्य चापुरुषार्थत्वादिति ।

प्रकाशः

अफलमिति । स्वतःपुरुषार्थाप्रयोजकमित्यर्थः । **दुःखानुत्पादेनेति** । तावत्कालीन दुःखानुत्पादेनेत्यर्थः । **विद्यमानेति** । तथा च निष्फलत्वशङ्का नेति भावः ।

चीर्णेति । कृतेत्यर्थः । अनिर्मोक्षप्रसङ्गमुद्धरति—**पापान्तरेणेति** ।

तर्कचूडामणिः

पापध्वंसरूपफलसत्त्वे अफलत्वशङ्कानुपपत्तिरित्यत आह—स्वत इति । ननु पापान्तरेण कालान्तरे दुःखोत्पत्त्यभ्युपगमेन दुःखानुत्पादोऽसिद्ध इत्यत आह—तावत्कालीनेति । चीर्णं कृतं प्रायश्चित्तं येन स तथा तस्मिन्नित्यर्थः । मूले प्रागभावपदं दुःखप्रागभावपरम् । ननु

अपरे तु दुःखात्यन्ताभावो मुक्तिः। यद्यपि परदुःखात्यन्ताभावः स्वतस्सिद्ध एव। स्वदुःखात्यन्ताभावः स्वात्मन्यसंभवी, घटादावतिप्रसक्तोऽसाध्यश्च। तथापि दुःखसाधनध्वंस एव स्ववृत्तिदुःखस्यात्यन्ताभावसंबन्धः, स च साध्य एव। न चावश्यकत्वेन स एव मुक्तिः। तस्य स्वतोऽपुरुषार्थत्वेन दुःखाभावमुद्दिश्य तत्र प्रवृत्तः। "दुःखेनात्यन्तं विमुक्तश्चरती"त्यत्र अत्यन्ताभावत्वेन मुक्तिश्रवणाच्च। यद्यपि दुःखसाधनध्वंसो न स्वतः पुरुषार्थः, अत्यन्ताभावश्च न साध्यः। तथापि विशिष्टस्य पुरुषार्थत्वं विशेषणसाध्यत्वेन विशिष्टसाध्यत्वं च। अहिकण्टकादिनाशस्यापि तत्तद्व्यक्तिसाध्यदुःखात्यन्ताभावमुद्दिश्य तत्संबन्धत्वेनैव साध्यतेति। तन्न। अधर्मादिदुःखसाधनध्वंसस्य न मुक्तिनिर्वाहकत्वमित्युक्तत्वात्।

किं च नानागतस्ववृत्तिदुःखस्यात्यन्ताभावसंबन्धः साध्यः, मुक्तस्यानागतस्ववृत्तिदुःखानभ्युपगमात्। अभ्युपगमे वा अमुक्तत्वापातात्। अत्यन्ताभावसंबन्धविरोधाच्च। नाप्युत्पन्नस्ववृत्तिदुःखस्य; तद्वृत्तेस्तत्रात्यन्ताभावसंबन्धविरोधात्। तदभावस्य स्वतस्सिद्धत्वात् अतीतदुःखाभावस्यानुद्देश्यत्वाच्च। नापि परकीयदुःखात्यन्ताभावसंबन्धः,

---

प्रकाशः

विशिष्टं नार्थान्तरम्, किं तु विशेषणाद्यात्मकमेव। तत्र विशेषणस्य स्वतःपुरुषार्थत्वाभावात् विशेष्यस्यासाध्यत्वात् तदुभयसंबन्धस्याप्युभयात्मकत्वेनोक्तदोषतादवस्थ्यान्नोक्तपक्षः क्षेदक्षम इत्याशयेनाह—अधर्मादीति। उक्तत्वादिति न तावदित्यादिनेति शेषः।

तर्कचूडामणिः

धर्मादिध्वंसस्य मुक्तिरूपत्वाभावेऽपि तद्विशिष्टस्य दुःखात्यन्ताभावस्य मुक्तित्वं स्यादित्यत आह—विशिष्टमिति। विशेषणस्य दुःखसाधनध्वंसस्य। विशेष्यस्य—दुःखात्यन्ताभावस्य। ननु विशेषणविशेष्यसंबन्धरूपस्य विशेषणविशेष्यभिन्नस्य साध्यत्वपुरुषार्थत्वे स्यातामित्यत आह—तदुभयसंबन्धस्येति। न तावदिति। 'न तावद्दुःखमयसंसारबीजं' इत्यादिनेत्यर्थः।

तस्य स्वतःसिद्धत्वात् । अपि च दुःखसाधनध्वंसस्य नात्यन्ताभावसंबन्धत्वे मानम् । दुःखसाधनध्वंसादावस्य दुःखस्यात्यन्ताभाव इति बुद्धिव्यपदेशौ स्त इति चेत्—न । तस्य समानाधिकरण[1]दुःखाभावविषयत्वेनाप्युपपत्तावतिरिक्तसंबन्धाविषयत्वात् ।

एतेन सर्वदुःखप्रागभावसंबन्धाभावो मुक्तिः । घटादेश्च न मुक्तत्वम् । दुःखसाधनध्वंसविशेषितैतद्योगिनो मुक्तपदार्थत्वात्, तथैव व्यवहारात्, योगरूढिभ्यां पङ्कजादिपदवाच्यत्ववदिति परास्तम् । प्रागभावसंसर्गाभावस्य स्वतोऽनुद्देश्यत्वात् प्रत्युतात्यन्ताभावस्यासाध्यत्वेन ध्वंसरूपत्वेन तस्य दुःखरूपतया हेयत्वात् ।

प्राभाकरास्तु आत्यन्तिकदुःखप्रागभावो मोक्षः । न च [2]तस्यानादित्वेनापुरुषार्थत्वम् । कदाचित् कृत्यनपेक्षत्वेऽपि प्रतियोगिजनकाधर्मनाशमुखेन तस्य कृतिसाध्यत्वात् । कृत्यधीनतत्त्वज्ञानादधर्मनाशे सत्यग्रिमसमये दुःखप्रागभावस्वरूपं नास्ति । तया च विना अधर्मेण दुःखाजननान्न तत्प्रागभावस्वरूपमस्तीति । घटवत् कृतिसाध्यत्वात् । व्यवस्थापितं च त्वया प्रागभावस्य कृतिसाध्यत्वमहिकण्टकादिनाश-

---

प्रकाशः

योगेति । पद्मत्वपङ्कजनिकर्तृत्वोभयविशिष्टे यथा पङ्कजपदप्रयोगो योगादिना तथोक्तोभयविशिष्टे रूढ्यैव मुक्तिपदप्रयोग इत्यर्थः ।

तर्कचूडामणिः

मुक्तपदस्य मुक्ते योगरूढ्यभावात् दृष्टान्तासंगतिमाशङ्क्य विवक्षितसाम्यं दर्शयति—पद्मत्वेति । तथोक्तेति । दुःखसाधनध्वंसेन सर्वदुःखप्रागभावसंसर्गाभावेन च विशिष्टे आत्मनि मुक्तपदप्रयोग इत्यर्थः ।

---

1 दुःखासमानकालदुःखाभाव

2 तस्यानादित्वेन सिद्धत्वेनापुरुषार्थत्वमिति पाठान्तरम् ।

प्रायश्चित्तक्षेमार्थिप्रवृत्तिस्थले । न चैवं युगपदधर्मध्वंस एव मुक्तिः, प्रागभावस्यानादितया विवक्षितविवेकेन तत्रैव कृतिसाध्यत्वपर्यवसानादिति वाच्यम् । अधर्मध्वंसस्य स्वतोऽपुरुषार्थत्वात् दुःखानुत्पादहेतुत्वेनैव तस्य प्रयोजनता वाच्या । सा च कथमसाध्यत्वे प्रागभावस्य स्यादिति । अत एव 'दुःखजन्मप्रवृत्तिदोष' [न्या. सू. १-१-२] इत्यादि सूत्रमपि संगच्छते । अन्यथा मिथ्याज्ञानाद्यनुत्पादानां दुःखानुत्पादाहेतुत्वेन असंगतं स्यादित्याशिषत ।

तदतिस्थवीयः । तथा हि-अस्तु प्रागभावस्य साध्यत्वम्, तथापि तस्य प्रतियोगिजनकत्वनियमात् मुक्तस्यापि दुःखोत्पादप्रसङ्गः । अधर्म-शरीरादिसहकारिविरहान्न दुःखोत्पाद इति चेत्--तर्हि उत्तरावधिविधुरत्वे-नानादेरत्यन्ताभावत्वापत्तौ प्रागभावत्वव्याकोपः प्रतियोगिजनकनाश्य-जातीयत्वेन तत्र प्रागभावत्वव्यपदेशो वस्तुतो नित्य एव स इति चेत्—न । नित्यत्वेनात्यन्ताभावरूपतया प्रागभावान्यत्वेन नाशजातीयत्वाभावात् प्रतियोगि[1]जनकनाशमुखेन तस्यासाध्यत्वाच्च ।

प्रकाशः

अत एवेति । अनुत्पादस्य साध्यत्वादेवेत्यर्थः ।

प्रतियोगीति । प्रतियोगिजनकनाश्यः प्रागभावः तन्नाशस्य प्रतियोगिरूपत्वात् तज्जातीयत्वेनेत्यर्थः । यत्तु प्रतियोगिजनकत्वेन प्रतियोगिनाश्यत्वेन चेत्यर्थ इति । तन्न । तन्नाश्यत्वं हि तज्जन्यनाशप्रतियोगित्वम् । न च प्रागभावनाशः प्रतियोगिजन्यः, अभेदे तदनुपपत्तेरिति ।

तर्कचूडामणिः

दुःखप्रागभावस्य मुक्तित्वमतश्शब्दार्थ इति भ्रान्तिं वारयति अनुत्पादस्येति । प्रतियोगिजनकनाश्यजातीयत्वेनेति मूलमेकहेतुपरत्वेन व्याचष्टे—प्रतियोगिजनकेति । हेतुद्वयपरत्वं दूषयति--यच्चिति । द्वितीयहेतौ बाधकमाह—तन्नाश्यत्वमिति।

---

1 जनकत्वनाश

अपि च मुक्तेः प्रागभावस्य समानाधिकरणं भावि दुःखं न प्रतियोगि, तस्याभावात्। भावे वा अमुक्तत्वापातात्। नापि समानाधिकरणमतीतं वर्तमानं च, तत्प्रागभावस्य विनष्टत्वात्। नापि व्यधिकरणम्, अन्यवृत्तिदुःखस्यान्यत्रात्यन्ताभावेन प्रागभावाभावात्। तस्य प्रतियोगि समानदेशत्वात्। न च दुःखमात्रं प्रतियोगि। स्वपरावृत्तेर्दुःखमात्रस्याप्रामाणिकत्वात्। तस्यात्यन्तासतो [1]नित्यनिवृत्तत्वेन [2]तन्निवृत्तये प्रेक्षावत्प्रवृत्त्यनुपपत्तेः। अहिकण्टकादिनाशप्रायश्चित्तादिसाध्यदुःखप्रागभावस्य कलञ्जभक्षणप्रागभावस्य च समानाधिकरणमेव भावि दुःखं भक्षणं च प्रतियोगि।

ननु दुःखाभावो न पुरुषार्थः, सुखस्यापि हानेस्तुल्यायव्ययत्वात्। न च बहुतरदुःखानुविद्धतया सुखस्यापि प्रेक्षावद्धेयत्वम्। आवश्यकत्वेन दुःखस्यैव हेयत्वात सुखस्य निरुपाधीच्छाविषयत्वात्। अन्यथा दुःखाननुविद्धतया तथात्वेन पुरुषार्थत्वविरोधादिति चेत्—

न। सुखमनुद्दिश्यापि दुःखभीरूणां दुःखहानार्थं प्रवृत्तिदर्शनात् दुःखाभावस्य स्वत एव पुरुषार्थत्वात्। न हि दुःखाभावदशायां सुखमस्तीत्युद्दिश्य [2]दुःखाभावार्थं प्रवर्तते। वैपरीत्यस्यापि संभवे

प्रकाशः

प्रायश्चित्तादिसाध्येति। तत्प्रयोज्येत्यर्थः। कलञ्जः [3]पक्षिविशेष इत्याहुः [4]अभक्ष्यमांसमित्यपरे।

तर्कचूडामणिः

ननु पापध्वंसस्यैव प्रायश्चित्तसाध्यतया दुःखप्रागभावस्य (कथं) तत्साध्यत्वमित्यत आह तत्प्रयोज्येति।

---

1 नित्यानिवृत्तत्वेन
2 दुःखहानार्थम्
3 करकरश्वा इति प्रसिद्धपक्षी—ख
करण इति प्रसिद्धपक्षी—ग
4 कुक्कुटमांस ग

सुखस्याप्यपुरुषार्थत्वापत्तेः। अतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकम्। तस्माद्विवेकिनः सुखमात्रलिप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य "शिरो मदीयं यदि यातु यातु" इति कृत्वा परदारादिष्वपि प्रवर्तमानाः "वरं वृन्दावनेऽरण्ये" इत्यादि वदन्तो नात्राधिकारिणः।

ये च विवेकिनोऽस्मिन् संसारकान्तारे कियन्ति दुःखदुर्दिनानि, कियती सुखखद्योतिकेति कुपितफणिफणामण्डलच्छायाप्रतिममिदमिति मन्यमानाः सुखमपि हातुमिच्छन्ति तेऽत्राधिकारिणः। न च भोगार्थिनामप्रवृत्तौ पुरुषार्थता हीयते। कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात्। अथ—

दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते।
न हि मूर्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः॥

पुरुषार्थत्वे सुखवत् ज्ञायमानत्वनियमात्, न च मुक्तौ ज्ञानं संभवतीति

प्रकाशः

तथापि तुल्यायव्ययत्वं न समाहितमित्युपसंहरति—तस्मादिति। तथा च विवेकिनं प्रति न तुल्यायव्ययत्वमिति भावः।

कस्यचिदिति। अन्यथा मुमुक्षोः प्रवृत्त्यभावे सुखमपि पुरुषार्थो न स्यादिति भावः।

नन्वस्तु तज्ज्ञानमित्यत आह—न चेति। शरीराद्यभावादिति भावः। पुरुषार्थत्व इति निरुपाधीच्छाविषयत्वस्य तथाप्यनपायादिति भावः।

तर्कचूडामणिः

तथापीति। तथा च मोक्षशास्त्रस्याप्रवर्तकत्वलक्षणमप्रामाण्यं स्यादित्यर्थः। किं विवेकिनां प्रवृत्तिः, उताविवेकिनाम्? नाद्य इत्यह—तथा चेति। अन्त्यं दूषयति—कस्यचिदिति। शास्त्रमधिकारिणं प्रवर्तयति, विपक्षे बाधकमाह—अन्यथेति॥ तथा च ज्योतिष्टोमादिशास्त्रमप्यप्रमाणं स्यादिति भावः।

शरीरेति। शरीराभावे जन्यज्ञानाभावादिति भावः। निरुपाधीति

चेत्—न दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः। किं तु दुःखं मे मा भूदित्युद्दिश्येत्यतः दुःखाभाव एव पुरुषार्थः। तस्य ज्ञानं तु स्वकारणाधीनम्, न तु पुरुषार्थतोपयोगि। सुखी स्यामित्युद्दिश्य प्रवर्तते न तु सुखं जानीयामिति सुखमेव तथास्तु, न तु तदवगमः, तस्यावश्यकत्वेनान्यथासिद्धत्वात् गौरवाच्च।

किं च बहुतरदुःखजर्जरकलेवरा दुःखाभावमुद्दिश्य मरणेऽपि प्रवर्तमाना दृश्यन्ते। न च मरणे तस्य ज्ञानमस्ति। न ते विवेकिन इति चेत्—न। पुरुषार्थत्वे विवेकानुपयोगात्। किं च चरमदुःखानुभवेऽनागतदुःखध्वंसोऽपि विषयः। तथा चाग्रिमक्षणे [1]तदुपरमः। तद्विषयकं च विनश्यदवस्थं ज्ञानमस्तीति वर्तमानमप्यचिरमनुभूयते। ज्ञानसमये मुक्तिलक्षणस्य सत्त्वान्न ज्ञानं मुक्तिविरोधि।

प्रकाशः

अनागतेति। योगजधर्मबलादिति भावः। मुक्तिलक्षणस्येति। पूर्वोक्तस्येत्यर्थः। अशेषात्मविशेषगुणोच्छित्तिस्तु न लक्षणं येन ज्ञानं मुक्तिविरोधि स्यादिति भावः।

ननु देवदत्तदुःखत्वं न पक्षतावच्छेदकम्, उक्तहेतुद्वयस्य दुःखत्वे व्यभिचारात्

तर्कचूडामणिः

यदवगतं सत् स्ववृत्तितयेष्यते तस्य प्रयोजनत्वादिति भावः।

नन्ववर्तमानस्य चरमध्वंसस्य कथं प्रत्यक्षविषयतेत्यत आह—योगजेति। ननु ज्ञानसमये कथमशेषविशेषगुणध्वंसरूपमुक्तिलक्षणमित्यत आह—पूर्वोक्तस्येति।

व्यभिचारादिति। तत्संदेहादित्यर्थः। एतच्च सम्प्रदायमते। नव्यमते

---

1 तद्ध्वंसः

प्रमाणं तु—दुःखत्वं देवदत्तदुःखत्वं वा स्वाश्रयासमानकालीन-ध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तिधर्मत्वात् संततित्वाद्वा एतत्प्रदीपवत्। संततित्वं च नानाकालीनकार्यमात्रवृत्तिधर्मत्वम्। एवं च सुखत्वादावपि साध्यम्, तेन समूलोच्छेदे मोक्षः। न चाप्रयोजकत्वम्। संतत्युच्छेदे मूलोच्छेदस्य प्रयोजकत्वात्। प्रकृते च मिथ्याज्ञानस्य संसारमूलस्य श्रवणादिक्रमेणोत्पन्नतत्त्वज्ञानान्निवृत्तिः संभवत्येव। "आत्मा ज्ञातव्यो न स पुनरावर्तते" इति श्रुतिस्तत्र प्रमाणम्। रात्रिसत्रन्यायेनार्थवादोपनीतापुनरावृत्तेः अधिकारिविशेषणत्वात्। सः-आत्मज्ञो न पुनरावर्तते न

प्रकाशः

प्रत्येकं मुक्तिरपि न सिध्येदित्याशयेन सर्वमुक्तिं साधयन्नाह—दुःखत्वमिति। स्वाश्रयेति। स्वाश्रयत्वावच्छिन्नासमानकालीनेत्यर्थः। द्रव्यत्वादौ व्यभिचारादाह—मात्रेति। यद्यपि ध्वंसत्वे व्यभिचारः, स च भावकार्यविवक्षया परिहर्तुं शक्यः। तथापि यथाश्रुतेऽपरितुष्यन्नाह—संततित्वाद्वेति। नन्वत्रापि दोषतादवस्थ्यम्, अत आह—संततित्वं चेति। नानाकालः पूर्वोत्तरकालः। ध्वंसे च नोत्तरकालः, तस्यानन्तत्वात्। तथा च ध्वंसप्रतियोगिकार्यमात्रवृत्तिधर्मत्वादित्यत्र तात्पर्यम्। एवमिति। न च ज्ञानत्वादीनां पक्षत्वे कार्यमात्रवृत्तित्वमसिद्धमिति वाच्यम्। जन्यज्ञानत्वादेः पक्षत्वात्। संतत्युच्छेद इति। एवं चोपाधिशङ्कापि प्रत्युक्ता। रात्रीति। यथा "य एता रात्रीरुपयन्ति

तत्त्वचिन्तामणिः

तत्संदेहस्य पक्षीयसंशयवत् अगतिबन्धकत्वादिति बोध्यम्। अतीतकिंचित्स्वाश्रयासमानकालीनत्वमिदानीमुत्पन्नस्य दुःखध्वंसस्यापीत्यत आह—स्वाश्रयत्वेति। दोषतादवस्थ्यमिति। कार्यमात्रवृत्तित्वं संततित्वम्, तच्च ध्वंसत्वेऽपीति भावः। तर्हि पूर्वकालवैयर्थ्यम्, प्रागभावे साध्यसत्त्वेन व्यभिचाराप्रसङ्गात्। अतस्तथैव निष्कृष्टमर्थमाह—तथा चेति। अत्र कार्यपदं संपातायातम्। उपाधीति। अनुकूलतर्काभावे पक्षेतरत्वादेरुपाधित्वसंभवादिति भावः। यद्यपि "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इति प्रतिष्ठाकामा रात्रीरुपयुरित्येवार्थवादिकफलनिष्पत्त्युदाहरणं मीमांसकैरुक्तम्, तथापि तुल्यन्यायत्वादुदाहरणान्तरमाह—यथेति।

पुनः शरीरी भवतीत्यर्थः। "आत्मा वा अरे श्रोतव्यो निदिध्यासितव्यः [साक्षात्कर्तव्यः]" इत्युपक्रम्य "दुःखेनात्यन्तं विमुक्तश्चरति" इति श्रुतिश्च मानम्।

आचार्यास्तु—"अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः" इति श्रुतिस्तत्र मानम्। वावसन्तमिति यङ्लुकि। तेन संसारदशायां क्षणमात्रमशरीरत्वेन नान्यथासिद्धिः।

ननु द्वन्द्वस्वरसेन मिलितसुखदुःखोभयनिषेधः प्रतीयते। स तु

प्रकाशः

तस्य पितरो घृतकुल्यां मधुकुल्यां वा क्षरन्ति" इत्यर्थवादोपनीतं तत्फलं तथात्रापीत्यर्थः। शरीरीति। यद्यपि तत्त्वज्ञानवतोऽपि भोगार्थं शरीरम्, तथापि [1]दोषानुषक्तशरीराभावात् तद्वान्न भवतीत्यर्थः। तत्त्वज्ञानहेतुत्वसिद्ध्यर्थमाह—इत्युपक्रम्येति।

तेनेति। न चैवमपि खण्डप्रलयकालमादायान्यथासिद्धमिति वाच्यम्। मुक्तिप्रकरणाम्नातत्वेन तत्परत्वादित्याहुः। ननु यङन्तत्वे वावसतमिति स्यात्। 'नाभ्यस्ताच्छतु' (पा. सू ७-९-७८) इति नुम्निषेधात्। तथा च वावेति संबोधनम्। अतः क्षणमात्राशरीरत्वेनैवान्यथासिद्धिरिति चेत्—न। छान्दसत्वेनोपपत्तेः। [2]एतदस्वरसादेव 'आचार्यास्तु' इत्युक्तमित्यन्ये।

तर्कचूडामणिः

खण्डेति। तदाप्यात्मनामशरीरत्वादिति भावः। अन्य इत्यस्वरसोद्भावनम्। आगमविधेरनित्यत्वेन नुमभावेऽपि साधुत्वात्। अत एव स्वपरावृत्तेर्दुःखमात्रस्येत्युक्तमिति

---

1 दोषानुषक्तशरीरं न भवतीत्यर्थः—क
दोषानुषक्तशरीरभावाभावात् भवतीत्यर्थः—ख

2 एतदनुशयादेव—ख

नित्यवत् प्राप्त एव। एकैकनिषेधे च वाक्यभेदापत्तिः। न च मुक्तौ प्रमाणमिति चेत्—न। द्वित्वेनैकेन रूपेणोपस्थितयोः प्रत्येकंनिषेधान्वयेऽपि वाक्यभेदाभावात्। धवखदिरौ छिन्धीत्यत्र प्रत्येकं छिदान्वय इव। न हि तत्र मिलितच्छिदा। अपि च न प्रियाप्रियरूपं किंचिदस्तीति मिलितनिषेधोऽप्येकैकान्वये प्रत्येकाभावे वा भवेत्। तत्र एकैकान्वयस्याशरीरे योग्यत्वात् प्रत्येकाभाव एव पर्यवस्यति। अत एव सर्वमुक्तिरपि। सर्वदुःखसंततिपक्षीकरणे तत्सिद्धेः। अन्यथा मुक्तिरपि न स्यात्, तत्रैव व्यभिचारात्।

यदि [1]चोभयात्मान एव केचित्, तदा तच्छङ्कया मोक्षार्थं न कश्चित् प्रवर्तेत। शमदमभोगानभिष्वङ्गादिमुक्तिचिह्नेन श्रुतिसिद्धेन सन्देहनिवृत्तिरिति चेत्—न। संसारित्वेन मुक्तियोग्यत्वात्, न तु तद्विशेषणशमादिमत्त्वेन। सामान्ये बाधके सत्येव योग्यतायाः विशेषनिष्ठत्वात्।

प्रकाशः

न चेति। एकसत्त्वेऽपि मिलितनिषेधसंभवात् न मुक्तौ प्रमाणत्वमिति भावः। श्रुतेः प्रत्येकमुक्तिविषयतयाप्युपपत्तेः सर्वमुक्तौ उक्तानुमानमेव प्रमाणमित्याह—अत एवेति। अस्यश्रुतेरामर्शभ्रमं वारयति—सर्वेति। [2]सर्वदुःख[3]पक्षीकरण इत्यर्थः।

लीलावतीकारमतं निरस्यति—यदि चेति।

तर्कचूडामणिः

द्रष्टव्यम्। नित्यवत्प्राप्तावपि का हानिरित्यत आह—एकसत्त्वेऽपीति। अस्येति। अतश्शब्दस्येत्यर्थः। सर्वदुःखपक्षीकरणे पूर्वोक्तसाध्यस्य तत्र बाधः स्यादित्यत आह—दुःखत्वेति।

ऊषरभूमिवत् केचित् आत्मानो मुक्तिं प्रत्ययोग्याः। ते च नित्यं संसारिणः तथा च न सर्वमुक्तिरिति लीलावतीकारमतं दूषयतीत्याह—लीलावतीति।

---

1 यदि चोभयात्मान[3]

2 दुःख-ख

दुःखत्वपक्षी-ग सर्वदुःखत्व-ग

किं च शमादयः श्रुत्या मुक्तौ सहकारितया बोधिताः न तु योग्यतया। तत्त्वेऽपि संसारित्वेन तेऽपि साधनीयाः। शमादिकमपि हि कार्यम्। तत्रापि संसारित्वेनैव योग्यता, सामान्ये बाधकाभावात्।

न च नित्यसुखाभिव्यक्तिर्मुक्तिः। सा हि न नित्या, मुक्तशरीरिणोरविशेषापातात्। नोत्पाद्या, तद्धेतुशरीराद्यभावात्, ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधारणात्। न च संसारदशायां तद्धेतुः, सामान्ये बाधकाभावात्। अत एव सर्गादौ शरीरकल्पना। किं च तज्जनकं न तावदात्ममनोयोगः। तस्यादृष्टादिनिरपेक्षस्याजनकत्वात्। विषयमात्रापेक्षणे तु संसारिदशायामपि तदभिव्यक्तिप्रसङ्गः। नापि योगजो धर्मः सहकारी, तस्योत्पन्नभावत्वेन विनाशित्वेऽपवर्गनिवृत्त्यापत्तेः। न तज्जन्याभिव्यक्तिरनन्ता, तस्या अपि तत एव नाशात्।

अथ तत्त्वज्ञानात् सवासनमिथ्याज्ञाननाशे दोषाभावेन प्रवृत्त्याद्यभावात् धर्माधर्मयोरनुत्पादे प्राचीनधर्माधर्मक्षयात् दुःखसाधनशरीरादिनाश एव तत्र हेतुः। अत एव तस्यानन्त्येनाभिव्यक्तिप्रवाहोऽप्यनन्त इति

प्रकाशः

भट्टमतं निरस्यति--न चेति। नित्यस्य सुखस्याभिव्यक्तिरित्यर्थः। सुखमात्रे वेति दृष्टान्तार्थमुक्तम्। अस्यैवासिद्धिमाशङ्क्याह--अत एवेति। [1]सुखमात्रस्य शरीरजन्यत्वादेवेत्यर्थः। तत[1] एवेति। उत्पन्नभावत्वादेवेत्यर्थः।

तर्कचूडामणिः

वेदान्तिमतभ्रमं निरस्यति--भट्टेति। अनित्यत्वस्य अभिव्यक्तिविशेषणत्वभ्रान्तिं वारयति--नित्यस्येति। प्रकृतासंगतिं वारयति--दृष्टान्तार्थमिति। अस्यैवेति। दृष्टान्तस्येत्यर्थः। बाधकाभावस्यातःशब्दार्थत्वं वारयति--सुखमात्रस्येति। उपजनाद्यसिद्धिं निरस्यति--इदानीमिति। नष्टं सुखमित्यनुभव आदिशब्दार्थः। ननु सुखत्वमेवोक्त-

---

1 नत-क

चेत्—न। शरीरं विना तदनुत्पत्तेः। तस्य तद्धेतुत्वे मानाभावाच्च। न च मोक्षार्थिप्रवृत्तिरेव तत्र मानम्। दुःख[1]हानार्थितया तदुपपत्तेः। न च नित्ये सुखे मानमस्ति। 'नित्यं विज्ञानमानन्दं ब्रह्म'' ''आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्'' इत्यादिश्रुतिर्मानमिति चेत्—न। [3]उपजनापायवतोर्ज्ञानसुखयोरहं जानाम्यहं सुखीति भिन्नत्वेनानुभूयमानयोर्ब्रह्माभेदबोधने प्रत्यक्षबाधात्।

अथ सुखस्य ब्रह्माभेदबोधनादेवायोग्यतया अनित्यं सुखं विहाय वाक्यार्थत्वेन नित्यसुखसिद्धिः स्वर्गवत्। न तु नित्यसुखे सिद्धे तदभेदबोधनम्, येनान्योन्याश्रयः। यद्वा नित्यं सुखं बोधयित्वा ब्रह्म बोध्यते। न च वाक्यभेदः। वाक्यैकवाक्यत्वादिति चेत्—न। आत्मनोनुभूयमानत्वेन

प्रकाशः

[3]उपजनेति। इदानीमुत्पन्नं सुखम् इत्याद्यनुभवबलादिति भावः। भिन्नत्वेनेति। अभेदे तद्वत्तानुपपत्तेरिति भावः।

[4]बाधस्य विशेषविषयत्वेन सामान्यतो योग्यतासंशयमत्त्वात् अन्वयः स्यादित्यत आह—अथेति। स्वर्गवदिति। अन्यथा अस्मदादिसुखस्य दुःखसंभिन्नत्वनिश्चयात् बाधापत्तेरिति भावः। उक्तरीत्या प्रथमेऽपि नित्यसुखसिद्धिः संभवत्येवेति क्वान्योन्याश्रय इत्यरुचेराह—यद्वेति।

तर्कचूडामणिः

प्रत्यक्षविषयः, न तु तद्भेद इत्यत आह—अभेद इति। तथा च भेदव्याप्यधर्मप्रत्यक्ष इत्यर्थः।

ननु भेदनिश्चयस्याभेदज्ञानविरोधित्वादभेदबोधनादेवेत्ययुक्तमित्यत आह—बाधस्येति। भेदनिश्चयो वैषयिकानन्दगोचरतया नालौकिकानन्दाभेदविरोधीति भावः। अन्यथेति। तथा च भिन्नविषयत्वादेव न तत्र प्रतिबन्धकत्वमिति वक्तव्यमिति भावः। ननु सुखं नष्टमिति प्रत्यक्षे सति सुखं नित्यमित्यवान्तरवाक्यार्थबोधोऽसंभवीत्यत आह—उक्तरीत्येति।

---

1 हानार्थितयापि
2 उत्पत्त्यपाय।
3 उत्पत्त्यपायेति-ग
4 बोधस्य—ख

तदभिन्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात् । सुखमात्रस्य स्वगोचर-साक्षात्कारजनकत्वनियमात् तदननुभवे वा आत्मनोऽप्यनुभवो न स्यात् । अथात्माभिन्नं नित्यसुखमनुभूयत एव । सुखत्वं तु तत्र नानुभूयत इति चेत्—न । सुखानुभवसामग्र्या एव सुखत्वानुभावकत्वात् । तस्मात् 'आनन्दं ब्रह्म' इति मत्वर्थीयाच्प्रत्ययान्तत्वेन आनन्दवत्त्वं बोध्यम्, तेनाभेदः । अन्यथा नपुंकसलिङ्गत्वानुपपत्तेः ।

एतेन ब्रह्माद्वैतसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः 'कैवल्यात्मापवर्गे वर्तत इति वेदान्तिमतमपास्तम् । स्वप्रकाशसुखात्मक-ब्रह्मणो नित्यत्वेन मुक्तसंसारिणोरविशेषप्रसङ्गात् पुरुषप्रयत्नं विना तस्य सत्त्वादपुरुषार्थत्वाच्च । अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत्—अविद्या यदि मिथ्याज्ञानमर्थान्तरं वा, उभयथापि सुखदुःखाभावतत्साधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात्।

प्रकाशः

श्रुतिविरोधं परिहरति—तस्मादिति । यद्यपि छान्दसत्वेऽपि लिङ्गव्यत्ययः संभवति, तथाप्युक्तयुक्त्या तयोर्भेदे तद्वत्त्वपरतैवेति भावः ।

एकदण्डिमतं निरस्यति—एतेनेति । तत्साधनेति । यद्यपि मिथ्याज्ञाननिवृत्तिः

तर्क चूडामणिः

नष्टं सुखमिति ज्ञानस्य भिन्नविषयत्वेनाप्रतिबन्धकत्वान्न दोष इति भावः । (मूले) अन्यथेति । आनन्दशब्दस्य नित्यपुंलिङ्गत्वादिति भावः ।

यद्यपीति । तथा च तत्साधनत्वेनाविद्यानिवृत्तेः पुरुषार्थता स्यात् इति भावः ।

---

1 केवल आत्मा

[1]त्रिदण्डास्तु—[2]आनन्दात्मकपरमात्मनि जीवात्मलयो मुक्तिः। लयश्च लिङ्गशरीरापगमः। लिङ्गशरीरं च एकादशेन्द्रियाणि पञ्च महाभूतानि सूक्ष्ममात्रया संभूयावस्थितानि जीवात्मनि सुखदुःखावच्छेदकानीत्याहुः।

प्रकाशः

तत्त्वज्ञानव्यापारतया दुःखाभावसाधनमेव। तथापि दुःखाभावस्य मोक्षत्वेनानभ्युपगमात् मुमुक्षूणां तदर्थितया प्रवृत्तिस्तव मते न स्यादित्याशयः।

ननु लयः संयोगो विनाशो वा विभुत्वनित्यत्वाभ्यां न संभवतीत्यतो व्याचष्टे—**लयश्चेति**। तथा च जीवात्मलय इत्यस्य जीवात्मसंबन्धिलिङ्गशरीरध्वंस इत्यर्थः। लिङ्गशरीरमेव किमित्यत आह—**लिङ्गेति**। चक्षुरादीनि बुद्धीन्द्रियाणि पञ्च, वाक्पाणिपादपायूपस्थानि च कर्मेन्द्रियाणि पञ्च मनश्चेत्येकादशेन्द्रियाणि। **सूक्ष्मेति**। किंचिन्मात्रया शरीरभावेनावस्थितानीत्यर्थः।

तर्कचूडामणिः

तदर्थितयेति। दुःखाभावार्थितयेत्यर्थः। एतच्चोपलक्षणम्। अविद्यानिवृत्तिः ब्रह्मभिन्ना चेत् तस्या मिथ्यात्वे तन्निवृत्तौ मुक्तस्य संसारापत्तिः। तस्याः सत्यत्वे अद्वैतहानिः। ब्रह्मा भिन्ना चेत् संसारदशायामपि मुक्त्यापत्तिः। मिथ्याज्ञानाद्व्यतिरिक्ताविद्यायां मानाभावश्चेत्यपि बोध्यम्।

विभुत्वेति। विभुत्वात्संयोगाभावः नित्यत्वाल्लयाभावः इत्यर्थः। ननु तथापि जीवलयाभिधानमसंगतमित्यत आह — **तथा चेति**। औपचारिको जीवलयव्यपदेश इत्यर्थः।

---

1 त्रिदण्डिनस्तु 2 आनन्दमयपरमात्मनि

तन्न। लिङ्गशरीरध्वंसस्य स्वतो दुःखसाधनाभावतया अपुरुषार्थत्वात्। न चोपाधिशरीरनाशे ह्यौपाधिकजीवनाशो लयः। स्वनाशस्या-पुरुषार्थत्वात्। ब्रह्मणो नित्यत्वेन तदभिन्नस्य नाशानुपपत्तेः, भेदाभेदस्य विरोधेनाभावात्।

नाप्यनुपप्लवा चित्तसंततिरपवर्गः। आवश्यकत्वेन अनुपप्लवस्य दुःखाभावस्य पुरुषार्थत्वे चित्तसंततेरपुरुषार्थत्वात्। शरीरादिकारणं विना चित्तसन्ततेरनुत्पादाच्च। न हि चित्तमात्रं तत्सामग्री। शरीरादि वैयर्थ्यापत्तेः। नापि दुःखहेतुत्वेनात्महानमेव मुक्तिः। सुखदुःखाभावेना-पुरुषार्थत्वात्। ज्ञानरूपात्महानस्यायत्नसिद्धेः अतिरिक्तहानस्या-शक्यत्वात्।

यत्तु योगर्द्धिसाध्यनिरतिशयानन्दमयीं जीवन्मुक्तिमुद्दिश्य प्रवृत्तेः कारणवशादात्यन्तिकदुःखाभावरूपां मुक्तिमासादयतीति मतम्। तन्न। [परम]मुक्तेरपुरुषार्थतापत्तेः। विरक्तस्य मोक्षेऽधिकारात् सुखोद्देशेना-प्रवृत्तश्च।

प्रकाशः

उक्तव्याख्यायाम् 'आनन्दमयपरमात्मनि' इत्यलग्नकमेवेति दोषे सत्येवाह — लिङ्गेति। दुःखसाधनेति। अहिकण्टकादिध्वंसस्य चानागतदुःखप्रागभावप्रयोजकतया प्रयोजनत्वम्। न च दुःखप्रागभावो मुक्तस्येति न तस्य प्रवृत्त्यङ्गत्वमिति भावः।

मुक्तेरिति। परममुक्तिरित्यर्थः। इष्टापत्तिमाशङ्क्याह — विरक्तस्येति। दुःखाभावमुद्दिश्यैव प्रवर्तते न तु सुखोद्देशेनेति तस्य स एव [1]पुरुषार्थ इति भावः।

तर्कचूडामणिः

अहिकण्टकनाशवदुद्देश्यतां निराकरोति— [अहीति]।

ननु जीवन्मुक्तेरुद्देश्यतया कथं [अ] पुरुषार्थत्वापादनमित्यत आह—परममुक्तेरिति।

---

1 इष्टार्थः—क

मोक्षे च सर्वाश्रमिणामधिकारः । आश्रमचतुष्टयमुपक्रम्य "स ब्रह्मसंस्थोऽमृतत्वमेति" इति श्रुतेः, संकोचे [1]कारणाभावात् । आकाङ्क्षाया अविशेषेणानन्तर्यस्याप्रयोजकत्वात् । कथं तर्हि —

"मोक्षश्रमश्चतुर्थो वै यो भिक्षोः परिकीर्तितः"

इति प्रव्रज्यां मोक्षाश्रममाहुः । गृहस्थस्य च पुत्रदारादिसङ्गो दुर्वार इत्यसाधारण्येन तथोपदेशात्, "तत्त्वज्ञाननिष्ठो गृहस्थोऽपि हि मुच्यते" इत्यागमाच्च ।

प्रकाशः

प्रसङ्गादाह—मोक्षे चेति । ननु "ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा" इत्युपक्रम्य "स ब्रह्मसंस्थोऽमृतत्वमेति" इति श्रुत्या यतेरेवाधिकारबोधनम् : अव्यवहितानन्तर्येण [2]तस्यैव तत्पदेन परामर्शादित्यत आह—आकाङ्क्षाया इति । आनन्तर्यस्येति । अव्यवहितानन्तर्यस्येत्यर्थः । बाधकं विना संकोचानुपपत्तेरिति भावः । कथमिति । एतद्बलादेव संकोच इति भावः । नन्वेतदेव कथमित्यत आह—तत्त्वज्ञानेति । एवं स्थिते मननं विदधातीत्यन्वयः । गृहस्थादिरपीति शेषः ।

तर्कचूडामणिः

प्रसङ्गादिति । मोक्षे निरूपिते तदधिकारिणो बुद्धिस्थत्वादिति भावः । यद्यपि स्वर्गस्थानीये मोक्षे नाधिकारचिन्ता युक्ता, तथापि तत्साधनश्रवणादावियमधिकारचिन्तेति भावः । यद्यपि "त्रयो धर्मस्कन्धाः" इत्युपक्रम्य "ब्रह्मसंस्थोऽमृतत्वमेति" इति श्रूयते । तथापि स्मृतिवाक्यमापातत उदाहरति — ब्रह्मचारीति । आनन्तर्यप्रतियोगित्वं ब्रह्मचर्यादेरप्यस्तीत्यत आह—अव्यवहितेति । प्रकरणात्मकाकाङ्क्षापेक्षया आसत्तिलक्षणस्यानन्तर्यस्य दुर्बलत्वादिति भावः । एतदेवेति । गृहस्थस्य तत्त्वज्ञानमेवेत्यर्थः । एवं स्थित इति । सर्वाश्रमे सतीत्यर्थः ।

---

1 मानाभावात् 2 तत्पदार्थस्यैव परा-क

एवं स्थिते मोक्षमुपक्रम्य "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः (साक्षात्कर्तव्यः)" इति श्रुतिः, श्रुतिभ्यश्च शरीरादिभिन्नमात्मानमवधार्य शास्त्रेण पदार्थान् विविच्य तद्बोधितोपपत्तिभिस्तस्य स्थिरीकरणरूपं मननं विदधाति ।

न च शब्दोपपत्तिजन्यतत्त्वज्ञानात् साक्षात्कारिसंसारबीजसंस्कारमिथ्याज्ञाननिवृत्तिः । दिङ्मोहादौ तथानुपलम्भेः । अतः श्रुतिस्मृत्युदितविधिना चिरनिरन्तरादरसेवितनिदिध्यासनजन्ययोगजधर्मात् आत्मतत्त्वसाक्षात्कारं संसारबीजसंस्कारमिथ्याज्ञानोन्मूलनसमर्थमासाद्य दोषाभावात् प्रवृत्त्यादेरभावेऽनागतधर्माधर्मानुत्पादेऽनादिभवसञ्चितकर्मणां भोगेन क्षयादपवृज्यते । उपदेशमात्रात् शरीरभिन्नात्मावगमेऽपि अन्यपरत्व-

---

प्रकाशः

इति श्रुतेरिति [श्रुतिरिति] । इत्यादिश्रुते[श्रुति]रित्यर्थः । शरीरादिभिन्नमित्युपलक्षणम् । इष्टसाधनीभूत[1]मननविषयत्वेत्यपि (?) द्रष्टव्यम् । [2]इतरभिन्नत्वानुमितौ प्रतियोगिज्ञानद्वारा शास्त्रोपयोगं दर्शयति—शास्त्रेणेति ।

तर्कचूडामणिः

उदाहृतश्रुतिः श्रुत्यन्तरोपलक्षणार्थेत्याह--इत्यादीति । न्यायशास्त्रजन्यपदार्थबोधस्योपयोग इत्याह— इतरेति ।

---

1 मननसाधनं चेत्यपि—ग 2 इतरभिन्नत्वोपपत्तौ—क

शङ्कया 'सङ्कासूकस्य नाश्रद्धामलक्षालनमिति मननमावश्यकम् । तथा च 'मन्तव्यश्चोपपत्तिभिः' इति श्रुतिरेवोपपत्तिबोधकस्य शास्त्रस्यापवर्गहेतुत्वं बोधयति । मननस्य तदेकसाध्यत्वात् । एवं च शमदमब्रह्मचर्याद्युपबृंहितयावन्नित्यनैमित्तिकमन्ध्योपासनादिकर्मसहितात् तत्त्वज्ञानान्मुक्तिः ।

प्रकाशः

उपपत्तिबोधद्वारापि तदुपयोगमाह— तथा चेति । ज्ञानकर्मसमुच्चयवाद्याक्षिपति— एवं चेति । ज्ञानहेतुत्वाभ्युपगमे तथैव कर्मणोऽपि हेतुत्वमिति तुल्यम् उभयप्राधान्यमिति भावः ।

केचित्तु— तत्वज्ञानमात्रं न प्रयोजकम , किं तु प्राधान्येन कर्मणोऽपि [2]तथात्वमित्यत आह—एवंचेति । तथा च सिद्धान्तग्रन्थ एवायम् । तटस्थपूर्वपक्षे [3]श्रमकृते ज्ञानमात्रतन्त्रत्वपरे परद्वारा निरस्ते सिद्धान्तावतार इत्याहुः ।

तर्कचूडामणिः

सिद्धान्तिग्रन्थत्वशङ्कां वारयति --ज्ञानेति । समुच्चयमाह—ज्ञानेति । उत्तरो ग्रन्थः स्पष्टार्थः ।

इति श्रीमत्कण्टरमाणिक्यग्रामवासिना त्रिवेदनारायण
भट्टात्मजेन धर्मराजभट्टेन विरचिते तर्कचूडामणौ
'अनुमानपरिच्छेदः संपूर्णः

क्वाहं मन्दतरप्रज्ञः क्व च चिन्तामणिः खरः ।
तथापि परिहम्याय कृता टीका विपश्चिताम् ॥

---

1 अस्थिरस्येत्यर्थः
2 तथात्वमित्याह—ख
3 श्रमकृतज्ञानमात्रतन्त्रत्वे चोदकद्वार
4 मोक्षवादः समाप्तः—

स्यादेतत्—ज्ञानकर्मणोर्न समप्राधान्येन समुच्चयः। कर्मणां स्ववाक्यात् फलान्तरार्थत्वेन श्रुतत्वात् मोक्षार्थकल्पनाविरोधात् तत्त्वज्ञानस्य कर्मनैरपेक्ष्येण मुक्तिहेतुत्वप्रतीतेश्च। नाप्यङ्गाङ्गिभावेन। तथा हि--न कर्म संनिपत्योपकारकम्। तत्त्वज्ञानशरीरानिर्वाहकत्वात्। नापि प्रयाजादि वदारादुपकारकम्। स्ववाक्यत एव कर्मणां प्रयोजनलाभेन फलवत्संनिधावफलत्वाभावात्। उपपत्तिविरुद्धश्च ज्ञानकर्मसमुच्चयः। काम्यनिषिद्धयोस्त्यागात् नाप्यसंकल्पितफलवत्काम्यकर्मसमुच्चयः। चतुर्थाश्रमविरोधात्। अत एव न यावन्नित्यनैमित्तिकसमुच्चयोऽपि। नापि यत्याश्रमविहितेन कर्मणा। तत्त्वज्ञाने सति गृहस्थस्यापि मुक्तिः।

ज्ञानं प्रधानं न तु कर्महीन
कर्म प्रधानं न तु बुद्धिहीनम्।
तस्मात्तयोरेव[1] भवेत्प्रसिद्धिः
न त्वेकपक्षो विहगः प्रयाति॥

प्रकाशः

संनिपत्योपकारकत्वं यदि तत्त्वज्ञानसहकारितया साक्षान्मुक्तिहेतुत्वं तदा नाङ्गाङ्गिभावः। किं तु समप्राधान्यमेव। तच्च दूषितमेवेति प्रधानीभूततत्त्वज्ञानशरीरनिष्पादकत्वमेव तद्वाच्यम्। एवं च सत्याह--तत्त्वज्ञानेति। नापीति। [2]असंकल्पितफलमभिलाषाविषयफलम्, काम्यं कामनापूर्वकं कृतं श्राद्धादि तत्समुच्चय इत्यर्थः। चतुर्थेति। तत्र काम्यमात्रस्यैव निषेधादित्यर्थः।

द्वयोरेवेति। ज्ञाने कर्मणि च सतीत्यर्थः। प्रसिद्धिः-प्रकृष्टा सिद्धिः मुक्तिरित्यर्थः।

---

1 द्वयोरेवेति प्रकाशसंमतः पाठः

2 असंकल्पितफलम् अभिलाषविषयसंकल्पादिविषयफलम्—क
असंकल्पितफलसंकल्पविषयफलम्—ख

"न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि हि मुच्यते ॥'

इति स्मृतेः ।

न चाननुगतमपि साधनम् । स्वर्गवदपवर्गे प्रकारभेदाभावात् । न चापवर्गार्थिकर्तव्यतया विहितानि कर्माणि, येन तत्समुच्चयः स्यात् । 'संन्यस्य सर्वकर्माणि' इतिस्मृतेः सर्वकर्मसंन्यासः । ज्ञानमात्राच्च मोक्ष इति।

मैवम् । स्वस्वाश्रमविहितेन कर्मणा ज्ञानस्य समप्राधान्येन समुच्चयात् ज्ञानकर्मणोस्तुल्यत्वेन मुक्त्यर्थत्वाभिधानात् । तथा च भगवद्गीता—

स्वे स्वे कर्मण्यभिरतः सिद्धिं विन्दति मानवः ॥

श्रीविष्णुपुराणे—

तस्मात् तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामते ॥

हारीतः—

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतम् ॥

श्रुतिश्च--"सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण"इति । एतन्मूलकमेव--

परिज्ञानाद्भवेन्मुक्तिरेतदालस्यलक्षणम् ।
कायक्लेशभयाच्चैव कर्म नेच्छन्ति पण्डिताः ॥

न च फलान्तरार्थत्वेन श्रुतस्य कर्मणः फलान्तरार्थत्वमनुपपन्नम् ; तथा वाक्यस्वरसात् ज्ञानतुल्यताप्रतीतेः । तत्तत्फलजनकत्वेऽपि कर्मणां शब्द एव मानम् । एवमन्यत्रापि ।

[1]अथ वा [भवतु वा] आरादुपकारितया अङ्गाङ्गिभावेन समुच्चयः। स च प्रयाजादिवत् अपूर्वद्वारैव।

यत्तु जडभरतोपाख्याने --

न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम्।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च॥

इति, तत् योगिभ्रमसङ्गत्यागार्थं जातिस्मरत्वेन न शिक्षितानीत्येवंपरं वा। तदुक्तम् —

" . . . . ज्ञेज जातिस्मरो द्विजः।
सर्वविज्ञानसंपन्नः सर्वशास्त्रार्थतत्त्ववित्।' इति।

अत्र केचित्—अनुत्पन्नतत्त्वज्ञानस्य ज्ञानार्थिनः तत्प्रतिबन्धकाधर्मनिवृत्तिद्वारा प्रायश्चित्तवदारादुपकारकं कर्म, संनिपत्योपकारकं तु तत्त्वज्ञानम्। उत्पन्नतत्त्वज्ञानस्य तु अन्तरा लब्धवृष्टेः कारीरीसमाप्तिवत् आरब्धाश्रमपरिपालनं लोकसंग्रहार्थम्। [2]यद्यपि लोकसंग्रहो न प्रयोजनम्, सुखदुःखाभावतत्साधनेतरत्वात्। तथाप्यकरणे लोकानां

प्रकाशः

भवतु वेति। न च फलान्तरार्थत्वेनाङ्गत्वानुपपत्तिः। न ह्यतिरिक्तफलत्वेनैवाङ्गत्वक्षतिः। किं तु प्रधानातिरिक्तमुख्योद्देश्यफलवत्त्वेन। अन्यथा विघ्नध्वंसफलकमङ्गलस्य ग्रन्थाङ्गत्वं न स्यादिति भावः।

जातिस्मरत्वेनेति। तत्समये [3]पूर्वकृतं कर्म स्मृत्वा न [4]शिक्षितानीत्यर्थः।

आचार्यमतमाह--अत्रेति। संनिपत्येति। कर्मापेक्षया [5]संनिधायोपकारक

---

1 'भवतु वा' इति व्याख्यातृपाठः
2 यदपि
3 पूर्वकृतमेव कर्म-क-ग
4 शिक्षितवानित्यर्थः-ग
5 संनिपत्योप-क

विगानान्निन्द्यत्वेन यज्ज्ञानं तत्परिहारार्थं तत्कर्मसाध्यदुःखोत्पादनेनाधर्मक्षयार्थञ्चेति ।

तन्न । तत्त्वज्ञानं प्रत्यङ्गत्वपक्षे कर्मणामपूर्वद्वारा जनकत्वम्, दुरितध्वंसकल्पनातो लघुत्वात् । तस्मात् यानि कर्माण्युपनीतमात्रकर्तव्यत्वेन विहितानि सन्ध्योपासनादीनि तानि मोक्षार्थिभिरवश्यं कार्याणि । तत्परित्यागस्य प्रत्यवायहेतुत्वेनाशास्त्रीयत्वात् संकोचे मानाभावात् । निषिद्धानि काम्यानि च बन्धहेतुत्वात् मुक्तिपरिपन्थीनीति त्यज्यन्ते । धनमूलानि च धनत्यागादेव त्यज्यन्ते । सोऽयं "संन्यस्य सर्वकर्माणि' इत्यस्यार्थः । अयमेव हि संन्यासपदार्थः । तथा च गीता—

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।

. . . . . .

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ॥
मोहात्तस्य परित्यागः तामसः परिकीर्तितः ।

इति । तत्त्वज्ञानं धर्मद्वारा मुक्तिसाधनं विहितत्वेन धर्मजनकत्वनियमादिति धर्मस्यैव प्राधान्यम् । स च धर्मो मुक्त्यैव फलेन नाश्यत इति केचित् । तन्न । मिथ्याज्ञाननिवृत्त्या दृष्टद्वारेणैवोपपत्तावदृष्टकल्पनानवकाशात् । अन्यथा भेषजादिष्वपि तथा स्यात् । एवं च तत्रैव विहितत्वस्य व्यभिचारः ।

प्रकाशः

मित्यर्थः । ननु " जनेनावमतो योगी " इत्यादिना न तस्य तत् त्याज्यमित्यरुचेराह — तत्कर्मसाध्येति ।

अपूर्वद्वारेति । प्रायश्चित्ते पाप[1]नाशश्रुतेस्तथात्वमिति भावः । समुच्चयवादी परमतं दूषयित्वा स्वमतमुपसंहरति—तस्मादिति ।

---

1 नाशफलश्रुतेः—ख

अत्र वदन्ति--संसारकारणोच्छेदक्रमेण कार्योच्छेदान्मोक्षः। एवं च तत्त्वज्ञानमात्रादेव मिथ्याज्ञानोच्छेदादपवर्गः। तत्र न तस्य कर्मसहकारित्वम्। मिथ्याज्ञानोन्मूलने कर्मविनाकृतस्यैव तस्य दिङ्मोहादौ हेतुत्वावधारणात्। कर्मणामपवर्गहेतुताश्रुतिश्च तत्त्वज्ञानद्वाराप्युपपद्यते; साक्षात्त्वस्याश्रुतेः। तत्त्वज्ञानवतश्चाधिकारे नित्याकरणेऽपि दोषाभावेन प्रत्यवायाभावोपपत्तेः। अन्यथा भोगार्थं विहितनिषिद्धाचरणेन धर्माधर्मोत्पत्तौ मोक्षाभावप्रसङ्गः।

ननु तत्तत्तीर्थमहास्नानदानकाशीमरणादिकर्मणां तत्त्वज्ञाननैरपेक्ष्येण मुक्तिहेतुत्वं श्रूयते। तत्कथं तत्त्वज्ञानमेव तद्धेतुः। न च तेषां तत्त्वज्ञानमेव व्यापारः। अनुपदं तत्त्वज्ञानानुत्पादात् अदृष्टद्वारा तद्धेतुत्वं वाच्यम्। तथा चापवर्गकारणमेवादृष्टं कल्प्यताम् लाघवात्। न च

प्रकाशः

[1]अत्रेति। [2]नैयायिका इति शेषः। मात्रपदव्यवच्छेद्यं कर्ममात्रमित्याह--तत्रेति। मिथ्या[2]ज्ञानोच्छेद इत्यर्थः। तस्य—तत्त्वज्ञानस्य। कर्मणामिति। 'तं विद्याकर्मणी समन्वारभेते विद्या चैव तपश्चैव' इत्यादिश्रुतिश्चेत्यर्थः। यद्यपि तत्त्वज्ञानहेतुत्वमपि अदृष्टद्वारा। [3]तथा च तद्द्वारा मुक्ति[3]हेतुत्वमेवास्तु। ज्ञानं प्रत्यपि[4] हेतुत्वकल्पने गौरवात्। तथापि "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा" इति श्रुत्या वेदनं प्रत्यपि[5] यज्ञादेर्हेतुत्वसिद्धेः प्रामाणिकं गौरवमिति भावः। विपरीता [6]तु न श्रुतिरित्याह—साक्षात्त्वस्येति। दोषाभावेनेत्युपलक्षणम्। प्रागभावाभावेनेयपि बोध्यम्। अन्यथा प्रतियोग्युत्पत्तेरावश्यकत्वात्।

नन्विति। तथा च तृणारणिमणिन्यायेन मोक्षविशेषे ज्ञानकर्मणोर्हेतुत्वमिति भावः। लाघवादिति। उभयहेतुत्वकल्पने गौरवादित्यर्थः।

---

1 तत्रेति—क
2 मिथ्या-क
3 मुक्ति-क-ख
4 प्रति-क
5 प्रति-क
6 पुनः श्रुतिः-ख

तत्त्वज्ञानप्रतिबन्धकाधर्मनाश एव तेषां व्यापारः । प्रतिबन्धकदुरितध्वंसतोऽपूर्वस्य लघुत्वात् । अथ तत्तत्कर्मणामननुगमात् कथं मुक्तिरनुगता, दुःखध्वंसे प्रकाराभावादिति चेत्—न । गुणनाशे समवाय्यसमवायिनाशविरोधिगुणानां नाशकत्वदर्शनात् । तत्तन्नाशविशेषे तु तत्तत् हेतुरिति चेत्—तर्हि तत्तद्दुःखध्वंसे तत्तत्कर्मणामपि तथात्वमस्तु । तत्रापि तत्त्वज्ञाने तत्प्रतिबन्धकदुरितध्वंसे चाननुगतानामेव तत्तत्कर्मणां जनकत्वम् , मुमुक्षुमुद्दिश्य विहितत्वादनुगतमस्तीति चेत्--

न । ज्ञानकर्मणोर्निरपेक्षसाधनताश्रवणात् व्रीहियववद्विकल्प एव । निरपेक्षैकसाधनावरुद्धेऽपरसाधनान्वयो न विकल्पं विना संभवति, आकाङ्क्षाविरहादिति न्यायात् । साहित्यबोधकं विनैकं प्रत्यनेकस्य हेतुता यत्र शब्देन बोध्यते तत्र विकल्पेनान्वयो यथा व्रीहियवयोरिति व्युत्पत्तेर्वा ।

वस्तुतस्तु दृढभूमिसवासनमिथ्याज्ञानोन्मूलनं विना न मोक्ष इत्युभयसिद्धम् । तादृशमिथ्याज्ञाननाशे चान्वयव्यतिरेकाभ्यां तत्त्वज्ञानकारणत्वमवधारितम् । अतो न तेन विना स इति तत्रापि तत्त्वज्ञानमावश्यकम् ।

यद्यपि मिथ्याज्ञाननाशे विरोधिगुणमात्रस्यैव तद्धेतुत्वम् । तथापि मिथ्याज्ञानप्रागभावासहवृत्तिमिथ्याज्ञानध्वंसस्य तदेकसाध्यत्वम् । "आत्मा ज्ञातव्यः न स पुनरावर्तते' इत्यादिश्रुतेर्मोक्षं प्रति तत्त्वज्ञानस्य हेतुत्वाव-

---

प्रकाशः

संप्रदायमतेन समाधत्ते—ज्ञानकर्मणोरिति । ननु नैरपेक्ष्यमपि न श्रूयत इत्यरुचेराह--साहित्यबोधकमिति । 'क्षौमे वसानौ' इत्यादौ च यत् कर्तव्यं तदनया सहेत्यादि साहित्यबोधकमेवास्ति इति न विकल्प इति भावः ।

ननु 'नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतिः प्रकृतेऽपि साहित्यबोधिकैवेति न विकल्प इत्यरुचेराह--वस्तुतस्त्विति ।

धारणात् । "तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्या तत्त्वज्ञानं विना न मोक्षः, किं तु तस्मिन् सत्येवेति प्रतिपादनाच्च । अन्यथा स्वर्गादौ न शरीरादयः कल्प्येरन् । कर्मणां तत्त्वज्ञानद्वारापि मुक्तिजनकत्वसंभवात् । प्रमाणवतो गौरवं च न दोषाय । कर्मणां [तत्तत्] तत्त्वज्ञानविशेष एव जनकत्वम्, अतो न तत्राननुगमो दोषाय । वाराणसीमरणस्य तत्त्वज्ञानफलजनकत्वमागमादेवावगम्यते । तत्त्वज्ञानाददत्तफलान्येव कर्माणि प्रायश्चित्तादिव विनश्यन्ति, अनन्यथासिद्धशब्दबलात् । न च प्रायश्चित्तस्य दुरितोपत्तिनिमित्तकत्वम् । पापनाशफलश्रवणात् ।

अत एव न ब्रह्महत्यादीनां प्रायश्चित्तदुःखमेव फलम् ; नरक-

प्रकाशः

यद्यपि बाधकं विना सामान्यपरत्वमेव [1]तथाप्युक्तश्रुतेर्विशेषपरत्वेनाप्युपपत्तेर्निस्सन्दिग्धं श्रुत्यन्तरमाह--तमेवेति । तं विदित्वैवेत्यर्थः [1]तदेवाह--नान्य इति । अन्यः--तत्त्वज्ञाननिरपेक्षः । अन्यथेति । तथा च यथा सुखत्वावच्छेदेन तद्धेतुत्व[2]कल्पनात्तत्र शरीरकल्पना, तथा मुक्तित्वावच्छेदेन लाघवात्तद्धेतुत्वकल्पनात् सर्वत्र तत्त्वज्ञानकल्पनापीति भावः । नन्वेवं कर्महेतुतावोधकश्रुतेः का गतिरित्यत आह—कर्मणामिति । एवं च पूर्वोक्तगौरवं निरस्यति — प्रमाणेति । तत्रापीत्यादिप्रतिबन्दीमुद्धरति— तत्तदिति । तृणारणिमणिन्यायादिति भावः । नन्वनादिकर्मराशेः [3]क्षयानुपपत्तौ न मोक्ष इत्याशङ्क्य परमतं दूषयितुमुपन्यस्यति—तत्त्वज्ञानादिति । दृष्टान्तासिद्धिमाशङ्क्य [4]निराकरोति — न चेति ।

ननु निषिद्धकर्मणां नरकफलकत्वाभावात् तदुपपादकतया [5]पापस्यैवाकल्पनात् कुतः

---

1 तथाप्युत्तरश्रुतेर्विशेषपरत्वेन श्रुत्यन्तर—क

2 कल्पना तथा मुक्ति—क

3 प्रत्ययानुत्पत्तौ—क

4 परिहरति—ख

5 पापस्यैवाभावात् —क

फलश्रुतिविरोधात् प्रायश्चित्तविधिवैयर्थ्याच्च दुःखैकफलत्वेन तत्राप्रवृत्तेः । नापि कर्मान्तराधिकार एव फलम् , महापातकातिरिक्तेऽनधिकाराभावात् । अन्यथा यत्किंचित्पापवतोऽकृतप्रायश्चित्तत्वेनानधिकारापत्तेः । प्राणान्तिके तदभावाच्च । श्रूयते हि—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परात्मनि ॥"

इति । स्मृतिरपि —

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन । " इति ।

"नाभुक्तं क्षीयते कर्म' इत्यत्र च प्रायश्चित्तादिस्मृतितः संकोचस्यावश्यकत्वेन शब्दबोधितनाशकानाश्यकर्मपरत्वम्, लाघवात् । न तु तत्तदन्यकर्मपरत्वं, गौरवात् । पापपुण्यक्षयहेतूनां बहुतरत्वात् ज्ञानस्य नाशकत्वं शब्दबोध्यमित्युक्तम् ।

अथ भस्मसात्पदस्य लाक्षणिकत्वेन यथा वह्नेः परंपरया भस्म, तथा ज्ञानात् कर्मक्षय इत्यर्थः । तया च "नाभुक्तं क्षीयते कर्म" इति

प्रकाशः

प्रायश्चित्तस्य तन्नाशकत्वम् । अतः पुनरपि दृष्टान्तासिद्धिरित्यत आह—अत एवेति । वक्ष्यमाणहेतोरित्यर्थः । प्रायश्चित्तेति । नन्वेतदेव कुत इत्यत आह—दुःखेति । प्राणान्तिक इति । तत्र कर्मान्तराभावेन तदधिकारार्थितया अप्रवृत्तेरित्यर्थः । ननु शब्दबलादित्यसिद्धम् , तादृशशब्दाभावादित्यत आह—श्रूयते हीति । हृदयग्रन्थिः—मिथ्याज्ञानवासना । कर्म-अदृष्टम् । [1]तन्निबन्धनं दोषः । कर्माणि—अदृष्टानीत्यर्थः ।

शब्देति । यदि भोगोऽपि शब्दबोधितः तदा तद्भिन्नत्वमपि नाशकविशेषणं बोध्यम् ।

---

1 तन्निबन्धनदोषकर्माणि —क—ख

स्मृतिरुत्सर्गतो भोगेनैव क्षयमाह। अनन्यथासिद्धप्रायश्चित्तविधिना सा बाध्यते। [1]ज्ञाननाश्यत्वं च भोगद्वारापि संभवतीत्यबाधे संभवति (न) बाधकल्पना नेति चेत्—न। कर्मणो भोगनाश्यत्वे ज्ञानस्यानाश्यकत्वात्। न हि भोगस्तत्त्वज्ञानव्यापारः. तथाऽश्रवणात् तेन विनापि कर्मण एव तदुपपत्तेश्च। कर्मणो भोगनाश्यत्वे तत्त्वज्ञानानुपयोगात्।

यत्तु नाभुक्तमिति स्मृतिविरोधेन क्षीयन्त इत्यादिश्रुतेरन्यथावर्णनम्। तन्न। स्मृतेः प्रत्यक्षवेदबाधितत्वेन तद्विरुद्धार्थकवेदाननुमापकत्वात्। वामदेवसौभरिप्रभृतीनां कायव्यूहश्रवणात् तत्त्वज्ञानेन कायव्यूहमुत्पाद्य भोगद्वारा कर्मक्षय इति चेत्—न। तपःप्रभावादेव तत्त्वज्ञानानुत्पादेऽपि कायव्यूहसंभवात्। भोगजननार्थं च कश्चुभिरवश्यं तत्तत्कायनिष्पादनमिति न तत्र तत्त्वज्ञानोपयोगः। यौगपद्यं च कायानां तज्जनककर्मस्वभावात् तपःप्रभावाद्वा। न च ज्ञानं भोगद्वारा कर्मनाशकमित्युक्तम्।

एतेनागमयोः परस्परविरोधादनिर्णये विमतिपदं कर्म भोगनाश्यं

प्रकाशः

कीर्तनादिनापि तन्नाशादाह—उत्सर्गत इति। प्रायश्चित्तेति। प्रायश्चित्त-[1]विधिनेत्यर्थः। तथा इति। तथा च तत्त्वज्ञानवतः कायव्यूहोऽसिद्ध एव। तस्य ज्ञानेनैव कर्मक्षयादिति भावः। यौगपद्यं चेति। प्रलये वृत्तिनिरोधवत् तावत्कर्मणामेकदा वृत्तिलाभसंभवादिति भावः। तप इति। पूर्वं कायव्यूहे हेतुत्वमुक्तम्, इदानीं तु यौगपद्य इत्यपौनरुक्त्यम्।

विमतिपदमिति। एतच्च प्रायश्चित्तादिनाश्यकर्मभागे बाधासिद्धिवारणाय।

---

1 ज्ञानस्य नाशकत्वं 2 विशेषेणेत्यर्थः—क

प्रायश्चित्ताद्यनाश्यत्वे सति कर्मत्वात् भुक्तभुज्यमानकर्मवदित्यनुमानान्निर्णय इत्यपास्तम् । ज्ञानस्य प्रायश्चित्ततुल्यत्वेनाप्रयोजकत्वात् श्रुतिबाधितत्वाच्च । शब्दबोधितनाशकानाश्यत्वस्योपाधित्वाच्च । अकृतप्रधानेन कृतप्रधानेन चाङ्गापूर्वेण व्यभिचाराच्च । तस्य प्रधानयागादिनाश्यत्वात् । न च तस्यापि यागस्येव स्वर्गफलकत्वमिति तन्नाश्यत्वमेव, अधिकृताधिकारेऽपि स्वर्गकामस्याधिकारात् , अन्यथा निष्फलेऽप्रवृत्तेरिति वाच्यम् । स्वर्गफलत्वेऽङ्गत्वविरोधात् । प्रवृत्तिश्च फलवद्यागान्विततया[1] । तदुक्तम्— 'यागे रागादङ्गे वैधी'' इति ।

ननु ''तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ संपत्स्यते कैवल्येन'' इति तेः तावदेवास्योत्पन्नतत्त्वज्ञानस्य चिरं विलम्बो यावन्नोत्पन्नकर्मणो विमोक्षः । अथ संपत्स्यते कैवल्येनेति । अत्र भोगेन क्षपयित्वेति शेषः । न च शेषे मानाभावः । सत्यपि विज्ञाने कर्मावस्थाने क्लृप्तसामर्थ्यस्य भोगस्यैव नाशकत्वेनाक्षेपादिति चेत्—न । तत्त्वज्ञाने सति तत्त्वज्ञानदशायां न मोक्षः, किं तु तदग्रिमक्षण इत्यार्थत्वेनाप्युपपत्तेः ।

प्रकाशः

ज्ञानस्येति । तथा च ज्ञानानाश्यत्वमपि भोगनाश्यत्वे तन्त्रम् । अन्यथा कर्मत्वमात्रस्यैव तन्त्रतया प्रायश्चित्तादिरपि तन्नाशको न स्यादिति भावः । ननु कृतप्रधाने कथं व्यभिचारः, तत्र भोगसंभवेन तन्नाश्यत्वसंभवादित्यत आह—**तस्येति** । याग आदिर्यस्य तदपूर्वं, तथा च [2]प्रधानापूर्वनाश्यत्वादित्यर्थः । तस्य यागशरीरनिष्पादकतया [3]तन्नाश्यत्वमेवेत्याहुः । **अधिकृतेति** । अधिकृतस्याधिकारो यत्र तदधिकृताधिकारमङ्गं तत्रेत्यर्थः । **यागाधितया**— प्रधानापूर्वार्थितया ।

श्रुतिं योजयति -- **तावदेवेति** ।

---

1 यागार्थितयेति व्याख्यातृसंमतः पाठः

2 प्रधानापूर्वस्य सत्त्वादित्यर्थः-क

3 तन्नाश्यकत्वम्-क

यत्तु अकृतप्रधानाङ्गापूर्वाभिप्रायमेतत् ''ज्ञानाग्निः सर्वकर्माणि'' इत्यादि, तेषां कार्याणां नाशकान्तराभावादिति। तन्न। [1]प्रधानार्थितया क्लुप्तानां तदभावे तत्सामग्र्यसिद्धेः, तत्सत्त्वेऽपि सर्वकर्मपदस्य कर्मान्तरपरिग्राहकस्य संकोचे मानाभावात्।

यदपि भस्मसात्करणादिना फलाजनकत्वमुच्यते, तत्त्वज्ञानात् कृतमपि विहितं कर्म न फलायेति। तथा च श्रुतिः ''तद्यथा पुष्करपलाशे नापः श्लिष्यन्ते'' इत्यादि। तदपि न। न हि भस्मसात्करणं क्षयश्चानुत्पत्तिरुच्यते। न च लक्षणा। मुख्ये बाधकाभावादिति।

उच्यते। कर्मणो भोगनाश्यत्वेऽपि ज्ञानस्य कर्मनाशकत्वम्, भोगस्य तत्त्वज्ञानव्यापारत्वात्। न च भोगमात्रस्यैव कर्मनाशे सामर्थ्यात् तत्त्वज्ञानव्यभिचारः। कर्मप्रागभावासहवृत्तिकर्मनाशे युगपत्कर्मभोगे वाव्यभिचारात्।

प्रकाशः

